





Trade Mark
SCALE
Non Com



७०८

शब्दकल्पद्रुम



शब्दकल्पद्रुम
२०८






सन्तमाधोपत्रदंप्रावंदेषं

२०८

शब्दकल्पद्रुम



ॐश्रीगणेशायनमः ॥

शब्दकल्पद्रुमः

अर्थात

एतद्देशस्य समस्त कोषा
शेषशास्त्र संकलिताकारादि
वर्णक्रमविन्यस्तप्राकृतलिंगनाना
र्थ पर्य्याय प्रमाण प्रयोग धातुतदनु
बंधाभिधेय सहितशब्दसमूहप्रसंगोपस्थित वे
दवेदांग वेदांत न्याय पुराणेतिहास संगीत शि
ल्पसूपकारशास्त्र ज्योतिष तंत्राख्यान काव्यालंकार
छंदः प्रभृति नाम लक्षणोदाहरण द्रव्यगुण रोग
निदानौषध स्मृत्युक्तव्यवस्थादि संयुक्तसर्वदेशी
य मतानुसारि संस्कृताभिधानग्रंथः तत्र प्र
थमकांडः १ राजश्रीराधाकांतबाहादुरो
पाधिकेन विरचितः १७७३ त्रिसप्तत्य
धिक सप्तदशशत शकाब्दे कलि
कातानगरे स्वकीययंत्रे श्री
भगीरथवंधुद्वारा मुद्रांकित
श्च ॥ ॥॥

तत्रादौ मंगलाचरण श्लोकाः


योऽद्वैत सच्चिदानंद परंब्रह्मेति कीर्त्तितः उपासकानां कार्य्यार्थं कृ
पया पंचधाभवत् शाक्तिः शिव स्तथा सूर्य्यो गणेशो विष्णुरेवच अ
शेष विघ्ननाशाय भक्तिश्रद्धा समन्वितः साष्टांगं तं प्रणम्यादौ शि
ष्टाचारानुसारतः राजबाहादरोपाधिश्रीराधाकांत देवजः परेषा
मुपकाराय शब्दकल्पद्रुमाभिधं कोषं नव्यक्रमयुतं कृतवान् बहुय
त्नतः

ग्रंथसमाप्तौ मंगलाचरणबीजं ॥

संस्कृतग्रंथाना मेतादृशीरीतिः सर्वत्र प्रचलिता यन्मंगलाचरण
श्लोकानुक्रमणिकादिकं ग्रंथादावेव लेखनीयं भवितु मर्हति किं
त्वस्मिन् कोषे तन्नाचरितं तस्यैतत् कारणं उक्तश्लोकादिरचनप्रा
गेव प्रथमकांडादि मुद्रांकनसमापनमात्रेण तल्लिप्सवो स्वदेश
विदेशीयमहात्मानः पुनः पुनः प्रार्थयित्वा सर्व्वमेव गृहीतवंतः
इदानीं एतत् कोषस्य प्रथमादिकांडे नोपस्थितं तेन देवता एत
न्मंगलाचरणादिरूप मुखबंधनं शेषकांड पुरोवर्त्तिकृतं किन्त्वेत
द्ग्रंथारंभे अथ शब्दकल्पद्रुमो मुद्र्यते इति लिखनेन मंगलवा
चकाथशब्द प्रयोगादेव एतत् कोषस्य मंगलाचरणसिद्धि र्जा
ता तदुक्तं प्राकृततत्त्वे धृतस्मृतौ ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्म
णः पुरा कंठंभित्वा विनिर्यातौ तेन मांगलिका वुभौ ॥

ग्रंथरचनप्रयोजनं

अष्टादशसंख्यकासु प्रान्तीयभाषासु संस्कृतभाषा गीर्वाणवाणी
अतः सर्व्वासां कृष्टा सर्व्वत्रसम्मता सर्व्वजनमान्याच दैवै ऋषिभि
श्च तद्भाषया अष्टादशविद्याः प्रणीताः किंत्वस्मिन् भारतवर्षे
उक्त विद्यासम्बंधि पारिभाषिकशब्दादीनां प्रकाशककोषा नप्रा
प्यंते तेच तत्तद्भाष्यटीकादिभि रेव चरितार्था भवंति किंच म
हामहोपाध्यायैः प्राचीन नवीन कवि कोविदगणैः पद्येन पा
र्याय नानार्थयुक्त बहुविधाभिधानरचना कृता किंतु तत्तद्



ग्रंथीयेकार्थशब्दसंग्रहस्य वर्गास्मरणाभावात् प्रयोजनीय पर्य्यायश
ब्दप्राप्तिः सुदुष्करी एवं अनेकार्थशब्दसंग्रहस्य एकादिषडुत्तरपर्य्या।
न्तकांतादिहांतशब्दनिबंध निखिल श्लोकानांपाठव्यतिरेकेण प्रार्थनीय
नानार्थशब्दनिर्गमोऽत्र तिङ्गमस्त्र विशेषतः तत्तदेकैककोषे समग्रश
ब्दार्थयोर्लाभाभावः इत्यादि दोषमहमालोच्य परोपकाराय पठद
शावधि वर्त्तमानकाल पर्य्यंतं वत्सरत्रयस्य परि श्रमैः धीरवरनिकरसा
हाय्यै रेतद्देशप्राप्यसमस्तकोष वेद वेदांत वेदांगभाष्य व्याकर
ण छन्दो ज्योतिष साहित्य नाटक काव्यालंकार वैद्यक संगीत।
न्याय सांख्य पातंजल वैशेषिक मीमांसा स्मृति पुराण तिहा
स तंत्रागम निगम शिल्प सूपकार नीतिशास्त्र कलाचार्य्य गो
स्वामिग्रंथादिभ्यः शब्दसमूहं संग्रह्य कविकल्पद्रुम नामक धा
तुपाठग्रंथात् धातुनिवहंच संकलय्य सकलशब्द धात्वर्थाना।
मनायासेन लाभार्थं विनापद्येन वर्णव्यवस्थाक्रमेन शब्दकल्प
द्रुमाभिधानमभिनवाभिधानं कृतवान् इमं सप्तकांडात्मक बृह
त् कोषं स्वीयकोषव्ययेन मुद्रांकयित्वा मुद्राव्यतिरेकेण नाना
दिग्देशीय विशिष्टपात्रेभ्यो बंधुवर्गेभ्यो याचकेभ्यश्च दत्तवान्

ग्रंथस्यनामकारणं

एतत् कोषस्य शब्दकल्पद्रुम नामकरण कारण मेतत् स्वर्गीय
कल्पद्रुमसंनिधाने यायत् प्रार्थयते तस्यतत् प्राप्ति र्भवत्येव मतच्छ
तमंत्रीयशब्दकल्पद्रुम समीपेप्राथियाति समीहित शब्दादीनि प्रा।
र्थयत्नेनानितान्यवश्यं प्राप्नुवंति अतः कल्पद्रुमसादृश्य मेव ना
मकारणं प्राचीनसंग्रहकर्त्तृभि रपि स्वकृतग्रंथानां कल्पद्रुम क
ल्पतरु कल्पलता प्रभृतिनामधेयं कृतं तत् सहस्रार्थक कामधे
नु चिंतामण्यादि पुस्तकानि चप्रचलंति एतद्ग्रंथस्य ग्रंथक
र्त्तात् अस्य खंडस्य कांडेतिसंज्ञां कृतवान्

अथग्रंथपरिपाटी

अतः परमहमेतत् कोषस्यानुक्रमं विशेषनियमंच विवृणोमि।

निखिलाभिधानिक शास्त्रिक लौकिक व्यावहारिक साधुशब्दा।
नां धातुगणानांच ऋद्धिनि मानसे तेषामानुपूर्व्विकाकारादि
हकारांत पंचशब्दवर्णानां यथाक्रमं सूची कृत्वा विन्यासमकु
र्वं तत्र प्रथमं स्वरवर्णादिशब्दानां परे हलवर्णादिशब्दानां।
शेषे युक्ताक्षरादिशब्दानांच वर्णक्रमेणैव यथास्थानं प्रथमावि
भक्त्यंतत्वेन संस्थापन मकार्षं पदसाधने येषां मंत्यान्तराणां वि
कारोलोपोवा अभवत् तेवर्णा स्तत्तच्छब्दोपरिविन्यस्ताः अनुस्वा
र विसर्गाणां षोडशस्वरांतर्गतत्वेन तदुभयवदाद्यवर्णयुक्ता।
शब्दान् स्वरवर्णास्थलाभिषिक्तान् चकार तत् पश्चात् प्रत्येक।
शब्दस्य लिंगं प्रत्येकधातो रनुबंधंच निर्णीतवान् येषां धातूना।
मनुबंधो नास्ति तत् स्थाने बिंदुयुक्त मथवा शून्यमास्ते त
दनंतरं सकलशब्दाना मर्थवाचकपदानि प्रथमाविभक्त्यंतत्वे
न एवंसमस्त धात्वर्थवाचकपदानि सप्तमीविभक्त्यंतत्वेन लि।
खितानि प्रत्येकप्रसिद्धशब्दानंतरं तदीय पर्य्यायः देशभाषाश्च
तथा प्रत्येक धात्वर्थानंतरं तट्टीका धातुदीपिकोक्त व्याख्या प
दादीनि विहितानि सर्वशेषे तेषां प्रमाणानि तदभावे तत् प्रयो
गः तद्विरहे तद्युत् पत्तिर्लिखिता ॥

वर्णमालायां चवर्गीयजकारांतस्थयकारौ मूर्द्धन्यणकार दंत्य
नकारौ वर्गीयबकारान्तस्थवकारौ तालव्यशकार मूर्द्धन्यषकार दन्त्य
सकाराःसन्ति एतदखिलवर्णादिशब्दानां धातूनांच प्रभेदं कृत्वासू
चीपूर्वकं यथास्थानं संस्थापनं कृतवान् वंगदेशे उक्तवर्णानामु
च्चारणभेदाभावः विशेषतो वकारद्वयस्याकारोच्चारणयो र्भेदो।
नास्तिपश्चिमादिदेशे वर्त्तते किंतु मुग्धबोधटीकायां दुर्गादासवि
द्यावागीशधृता वकारभेदिकैकप्राचीनकारिकास्ति सा यथा।
उष्टौयत्र विद्येते यो वः प्रत्यासंधिजः अन्तस्थं तं विजानीयात्
दन्त्यो वर्ग्य उच्यते एतत् कारिकया सकलवकारप्रभेदो न भवति।

इति हेतो रहं धातूनां शब्दाकरत्वादोऽस्मदस्तवकारादिधातुद्वारा प्रद
र्शनं कृत्वा वक्रप्रयत्ने वकारद्वयभेदं प्रकाशितवान् रेफा
युक्तवर्णेन रचणेन परं शब्दसूचीमध्ये विन्यस्तवान् पूर्वेन
नकोषकारववर्गैः स्वस्वकोषे धातुसंचयो न कृतः शब्दमात्रसं
ग्रहः कृतः किन्तु शब्दाना मत्र पतिस्थाने धातुः अत्र एवा
हं सर्वोत्तमबोपदेवीयधातुपाठकविकल्पद्रुमात् १७५४ चैतः
पंचाशदधिक सप्तदशशतसंख्यक धातूनां संकलनं कृत्वा प
तत् कोषांतर्गतान् कृतवान् तत्र १३२ अकारांतधातवः २४
आकारांतधातवः १३ ऊकारांतधातवः २५ ईकारांतधातवः १९
धातैं ऋकारांतवः ९ एकारांतधातवः २५ ऐकारांतधातवः ५ ओ
कारांतधातवः ५९ ककारांतधातवः २१ खकारांतधातवः १७
गकारांतधातवः ७२ ङकारांतधातवः ५० चकारांतधातवः १९
छकारांतधातवः ७२ जकारांतधातवः ३ झकारांतधातवः ७१
टकारांतधातवः २३ ठकारांतधातवः ७८ डकारांतधातवः १
ढकारांतधातवः ५० णकारांतधातवः ३१ तकारांतधातवः २८
थकारांतधातवः ७९ दकारांतधातवः ३७ धकारांतधातवः २८
नकारांतधातवः ४४ पकारांतधातवः १५ फकारांतधातवः ४५
बकारांतधातवः ३९ भकारांतधातवः ३३ मकारांतधातवः ३१
यकारांतधातवः ४२ रकारांतधातवः ९३ लकारांतधातवः
८८ वकारांतधातवः ३९ तालव्यशकारांतधातवः ११९ मूर्द्धन्य
षकारांतधातवः ९४ दंत्यसकारांतधातवः ५० हकारांतधातवः ४२ क्ष
त्रधातवः संति एषां मध्ये संख्याया एक इकारांतधातुरेवमेकोल
कारांत धातुर्नास्ति सोत्रधातूनां नियतप्रयोगाभावं एतत् स
मुदायधातुगणभेदे विभक्ता भूतस्तस्माद्धेतो धातुपाठस्य गणसं
ज्ञा अभवत् तन्मध्ये प्रसिद्ध गणा दशभ्वादितगणाः अनेके विद्यंते य
था भ्वाद्यदादी जुहोत्यादि दिवादिः स्वादिरेव च तुदादिश्च रुधादिश्च।

तत्र भ्वादिचुरादयः इति दुर्गादासविद्यावागीश कृत कविकल्पद्रुमटीका
धातुदीपिका उक्तगणे बोपदेवविप्रेण अकाराद्यादि धातुपाठे क्रमेण
अकारांतादिधातुसकलं कथितवान् किंत्वहमेतत् क्रमानुगमनमकृ
त्वा निजकोषरीत्यनुसारेण शब्दसूचीमध्ये धातुगणान् लिखित
प्रतिपत्रस्य वान् ॥ एतत् पुस्तकस्य प्रत्येकपृष्ठमध्यस्थाने शुभ्ररेखांप्रदाने
प्राग नद्विभागं कृत्वाहं द्वये शब्दादिर्लिखितः तस्यांतिमशब्दादेर्वर्ण अत
रपर्यंतं उक्तभागद्वयोपरिविन्यस्त मभवत् तद्दृष्टिमात्रेण यदतरप
र्यंतशब्दस्तत् दृष्टाकृष्टो भूतस्तद्बोधो भविष्यति तेनेष्टशब्दाना मना
यासेन लाभो भविता ॥ पुंलिंगस्य संकेतः पुं स्त्रीलिंगस्य संक्षेपः
स्त्री क्लीबलिंगस्यचिह्नं क्ली वाच्यलिंगस्य अर्थात् त्रिलिंगस्य लक्ष त्रि
एवमव्ययशब्दस्यैकदेशस्य अ इत्यक्षरस्य ग्रहणं कृतं ॥
यस्मिन्स्थले एकशब्दघटकीभूत वक्रवर्णाः पंक्तिद्वये पतितास्त
ज्ज्ञापनार्थं तत्र प्रथमपंक्तिशेषे एकाहसमरेखा ।-। प्रदत्ताभू
ता ॥ ॥ एकार्थशब्दस्यान्तरे एवं प्रमाणस्य पूर्वं एका विषमरेखा
प्रदत्ता भिन्नार्थकशब्दस्य एवं प्रमाणस्य परं विषमरेखाद्वयं विन्यस्तं
प्रथमकांडे क्वचिदस्य व्यतिक्रमो जातः ॥

समानार्थक द्वित्र्यादिशब्देष्वेक
स्थले उपदितेषु तदुत्तरं तज्ज्ञापकं एवंप्रकार वेष्टनचिह्नं ॥ ॥

विशेषवृत्तान्त समापनात् परं विशेषणशब्दावस्थात् पूर्वं च एष्याका
रचिह्नं कृतं एवं विस्तारितविषयांतर्गत प्रकरणभेदस्थलेष्व
ध्याकारेणांकितं ॥

द्र येषां प्रसिद्धशब्दानां मुत्तरं तत् पर्यायशब्दा लिखिता स्तत् संख्यान
मंकपातैः कृतः तत्रोक्त प्रसिद्धशब्दमेकत्वेन गणयित्वा तत् पर्या
येष्वादिसंख्यांकाः स्थापिताः

पूर्वोदित चैतः पंचाशदधिकसप्तद
शशतधातूनां षट्चत्वारिंशदङ्कवैधवर्णानां फलानि लिख्य
न्ते ॥ ॥ ॥ ॥ ॥

अः अनुबंधेषु मध्ये अकारः स्वोच्चारणार्थः यथा यक्क नक्क क नाशने इति ॥

आः निष्ठाभावादिकर्मणिवेट् आकारेतो धातो भावे आदिकर्मणि च विहितायानिष्ठाया वा इट् इत्यर्थः यथा ञिमिदा स्नेहे भा वादिष्ठेवेति मिन्नं मेदितं तेन प्रमिन्नः प्रमेदितः सः ॥ ॥ भावादिकर्मभ्या मन्यत्र निष्ठाया न इम् इत्यर्थः यथा आ दित इतिमिन्नः मिन्नवान् ॥

इः नन्दवान् वदिङ् स्तुत्यभिवादयोः अतएवेदितो नुम् वंद्य ॥ नेविस्तुः ॥

इर् वा अङ्वान् च्युतिर् क्षरणे इरितस्तुरेति अच्युतत् अच्यो तीत् ॥

ईः अनिड्निष्टः दीपीङ् दृ दीपन नेमडीस्थीति दीप्तः दी प्तवान् ॥

उः क्त्वावेट् चमु अदने उ ञ्किमुदित इम् इति चमित्वा चांत्वा

ऊः वेट्कः यस्य सामान्यविधिना इम् विहितः ऊदितः परस्य तस्य वा इम् इत्यर्थः षिधू शिवे शास्त्रे वेमूदिदिति असेधीत्। असैत् सीत् ॥

ऋः चङ्गह्रस्वः चङि णौ परे अङि परे अह्रस्वः ह्रस्वाभाववान्। यथा टौकृङ् गत्यां अटुटुङस्य इत्यत्र ऋदिदर्जनात् अडु टौकत् ॥

ॠः वा चङि अह्रस्वः इत्यनुवर्त्तते कणद्र आत्तस्वरे भ्राज भ्रासेति ॥ अचीकणत् अचकाणत् येषां समममस्वरानुबंधः केषित्तु प अक्षते केषित्र पठ्यते तेषां ह्रस्वविकल्पनार्थो यमनुबंधः ॥

लृः अङ्वान् श्रोगमृ गत्यां शास्त्रलृदितः पुषादेरिति अगमत्

लॄः सिचि अह्रस्विः सिचि सां विहितसो एकदह्रस्वोऽपि ह्रसा ॥ दे: सेम इत्यत्र एदिदर्जनात् अकटीत्

एः यजादिः स्यात् यजे ञो देवार्चने व्यथयदेति ञिः इयाज्ञ ग्रहस्वपाद्यो रिति इज्यात् ॥

ओः निष्ठातनः निष्ठाया स्तो निष्ठातः निष्ठानो नोयस्मात् सनि ष्ठातनः रुजो भंगे भंगे स्वाद्योदिदिति रुग्णः रुग्णवान् ॥

औः अनिट् औख्र गत्यां वसोरस्येत्यत्र औदिदर्जनात् गन्ता

कः चुरादिः गणात् कसंख्याने चुभ्यो णिचेति गणयति ॥

किः चुरादिर्वा पक्षे गणान्तर नियमाभावात् भ्वादि रित्यर्थः युजकि संयमे योजयति योजति यद्यपि चुरादिभ्यो णिचि कि ॥ ल्यते तथाप्यन्येषा मत्तरोधादिदमुक्तं अन्येषांमते तच्च रादिभ्यो णिचित्यः तत्रापि युजप्रभृतिभ्यो विति स्मर्मते ॥ ॥ न चुभ्योणिचेत्यत्र वाशब्दस्य व्यवस्थावाचित्वात् चुरादिभ्यो णिर्नित्यः अत्र युजप्रभृतिभ्यो वेति ॥

गः क्र्यादिः डु क्री ञ् द्रव्यपर्यये दिवसवदेति क्रीणाति

गिः प्वादिरपि अपिशब्दात् क्र्यादिश्च पूञ्‌ पवने शोधे श्नादेः ॥ ख इतिह्रस्वः पुनाति अपूः सल्वादिः पूर्ववर्जितः सम्वादि ल्वादिश्चस्यात् लूञ्‌ छिदि लुनाति स्वाद्योदिदिति लूनः लूनवान् कॄगॄज्याप्राद्या ल्वादेरिति लूनिः ॥

घः रुदादिः लघिर रुद रोदे रुदाद्यो ह्रस्वस्येम इति रोदिति रुदादाद्यस्तोति ईम् अरोदीत् ॥ त्य

ङः तङ्वान् कर्त्तरि कर्त्तरि वाच्ये तङ्वान् अतिपदी पथड् वृद्धौ नवशः पमे इति पथते ॥

जः ज्वलाद्यः ज्वल ज्ञा चलनयोः हूनीभूज्वलाद्योति णः ज्वालः पक्षे पचादित्वादन् ज्वलः एवं कुच ज्वराथ पक्का कौटिल्य लेखने हूनीभूज्वलाद्योति णः कोचः पक्षे कुशहत्ता मीति ॥

[illegible] कः कुचः ॥

झः ज्वलाद्याः इतिकेचित् ॥

ञः आत्मने आत्मने आत्मार्थे फलवति कर्त्तर्यात्मनेपदं अफ लवति परस्मैपद मितिशेषः यजे ञो देवार्च्चायां यजते ॥ यज्वमानः यज्वति याजकः चुरादेस्तु स्वार्थे विहित ञे ञकारेण णिचोपि उभयपदं नस्यात् अन्यथा स्वम अकवितर्के ॥ ॥

इत्यादे र्जातु वंधो व्यर्थः स्यात् ॥
ञिः अयक्तः अय वर्त्तमाने क्तो यस्मात् स अयक्तः ञि इ स्या
नेत्रावैच्छार्थे जीच्छीलादेरिति स्थितोविस्मितिष्टतीत्यर्थः ॥ ॥
टुः सार्थुः टुडु वेप चलने द्वितोऽथु रिति वेपथुः ॥
ठः फणादिः इति केचित् ॥
डुः त्रिमप्रुतः कृञ दड् कृतौ ड्वितस्त्रिजे इति कृत्रिमं ॥
णः फणादिः फण णनि स्लेदे त्र फल भजेति फेणतुः पफणतुः
फेणिथ पफणिथ ॥
तः अदन्तः अन्तानां पृथग्वर्ग विधानेनैवान्ताने सिद्धे तान्तु ॥ ॥
वंधोऽनभ्यासाना मंकादिषु कान्तत्वादि भ्रमनिरासार्थः ॥ ॥
दः तनादिः तनडुञ विस्तृतौ तनयः ऊविति तनोति सेलं।
कू तथासो रिति अतन अतनिष्ट अतथाः अतनिष्ठः वन
तनाद्यनिमा मिति प्रतत्य ॥
धः रुधादिकः रुधिर्यो ञिञ आवृतौ दिवस्तु देति रुणद्धि ॥
नः स्वादिः षुञ्ञसंधा क्लेद पीड मन्दादिवस्तुदेति सुनोति ॥
पः मचादिः मुञ्चु शप जो मोक्षे तुणरधो मुचा मिति मुंच ति॥
भंः श्रामादिः श्रामु खिये श्रामे यन्ये श्रामादीति श्राम्यति ॥
मः चटादिः निविन्नमो दीर्घोवा दीर्घो दीर्घवान् चट भ्रम उ चे -
ष्टे जीन्नमोस्तु चेस्त्रेति अचटिशचादि चटं चटं चाटं चाटं ॥
निविह्रस्वः मोऽनुवर्त्तते निवि जो ह्रस्वं ह्रस्ववान् चटादि ॥॥
जनीति चटयति ॥
गतो
सिः वा निविह्रस्व इत्यनुवर्त्तते फण मिण वा सम यम फणे ॥ ॥
तिफणयति फाणयति ॥
यः दिवादयः दिवु जिगीषेच्छादौ दिवस्तु देति दीव्यति ॥
रः वैदिकः वेदेष्वेव प्रयुज्यन्ते नतु भाषाया मित्यर्थः गालि ॥
स्लुतो जन्मनि जगति ॥
लः अदादिकः अद्धी भक्ले लुगद्योऽयः अत्ति ॥
लिः क्रादिः क्रादे रदोयन्न गणत्वेन ख्यातत्वाददादित्वस्य चकारन्वंधो

नहूनतः अथवा लः स्वपादिषु लि क्रादि रित्येकं वाक्यं ॥ ॥
लुलि एतदुभयानुवंधो धातूक्रमात् स्वपादि क्रादी स्तः चकार
स्याभयत्र संवंधाददादी चेत्यर्थः क्रादिः पृथक गण इत्येके
अतएव पठन्निच क्राया दादौ जहोत्यादि दिवादिः स्वादि रे
वच तुदादिषु रुधादिषु तन क्र्यादि चुरादयः इति ऊ लि
होमेऽदने क्रादौ रेद्धिः जहोति ॥
लः स्वपादिषु चकारादादिषु स्वमने स्वपादेः प्रयोजनं ॥
नास्ति हरि दूतीत्यादौ स्वपादित्वादजादौ सार्वधात्वके ॥
दा आद्युत्वत्व मिति वोपदेवः ॥
वः वृतादिः वृत उ वर्त्तु वर्त्तने वृद्भ्योनेस पेरति तेनैव प-
रस्मैपदे वर्त्स्यति विवृत्सति आत्मने पदे तु वर्ति ष्य
ते विवर्त्तिषते अन्यत्र विवर्त्तिषा विवृत्सा ॥
शः तुदादिकः तुदौ ञ पाव्यथे दिवस्तुदेति तुदति ॥ ॥
शिः कुटादिषु चकारात् तुदादिषु कुटो तुञो ञ्गिति इति निय C
मात् कुट शि कौटिल्ये इत्यादीनां अकुटीत् इत्यादौ न
गुणः णूषित्त्वेन इत्यादीनां अनुवीदित्यादिषु न वृद्धिः ॥
अगुणत्वानुवृत्त ॥
ष कृदडू वान् आख्यातिकस्याडे प्राप्त्यर्थः कृदिति विशेषणं
स्वमते तूभयत्रऊ एव तु जौ शाश्वपाको भीषिचिन्तीति वा ॥ प
दः जल्यान्ति [illegible] जलादीति द्विसं
ज्ञायां शत्रन्तस्य त्रिदचोऽद्वेरिति नतु णा जलत् क्षीरे जल
प्राप्तो द्वेः पान्नेण इति जलति जलतीति आख्याति के
ऽनोऽन्नोद्वेरिति जलति अनुस्सिद्धेरिति अजल्लः इति
धातुदीपिकायां अनुवंध फलनिरूपणं ॥

आदिकोषविवरणं ॥

सर्वेषां कोषाणां मादि अग्नि पुराणोक्ताभिधानं तत्रादौ स्वर्ग
पातालादिवर्गः ततोऽव्ययवर्गः ततो नानार्थवर्गः ततो भू
पुराद्रि वनौषधि सिंहादिवर्गः ततो नृब्रह्मक्षत्र विट् शूद्रवर्गः ॥

शेषे सामान्यानि नामलिंगानि सन्तीति मया दृष्टं अमरसिंहेन उत्पलिनीप्रभृतीनामभिधानस्य कस्यचित् कस्यचित् वर्गस्य व्यतिक्रमं कृत्वा तत्रादित सामान्यनामलिंगानां विशेष्यनिघ्नवर्ग संकीर्णवर्गाविति संज्ञां स्थापयित्वा अन्ते लिंगादिसंग्रहवर्गस्य योगं कृत्वा स्वीयकोषं रचितवान् एवं जटाधरोऽपि अमरकोषस्यानुकरणं कृतवान् इति विरलप्रचारः ॥१॥

प्राप्तकोषादिनामानि ॥

अत्राभिधाने मत्प्राप्त यद्यत् कोषादितः शब्दादयं संगृहीतास्तेषां संज्ञाः पश्चाल्लिख्यन्ते ॥

अप्राप्तकोषनामानि ।

एतद्भिन्नानेकप्राचीनाभिधानानि संति यद्यपि तानि मया अप्राप्तानि तथापि तेषां मध्ये बहुकोषाणां प्रयोगप्रमाणानि अमरटीका धृतानि आसादितानि एवं विश्वमेदिनीकोषे तत्तत्सकलाभिधानानां शब्दाः समागताः उक्तकोषद्वयशब्दानां शब्दकल्पद्रुमाभ्यन्तरितत्वेन वक्ष्यमाणा समस्त प्राचीन कोषाणां शब्दा एतत्कोषान्तर्गता भूताः ॥

विश्वधृतप्राचीनकोषाः

भोगीन्द्र	१	विश्वरूप	६
कात्यायन	२	मंगल	७
साहसांक	३	शुभांक	८
वाचस्पति	४	वोपालित	९
व्याडि	५	भागुरि रचितकोषाः .	१०

मेदिनीधृतप्राचीनकोषाः

उत्पलिनी	१	संसारावर्त्तः	३
शब्दार्णवः	२	नाममालाख्यः	४

वररुचि	५	वाभट	१४
शाश्वत	६	माधव	१५
रन्तिदेव	७	धर्म्म	१६
रत्नापरनामहर	८	तारपाल	१७
गोवर्द्धन	९	वामन	१८
रभसपाल	१०	चंद्र	१९
रुद्र	११	विक्रमादित्य	२०
अमरदत्त	१२	गोमिरचितकोषाः	२१
गंगाधर	१३	पाणिनि पदानुशासनेच	२२

एतदन्येबलहड्डप्रभृति कृतकोषाः संति ॥

लब्धालब्धामरकोषटीकानामानि ।

अमरकोषस्यभृशप्रामाणिकत्वात् पादकस्य तस्मात् बहुतरटीकाकारैस्तस्य नानाविधा टीका कृता तन्मध्येकतिपयलब्धटीकानांप्रमाणानिशब्दकल्पद्रुमे दत्तानि किन्तत् समुदायटीकाकृन्नामानि टीकानामधेयानिचाहं व्यक्तीकरोमि ॥

क्षीरस्वामी	१	सर्वानन्दः	१३
सुभूतिः	२	अभिनन्दः	१४
हट्टचन्द्रः	३	मल्लिनाथः	१५
कलिंगः	४	रायमुकुटमणिः	१६
कोकटः	५	नीलकंठः	१७
सर्वधरः	६	अरुणः	१८
राजदेवः	७	भगीरथः	१९
गोवर्द्धनः	८	जयादित्यः	२०
द्राविडः	९	कोलाहलाचार्य्यः	२१
भोजराजः	१०	शाबरस्वामी	२२
माधवी	११	रामतर्कवागीशः	२३
मधुमाधवी	१२	नयनानन्दः	२४

विद्याविनोदः	२५	मथुरेशविद्यालंकारकृतासार	
रघुनाथचक्रवर्त्ती	२६	सुंदरी	३२
व्याख्यामृतः	२७	नारायणचक्रवर्त्तिकृता पदार्थ	
टीकासर्वस्वः	२८	कौमुदी	३३
संदेहभंजिका	२९	रमानाथविद्यावाचस्पतिकृत	
रामाश्रमापरनामभानुदीक्षित		त्रिकांडविवेकः	३४
कृताव्याख्यासुधीः	३०	भरतमल्लिककृता मुग्धबोधस	
अच्युतोपाध्यायकृत व्याख्याप्र		ताटीका	३५
दीपः	३१	एतद्भिन्ना अपि टीका वर्त्तन्ते ॥	

अत्रागतविषयकृत्स्नशब्दसिंधुस्तत्त्वंच विज्ञापयामि ॥

कोषगणातिरिक्त नानाशास्त्रोक्त शब्द प्रमाण प्रयोगोपाख्यानादीनि चतुर्वैदिक षाड्दर्शनिक मत विवरण पदार्थ कर्म्मोपासनाज्ञानकांड ब्रह्मनिरूपण वेदांगशास्त्रादीनि शाब्दिककाव्यालंकारिकछांदसिक सूत्रवृत्तिमात्रा नाम लक्षणोदाहरण चित्रकाव्यनवरसरचितंधादयः श्रौतस्मार्त्तयज्ञमलमासादिलक्षण दायभागशौचसंस्कारप्रायश्चित्तोद्वाहतिथिकृत्यजन्माष्टमी दुर्गोत्सवाष्टादशविवादपदचतुष्पादव्यवहारैकादश्युपवासनिर्णय तडागभवनवृषोत्सर्ग व्रतप्रतिष्ठा परीक्षा ज्योतिःशुभाशुभदिनादिवास्तुयागदीक्षाह्निकाचारमासकृत्यपुरुषोत्तममाहात्म्यश्राद्धशूद्रकृत्य कर्मविपाक द्वादशयात्राधिकरणदत्तकव्यवस्थादयः पौराणिकतान्त्रिक वर्णतत्त्व षट्कर्मस्नान तर्पणपूजामुद्रा मंत्रयंत्रजप होमबलिध्यान स्तव कवच माहात्म्यभुवन स्वर्गनरकदेवतादानवतीर्थावतारनदनदी देशभेद पीठ पर्वत वृक्षराजनीतिवर्णाश्रमधर्म्मवर्णसंकरद्रव्य शुद्धि महादाननिधिरत्नायुत पंक्ति सृष्टिप्रलयदुर्गपुरमंदिर श्रीमूर्त्तिनिर्म्माणप्रमाणादीनि ज्योतिषिकसैद्धान्तिकवार तिथि नक्षत्र योग करण संक्रान्ति मासर्त्तु पक्षवर्षायन ज्ञानफलाकालग्रहण नष्टचंद्र धूमकेतु स्त्रीपुरुषादिशुभाशुभलक्षण शाकुन स्वरोदयगणितांकक्षेत्रव्यवहारराशिचक्रभूगोल खगो

लङ्गोल वर्णनादीनि आयुर्वेदीय जन्मक्रम शारीरस्थान रोग
निदान पूर्वरूप संप्राप्त्युपशयचिकित्सौषध द्रव्यगुण पाचन
जारण मारण पथ्यापथ्यनाडी मूत्र जिह्वापरीक्षा पंचकर्म
षट्स्रोत् पन्याख्यानादयः गान्धर्ववेदीय नृत्यगीतवाद्य स्वरता
ललयतान मान ग्राम श्रुति मूर्छना राग रागिणी तत् पुत्रा
य तेहार्य्यागानसमभ्रुवक गमक नायक नायिका निरूपणादीनि
युक्तिकल्पतरु ग्रन्थीय नीति हन्द्वनगरी वास्तु राजगृह विशेषणा
मान्यामनोपकरणालंकारास्त्रयात्रायुक्तयः तथा चतुष्पद द्विपद
निष्पदयानोद्देशाः पत्रःकौमुदीय पत्रप्रमाण भंग रचन लेख
न तेचन पठन चिह्नकोणच्छेदन पदन्यास शीर्षविन्यास प्र
शंसिप्रकरणादीनि कुलाचार्य्यादि श्रोत्रिय कुलीन मौलिक गो
ष्ठीपतिनिर्णयादीनि च शब्दकल्पद्रुमस्य सप्तकांड समागतानि
यान्यवशिष्टानि तानि परिशिष्टे प्रवक्ष्यामि तत्तद्ग्रन्थनामानि
बाहुल्यभिया नोक्तानि तथापि शब्दसमुद्रस्य पारगमनं दुष्क
रतरं तदुक्तं कलाप मुग्धबोध टीकाधृत श्लोके ॥ ॥

आहंच भाष्यकारस्तु कुशाग्रीय धियावुभो ।
नैवशब्दाम्बुधेः पारंकिमन्येजडबुद्धयः ॥ ॥

परिशिष्टकरणकारणं ।

अस्मिन् सप्तकांडात्मक शब्दकल्पद्रुम पुस्तके ये शब्दार्थ प्रमाणप्र
योगादयः एवं प्राप्त्यभावेन नसंगृहीताः अथवा भ्रमवशात् पति
ताः एवं यस्य यस्य रोगस्य निदानमात्रं लिखितं तत्तद्दोषधानि
न लिखितानि एवं येषां शब्दानां अमरातिरिक्त कोषोक्त पर्य्याय
शब्दसंकलनं नकृतं एवं टीकान्तर तकारादि वर्णयुक्त क
तिपय शब्दानां मुद्रांकक प्रमादेन स्खलनं जातं एवं आका
शयादि वर्णवकारादि पर्य्यन्त धातूनां तत्तट्टीकाधृत पदोदाहर
णादयः पुरा नलिखिताः एतत् सर्वं मवशिष्टं परिशिष्टमध्ये लिपि
वद्धीकरिष्यामि अतः परमेतत् परिशिष्टीय पुनरुक्त शब्दादीन् प्रा

गुदित सप्तकांडीय शब्दसूचीमध्ये यथास्थानं स्थापयित्वा ग्रन्थ
समाप्तौ मंगलाचरणबीजं परिशिष्टकरणकारणंच दत्वा प
तत्पुस्तकबंधनं प्रथमकांडस्य पूर्वं योजयित्वा पुनर्मुद्रांकने कृ
ते एष कोषः सुसंपूर्णो भविष्यति किंच पश्चिमदेशीय लोका
नां महोपकाराय देवनागराक्षरेण एतत् कोष मुद्रांकनार्थं
पाश्चात्या मद्बन्धुवर्गा ममान्तिके वहुशः प्रार्थयंते किंन्तु तत् प्रा
र्थनापूरणे मदीयायुषोऽवकुलतायां संदिहानो निवृत्तोस्मि य
द्यपि कश्चित् विपश्चित् किंवा विषयी स्वीयलाभार्थं मत् कृ
तैतद्ग्रंथाधिकारं यथारीति गृहीत्वा अस्मिन् कर्मणि प्रवर्त्ते
त तत्र ममापत्ति नास्तीति ॥

शाकेवह्नि समुद्रशैल धरणी मानेऽरुणे कर्कटे याते स्वामि
मिताहतः परसमी मत् शब्दकल्पद्रुमः कांडैः सप्तभिरंचि
तो भगवतोऽनुक्रोशतः पूर्णतां प्राप्तो दूषणमस्ति किंचि
दिह चेत् तत् क्षम्यतां साधुभिः ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सञ्ज गतौ इति कविकल्पद्रुमः
असस्राव इति दुर्गादासः
सृ गतौ पैश्वर्ये प्रसवे
इति कविकल्पद्रुमः सव ति
इति दुर्गादासः ॥
सव्य पूजा निर्भरे इत्य
मरः अवमतिः कच्छे
समृद्धिः इति मेदिनी अना
यासः इति भरतैकार्थे सं
ग्रहः उपसर्गविशेषः यथा
सूज्ञानायासाति शोषेषु इति
मुग्धबोधटीकायां दुर्गादासः
सप्तम्यावृ वचनविभक्तिः इति
व्याकरणं ॥
सकंटका स्त्री हृतंभमारी इति
राजनिर्घंटः ॥
सकंडुः पुं काण्डुरोगः इति
शब्दरत्नावली सकंडुकशोरुः इति रा
निर्घंटः सकन्दकः पुं पलाण्डुः इति
मरः वाराहीकन्दः धरणी ॥
कन्दः इति राजनिर्घंटः ॥।
सकन्दी पुं मूरणः इति राज
निर्घंटः ॥
सकन्यकः त्रि शोभनाकन्याय
स इति मुग्धबोधव्याकरणं ॥

सकन्या स्त्री शार्यातिराजकन्या ।
सा तु च्यवनर्षिपत्नी यथा
शार्यातिर्मानवो राजा ब्रह्मिष्ठः
संबभूव ह सकन्यानाम तस्या
सीत् कन्या कमललोचना स
कन्या च्यवनं प्राप्य पतिं पर
मकोपनं प्रीणयामास चित्र
ज्ञा अप्रमत्तानुवृत्तिभिः इति
श्रीभागवते ९ स्कंधे ३ अध्यायः
शोभनाकन्या च ॥
सकन्याकः त्रि सकन्यकः इति
मुग्धबोधव्याकरणं ॥
सकरं त्रि सखकरः अक्लेश।
साध्यः यथा क्रियमाणन्तु यत
कर्म्म स्वयमेव प्रसिध्यति सक
रैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्ते।
ति तद्विदुः इति मुग्धबोधव्या
करणं ॥ ॥
सकरा स्त्री सुशीलागौः इत्य
मरः ॥
सकर्णकः पुं हस्तिकन्दः इति
राजनिर्घंटः सन्दरकर्णयुक्ते त्रि
सकर्णिका स्त्री मूषीकर्णी इति
शब्दरत्नावली ॥
सकर्णी स्त्री इन्द्रवारुणी इति
राजनिर्घंटः ॥
सकर्म्मा पुं विश्वकर्म्मादि सवर्वि

शतियोगांतर्गतसप्तमयोगः
तत्रजातफलं परोपकारी ।
कुशलः कलासु हर्षेण युक्तो
नितरां यशस्वी प्रसूतिकाले ।
यदि चेत् सुकर्मा नरः सुकर्मा
भवति प्रसिद्धः इति कोष्ठी ॥
प्रदीपः विश्वकर्मा इति
मेदिनी ॥
सुकर्मा त्रि शोभनकर्मशी
लः सत्क्रियः इति हेमचंद्रः ॥
सकलः त्रि दातृभोक्तृव्यक्तिः
इत्यमरः यएक एव ददाते ॥
भुंक्ते च तत्र विख्यातत्वात् सुष्ठु
अतिशयेन वा कल्यते शब्द्यते ॥
ते वा असौ सकलः इति
भरतः ॥
सुकाण्डः पुं कारवेल्लः इति
राजनिर्घण्टः सुन्दरकाण्डयुक्त
हृतादिश्च ॥ ॥
सुकाण्डिका स्त्री काण्डीरलता
इति राजनिर्घण्टः ॥
सुकाण्डी पुं भ्रमरः इति राज
निर्घण्टः सुंदरकाण्डयुक्तश्च
सुकामा स्त्री त्रायमाणा इति
राजनिर्घण्टः शोभनकामः ॥
युक्ताच ॥
सुकालुका स्त्री डोडीक्षुपः इति

राजनिर्घण्टः ॥
सुकाष्ठकं क्ली देवकाष्ठं इति
राजनिर्घण्टः सुंदरदारुच ॥ ॥
सुकाष्ठा स्त्री कट्वीकाष्ठकदली
इति राजनिर्घण्टः ॥
सुकुंदकः पुं पलाण्डु इति ।
शब्दरत्नावली ॥
सुकुंदनः पुं वर्वरः इति राज
निर्घण्टः ॥
सुकुमारः त्रि कोमलः इत्य ।
मरः उत्तमबालकश्च ॥
सुकुमारः पुं पुण्ड्रः इति
मेदिनी वनचम्पकः लवः
श्यामाकः इति राजनिर्घण्टः ॥
दैत्यविशेषः इति केचित् ॥
सुकुमारकं क्ली तमालपत्रं ॥
इति राजनिर्घण्टः ॥
सुकुमारकः पुं शालिः इति
राजनिर्घण्टः सुंदरबालकः ॥
यथा सिंहप्रसेनमवधीत् सिं
होजाम्बवता हतः सुकुमारक
मा रोदीस्तव ह्येष स्यमन्तकः ॥
इति तिथ्यादितत्त्वं ॥
सुकुमारा स्त्री जाती नवमा
लिका कदली पृक्का मा
लती इति राजनिर्घण्टः ॥ ॥
सुकुमारी स्त्री नवमालिका इति

राजनिर्घण्टः ॥
सुकृत् त्रि पुण्यवान् इति जटा
धरः धार्मिकः इति त्रिकाण्ड
शेषः ॥
सुकृतं क्ली पुण्यं इत्यमरः ॥
शुभं सुविहिते त्रि इति
मेदिनी तन्मनुष्यैः सह ग
च्छति यथा सुकृतं दुष्कृतं
लोके गच्छन्तमनुगच्छति न
स्वाहितं समासाद्य दैवाद्वा ।
पौरुषादथ दद्यात् सम्यक्कृ
ज्ञातिभ्यः कीर्त्तनानि चकार ॥
येन इति वह्निपुराणे वेस ॥
वक्रियायोगे पञ्चानुशासनो ।
नामाध्यायः ॥
सुकृतिः स्त्री पुण्यं मंगलं ॥
सत् कर्म सुपादपूर्वककृधातो
र्भावे क्ति प्रत्ययेन निष्पन्ना ॥
सुकृती त्रि पुण्यवान् इत्यमरः
शुभयुक्तः इति मेदिन्यां ॥
सुकृतशाखाग्रदर्शनात् ॥
सुकेशरः पुं बीजपूरः इति
राजनिर्घण्टः ॥
सुकेशा त्रि सुंदरकेशयुक्ता
यथा सुकेशी सुकेशरथ्या
इति मुग्धबोधव्याकरणं ॥ ॥
सुकेशी स्त्री स्वर्गवेश्याभेदः ॥

इति पुराणं ॥ शोभनकेश ॥
युक्ते त्रि ॥
सुकोली स्त्री क्षीरकाकोली ।
इतिरत्नमाला शोभनबदरी च
सुकोशकः पुं कोषाम्रः इति
राजनिर्घण्टः ॥
सुखन् कतत् कृतौ इति कवि
कल्पद्रुमः तत्कृतिः सुखक्रि ।
या श्रीजयदेवकवेरितिगीतं ।
सुखयतु केशवपदमुपनीतं
इति दुर्गादासः ॥
सुखं क्ली आत्महृत्तिगुणविशेषः
तत्पर्यायः सुत् २ प्रीतिः ३
प्रमदः ४ हर्षः ५ प्रमोदः ६ आ
मोदः ७ संमदः ८ आनंदथुः ९
आनंदः १० शर्म्म ११ शातं १२
इत्यमरः मदः १३ भोगः १४
रभसः १५ निर्वृतिः १६ धृतिः १७
वीचिः १८ इति जटाधरः ॥
संमोदः १९ प्रमदः २० मोदः २१
नन्दथुः २२ नन्दः २३ मुदा
२४ सौख्यं २५ उपजोषं २६
आनंदं २७ जोषं २८ इति ।
शब्दरत्नावली न्यायमते ज
गतो काम्यं धर्मजन्य मिदं
यथा सुखंतु जगतामेव काम्यं
धर्मेण जन्यते अधर्मजन्मे ॥

दुःखं स्यात् प्रतिकूलं सचेतः॥
सां तस्य मनोगोचरत्वं ॥
यथा मनोग्राह्यं सुखं दुःख
मिच्छाद्वेषौ मतिः स्मृति इति
भाषापरिच्छेदः सुखंच
तुर्विंशतिगुणान्तर्गतगुणवि।
शेषः तत्तु नित्यं जन्यंच नित्यं प
रमात्मनो विशेषगुणान्तर्वर्ति
जन्यसुखं जीवात्मनो विशेषगु
णान्तर्वर्ति तच्च सुभाष्टेष्टज
न्यंधन मित्रलाभोराज्य मिष्टान्न
पानपुष्टीकोत् सर्वेभुज्ञा दिसम्भ
वत् पाण्डित्य कान्तासंभोगादि
जन्यंच तस्य द्वितीयक्षणस्थायित्वे
नैवसत्वैन पश्चादनुभवनापपत्तात्
सुखायोपरागेणैवात्मनो मान
सबोधः सुखं तदुभाषशुरुत्वः।
बालस्य स्तन्यपानप्रवृत्तौ सुख
साधनत्वज्ञानं हेतुः तत्र सुख
स्येष्टत्वं दुःखजनक गमना
दिप्रवृत्तौ सुखोपायबोधनं न
देवेष्ट तत् साधनत्वज्ञानमेव॥
हेतुः यागादिप्रवृत्तावपि पा
रलौकिकसुखसाधनत्वज्ञानंका
रणं सुखोपायस्वर्गादिरूपेष्ट
साधनत्वज्ञानमपि कारणं सुख
स्य कालावच्छेद्यत्वं शरीराव

शुभ

च्छेद्यत्वं चातोऽव्याप्यवृत्तित्वं
शरीरैकदेशावच्छेदेन दुःखस
म्भवेऽप्यन्य देशावच्छेदेन सुख
सम्भवात् पदतलाद्यवच्छेदेन जी
वस्य दुःखसंभवेऽपि तदानीम
वच्छेदेन सुखसंभवाच्च तत्र वि
स्फोटकृते मिष्टान्नभोजना।
दौ द्रष्टव्यं इति तार्किकः॥
पुराणमते तत् कारणं॥
यथा सुदिने दुर्दिने शश्वद्भ्रम
त्येवभवेभवे सर्वेषां प्राकृतानां
च देवीजे सुखदुःखयोः॥
सुखाद्भवति हर्षश्च दर्पः शौर्यं
प्रमत्तता रागः ऐश्वर्यकामौ च
विद्वेषश्च परस्परं दुःखात्तपो
कात् समुद्वेगाद्भयं नित्यं
प्रवर्त्तते ह्येतान्येतानि सर्वाणि।
हेतुवीजे महेश्वर सुदिने ॥
दुर्दिनेचैवसर्वं कर्म्मोद्भवं भव
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखं
डे ४२ अध्यायः तत्प्रकार।
णां तरलक्षणंच यथा रागद्वे।
षादियुक्तानां न सुखं क्वचित्
द्विज विचार्य्यं खलु पश्यामि तत्
सुखं यत्र निर्वृतिः यत्र स्नेहो
भयं तत्र स्नेहो दुःखस्य भाजनं।
स्नेहमूलानि दुःखानि तस्मिं।

स्त्यक्ते महत् सुखं शरीरमेवा
यतनं दुःखस्य च सुखस्य च जी
वितं च शरीरं च जात्यैव सह जाय
ते सर्वं परवशं दुःखं सर्व
मात्मवशं सुखं एतद्विद्यात् स
मासेन लक्षणं सुखदुःखयोः
सुखस्यानन्तरं दुःखं दुःखस्यान
न्तरं सुखं सुखदुःखे मनुष्याणां
चक्रवत् परिवर्त्तते इति गरुडे।
३ ११३ अध्यायः सर्वभू
तसुखकर्त्तव्यत्वं यथा कृमिकी
टपतङ्गेषु भूमौ रथोदनं क्षि
पेत् सर्वदा सर्वभूतानां सुख
कार्य्यं सुखार्थिनां इति देवी।
पुराणे देवीसत्रात् सरवलिद्
रानाध्यायः सुखदुःख साधना
नामस्थिरत्वं सुखस्य मनोविला
समात्ररूपत्वंच यथा वस्तेकमेव
दुःखाय सुखायेर्ष्योद्भवाय च
कोपाय च यत स्तस्माद्वस्त्वा
त्मकं कुतः तदेव प्रीतये भूत्वा
पुन दुःखाय जायते तदेव
कोपाय ततः प्रसादाय च जाय
ते तस्माद्दुःखात्मकं नास्ति न
च किंचित् सुखात्मकं मनसः प
रिणामोयं सुखदुःखादिलक्षणं
इति विष्णुपुराणे २ अंशे ६

अध्यायः सुखंहिदुःखा ॥
न्यनुभूय शोभते चतो पकारे।
च्छिव दीपदर्शनं सुखान्तु यो।
याति नरो दरिद्रतां धृतः श
रीरेण मृतः सजीवति इति
मृच्छकटीकं स्वर्गः इति
मेदिनी वृद्धिनामौषधं इति
राजनिर्घण्टः जलं इति के
चित् सुखविशिष्टे त्रि यथा।
शस्तंचाथ त्रिषु द्रव्ये पापं पुण्यं
सुखादिच इत्यमरः पाप ॥॥
पुण्य शाहौ सुखादयः शस्तान्ता
श्च गुणे यथोक्त लिङ्गाः उपचा।
रात्तद्वति द्रव्ये विशेष्य वत्तेमा।
नावाच्यलिङ्गाः यथा पापा
कृत्समती कन्या पापो राजा प्प।
रजकः पापं व्याधं गलं हि स्व ॥
पापो विप्रश्च सेवकः ॥ इति
पुण्यं तीर्थं पुण्यानदी पुण्यश्रा
श्रमः सुखा मूर्तिः सुखो वासः
सुखं कामिगृहे इति भरतः।
सुखकरः त्रि सुखकरः यथा कर्म्मे
मकरैः सुखकरैर्विमृष्टं इति
सुखबोधटीकायां दुर्गादासः
सुखगः त्रि सुखेन गमन कर्त्ता
सुखपापूर्वेक गमधातोर्डप्रत्य
येन निष्पन्नः॥

सुखंकरी स्त्री जीवन्तीवृक्षः इति राजनिर्घण्टः सुखकरी च ॥
सुखकुण्डः पुं शिवस्वगणः इति त्रिकाण्डशेषः ॥ ॥
सुखचरः त्रि सुखगामी सुखेन निष्पन्नः ग्रामविशेषे पुं सुखेन चरति अत्र इत्यर्थे अल् प्रत्ययेन निष्पन्नः ॥
सुखचारः पुं उत्तमाश्वः इति शब्दमाला ॥
सुखजातः त्रिजातसुखः यथा सुखजातः सुरापीतो नृजगधो माल्यधारयः इति भट्टौ । सर्गः ॥
सुखदं क्ली विष्णोः स्थानं विष्णो रासनं इति केचित् ॥
सुखदः पुं विष्णुः यथा सुखदोऽनैकदोऽग्रजः इति तस्य सहस्रनामस्तोत्रं इति तालभेदः यथा विंशत्यक्षर ॥ संयुक्तो द्रुतः सुखदसंज्ञक । सृङ्गारवीरयोर्ज्ञेया गुरुणौ । केनमण्डितः इति संगीत ॥ दामोदरः सुखदातरिविज्ञि ॥
सुखदा स्त्री सुखदात्री गंगा । यथा सद्यः पातकसंहन्त्री सद्योदुःखविनाशिनी सुखदा । मोक्षदा गंगा गंगैव परमा । गतिः इति गंगाप्रणाममंत्रः स्वर्गवेश्या इति शब्दरत्ना ॥ वशीशमीवृक्षः इति राजनिर्घण्टः
सुखदोह्या स्त्री सुखसंदोह्या गौः इति हेमचन्द्रः ॥
सुखभाक् त्रि सुखी प्राज्ञवत्सहोविण् इत्यनेन सुखशब्द ॥ पूर्वकभजधातोर्विण् प्रत्ययेन निष्पन्नः इति मुग्धबोधव्याकरणं । इष्टपरिष्वंगः इति । महाभारते मोक्षधर्मः ॥
सुखमोदा स्त्री सल्लकीवृक्षः इति राजनिर्घण्टः ॥
सुखरात्रिः स्त्री दीपान्विताख्या सुखरात्रिका । वा सा रात्रिः तद्विधानं यथा ज्योतिषे तुलाराशिगते भानौ अमावास्यां । नराधिपः स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च कृत्वा तु पार्वणश्राद्धं दधिक्षीर गुडादिभिः ततोऽपराह्णसमये ॥ घोषयेन्नगरे नृपः लक्ष्मीः संपूज्यतां लोका उल्काभिश्चापि वेष्टितां दर्भ ।

हैषे प्रदोषव्याप्या निशि यः तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनं इति ज्योतिषात् उभयतः प्रदोष ॥ व्याप्तौ परदिन एव मुख्यात् द्वैधे करजनीयोगो दर्शस्स्यात् परेऽहनि तदा विहाय पूर्वेद्युः ॥ परेह्नि सुखरात्रिका इति ज्योतिर्वचनाच्च उभयत्र प्रदोषाव्याप्तावपि उल्कादानं परदिने पूर्वोक्त पार्वणानुरोधात् भूताहे ये प्रकुर्वन्ति उल्काग्रहं । महेतसः निराशाः पितरो यान्ति शापं दत्वा सुदारुणं इति ज्योतिर्वचनाच्च अत्रैव ॥ लक्ष्मीः पूर्वाह्ने राज्ञो पूज्या अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी पूजनीया तदा लक्ष्मी विज्ञेया सुखरात्रिका इति ज्योतिर्वचनात् उल्काग्रहणादि पितृकृत्यत्वात् प्राचीनावीतिना दक्षिणामुखेन कर्तव्यं तथा च मनुः प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना इति तत्र ग्रहणमन्त्रः शस्त्राशस्त्र

हतानां च भूतानां भूतदर्शयोः उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना दानमन्त्रस्तु अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिं इति विसर्जनमन्त्रः यमलोकं परित्यज्य आगता ये महालये उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते इति ॥ ॥ ब्रह्मपुराणे अमावास्या यदा देवाः कार्त्तिके मासि केशवात् । अभयं प्राप्य सन्तास्तु लीनाः सदा । लोकसागरे लक्ष्मीर्दैत्यभया त्यक्त्वा सुखं सुप्ताम्बुजोदरे चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पंकजे अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखरात्रिका दिवा तत्र न भोक्तव्यं ऋते बालातुरात् जनात् प्रदोषसमये लक्ष्मी पूजयित्वा यथाक्रमं दीपवृक्षास्तथा कार्य्याः भक्त्या देवगृहेष्वपि चतुष्पथश्मशानेषु नदीपर्वतसानुषु वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः दीपमालापरिक्षिप्ते प्रदोषे ॥ ॥

तदनंतरं ब्राह्मणान् भोजयि।
त्वा दीविभोज्य च बंधुभि तिनान्
अलंकृतेन भोक्तव्यं नववस्त्रा
पशोभिना ॥ स्त्रियो ये सुगंधविद
ग्धेषु वान्धवै भृतकैः सह
सुगंधैः सुन्दरैः सुन्दरमूर्द्ध ॥
योरिति विश्वः अत्र ल
क्ष्मीपूजायां पुष्पदानकालेन
मस्ते सर्वदेवानां वरदासि ह
रि प्रिये या गति स्त्वत्प्रपन्ना
नां सा मे भूयात् त्वदर्चनात् ल
क्ष्म्यै नमः इत्यनेन वारत्रयं पू
जयेत् सुखरात्र्यां प्रदोषे तु कुवेरं
पूजयंति ये इति रुद्रधरधृता
त कुवेरमपि पूजयंति धनदाय
नमस्तुभ्यं निधिपद्माधिपाय च
भवंतु त्वत्प्रसादान्मे धनधान्या
दिसंपदः इति पठित्वा कुवेराय
नमः इति त्रिः पूजयेत् ततो दे
वगृहादिषु दीपान्दद्यात् तत्र
मंत्रः अग्निर्ज्योती रविर्ज्योति
श्चन्द्रः ज्योतिस्तथैव च उत्तमः
सर्वज्योतीनां दीपोऽयं प्र ॥ ॥
तिगृह्यतां ततो ब्राह्मणान् ॥
बंधूंश्च भोजयित्वा स्वयं भुक्त्वा
सुखं सुप्त्वा प्रत्यूषे भविष्योत्तरं ॥
कर्मार्गंयात् यथा सुखरात्रे

रुषः काले सदीपोज्वलितालि।
ये बंधुर्न बन्धूंश्च वाचांक्ता।
शालयार्च्चयेत् सदी प्रदीपवन्द
नं कर्यं लक्ष्मी मंगल हेतवे ॥
गोरोचनाक्तं चैव दद्याद ॥
कुंकुमसंवेतः लक्ष्मी पूजामन्त्रः
विश्वरूपस्य भार्यासि पद्मे प
द्मालये शुभे महालक्ष्मि नम
स्तुभ्यं सुखरात्रिं कुरुष्व मे
वर्षाकाले महाघोरे यन्मया
दुष्कृतं सुखरात्रिप्रभाते ऽ
द्यात न्मे लक्ष्मीर्व्यपोहतु या।
रात्रिः सर्वभूतानां या च
देवेष्ववस्थिता संवत्सरप्रिया
या च सा ममास्तु सुमंगला मा
तात्वं सर्वभूतानां देवानां सृ ॥
ष्टिसंभवा आख्याता भूतले
देवि सुखरात्रि नमोऽस्तु ते ॥
लक्ष्म्यै नमः इति त्रिः पूज
येत् इति तिथ्यादितत्त्वे ॥ ॥
सुखवर्चकः पुं सर्जिकाक्षारः
इत्यमरः ॥
सुखवर्चाः पुं सर्जिकाक्षारः ॥
इति राजनिर्घंटः ॥
सुखवासः पुं फलविशेषः तर
मूज इति भाषा तत्पर्यायः ॥
धीधीहत्रं २ इति रत्नमाला ॥

मुग्ध
बंधू
कृतं
कौ

सुखवासनः पुं सुखवासनगं
धद्रव्यं यथा सुखवासकरो गंध
आमोदी सुखवासनः सुख।
वासन इत्येके शुभवासन इत्य
पि इति शब्दरत्नावली ॥ ॥
सुखसन्दोह्या स्त्री सुशीलागौः
इत्यमरटीकायां भरतः ॥ ॥
सुखसंदोह्या स्त्री सुशीला
गौः तत्पर्यायः सुव्रता २ इत्य
मरः सुखदोह्या ३ इति
हेमचंद्रः सुखदुह्या ४ इति।
भरतः ॥
सुखा स्त्री वरुणपुरी इति मे
दिनी ॥
सुखाधारः पुं स्वर्गः इति शब्द
रत्नावली सुखस्याधारे त्रि
सुखायतः पुं सुशिक्षिताश्वः
यथा सुखायनः सुसायनः सुदश
वः सुखाचारः सुखायनः इति
शब्दमाला ॥
सुखावतीश्वरः पुं बुद्धभेदः।
इति हेमचंद्रः ॥
सुखावहः त्रि सुखदाता यथा
सर्वपापहरे पुण्यं सर्वापद्विनि
वारकं सर्वकामार्थदं देवि।
साधकानां सुखावहं इति
वटुकभैरवस्तोत्रे ॥

सुखाशः पुं वरुणः राजति ॥
निषुः सुखभोजनं इति
मेदिनी ॥
सुखासकः पुं राजतिनिशः
इति शब्दमाला ॥
सुखी त्रि सुखविशिष्टः यथा
सचिरायुः सुखी पुत्री विनयी
विजयी भवेत् इति श्रीराम
कवचे स्वजनं हि कथं हत्वा।
सुखिनः स्याम माधव इति
श्रीभगवद्गीता सा श्री यान
मदं कुर्यात् स सुखी तस्य यो
ज्जितः तन्मित्रे यस्य विश्वासः
पुरुषः स जितेन्द्रियः इति
गारुडे ११४ अध्यायः ॥ ॥
सुखोत्सवः पुं पतिः इति
त्रिकांडशेषः आनन्दोत्स ॥
सवश्च ॥
सुखोदकं क्ली सुखजनक
तप्तजले तत्पर्यायः सुखोस
२ इति रत्नमाला ॥
सुखोज्झिकः पुं सर्जिकाक्षा
रं इति राजनिर्घंटः ॥
सुगं क्ली विष्ठा इति शब्दचंद्रि
का सूत्रस्थानमिति त्रि ॥
सुगण त्रि सुन्दरगणकः इति
सिद्धांतकौमुदी ॥

सुगतः पुं बुद्धः इत्यमरः।
सुन्दरगमनविशिष्टे त्रि ॥
सुगतिः पुं प्रतीतकल्मीया
दैर्द्दैदः इति हेमचंद्रः ग्रंथ ॥
कन्नाविशेषः यथा सुगति।
सोपानमभृतपोप्येवमिति
स्मान्नलिखेन ॥
सुगंधं क्ली त्ववजीरकं गं
धतृणं इति रत्नमाला नी
लोत्पलं चन्दनं इति।
राजनिर्घण्टः ग्रंथिपर्णी इति
भावप्रकाशः ॥
सुगंधः पुं रक्तशिग्रुः गंधकः
चणकः भूतृणं इतिराजनि
र्घण्टः समवायातिरिक्तसं।
बंधेनसद्गन्धविशिष्टे त्रि॥
सुगंधकः पुं रक्ततुलसी गं।
धकः इतिरत्नमाला नाग
रंगकः इतित्रिकांडशेषः
कर्कोटकः इति हेमचंद्रः
सुगंधतैलनिर्यासे क्ली जवा
दिनामगंधद्रव्यं इतिराजनि
र्घण्टः ॥
सुगंधपत्रा स्त्री रुद्रजटा इति
राजनिर्घण्टः ॥
सुगंधभूतृणं क्ली गंधतृणं
इति राजनिर्घण्टः ॥

सुगंधमूला स्त्री स्थलपद्मिनी
रास्ना इतिराजनिर्घण्टः ॥॥
सुगंधा स्त्री रास्ना इत्यमरः
शटी इतिशब्दरत्नावली॥वं
ध्याककर्कोटकी रुद्रजटा ॥॥
शतपुष्पा नाकुली नव
मालिका स्वर्णयूथिका एक्का
गंगापत्री सलकी माध ॥ ॥
वी इतिराजनिर्घण्टः अन।
न्तामातलुंगा तुलसी ॥
इतिरत्नमाला
सुगंधामलकं क्ली मिलितौषध
विशेषः यथा सर्वौषधिसु॥
मातुर्क्वाः सूक्ष्मास्त्वामलककल्क
कं यदात्तदायं योगः स्यात् सुगं
धामलकाभिधः इतिराज ॥
निर्घण्टः ॥
सुगंधिः पुं सद्गंधः तत्पर्या
यः इष्टगंधः २ सुरभिः ३
घ्राणतर्पणः ४ इत्यमरः पर।
मात्मा इति मोक्षधर्मटीका
यां नीलकंठधृतवेदः सुगंधयु
क्ते त्रि इतिमेदिनी सद्दकारः।
इतिशब्दचन्द्रिका ॥
सुगंधि क्ली एलवालुकं इत्य।
मरः मस्तकसेरु गंध ॥
तृणं धान्यकं पिप्पलीमूलं ॥।

इति राजनिर्घण्टः ॥
सुगंधिकं क्ली कल्हारं इति
शब्दरत्नावली पुष्करमूलं ॥॥
गौरसुवर्णः सुरपर्णं उशी
रं इति राजनिर्घण्टः ॥
सुगंधिकः पुं महाशालिः इति
हेमचन्द्रः तुरुष्क इति रा
जनिर्घण्टः गंधकः इत्यमर ॥
टीकायां रायमुकुटः ॥
सुगंधिकुसुमः पुं पीतकरवीरः
इति राजनिर्घण्टः ॥सुगंधि ॥
पुष्पे क्ली ॥ ॥
सुगंधिकुसुमा स्त्री टक्का इति
जटाधरः ॥ ॥
सुगंधेता स्त्री सौगंधिः सौ
रभं इतिहलायुधः ॥॥
सुगंधित्रिफला स्त्री जातीफलं
पूगफले लवंगकलिकाफले
इतिराजनिर्घण्टः ॥ ॥
सुगंधिनी स्त्री आरामशीतला
इतिराजनिर्घण्टः ॥
सुगंधिमूलं क्ली उशीरं इति
राजनिर्घण्टः ॥ ॥
सुगंधिमूषिका स्त्री छुच्छुन्दरी
इतिराजनिर्घण्टः
सुगमः त्रि सुखेनगम्यते प्राप्य
तेयः यथा पंथसुगम

इति मुग्धबोधीयाद्यादिप्रकरण
लिखनं ॥
सुगहनः त्रि निविडः इत्यमर
टीकायांरामाश्रमः ॥ ॥
सुगहना स्त्री कुंवा सुगहनेति
विशेषणमिति केचित् नाम
इत्यन्ये इत्यमरटीकायां र
मानाथः ॥
सुगहनावृतिः स्त्री कुंवा इत्य
मरः यज्ञस्थाने अस्पृश्यादि।
दर्शनवारणाय या सुगहनाभि
रवकाशावृतिर्वेष्टनं साकुंवा।
इतिभरतः ॥
सुगृहः पुं चंचुसूचिकपक्षी इ
ति हेमचन्द्रः सुन्दरालये क्ली॥
सुगृहीतः त्रि सुन्दररूपेणकृ
तग्रहणः सुखपूर्वकग्रहणात्
कप्रत्ययेन निष्पन्नः ॥
सुगृहीतनामा पुं शुभकाम्यया
प्रातः स्मर्यतेयः सच युधि॥
ष्ठिरादिः इतित्रिकांडशेषः ॥
सुग्रन्थिः पुं चोरकः इति रा
जनिर्घण्टः सुंदरग्रंथियुक्ते त्रि
सुग्रीवः पुं विस्तोरस्कः शस्त्र॥
खास्त्रेश्वरः इतिमेदिनी ॥
सतसूर्यपुत्रः किष्किंधाधिपतिः
श्रीरामचंद्रस्यसखा यथा वान।

ऐंद्रमर्द्धं सुभमिद्धा वालिनं
मात्मजं सुग्रीवं जनयामास॥
तपनस्तपतां वरः इतिवा ॥
ल्मीकीये रामायणे वालकां
ड १७ सर्गः किंच दीप्यमाने
ततो वह्निं पुष्पैरभ्यर्च्य सुता
हुते तयो मध्येतसमीतो॥
निदधौ सुसमाहितः ततो
ऽग्निं दीप्यमानं तौ चक्रतुस्त्व
प्रदक्षिणं सुग्रीवोराघवश्चैव
वयस्यत्वमुपागतौ इतितत्रै ॥
व किष्किंधाकांडे ५ सर्गः॥ अ
हन् पिता सचवर्त्तमानसुग्री
यनवमजिनपिता इति हेमचं
द्रः शिवः इन्द्रः राजहंसः ॥
असुरः पर्वतविशेषः अ
स्त्रविशेषः नागभेदः इति
केचित् शोभनग्रीवायुक्ते॥
त्रि इतिविश्वः॥
सुग्रीवी स्त्री कश्यपपत्नीवि
शेषः यथा शुकीश्युकानज
नयत् उलूकी प्रत्युलूककान्
शुच्यौदकान् पतिगागान सु
ग्रीवीत व्यजायत। इति गारु
डे ६ अध्यायः॥
सुग्रीवेशः पुं श्रीरामचंद्रः इ
ति शब्दरत्नावली॥ ॥

सुग्लः त्रि अत्यंतहर्षक्षयविशि
ष्टः सुशब्दपूर्वक ग्लैधातोः कम
र्म्मण्येननिष्पन्नः इतिसिद्धा॥ ॥
न्तकौमदी॥
सुचंचुका स्त्री महाचंचुशाकः
इतिराजनिर्घण्टः॥
सुचरित्रा स्त्री साध्वी इत्यमरः
शोभनचरित्रयुक्ते त्रि॥
सुचर्म्मा पुं भूर्जवृक्षः इतिरा
जनिर्घण्टः शोभनचर्म्मविशि
ष्टे त्रि॥
सुचक्षुः पुं उडुम्बरः इतिजटा
धरः शोभनलोचनेस्त्री ॥
नयुक्ते त्रि ॥
सुचारुः त्रि मनोहरः यथा
सुचारुदशनां तद्वत् पीनोन्न
तपयोधरां इति कालिकापु
राणोक्तदशभुजादुर्गाध्याने
सुचित्रकः पुं मतस्यरंकः चि
त्रसर्पः इति शब्दरत्नावली
सुन्दरचित्रयुक्ते त्रि॥
सुचित्रबीजा स्त्री विडंगा इति
राजनिर्घण्टः॥
सुचित्रा स्त्री चिर्भिटा इति॥
राजनिर्घण्टः॥
सुचिरायुः पुं देवता इति श
ब्दरत्नावली॥

सुचुटी स्त्री अग्न्यायुद्धरणार्थं
लौहादियंत्रविशेषः चिमिटा इति
भाषा इति केचित्॥
सुचेलकः पुं शोभनवस्त्रं ॥
सरुकापड इति भाषा तत्
पर्य्यायः पटः २ इत्यमरः ॥
पटिः च पटी ४ इति तट्टीका
सुन्दरवस्त्रयुक्ते त्रि ॥
सुच्छ स्त्री शातमूलकी॥ शत
लज इति ख्याता इति शब्द
रत्नावली॥ ॥
सुजनः पुं साधुः सज्जनः॥
यथा दुर्ज्जनस्य हि संगेन सुज
नोपिविनश्यति प्रसन्नं जल
मित्याहुः कर्दमैः कलुषीकृतं
इति गारुडे १५ अध्यायः ॥
सुजनता स्त्री सौजन्यं यथा
धिगस्त्वेता विद्या धिगपिकवि
ताधिक सुजनता वयोरूपं वा
धिक धिगपिच यशोनिधनव
तां असौजीयादेकः सकल ॥
गुणहीनोपि धनवान् बहिर्द्वा
रेयस्य तृणलवसमाः संतिगुणि
नः इत्युद्भटः॥
सुजलं क्ली कमलं इतिराज
निर्घण्टः सुन्दरसलिलं च सु
न्दरजलसंबंधिनि त्रि॥ ॥

सुजल्पः पुं वाक्यविशेषः यथा
यत्राज्ञोवात् सुगास्तीर्थं संदे॥
न्यं सहचापलं सोत्कंठं च ॥
हरिः स्पष्टः ससुजल्पो निगद्य
ते इत्युज्ज्वलनीलमणिः ॥
सुजाता स्त्री तुवरी इतिराज
निर्घण्टः॥
सुजीवंती स्त्री स्वर्णजीवंती इ
तिराजनिर्घण्टः॥
सुट क तोच्छ्ये अनादरे ॥
इतिकविकल्पद्रुमः पंचमस्वरी
टद्भयान्तः करद्दयति देत्या॥
दिरयमितिभीमः जौच्छ्यम
त्वौभावः इतिदुर्गादासः ॥
सुतः पुं पुत्रः इत्यमरः ॥
पार्थिवः इति मेदिनी ॥
मातृपितृस्वभाववत् स्वभावे सु
तकन्ये भवतः यथा शीले
संभजते पुत्रो मातरंतस्य
वैसुता यथा शीला भवेन्मा
ता तथाशीलो भवेत् सुतः ॥
यद्वर्णोवैभवेद्भूमिस्तद्वर्णं स
लिलं भवेत् मातृणां शी ल
दोषेण पितृशील गुणेन च
विभिन्नास्तु प्रजाः सर्वा भवंति
भवशीलिनः इति वह्निपुरा
णे काश्यपीयवंशः॥ ॥

सुतजीवकः पुं पुत्रजीवकवृक्षः इतिराजनिर्घण्टः ॥

सुतनुः स्त्री नारी इतिराजनिर्घण्टः शोभनशरीरः तद्युक्ते त्रि ॥

सुतपाः पुं सूर्य्यः सुपूर्व्वक तपधातोः रौणादिकासि प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी मुनिः शोभनं तपो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

सुतपादिका स्त्री हंसपदी इति राजनिर्घण्टः ॥

सुतरां अव्य अवधारितार्थप्रतिपादकं यथा क्रियैव काल ॥ इतिमलमासतत्त्व सुतरां नाधिकरणता इति सपिण्डीकरणसमाख्या सिद्धार्थः सुतरां तत्र तथा ॥ चरणं इति वतिष्पादितत्वं ॥ अपि च अपुत्राजन्मिनः पापात् प्राणिनः समवस्थिताः ॥ मनुजास्तत्र सुतरां भवन्ति गृहकर्म्मणः इति पाद्मे स्वर्गखंड ४२ अध्यायः शृणु द्विजमहाबुद्धे तेनापि सततो हरिः ॥ ददाति मोक्षं सुतरां किं पुनः ॥ हैमवर्ज्जनात् इति च तत्रैव ॥

पातालखंडे ॥

सुतकारी स्त्री देवदालीलता इतिराजनिर्घण्टः ॥

सुतहृनः पुं कोकिलः इति त्रिकांडशेषः ॥

सुतलः पुं अट्टालिकाबन्धः ॥ नागलोकप्रभेदः इति मेदिनी तत्र पातालषष्ठखंडः तद्विवरणं यथा ततोऽध स्तात् सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलि भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः स्वधर्म्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि इति श्रीभागवते ५ स्कन्ध २४ अध्यायः ॥

सुतवस्करा स्त्री सप्तपुत्रप्रसूः इतित्रिकांडशेषः ॥

सुतश्रेणी स्त्री मूषिकपर्णी इत्यमरः उन्दुरविलोया इति ॥ हिन्दीभाषा तत् पर्य्यायः द्रवंती १ न्यग्रोधी २ मूषिका ३

द्रुघा ४ चित्रा ५ मूषकमारी प्रत्यक्श्रेणी ७ शम्बरी ८ अस्या गुणाः चलष्यत्वं कटुत्वं । आखुविष व्रणदोष नेत्रामय नाशित्वंच इति राजनिर्घण्टः पुस्तकान्तरे सुतश्रेणीति च पाठः ॥

सुतहिबुकयोगः पुं विवाहोक्तयोगविशेषः यथा सुतहिबुक वियद्विलग्न धर्म्मधमरन्ध्र यदि दानवार्च्चितो वा यदशुभं सुपयाति नम्बुज मम स्यात् शुभमतिहृद्धि समेति तत्प्रभावात् इति ज्योतिःसारसंग्रहः अपि च लग्नेतत् ॥ पंचमे तुर्य्ये नवमे दशमे तथा गुरुर्भृगुर्वा दोषघ्नो विवाहे । वर्द्धते शुभं अयमेव सुतहिबुकयोगः इति ज्योतिस्तत्त्वं ॥

सुता स्त्री स्वापत्यकन्या इति मेदिनी दुहिता इति शब्दचन्द्रिका ॥

सुतात्मजः पुं पौत्रः दौहित्रः इति सुतात्मजाशब्ददर्शनात् ॥

सुतात्मजा स्त्री पौत्री दौहित्री इत्यमरः ॥

सुतारका स्त्री चतुर्विंशतिबुद्धशासनदेवतान्तर्गतदेवताविशेषः इति हेमचन्द्रः शोभनतारकायुक्ते त्रि ॥

सुतिक्तः पुं पर्पटः इतिराजनिर्घण्टः ॥

सुतिक्तकः पुं पारिभद्रः इति जटाधरः भूनिम्बः इति शब्दरत्नावली ॥

सुतिक्ता स्त्री कोषातकी इति राजनिर्घण्टः ॥

सुतीः त्रि पुत्रेच्छुः पुत्रवदाचरणकर्त्ता इति मुग्धबोधव्याकरणं ॥

सुती त्रि सुतविशिष्टः यथा । शुचिर्गणानां नारीणां न पतति कठिनी मसमृसाम्यस्य तेनाख्या यदि सुतिनी वदवैद्या कीदृशी भवति इति हितोपदेशः ॥

सुतीक्ष्णः पुं शोभाञ्जनः इति जटाधरः श्वेतशिग्रुः इति राजनिर्घण्टः मुनिविशेषः ॥ यथा पुरो रामस्य ज्ञहवाच कारज्वलनेव पुः शरभंगः प्रदिष्टपात् सुतीक्ष्णमुनिनिकेतने इति भट्टौ सर्गः अति ॥ ॥

शायरेवेति ॥
सुतुङ्गः पुं नारिकेलवृक्षः ॥
इति हारावली सुदृग्गणं ३
ज्ञाशविशेषः तस्य नामांत ॥
रं अन्यतङ्गः यथा सूर्याय
मान् क्रिय वृष मृग स्त्रीज्ञ।
लीरान्त्य सुके दिशवक्रीन्द्रद्वय
तिथिशरान् समरिशांश्च विशा
श्रेशानेतान् वदति जवनसा
न्मवेर्गन् सुतुङ्गान् नानेवां
शान् मदनभवनेषाद नीचान्
सुनीचान् इति सत्कृत्यमुक्ता
वली अतिशयोद्धे त्रि ॥ ॥
सुतेजनः पुं धन्वनवृक्षः इति
भावप्रकाशः ॥
सुतेजाः पुं अतीतकल्पीयार्ह
द्भेदः इति हेति हेमचन्द्रः आ
दित्यभक्ता इतिराजनिर्घण्टः
शोभनतेजोयुक्ते त्रि ॥ ॥
सुतैला स्त्री महाज्योतिष्मती
इति राजनिर्घण्टः ॥
सुत्रामा पुं इन्द्रः इत्यमरः ॥
सुष्टुत्रायते भुवनं सुत्रामा आ
सत्तिनिमन् सोः पदे दीर्घत्वं
सुत्रामा च इति कथः इति ॥
भरतः ॥
सुत्वा पुं अभिषवे कृती इत्य

मरः अभिषवः स्नानमात्रं इह
तु मत्लावान् यज्ञाङ्गस्नानं मत
कृतवान् यः सुत्वा कथ्यते
सुञः क्वनिप् तत् सुत्वा कृतीति
अधीतिवत् कृते इति पाठे ॥
सप्तमी इति भरतः ॥
सुद इ शोभे इति कविकल्पद्रु
मः सुन्दरं इति दुर्गा ॥ ॥
दासः सौत्रधातुरयं ॥
सुदंष्ट्रिका स्त्री दग्धानामवृक्षः
इति राजनिर्घण्टः ॥
सुदण्डः पुं वेत्रः इति राज ॥
निर्घण्टः ॥
सुदंतिका स्त्री गोरक्षी इति
राजनिर्घण्टः ॥
सुदत् त्रि शोभनदंतविशिष्टः
शोभना दंता यस्य इत्यर्थे दंत
शब्दस्य ददादेशेन निष्पन्नः ॥
सुदंतः पुं नटः इति केचित्
शोभनदंतश्च ॥
सुदंती स्त्री दिक्करिणीविशे
षः पुष्पदन्तीशब्ददर्शनादिति के
चित् ॥
सुदर्भा स्त्री इक्षुदर्भा इतिराज
निर्घण्टः शोभनकुशयुक्ते त्रि
सुदर्शनं क्ली इन्द्रनगरं इति
मेदिनी ॥ ॥

सुदर्शनः पुं विष्णुचक्रं तस्यो
त्पत्तिर्यथा तस्मात् प्रसादं कुरु
मे यद्यनुग्रहभागहं अपनेष्
ष्यामि ते तेजः कृत्वा यंत्रे दि
वाकर रूपं तवकरिष्यामि लो
कानन्दकरं प्रभो ॥ तथे
त्युक्तः सरविणा भ्रमौ कृत्वा।
दिवाकरं पृथक्चकार तत्तेज
स्त्वष्टा विष्णोरकल्पयत् त्रिशू
लं चापि रुद्रस्य वज्रमिन्द्रस्य चा
धिकं दैत्य दानव संहर्त्तुः सह
स्रांशुकिरणात्मकं इति मात्
स्ये ॥ अध्यायः अपिच
ईश्वर उवाच मायमेभिर्मखैः ॥
हातेजाः शस्त्रास्त्रैर्वध्यते मया
देवाश्च सवतेजांसि शस्त्रास्त्रं।
दीयतां मम नारद उवा
च अथ विष्णुमुखा देवाः स्वते
जांसि दुःसहया ताभ्यैकं वेग
तानीशो दृष्ट्वा संचाम्चकः
हः तेनाकरोन्महादेवः सदा
शाशस्त्रमुत्तमं चक्रं सुदर्शनं
नाम ज्वालामालातिभीषणं ते
जः शेषेण च तथा वज्रं च ॥
कृतवान् हरः इति पाद्मोत्तर ॥ ॥
खण्डे १४५ अध्यायः तस्य
शिवेन विष्णवे दत्तं यथा ततः ॥ ॥

प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं।
वरं प्रत्यक्षं तैजसं श्रीमान्
दिव्यं चक्रं सुदर्शनं तद् ॥
त्वा देवदेवाय सर्वभूतभयप्रदं
कालचक्रनिभं चक्रं शंकरो ॥
विष्णुमब्रवीत् वरायुधोऽयं ॥
देवेश सर्वायुधनिबर्हणः सुद
र्शनो द्वादशारो यो मतः सुद
र्शनाभवी आरात् स्थिता अमी
चात्र देवामासाश्चराशयः शि
ष्टानां रक्षणार्थाय संस्थिताऋ
तवश्च षट् अग्निः सोमस्तथा
मित्रो वरुणश्च प्रजापतिः इ
न्द्राग्नी चाप्यथो विश्वे प्रजापत।
य एव च हनूमांश्चाथ बलवान्
देवो धन्वन्तरिस्तथा तपोस्य।
व तापसश्च द्वादशेते प्रतिष्ठि
ताः चैत्राद्याः फाल्गुनान्ताश्च
मासास्तत्र प्रतिष्ठिताः त्वमेव
मादाय विभो वरायुधं शत्रुं सु
राणां जहि मा विशंकिथाः अ
मोघ एष ॥ मरराजपूजितो।
धृतो मया देहगतस्तपोबलात्
इति वामने ७९ अध्यायः ॥
सुमेरुः जम्बूवृक्षः इति मे
दिनी कृष्णार्हत् पिता जिना ॥
नोवलदेवः इति हेमचंद्रः ॥ ॥

सुदर्शनचूर्णं क्ली ज्वररोगस्य
औषधविशेषः यथा त्रिफला र
जनीयुग्मं कंटकारीयुगं शटी
त्रिकटु ग्रंथिकं मूर्वा गुडूची ध
न्वयासकः कटुका पर्पटो मुस्तं
त्रायमाणा च वालकं निंबं पु
ष्करमूलं च मधुयष्टी च वत्स
कः यवानीन्द्रयवो भार्गी शिग्रु।
वीजं सुराष्ट्रजा वचा त्वक् पद्म
कोशीरचन्दनातिविषा वलाः॥
शालिपर्णी पृश्निपर्णी विडंग
तगरं तथा चित्रकं देवकाष्ठं चा।
चव्यं पत्रं पटोलजं जीव ॥
कर्षभकौ चैव लवंगं वंश
लोचना पुंडरीकं च काको।
लिपत्रकं जातिपत्रकं ताली
शपत्र मेतानि समभागानि
चूर्णयेत् अर्द्धांशं सर्वचूर्णा।
स्य किराते प्रक्षिपेत् सुधीः प
तत् सुदर्शनं नाम चूर्णं दोष
त्रयापहं ज्वरांश्च निखिलान्॥
हन्यान्नात्र कार्या विचारणा
पृथग्द्वन्द्वागंतूंश्च धातुस्था
न् विषमज्वरान् सन्निपातोद्भवां
श्चापि मानसानपि नाशयेत्॥
शीतादीन् पिपासादीन् मोह।
तन्द्रा भ्रमं तृषा कासं श्वा॥ ॥

सं च पांडुं च हृद्रोगं कामलापि
च त्रिक पृष्ठ कटी जा नु
पार्श्वशूलं च नाशयेत् शीत।
म्बुना पिबेदेतत् सर्वज्वर निवृत्त
ये सुदर्शनं यथा चक्रंदा ॥
नवानां विनाशनं तद्वज्ज्वराणां
सर्वेषां चूर्णमेतत् प्रणाशनं
पुष्करमूलाभावे कुष्ठमपि द।
द्यात् भार्ग्यभावे कंटका।
रीमूलं सौराष्ट्र्यभावे ॥
स्फटिकां दद्यात् तगराभावे॥
कुष्ठं देयं जीवकर्षभयो र
भावे विदारीकंदस्य भागद्वयं
दद्यात् पुंडरीकं श्वेतकमलं।
काकोल्यभावे अश्वगंधामूलं
दद्यात् तालीशपत्रकाभावे।
स्वर्णताली मदी यले इति भा।
यवा कंटकारीजटा देया इति।
भावप्रकाशः ॥
सुदर्शनः त्रि सुदृष्यः सुखेन
दृश्यते असौ इति सुपूर्वक दृश
धातोः कर्मण्यन प्रत्ययेन नि॥
ष्पन्नः इति मुग्धबोधटीकायां
दुर्गादासः ॥
सुदर्शनद्वीपं क्ली जम्बुद्वीपं इति
पुराणं ॥
सुदर्शना स्त्री सुदर्शनवृक्षः ॥॥

सुदर्शनमूलं च इति पद्मग ॥
लं च इति चाख्यातः तत् पर्या ॥
यच क्रांगा २ वृषकर्णी ३ दृश्म
नी ४ इति रत्नमाला सोमवल्ली ५
मधुपर्णिका ६ चक्रांका ७ अ
स्या गुणाः स्वादुत्वं उष्णत्वं ॥
कफ शोफास्रवात नाशित्वं च॥
इति भावप्रकाशः ॥ विषना
शित्वं इति राजवल्लभः ओ
स्त्री औषधिविशेषः इति
विश्वमेदिन्यौ ॥
सुदर्शनी स्त्री अमरावती इति
विश्वः ॥
सुदलः पुं क्षीरमोरटा इति
रत्नमाला ॥
सुदला स्त्री शालपर्णी तरुणी
इति राजनिर्घण्टः ।
सुदान्तः पुं शाक्यमुनिशिष्यवि
शेषः इति त्रिकांडशेषः
सुदामा पुं मेघः पर्वतः ॥
इति मेदिनी गोपभेदः ॥
समुद्रः इति शब्दरत्नावली
ऐरावतः इति त्रिकांडशेषः ॥
श्रीकृष्णशरणागत विप्रविशेषः
यथा सः ब्राजगृहात् दारिद्र्यं सुदा
म्नो ब्राह्मणस्य च समागत।
स स्वगृहात् द्वारकां प्रभाण
॥ ॥ ॥ ॥

र्थिनः इति ब्रह्मवैवर्ते श्री॥
कृष्णजन्मखंडे ११२ अध्यायः॥
सुदामा त्रि सुदातृ सुष्ठु ददाती
त्यर्थे मन् प्रत्ययेन निष्पन्नः ॥
इति मुग्धबोधव्याकरणं ॥
सुदामा स्त्री नदीविशेषः यथा
स प्राङ्मुखो राजगृहादभिनि।
र्ययौ वीर्यवान् ततः सुदामां।
द्युतिमान् सन्तीर्यावेक्ष्य तां
नदीं इति वाल्मीकीये रामा ॥
यणे अयोध्याकांडे ७० सर्गः
सुदायः पुं देययौतकादि यथा
यौतकमादिना उपनयनेभि ॥
ता मसादादिच यत् देयं तत्
दाय हरण पदवाच्यं कन्याया।
नकाले जामात्रादिभ्यो ज्ञत ॥
भित्तादौ ब्राह्मणादिभ्यश्च यद्व
अंदीयते तत्र दायादि शब्दमित्य
र्थः यौतकं योनिसंबंधः तत्र।
भव मिति सु यौतकं युत
यो वंधू वरयो रिद मिति वा।
कपियौतकं यौतकमुका र॥
मध्यमपि यौतकं यौतकं च
तत् इति वाचस्पतिः दीय ॥
ते दायः कर्माणि यज्ञसुष्ठदी॥
यते सुदाय इति पाठ इत्यन्ये
इति भरतः पितृमान्॥ ॥
॥ ॥ ॥ ॥ ॥ ॥

भर्तृकुलसम्बन्धी यथा सुदा-
येभ्यः पितृमातृभर्तृकुलसम्ब-
न्धिभ्यो लब्धं सौदायिकं ॥
इति दायतत्त्वं ॥
सुदामः पुं पारियात्रपर्वतः ॥
तत्पर्यायः पारियात्रिक
२ इति हेमचन्द्रः ॥ ॥
सुदि व्य शुक्लपक्षः इति प-
श्चिमदेशप्रसिद्धं ॥ ॥
सुदिनं क्ली शुभदिवसः य-
था सुदिनं दुर्दिनं शश्वत् भ्रम-
त्येवं भवे भवे सर्वेषां प्राकृता-
नाञ्च देवीजे सुखदुःखयोः सु-
दिनं दुर्दिनञ्चैव सर्वं क-
र्मोद्भवं भव तत् कर्मतपसा
साध्यं कर्म्मणाञ्च शुभाशुभं ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म-
खण्डे ५२ अध्यायः ॥
सुदिनाहं क्ली प्रशस्तदिनं य-
था उत्तमैकाभ्याञ्च आभ्याम-
न्नादेशेन उत्तमशब्दोऽत्र ॥
न्नार्थः पुण्यशब्दात् सुदि-
काभ्यामित्येवमनुवृत्तिः सुदि-
नं पुण्याहं सुदिनाहं सुदिन ॥
शब्दः प्रशस्तवाची इति सिद्धा-
न्तकौमुदी ॥
सुदीर्घं त्रि अतिविस्तारः यथा
विवाहश्च श्रोत्रियैर्भुक्तं या-
ज्ञवल्क्यैस्तथैव च सुदीर्घेणा-
पि कालेन तेषां तन्न सिध्य-
ति इति व्यवहारतत्त्वं ॥ ॥
सुदीर्घघर्म्मा स्त्री असनपर्णी
इति शब्दचन्द्रिका ॥
सुदीर्घफलिका स्त्री वार्त्ताक-
विशेषः क्षिरावेगुन इति भा-
षा इति रत्नमाला ॥
सुदीर्घा स्त्री चीनाकर्कटी ।
इति राजनिर्घण्टः ॥
सुदुःखितः त्रि अतिशयदुःखि-
यथा विष्णुभार्य्ये त्रिके विघ्ने ।
ज्येष्ठायां ज्वलने यमे प्रति-
विवाहिता कन्या भवत्येव सु-
दुःखिता इति ज्योतिस्तत्त्वे भी-
मपराक्रमवचनं ॥
सुदुर्लभः त्रि अतिदुष्प्राप्यः
यथा ब्रह्मत्वादपि देवत्वादिन्द्र-
त्वादमरादपि अमरत्वात् सिद्धि-
लाभाद्धरेर्दास्यं सुदुर्लभं
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म-
खण्डे १० अध्यायः ॥
सुदुश्चरः त्रि अतिशयदुःखेन
चरणीयः सुपूर्वं दुःपूर्वं चर
धातोः खल् प्रत्ययेन निष्पन्नं ॥
सुदुष्करं त्रि अत्यन्तक्लेशाकरं

यथा सुदुष्करं कर्म्म कृत्वा ।
लोकपालैरपि प्रभुः पश्चात्ता ।
विरतो राजन् यशो विपुलं य-
स्तव इति श्रीभागवते ४ स्क-
न्धे ४ अध्यायः ॥
सुदुस्तरः त्रि अतिदुःखेन तर-
णीयः यथा स्वयं समुत्तीर्य्य ।
सुदुस्तरं द्युमन् भवार्णवं भीम-
मदभ्रसौहृदाः भवत् पदाम्भो-
रुह नाव मत्र ते निधाय या-
ताः सदनुग्रहो भवान् इति ।
श्रीभागवते १० स्कन्धे २ ॥
अध्यायः ॥
सुदुस्त्यजः त्रि अतिदुःखेन त्य-
ज्यः यथा त्यक्त्वा सुदुस्त्यज ॥
सुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ ।
आर्य्यवचसा यदगादरण्यं मा-
यामृगं दयितयेप्सित मन्वधा-
वद्वन्दे महापुरुष ते चरणार-
विन्दं इत्याह्निकतत्त्वधृतश्रीभा-
गवतवचनं ॥
सुदूरः त्रि अतिदूरतरः तत्
पर्य्यायः दवीयान् १ दविष्ठः ।
२ इत्यमरः ॥
सुदूरपराहतः त्रि अतिदूरनिरा-
कृतः निरस्तः यथा अन्न तु ।
गामेनन्तज्ञाति वदति लता ।
णासम्भवात् लतागानुपपत्ति-
रूपयुक्तेः सुदूरपराहतत्वात्
इति भाववर्णनं अनुपादेयमेव
हेत्ववयवग्रन्थगादाधरी ॥ ॥
सुदृक् त्रि सुन्दरचक्षुर्युक्तः ।
यथा भीतः सुदृक् पिधायास्यं
भेजे भीतिविडम्बनं इति श्री-
भागवते १ स्कन्धे ८ अध्या-
यः सुदृक् सुनयनं आस्यं पि-
धाय सुदृक् वरातीति वा भीति-
विडम्बनं भयानुकरणं इति श्री-
धरस्वामी शोभनचक्षुषि क्ली
सुदृढं क्ली गाढं तद्वति
त्रि इति शब्दरत्नावली ॥
सुद्युम्नः पुं वैवस्वतमनुपुत्रः
सतु इडराजः यथा जलक्री-
डागतो यत्र पार्वत्या सहितो
हरः स्त्री रूपधारिभिर्बाले-
स्ततः सदिमवक्रिरो ॥
ततोऽविशादिड स्तत्र मृगया-
कृष्टचेतनः बभूव नृपतिः
सद्यः सानुयात्रबलान्वितः इ-
दं स्त्रीलिङ्गमापन्नः मतिभ्र-
मतिकानने ततो बुधाश्रमाभ्या-
शाद्दिज्ञा रूपाश्रयासती बुधेना-
न्तरमासाद्य मैथुनायोपमन्त्रि-
ता सोमसुताद् बुधाज्जनन् ॥

तस्माज्जज्ञे पुरूरवाः जन।
यित्वा पुनः सा तं पुनः सु
द्युम्नतां गता प्रसादात् श
ङ्करस्यापि बुधेनाराधितस्य
च सुद्युम्नस्य तद्दायादः स्वदः
परमधार्म्मिकः इति वह्निपु।
राणे सगरोपाख्याननामाध्या
यः सुधन्वा त्रिष्वौढधानुष्कः
इति मेदिनी ॥
सुधन्वा पुं विश्वकर्म्मा इति मे
दिनी राजविशेषः इति पु ॥
राणं ॥ ॥
सुधन्वाचार्य्यः पुं व्रात्यवैश्या
त् सवर्णायां जातो जातिविशे
षः यथा वैश्यात्तु जायते व्रा
त्यात् सुधन्वाचार्य्य एव च।
कारुषश्च विजन्मा च मैत्रः।
सात्वत एव च इति मानवे १०
अध्यायः ॥
सुधर्म्मः पुं जिनगणाधिप
विशेषः इति हेमचन्द्रः ॥।
सुधर्म्मा स्त्री देवसभा इत्य।
मरः ॥
सुधर्म्मा पुं देवसभा कुटुम्बी
इत्युणादिकोषः ॥
सुधर्म्मी स्त्री देवसभा इत्य
मरटीका ॥ ॥

सुधा स्त्री अमृतं इत्यमरः ले
पनं मूर्वी स्नुही गंगा इष्टका
इति मेदिनी ॥
विद्युत् रसः तोयं धात्री ॥
इति नानार्थध्वनिमंजरी ॥ ॥
हरीतकी मधु इति शब्दचंद्रि
का शालपर्णी इति ॥
राजनिर्घण्टः ॥
सुधांशुः पुं चंद्रः इत्यमरः॥
सुधांशुतैलं क्ली कर्पूरतैलं इति
राजनिर्घण्टः ॥
सुधांशुरत्नं क्ली मौक्तिके इति
राजनिर्घण्टः ॥
सुधाकरः पुं चन्द्रः इतिशब्द ॥
रत्नावली ॥
सुधांगः पुं चन्द्रः इति त्रिकाण्ड
शेषः
सुधाजीवी पुं सुधया लेपनेन
जीवतीयः राज इतिभाषा तत्
पर्य्यायः पलगंडः २ लेपकः
३ इतित्रिकाण्डशेषः ॥
धी सुधांशुः पुं चन्द्रः इति शब्दरत्ना
वली अमृतपात्रं च ॥
सुधानिधिः पुं चन्द्रः इतिशब्द
रत्नावली ॥
सुधापयः पुं स्नुहीक्षीरं इति
केचित् ॥ ॥

सुधापाणिः पुं धन्वन्तरिः इति
केचित् ॥
सुधाभुक् पुं देवः इति हेम
चन्द्रः ॥
सुधाभृतिः पुं चन्द्रः यज्ञ इति
शब्दांकितमेदिनी हस्तादर्शः।
मेदिन्यां सुधासूति रिति ॥
पाठः ॥
सुधामयः पुं भूपालभवने इति
शब्दरत्नावली अमृता ॥
त्मके त्रि यथा रासोल्लासभरे।
ण विभ्रमभृतामाभीरवामभ्रु
वां अभ्यर्णे परिरभ्य निर्भर
मुरः प्रेमान्धया राधया साधु
त्वद्वदनं सुधामयमिति व्याहृ
त्य गीतस्तुतिव्याजादुद्भटचुम्बितः
स्मितमनोहारी हरिः पातु वः ॥
इति श्रीजयदेवः ॥
सुधामोदकः पुं यवासशर्करा
इतिराजनिर्घण्टः ॥
सुधामोदकजः पुं तवराजो ॥
गुडखंडः इतिराजनिर्घण्टः ॥
सुधावर्षी पुं ब्रह्मा इतिशब्दरत्ना
वली बुद्धभेदः इति ॥
त्रिकाण्डशेषः ॥
सुधावासः पुं चंद्रः यथा ॥
ज्योतिषां पतये तुभ्यं ॥

ज्योतिषां पतये नमः नम
स्ते रोहिणीकांत सुधावासन
मोऽस्तु ते इति तिथ्यादि ॥
तत्वे ॥
सुधावासा स्त्री त्रपुषी इति
राजनिर्घण्टः ॥
सुधासिंधुः पुं अमृतसमु
द्रः यथा सुधासिंधोर्मध्ये सु
रविटपिवाटीपरिवृते मणि
द्वीपेनीपोपवनवति चिन्तामणि
गृहे शिवाकारे मंचे परमशि
वपर्य्यंकनिलयां भजन्ति त्वां
धन्याः कतिचन चिदानन्दलहरीं
इत्यानन्दलहरी ॥
सुधासूतिः पुं यज्ञः चन्द्रः॥
पद्मं इति शब्दरत्नावली ॥
सुधास्रवा स्त्री प्रतिजिह्वा अ
लिजिह्विका इति त्रिकाण्डशे
षः रुदन्तीवृक्षः इति
राजनिर्घण्टः ॥
सुधाहरः पुं गरुडः इतिश
ब्दरत्नावली ॥
सुधाहृत् पुं गरुडः इति हेम
चन्द्रः ॥
सुधितिः पुं स्त्री स्वधितिः इत्य
मरटीकायां रायमुकुटः ॥
सुधीः पुं पंडितः इत्यमरः॥

सुधीः स्त्री सुंदरबुद्धिः सुष्ठु
धीः इति मुग्धबोधव्याकरणं
शोभनबुद्धियुक्ते त्रि
सुधूम्यः पुं स्वाडुनामगंधद्र
व्यं इति राजनिर्घण्टः ॥
सुधोद्भवः पुं धन्वन्तरिः इ
ति त्रिकाण्डशेषः ॥
सुधोद्भवा स्त्री हरीतकी इति
त्रिकाण्डशेषः ॥
सुनन्दं क्ली बलभद्रस्य मुषलं
इति शब्दमाला सुंदरानन्द
जनके त्रि ॥
सुनन्दः पुं श्रीकृष्णस्य पार्षद
विशेषः यथा सुनंद नन्दप्र
मुखैः स्वपार्षदैः चक्रादिभि
र्मूर्त्तिधरैर्निजायुधैः पुष्ट्या
श्रिया कीर्त्यजयाखिलर्द्धिभि
र्निषेव्यमाणं परमेष्ठिनां पतिं
इति श्रीभागवते ९ स्कन्धे
द४ अध्यायः द्वादशविधरा
जगृहांतर्गतगृहविशेषः यथा
यद्यत्रैवोच्यते मानं तस्याप्येकं
तु दीर्घं सर्वत्र निःक्षिपेत् ॥
आयामेन सुनन्दः स्याद्गजह
स्तैस्तु पंचभिः परिणाहेच तुर्भि
स्तु राजहस्तैः प्रतिष्ठितः ॥ ८ ते
नैवकल्पना राजः सुहस्तः ॥ ॥

अस्याधिदेवता भौमो रक्तती
दे वसुंधरा द्वाराणि विंशति
स्त्वास्य रक्तचित्राहृतानि च ॥
रक्तपट्टाहृतो गेहः सकला ॥
र्थप्रसाधकः अत्र स्थित्वा मही
पालः सुचिरं पाति मेदिनीं द्वी
चैः पा मत्स्यः ४ इति सुनन्द ॥
सुन्दरः इति च पाठः ॥
इति युक्तिकल्पतरुः ॥
सुनंदा स्त्री उमा गोरोचना इति
रोहिणी नारी इति ॥
विश्वः उमासखिभेदः इति ॥
शब्दमाला अर्कस्त्री वृद्धः ॥
हेषरमूल इति भाषा इति
रत्नमाला ॥
सुनयनः पुं मृगः इति शब्दच
न्द्रिका शोभनचक्षुर्युक्ते त्रि सुन
यना स्त्री नारी इतिराज ॥ ॥
निर्घण्टः ॥
सुनाकृतः पुं कर्पूरकः इति
शब्दचन्द्रिका ॥
सुनाभः पुं मैनाकपर्वतः ॥
इति त्रिकाण्डशेषः ॥
सुनामद्वादशी स्त्री द्वादशमा
सीयद्वादशीकर्त्तव्यव्रतविशेषः य
था अम्बरीष उवाच कथं सुनाम
भिर्देवो द्वादशभिस्तु निसत्तम ॥

पूज्यते केशवो मुने भक्ति
कामफलार्थिभिः वशिष्ठ उवा
च शृणुष्वैकमना भूपः सुनाम
द्वादशीं शुभां सर्वपापहरां स्वर्ग्यां
भुक्तिमुक्तिप्रदायिकां मनसा
पि चिकीर्षन्ति ये द्वादशीं नरोत्त
माः तेपि घोरं न पश्यन्ति पुनः सं
सारसागरं आद्यं सर्वव्रता ।
नां तु वैसवानां नृपोत्तम न
रैः स्त्रीभिश्च कर्त्तव्यं विलोकतु
ष्टिकरं परं मार्गशीर्षे शुभे
मासि शुक्लपक्षे यतव्रतः प्र
थमं चैव गृह्णीयात् द्वादशीं
विधिवन्नरः मनोवाक्कायचेष्टा
भिः स विशुद्धो जितेन्द्रियः द
शम्यां नियतः स्नात्वा प्रणिप
त्य जनार्दनं हविष्यान्नकृताहा
रः शुचिर्भूत्वा भवेद्व्रती उपलिप्ते
शुचौ देशे भक्षयेत् दन्तधावनं
उपोष्यैकादशीं सम्यक् पूजयि
त्वा जनार्दनं सुनामद्वादशीं दे
व ग्रहं भो हेपरेऽहनि ॥ एवं
संकल्प्य नियमं प्रणम्य गरुड
ध्वजं दशम्यामेकभक्ताशी से
यतः संवसेन्निशां एकाद
श्यां ततः कुर्यादेकचित्तः समा
हितः पूर्वं प्रपूजयेत्सूर्यं त ॥

तो देवं प्रपूजयेत् नमस्ते देव
देवेश नमस्ते भक्तवत्सल ॥
भास्कराय नमस्तुभ्यं रवये का
श्यभानवे नमः सूर्याय देवाय
नमस्ते सप्तसप्तये एकस्मै हिन
मस्तुभ्यमेकचक्ररथाय च ज्यो
तिषां पतये नित्यं सर्वतेजो हा ।
राय च दिवाकर नमस्तेऽस्तु ।
प्रभाकर नमोऽस्तु ते एवं संपू
ज्य विधिवत् पुष्पधूपानुले
पनैः दीपैर्वस्त्रैः सनैवेद्यै ।
स्ततो विष्णुगृहं व्रजेत ततो
ऽनुस्नापयेद्देवं दधिक्षीरघृ
तादिभिः सर्वौषधजलैः पुण्य
स्तथा चन्दनवारिभिः कुंकु
मोशीरकर्पूरैश्चन्दनेन विले
पयेत् अच्युतं चार्चयेन्मल्ला
मालती कुसुमैर्भृशं गुग्गु
लुघृतसंयुक्तं धूपं दद्याद्ध ।
रिंशा पायसापूपसंयावकर
म्भाज्यकदम्बकैः नैवेद्यं ह
रये दद्यात् फलमोदकपान्वि
तैः गीतवाद्यै हरेर्हैव प्रणाम
श्चभक्तिभृतः एवं पूजां हरेः
कृत्वा द्विजं ज्ञानप्रदायकं पू
जयेदंतरं नास्ति विप्रकेशव
योरपि ततोऽव्रणं समाप्तं ॥ ॥

मधुचंदनेन नवं वृतं सुवर्णे
तोयसंपूर्णं न्यसेद्देवस्य संनि
धौ सदेम मौक्तिकान्वितं व
स्त्ररत्नसुवर्णकं न्यस्य गंधैस्स
वस्त्रेन पूजयेत्तत्र केशवं यस्य
योसौ स्थिता मेघाः सर्वसंधिषु प
न्नगाः सागराः जलदाश्चाः स्रो
तस्त्रायात जगत्पतिः वनस्पति
रसो दिव्यः सर्वगंधेषु चोत्तमः
घृतेन सह सोस्मि श्रीधूपोयं प्र
तिगृह्यतां केशवः केशिहा ।
केशि कंसारिष्टनिसूदनं स
र्वकामप्रदो देवः समे पापं व्य
पोहतु एवमभ्यर्च्य देवेशं प्र
णिपत्य क्षमापयेत् द्वादश्यां
तत्र तोयेन स्नापयेत्तेन मान
वः सर्वपापविनिर्मुक्तो वैष्ण
वीं लभतेतनुं कृताभिषेकं
पुण्यात्मा सम्यगभ्यर्च्य केश
वं नवनीतकृतां धेनुं ब्राह्म
णायोपपादयेत् केशवः प्री
यतां देवः केशिहंता महाच्यु
तः समे भवतु सुप्रीतः इत्यान्
कामान्प्रयच्छतु एवं प्रदक्षि
णं कृत्वा शृणु तस्यापि यत्फ
लं त्रिंशाब्दकृतं पापं हित्वा स
त्रिविधं नरः साष्टिं वर्षसहस्त्रा॥

णि स्वर्गे मोदति देववत् यदा
कालाद्दिह्यति स धर्मधनवान्
भवेत् अभावादथ धेनूनां तत्
पात्रं कल्पयेत्ततः तत्फलं हि
विनिर्दिष्टं यथाशक्त्या तु दत्ति
णा भक्त्या फलं समाप्नोति भा
क्तिरेवात्र कारणं पौषस्यैव
तु मासस्य योप्येवं कल्पयेन्नरः
समाहितमना भूप रसधेनु ।
प्रदायकः आपोनारा इति ।
प्रोक्ता आपो वै नरसूनवः अ
यनं वर्त्मनी तस्मात् नारा
यण इति स्मृतः नारायणः
प्रीयतां मे देवो नित्यं समे पापं
व्यपोहतु ततः प्रदक्षिणं कृ
त्वा ब्राह्मणान् भोजयेत्ततः प
वं हि पौषमासस्य तस्य पुण्यफ
लं शृणु षष्टे वाहैः कृतं पा
पं स्वल्पं वा यदि वा बहु हत्वा
स्वर्गं समाप्नोति वर्षाणामयुता
युतं माघस्यैव तु मासस्य द्वा
दश्यां शुक्लपक्षतः यः तिपा
हि सुविभूत्वा एकविंशः समा
हितः ॥ स्नापने पूजने
नित्यं ब्राह्मणानां च तर्प
णे प्रदाने नृपश्रेष्ठ ॥ ॥
इमं मंत्रमुदीरयेत् ॥

या लक्ष्मीश्च पुरा त्रेयी भगिनी
शशिनोः तुजा भक्तो त्वमपि ।
तस्याश्च सर्वकामद माधव प्री
यतां माधवो देवो मधुकैटभ
सूदनः वासुदेवो जगन्नाथो म
म पापं व्यपोहतु ॥ एवं यः
कुरुते सम्यक् तस्य पुण्यफलं शृ
णु यावज्जन्म कृतं पापं हत्वा सर्व
मशेषतः दिव्यवर्षसहस्त्राणि स्व
र्गे वसति षोडश गुडधेनुप्रदो
माघे इत्याह ततः सदा सुखी भ
वेद्राजन् निरातंकः पुत्रैश्च ।
र्थ्य समन्वितः तत्र विष्णुपरो भू
त्वा कामान्मोक्षमवाप्नुयात् फा
ल्गुनामलपक्षस्य द्वादश्यां नि
यतः शुचिः पूजयित्वा विधाने ।
नेदेवदेवं स्वशाक्तितः मंत्रेण
ने नराजेन्द्र गोविन्दः प्रीयता
मिति गवां भक्तोऽस्मि गोस्वा
मी गोवासो गोकृतालयः ॥
सर्वकामप्रदो नित्यं समे पापं
व्यपोहतु स्वत्वेवं शार्करा धेनुं
भक्त्या दद्यात् द्विजातये ततः प्र
दक्षिणं कृत्वा शृणु पुण्यं यथा
तथ्यं बलीवर्दसहस्त्राणां दश
नां धुर्यवाहिनां तत्स्तत्फ
लमाप्नोति द्वादश्यां यद्भवे ॥॥

त्नृप दिव्यवर्षसहस्त्राणि स्वर्गे ति
ष्ठति स्वर्गवत् चैत्रस्य द्वादश्यां
शुक्लायामुपोष्य नृपोत्तम ॥
स्नात्वा प्रपूजयेद्विष्णुं जगतो
न्तरचारिणं पूर्वोक्तविधिवत्
स्नात्वा गोमूत्रे गोमयेन च स्ना
पयित्वामृतेनैव पंचानां गंध
संयुतैः अद्भिः पश्चात् प्रपू
ज्यैवं गंधधूपविलेपनैः पु
ष्पैर्वा सोभिरेवं हि मंत्रेणानेन
न बुद्धिमान् प्रवेशने यथा
प्रीतो जगतां रक्षणाय च दु
ष्टानां विनिर्जितमसि विष्णु
रतो हरे विष्णुर्भवतु मे प्रीतो
जिष्णुर्देवः सनातनः सर्वपा
पविनाशाय विष्णुर्मे प्रीयता
मिति मधुधेनुमभावाच्छक्ति
तः पात्रमेव च दत्वा यत्फल
माप्नोति तद्दिह्येकमनाः शृ
णु पूर्वजन्मनि यत्पाप मिह
जन्मनि संप्रते वर्तते सकलं
हत्वा स्वर्गलोके महीयते वै
शाखस्य तु मासस्य पूजयेन्म
धुसूदनं पूर्वोक्तविधिना राज
न्सौवर्णं मधुसूदनं जलकुंभे
तु संस्थाप्य मंत्रेणानेन पूजयेत्
एकार्णवे जले धातः कृत्वा वेदाः

पुगदरे मधुना ते दत्तः सो।
पि तेनासि मधुसूदनः स मे
भवतु सुप्रीतो देवदेवः सना
तनः सर्वपापविनाशाय प्री
प्रीयतां मधुसूदनः घृतधेनुम
थोदत्वा ब्राह्मणान् भोजयेत
तं ततः प्रदक्षिणं कुर्यात् त
त्वा देवान् यथोपगान् एवंव
तपमासस्य तस्य पुण्यफलं
शृणु कपिलानां सहस्रस्य सम्य
दत्तस्य पुष्करे तत्फलं समवाप्नो
ति भक्तियुक्तोप्यसंशयः याव
दिन्द्रो वसेत् स्वर्गे तावदेव स
तिष्ठति ज्येष्ठस्येव तु मासस्य
शुक्लपक्षे तु द्वादशी पूजा॥
येद्विधिवद्भक्त्या समुपोष्य।
त्रिविक्रमं जलधेनुमथो दद्या
द्विप्राय नियतः शुचिः यज्ञभा
गभुजो देवान् सन्निहत्य क्र।
मैस्त्रिभिः त्रैलोक्यमाहृतं त
स्मात् तेनासि त्वं त्रिविक्रमः
त्रिविक्रमं त्रिलोकेश प्रीणया
मि त्रिविक्रमं ततः प्रदक्षिणं
कृत्वा ब्राह्मणेभ्यश्च दक्षिणां द
त्वात् भोजयेत्तोस्तु ष्ठाणतस्या
पियत् फलं वाजपेयस्य यज्ञस्य
सम्यगिष्टस्य पार्थिव तत्फलं।

लभते मर्त्यः परत्रेह सात्वीभ
वेत् वामनं तु तथाषाढे स
मुपोष्य प्रयत्नतः द्वादशीं निय
ताहारो वामनं तत्र पूजयेत्
द्विजाय सर्वदेवानां आदित्या।
कामदो यथा तथा लभव
मेदेव वामनो वलिवंधनः ॥
तिलधेनुं ततो दद्यात् वाम।
नः प्रीयतामिति तदभावात्
घा पात्रं यथाशक्त्या च दक्षि
णां पूर्वजन्मकृतं पापमिह
जन्मकृतं च यत् तत् सर्वं वि
निहत्याशु परत्र च शुभां गतिं
श्रावणस्य तु मासस्य द्वाद।
श्यां शुक्लपक्षतः यः स्थितेन्द्रिय
तो भूत्वा समुपोष्य जनार्दनं
समभ्यर्चयेत् यथाशक्त्या पूर्वो
क्तविधिना ततः धेनुं सर्वगुणो
पेतां ब्राह्मणाय निवेदयेत् मे
त्रेणानेन राजेन्द्र पौराणे विधि
नेन च समादाय ततो लक्ष्मीं।
लोकेभ्यः क्षीरसागरे सुप्तोसि
श्रावणे मासि श्रीधरोसि जग।
गत् पते श्रावणे श्रीधरो देवः
श्रीवत्सः श्रीनिकेतनः प्रीय
तां द्विजः श्रियः कान्तो गतिमि
ष्टां ददातु मे गवां दश ॥ ॥

सहस्रेण पात्रदत्तेन यत्फ
लं सकलं लभते मर्त्यो भक्तियु
क्तो न संशयः स्वर्गेषु विपुलान्
भोगान् भुनक्ति सुरराडिव ॥
तेनैव विधिना राजन् मासे भा
द्रपदे ततः समुपोष्य ततो भक्त्या
हृषीकेशं प्रपूजयेत् ॥ शुक्ला
धेनुं मथो दद्यात् यथाविभव
विस्तरात् हृषीकाणीन्द्रिया
णाह्यस्तेषामीशो जगत्पतिः
करोति कर्तृभूतोऽसौ हृषी।
केशो भवान् ततः देवदेव हृषीके
श भूतेषु प्रभवाव्ययं ॥ प्री
णयामि त्वां से प्रीतो मम पापं
व्यपोहतु एवं प्रदक्षिणं कृत्वा
विष्णुलोके महीयते द्वादश्यां।
समुपोष्यैव पद्मनाभं तथाश्वि
ने पूजयेद्विधिवद्भक्त्या गंध
धूपविलेपनैः गंधधेनुं ततो
दद्यात् कर्पूरागुरुचंदनैः कुं
कुमेन हिराजेन्द्र विलिप्तांश्च विव
र्जयेत् एकार्णवगते लोयेस्व
पतो यस्य वेधसः निवासाय भ
वन्नाभ्यां पद्मनाभोसि इत्युत
प्रीयतां पद्मनाभो मे दुष्कृतं।
चोपशाम्यतु इत्युक्त्वा तु सम
भ्यर्च्य दद्यात् धेनुं द्विजातये ॥

इत्येवं तपमासस्य तस्य पुण्य
मतः शृणु सप्तजन्मकृतं पापं
स्वल्पं वा यदि वा बहु दग्धा
तत् सकलं भूप विष्णुलोकं स
गच्छति कार्तिकस्य तु मासस्य
एकादश्यामुपोषितः प्रसन्ने।
बोधयेद्रात्रौ श्रद्धाभक्तिसम।
न्वितः नृत्यगीतैस्तथा वाद्यै
र्ऋग्यजुः साम मंगलैः वी
णापणवशब्दैश्च पुराणश्रव
णेन च वासुदेवकथाभिश्च स्तो
त्रैरन्यैश्च वाद्वैः सभाषिते रि
न्द्रजाले भूमिस्पर्शाभिरेव च
पुष्पैर्धूपैश्च नैवेद्यै दीपहस्तैश्च
प्रशमनैः ॥
होमैर्भक्ष्यैरपूपैश्च फलैः शाकै
श्च पायसैः इक्षोर्विकारै ॥
मधूना द्राक्षालोडैः सदाडि।
मैः क्रमेलकस्य मंजर्यास।
र्द्धिकालवणेन च द्रव्याभ्यां
श्वेतरक्ताभ्यां चन्दनाभ्यां च सर्व
दा कुंकुमालक्तकाभ्यां च रत्नात्
चैः सकंकणैः तथा नानावि
धैः पुष्पैर्द्रव्यैर्वीविक्रियापनैः
तस्यां रात्र्यां व्यतीतायां द्वादश्यां
मरुणोदये स्नात्वा नदीजलैः
शुभैः प्रतिमां स्नापये ॥ ॥

ततः उद्वितां त्वपरे रम्यां ता
म्रां रौप्यां सुवर्णजां वैस
वी प्रतिमा यत्र चित्रे समाङ्क
चित् भवेत् तत्रस्नानादि पूजा
च वेद्यां कार्य्या च विष्णवे ॥
आदौ घृतेन तैलेन मधुनात
दनंतरं दध्ना क्षीरेण च ततः
पंचगव्येन शास्त्रवित् उद्वर्त्त
नं माषचूर्णं मसूरामलका
निच रोध्रं कालीयकं चैव नागरं
वर्णकं तथा सर्षपाश्च प्रियंगु
श्च मांसलं गारसेस्तथा सर्वौष
ध्याः सर्वगंधाः सर्वबीजानि कांच
नं मंगल्यानि यथालाभं रत्नानि च
जलोदकं हस्तिदन्तोद्धृतां मृच्चवृ
षशृंगोद्धृता तथा नदीतीरोद्भ
वां स्थानात् वल्मीकात् सं
गमात् हृदात् हस्तिस्थानाच्च
सरसस्तथा पर्वतमस्तकात्
एताभिः स्नाप्य देवेशं दद्यात् गो
रोचनां शुभां ततस्तु कलसादेषा
यथाप्राप्तं स्वलंकृताः जा
तीपल्लवसंयुक्ताः सफलाश्च
सकांचनाः पुण्याहवेदशब्देन
वीणा वेणुरवेण च पाठेन
मधुरेणैव सूतमागधवन्दिना
एवं संस्थाप्य गोविन्दं स्वनुलि

प्तं स्वलंकृतं सवासं पूजयेत्।
त्तं सुमनोभिश्च कुंकुमैः दीपै
र्धूपैर्मनोज्ञैश्च पायसेन तु भूरि
णा नानारत्नप्रभैश्चैव होमैः पु
ष्पैः सहादिणैः वासोभिर्भू
षणैर्हृद्यैर्गोभिरश्वैर्गजै
रपि ब्राह्मणाः पूजनीया।
स्व वि लो रायां समृतेयं
विलो रात्रौ प्रसूमस्य दामो
दरगतेयतः ब्रह्मोउस्य चैनेनामिता
मेवदि द्विजरूपेण ते विसा
प्रकृत्यापा सनातनी इत्येवं
पृथिवीदानात् फलं प्रा
प्नोति मानवः सुवर्णस्य महा।
धेनुं दत्वा नृपवरोत्तमः द
त्वा पापान्यशेषाणि यात।
जन्मान्तराणि वै ॥ वैलवं
लोकमाप्नोति यावदिन्द्रा॥
श्रुतं दृष्टं सम्यगत्र व्रतेची
र्णे सप्तजन्मानुगं फलं ददाति
भगवान् विष्णुः कामान् भो
दंन रेष्वर ब्राह्मणान् भो
जयेद्भक्त्या भक्ष्यैरुच्चावचै॥
रपि ततः प्रदक्षिणं कृत्वा
यथाशक्त्या च दक्षिणां॥
कलसान् द्वादशैवैव ब्राह्म
णेभ्यः प्रदापयेत् वस्त्रे॥ ॥

णावेष्टितग्रीवान् हेमगर्भोप
शोभितान् दधिक्षीरयुतांश्चै
वस्रगुज्ज्वान् नृपभूरिशः शक्ति
र्यथा तथा दद्यात् भक्तिरेवात्र
कारणं प्रसंगेनापि योराजन्
सुनामद्वादशीं नरः करोति।
पुण्यभागी स यथा दैत्योऽद्ध
बोबलिः एवं यः कुरुते राज
न् सुनामद्वादशीं नरः राज
पस्य सूययत्तस्य फलं समधिकं भवे
त् सर्वदानेषु यत् पुण्यं यच्चा।
पुण्यं तपोवने सर्वतीर्थेषु यत्
पुण्यं तत्पुण्यं समुदाहृतं गावो
द्वादशादत्वा वस्त्रयुग्मान्विकां
चनं अलाभे चैव गामेकां पात्रे
वा स्वर्णसंयुते मासे मासेऽथवा
वाप्येवं चंचलं जीवितं यतः व
कुविघ्नानि धर्मस्य कर्त्तुमिच्छ
रं नजायते पतत्स्वल्ला स्या।
मेधावी ततत्र ग्लपयेन्मनः न
तस्यवित्तलाभोऽस्ति भक्तियुः।
सो हिकेशवः अनेनविधिनाय
स्तु द्वादशीं प्रतिवत्सरं कृत्वा
नरः प्रयाति विष्णुलोकमनाम
यं सुनामद्वादशी सैव व्रतानां
मुत्तमा नृप आद्या नरैस्तु कर्त्त
व्या तोषयद्धि जनार्दनं ॥ य॥

स्त्रेनां कीर्त्तयेत् पुण्यं शृणुया
त् द्वादशीं नरः तावुभौ गच्छे।
तः स्वर्गं कर्त्ता विष्णुपुरं व्रजे
त् इति वह्निपुराणे सुनामद्वा
दशीनामाध्यायः ॥
सुनारः पुं शुनीस्तन्यं सर्पाण्डं
कलविंक इति मेदिनी सुनाल
कः पुं वकपुष्पवृक्षः ॥
इति शब्दचन्द्रिका सुन्दरना
ल युक्तेत्रि ॥
सुनासिका स्त्री काकनासा इ
ति राजनिर्घण्टः शोभननासा
तद्युक्ते त्रि ॥
सुनासीरः पुं इन्द्रः इत्यमरः
सुनाशीरश्च ॥
सुनिर्घोसा स्त्री जिंगिनी वृक्षः
इति भावप्रकाशः ॥
सुनिश्चितः पुं बुद्धविशेषः
इति त्रिकाण्डशेषः ॥
सुनिश्चितः त्रि सुन्दरनिश्चय
विषयीभूतः इति हलायुधः॥
सुनिषण्णं क्ली सुनिषण्णक
शाकं इति त्रिकाण्डशेषः ॥
सुनिषण्णकं क्ली शाकविशेषः
सुषुणी इति भाषा तत् पर्य्यायः
वितुन्नं २ इत्यमरः सुनिषण्णं
३ चुचूः ४ इति त्रिकाण्ड ॥ ॥

शेषः अस्य गुणाः । अवि
दाही त्रिदोषघ्नः संग्राही सु
विषमकः इति राजवल्लभः । अ
न्यत् सितावरशब्दे द्रष्टव्यं सु
निषण्णः त्रि अत्युत्तमः सुपू
र्वं निपूर्वं सदधातोः क्तप्र
त्ययेन निष्पन्नः ॥
सुनीतिः स्त्री शोभननयः ध्रु
वमाता इति मेदिनी शोभन
नीतिविशिष्टे त्रि ॥
सुनीथः त्रि धर्म्मशीलकः इ
त्युणादिकोषः ब्राह्मणः इ
ति संक्षिप्तसारोणादिवृत्तिः ॥
सुनीलं क्ली लामज्जकं इति
राजनिर्घण्टः ॥
सुनीलः पुं दाडिमः इति राज
निर्घण्टः सुन्दरनीलवर्णश्च
सुनीलकः पुं नीलभृङ्गराजः
नीलासनः नीलरत्नं इति रा
जनिर्घण्टः ॥
सुनीला स्त्री अतसी विष्णु
क्रान्ता जरतीतृणं इति
राजनिर्घण्टः ॥
सुनु क्ली जलं शोभना नौ
यत्र तत् सुनु जलं इति मुग्ध
बोधटीकायां दुर्गादासः ॥
सुनौः त्रि शोभननौकाविशि
ष्टः शोभना नौर्यत्र यस्य वा
इति बहुव्रीहि समास निष्पन्नः
शोभननौकायां स्त्री ॥ सु
न्दः पुं वानरविशेषः यथा
जाम्बवान् ऋषभः सुन्दो व
ल्लः शतवलिः पृथुः वृक्षा
नीकाश्च यताश्च द्रुमानादाय
सर्वतः इति वाल्मीकीये रामा
यणे युद्धकाण्डे ४० सर्गः दान
वविशेषः यथा अथ कालोप
मौ युद्धे सुतौ सुन्दोपसुन्दयोः
यज्ञविघ्नकरौ तौ तेनैव रामा
मि पुत्रकं इति ॥
रामायणे बालकाण्डे २० सर्गः
सुन्दरं त्रि मनोहरं तत्
पर्य्यायः रुचिरं २ चारु ३
सुषमं ४ साधु ५ शोभनं ६
कान्तं ७ मनोरमं ८ रुच्यं ९
मनोज्ञं १० मञ्जु ११ मञ्जुलं १२
इत्यमरः मनोहारि १३ सौ
म्य १४ भद्रकं १५ रमणीयं १६
रामणीयकं १७ इति तट्टीका
बन्धूरं १८ बन्धुरं १९ पेशलं २०
पेसलं २१ वामं २२ रामं २३
अभिरामं २४ नन्दितं २५
सुमनं २६ इति शब्दरत्नावली
वल्गु २७ हारि २८ ॥ ॥

सुरूपं २९ अभिरूपं ३० दिव्यं
३१ इति जटाधरः ॥
सुन्दरः पुं कामदेवः इति
केचित् वृत्तविशेषः सुँदरी
इति भाषा यथा जंबूवद्बोल
खदिरसिंधुवाराश्च सुंदरः यथा
मन्यतमाकारं निर्म्मलाम्बुनि
भावयेत् इति सुखबोधः सु
न्दरी स्त्री नारीभेदः इत्यमरः
सुष्ठु उनत्ति आर्द्रयति मनः
इति सुन्दरी उन्दधी क्ले दे
सुपूर्वः नाम्नीति अरः निपा
तनात् उलोपः नदादित्वाद्ङीप
रूपलावण्यसंपन्ना सुन्दरी
इति तट्टीकायां भरतः तरुभे
दः इति मेदिनी हरिद्रा इति
शब्दचन्द्रिका त्रिपुरसुन्दरी
यथा अंगुष्ठानामिकायोर्गत्
वामहस्तस्य पार्वति तर्पयेत्
सुन्दरीं देवीं सशुद्धां च सवा
हनां इति तन्त्रसारे श्रीविद्याप्र
करणे योगिनीविशेषः यथा
तावन्मंत्रं जपेद्विद्वान् या
वदायाति सुन्दरी ज्ञात्वा दृढं
साधकेन्द्रं निशीथे याति नि
श्चितं इति तत्रैव योगिनीसाधन
प्रकरणे ॥ ॥
सुभ्रयुतौ हिंसे इति कविक
ल्पद्रुमः सुभ्नते इति दुर्गा
दासः ॥
सुन्वन् त्रि यज्ञकर्त्ता यथा
सुञो यज्ञसंयोगे सर्वे सुन्व
न्तः सर्वे यजमानाः सत्रिणः
इति सिद्धान्तकौमुदी ॥
सुपक्वः पुं सुगन्धाम्रः इति श
ब्दचन्द्रिका शोभनपरिणते त्रि
सुपत्रं क्ली तेजपत्रं इति
शब्दचन्द्रिका ॥
सुपत्रः पुं आदित्यपत्रः पलि
वारतृणं इति राजनिर्घण्टः ॥
सुपत्रकः पुं शिग्रुः इति राज
निर्घण्टः ॥
सुपत्रा स्त्री रुद्रजटा शता
वरी पालक्यं शमी शालप
र्णी इति राजनिर्घण्टः ॥
सुपत्रिका स्त्री जतुका इति
राजनिर्घण्टः सुपथ पुं सन्मार्गः यथा
सुपथ स्तनिपेयाश्च सुपेथाः
सुपथोपिच इति शब्दरत्नाव
शोभनपथयुक्ते त्रि ॥
सुपथ्या स्त्री श्वेतचिल्ली इति
राजनिर्घण्टः सततवाची त्रि
सुपंथाः पुं सत् पथः इति

शब्दरत्नावली ॥
सुपद्मः पुं पद्मनाभदत्तकृत
व्याकरणविशेषः यथा येद्या
वधेयंवीराः श्रीपद्मनाभनिवे
दितं उक्तो व्याकरणादर्शः
सुपद्मस्तस्य पंजिका ततो
हि बालबोधाय प्रयोगाणां
चदीपिका उणादिवृत्तीरवि
ता तथाचधातुकौमुदी इति
तदीयपरिभाषावृत्तिः शोभन
पद्मेच शोभनपद्मविशिष्टे त्रि
सुपद्मा स्त्री वचा इति शब्द
चन्द्रिका ॥
सुपर्णः पुं गरुडः इत्यमरः
स्वर्णचूडपक्षी कृतमालकवृ
क्षः इति मेदिनी शोभनपर्ण
विशिष्टे त्रि ॥
सुपर्णकः पुं आरग्वधवृक्षः
इति रत्नमाला सप्तच्छदवृक्षः
इति जटाधरः गरुडः इति हे
मचन्द्रः सुपर्णकेतुः पुं
विष्णुः इति ॥
हलायुधः
सुपर्णा स्त्री पद्मिनी इति शब्द
माला ॥
सुपर्णाख्यः पुं नागकेशरः
इति त्रिकाण्डशेषः ॥ ॥

सुपर्णिका स्त्री स्वर्णजीवन्ती
पलाशी शालपर्णी रेणुका
बाकुची इति राजनिर्घण्टः ॥
सुपर्णी स्त्री कमलिनी गरुड
माता इति मेदिनी ॥
सुपर्णीतनयः पुं गरुडः इति
हलायुधः सुपर्वा पुं देवता
इत्यमरः वाणः ॥
वंशः पर्व धूमः ॥
इति मेदिनी सुपर्वा ॥ ॥
स्त्री श्वेतदूर्वा इति राजनि
र्घण्टः सुन्दरपर्वविशिष्टेच
सुपाक्यं क्ली विड्लवणं इति
राजनिर्घण्टः ॥
सुपात्रं क्ली योग्यव्यक्तिः त
त्रदानविधिर्यथा तस्मात् स
र्वात्मना पात्रे दद्यात् कनकद
क्षिणामिति सर्वेषामेव पात्रा
णांपरं पात्रंमहेश्वरः पतन्तं।
त्रायते यस्माद्दतीव नरका
र्णवादिति पात्रापणाध्यात्मका
मुख्या विमुक्ता स्वग्निहोत्रि
णः देवताश्च तथा मुख्या गोदानं
होतदुत्तममिति सर्वत्रगुणवद्दानं
सुपात्रादिष्वपि स्वस्तदेवो काले
विधानेन पात्रे दत्तं विशेषतः पात्रे
विद्या

तपस्यादि गुणयुक्ते इति च
प्रायश्चित्ततत्त्वे अपि च त
स्मात् सर्वात्मना पात्रे दद्यात्
कनक सुतमं अपात्रे पात।
येदत्तं सुवर्णं नरकार्णवे इ
ति शुद्धितत्त्वे शोभन भाज
ने शोभनंच तत् पात्रंचेति।
इति कर्म्मधारय समास निष्प
न्ने उत्तमपात्रयुक्ते त्रि शोभ
नपानभाजने पक त ॥
कारवत् ॥
सुपानः त्रि पानयोग्यः सुखेन
पीयतेऽसौ आतोऽतोऽ दरि
द्र इत्यनेन कर्म्मणि अनप्रा
त्ययेननिष्पन्नः इति मुग्धबो
धव्याकरणं ॥
सुपार्श्वः पुं चतुर्विंशतिहन्नार्ह
दन्तर्गतहन्नार्हद्विशेषः इति
हेमचन्द्रः प्लक्षवृक्षः इति
राजनिर्घण्टः पक्षिविशेषः स
च संपातिपुत्रः यथा निर्दग्ध
पक्षं संपातिं वानराः सुमहौ
जसः इत्युपक्रम्याह सीता।
केन वा दृष्टा को वा हरति मै
थिलीं तदाख्यातु भवान् सर्वं
गतिर्भव वनौकसां सह वीर
प्रतिसंक्रमान्सीताश्च ॥ ॥

निसमाहितान् पुनराश्वासयन्
प्रीत इदं वचमब्रवीत अह
मस्मिन् गिरौ दुर्गे बहुयोजन
मायते चिरान्निपतितो वृद्धः क्षी
णप्राणपराक्रमः तं मामेवं
गतः पुत्रः सुपार्श्वो नामना
मतः आहारेण यथाकालं वि
भर्त्ति पततां वरः इति
वाल्मीकीये रामायणे किष्किन्धा
काण्डे ५९ सर्गः ॥
सुपार्श्वकः पुं चतुर्विंशतिभाव्य
र्हदन्तर्गतअर्हद्विशेषः इति
हेमचन्द्रः गर्द्दभाण्डवृक्षः
इत्यमरः ॥
सुपिङ्गला स्त्री जीवन्ती ज्यो
तिष्मती इति राजनिर्घण्टः ॥
सुपीडनं क्ली सुष्टुमर्द्दनं मा
चा पा इति भाषा इति केचित्
सुपुष्पं क्ली गर्जवं इति राजनिर्घण्ट
सुपीवा त्रि शोभनपानकर्त्ता
सुष्ठु पिवति इति सुपूर्वपाधातोः
क्वनिप् प्रत्ययेन निष्पन्नः इति
मुग्धबोधटीकायां ॥
दुर्गादासः ॥
सुपुटः पुं कोलकन्दः विष्णु
कन्दः इति राजनिर्घण्टः ॥ ॥
सुपुत्रिका स्त्री जतुका इति ॥

राजनिर्घण्टः ॥
सुपुष्करा स्त्री स्थलपद्मिनी इ
तिराजनिर्घण्टः ॥
सुपुष्पं क्ली लवंगं इति शब्द
चन्द्रिका आहुल्यं प्रपौंडरी
कं तूलं इति राजनिर्घण्टः ॥
स्त्रीरजः यथा सुपुष्पे रा। ३
कीर्णे कुसुमधनुषो मंदिरे म
हो पुरो ध्यायन् ध्यायन् यदि
जपति भक्तिस्तव मनु इति तं
त्रसारः ॥
सुपुष्पः पुं रक्तपुष्पकः पा
लितामादार इति भाषा इति
शब्दचन्द्रिका शिरीषः हरिद्रुः
राजतरुणी इति राज ॥
निर्घण्टः ॥
सुपुष्पिका स्त्री पाटला इति
राजनिर्घण्टः ॥
सुपुष्पी स्त्री स्वेतापराजिता ॥
क्षीरीफंजी शतपुष्पी मिश्रे
या द्रोणपुष्पी इति
राजनिर्घण्टः कदली इति
शब्दचन्द्रिका ॥
सुपूरः पुं वीजपूरः इति
राजनिर्घण्टः ॥
सुपूरकः पुं वकपुष्पवृक्षः
इतिरत्नमाला ॥ ॥

सुपं क्ली अलिंगेतरप्रयुज्यमा
नप्रत्ययविशेषः सत सप्तमी
विभक्तौ वहुवचनं इति मुग्धवो
धव्याकरणं सुपद्मादिव्याक
रणमते एकविंशति विभक्ती
नां संज्ञा ॥
सुप्तं क्ली सुप्तिः तत्पर्य्या
यः स्वापिका २ इति हेमचन्द्रः
सुप्तः त्रि निद्रितः तत्पर्य्यायः
निद्राणः २ शयितः ३ इति हे
मचन्द्रः तस्य वोधने विधिनि
षेधौ यथा क्षुधितं तृषितं
कामी विद्यार्थी कृषिकारकः
भांडारी च प्रवासी च सप्तसुप्ता
न्प्रवोधयेत् महिकाश्च
मरी सर्पो राजा वैवालका।
स्तथा परस्यापि च मूर्खश्च
सुप्तघातकः त्रि हिंस्रः तत्
पर्य्यायः दशेरः २ इति त्रि
कांडशेषः ॥
सुप्तजनः पुं अर्द्धरात्रं इति
जटाधरः निद्रितलोकश्च ॥
सुप्तज्ञानं क्ली स्वप्नः इतिज
सुप्तविज्ञानं टाधरः ॥
सुप्तिः स्त्री स्पर्शता ॥
निद्राविश्रंभः
शयनं इति मेदिनी ॥ —

सुप्रतिभा स्त्री मदिरा इ
ति राजनिर्घण्टः
सुप्रतिष्ठा स्त्री पंचाक्षरावृत्तिः।
छन्दः सतद्विविधः पंक्तिः प्रि
या च यथा उक्थात्युक्थात
था मध्या प्रतिष्ठा सा सुपूर्विका
गायत्री च तत उष्णिगनुष्टुप्
वृहती तथा पंक्तेरुदाहरणं
तच्छब्दे द्रष्टव्यं ॥
प्रियाया यथा सलगैः प्रिया
भ्र व्रजसुभ्रुवो विलसत्कलाः ॥
अभवन् प्रिया सुरवैरिणः
इति छन्दोमंजरी सुन्दरप्रशं
साच ॥
सुप्रतिष्ठितः पुं उडुम्बरवृक्षः ॥
इति राजनिर्घण्टः सुन्दरप्रति
ष्ठायुक्ते त्रि ॥
सुप्रतीकः पुं ईशानदिग्गजः
इत्यमरः शिवः कामदेवः इति
केचित् शोभनांगं ॥
तद्युक्ते त्रि ॥
सुप्रभः पुं शुक्रवलः इति
हेमचन्द्रः सुन्दरप्रभायुक्ते त्रि।
सुप्रभा स्त्री वाकुची इति राज
निर्घण्टः अग्निजिह्वाविशेषः
यथा सुप्रभा पद्मरागाभा वा
रुणीं दिशि संस्थिता। इति

तंत्रसारः शोभनदीप्तिश्च ॥
सुप्रभातं क्ली शुभसूचकप्रा
तः कालः प्रभातिकपाठमंग
लवाक्यं यथा स्कंदे शिवउवाच
किं तदुक्तं सुप्रभातं शंकरेण
महात्मना प्रभातेयत् पठन्म
र्त्यैर्मुच्यते पापबंधनात् ऋष
य ऊचुः श्रूयतां तात सम्प्रे
ष्ट सुप्रभातं हरोदितं श्रुत्वा
स्मृत्वा पठित्वा च सर्वपापैः प्र
मुच्यते ब्रह्मा मुरारिस्त्रिपुरां
तकारी भानुः शशी भूमिसु
तो वुधश्च गुरुः सशुक्रः स
ह भानुजेन कुर्वन्तु सर्वे मम सु
प्रभातं भृगुर्वशिष्ठः क्रतुरंगि
राश्च मनुः पुलस्त्यः पुलहः स
गौतमः रैभ्यो मरीचिश्च्यव
नोऽमलोकः कुर्वन्तु सर्वे मम
सुप्रभातं सनत्कुमारः सन
कः सनन्दनः सनातनोप्यासु
रिपिंगलौ च सप्तस्वराः सप्त
रसातलाश्च कुर्वन्तु सर्वे मम सु
प्रभातं पृथ्वी सगन्धा सरसास्तथा
पः सस्पर्शवायुर्ज्वलितं च तेजः
नभः सशब्दं महता सहैव कुर्व
न्तु सर्वे मम सुप्रभातं सप्तार्णवाः
सप्तकुलाचलाश्च सप्तर्षयो ॥ ॥

द्वीपवर्षाश्च सप्त भूरादि कृत्वा
भुवनानि सप्त कुर्वन्तु सर्वे मम
सुप्रभातं श्लोकं प्रभातेपरं मं ।
पवित्रं यः संस्मरेद्वा शृणुया
द्भक्त्या दुःस्वप्ननाशोनघ सु
प्रभाते भवेच्च सत्यं भगवत्
प्रसादात् इति वामन पुरा
णे १४ अध्यायः ॥
सुप्रभाता स्त्री नदीविशेषः ॥
यथा अरुणा सुमणा आङ्गि
रसी सावित्री सुप्रभाता ऋतं
भरा सत्यरेतिमहानद्यः इति
श्रीभागवते ५ स्कंधे २ अध्या
य शोभनप्रभातयुतायां त्रिषु
सुप्रयुक्तः त्रि शोभनप्रयोग
विशिष्टः सुप्रपूर्वयुजधातोः
क्तप्रत्यय निष्पन्नः ॥
सुप्रयुक्तशरः पुं कृतहस्तः
इति हेमचन्द्रः ॥
सुप्रयोगविशिखः पुं सुशिक्षि
तवाणमोक्तकः साध्यसानक्ष
मत्वात् शोभनः प्रयोगो नि
क्षेपो यस्य स सुप्रयोगः ना ।
दृशो विशिखो वाणो यस्य
सतथा कृतहस्तः सुप्रयो
गविशिखः कृतपुंखवत् इत्य
मरभरतौ ॥ ॥ ॥

सुप्रलम्भः पुं सुखलम्भः सुपूर्व
प्रपूर्व लभधातोः खल् प्रत्य ॥
येननिष्पन्नः इतिसिद्धान्त ॥
कौमुदी ॥
सुप्रलापः पुं सुवचनं इत्य
मरः ॥
सुप्रसन्नः पुं कुवेरः इति शा
ब्दमाला सुप्रसादयुक्ते त्रि
सुप्रसन्नकः पुं कृष्णार्जकः इ
तिराजनिर्घण्टः ॥
सुप्रसरा स्त्री प्रसारिणीलता
इति राजनिर्घण्टः ॥
सुप्रसादः पुं शिवः इति
त्रिकाण्डशेषः सुप्रसन्नता च ॥
सुप्रिया स्त्री सुन्दरस्त्रिया अ—
अप्सरः प्रमाणं सुभगायाहेद्र
ष्टव्यं सुफलः पुं कर्णिकारः
दाडिमः बदरः मुद्गः इति
राजनिर्घण्टः कपित्थः इति
शब्दचन्द्रिका शोभनफल ।
युक्ते त्रि ॥
सुफला स्त्री इन्द्रवारुणीकु
ष्माण्डी काश्मरी कदली क
पिलद्राक्षा इति राजनिर्घण्टः
सुफेनं क्लीं समुद्रफेनं इ
तिराजनिर्घण्टः ॥
सुबंधः पुं तिल इति शब्दा ।

चन्द्रिका ॥
सुब्रह्मवासुदेवः पुं ब्रह्मरूपवसु
देवसुतः यथा सुब्रह्मवासुदे ।
वाय गो ब्राह्मण हिताय च शा
न्तिरस्तु शिवं चास्तु इत्युक्त्वा
तान् विसर्जयेत् इति तिथ्यादि
तत्त्वे जन्माष्टमीप्रकरणं सुब्र
ह्मण्यः पुं कार्त्तिकेयः इति
केचित्
सुभगः पुं टंकणः चंपकः
रक्ताम्लानः अशोकः इति
राजनिर्घण्टः ॥
सुभगः त्रि सुहृदयः तत्प ॥
र्य्यायः वल्लभः २ इति हेमच ।
न्द्रः शोभनैश्वर्य्यादियुक्तश्च ॥
सुभगा स्त्री कैवर्त्ती शालपर्णी
हरिद्रा नीलदूर्वा तुलसी ॥
प्रियंगुः कस्तूरी स्वर्णकद
ली इति राजनिर्घण्टः
वनमल्ली इति शब्दरत्नावली
पतिप्रिया यथा मां उच्यः म
या कृतं परित्यज्य यदा सिंहे
गुरुर्भवेत् तत्राहेकन्यका चो
ष्मा सुभगा सुप्रिया भवेत् इ
तिमलमासतत्त्वे ॥
सुभगसुतः पुं सौभागिनेयः
इत्यमरः ॥ ॥ ॥

सुभंगः पुं नारिकेलवृक्षः इति
जटाधरः
सुभद्रः पुं विष्णुः इति शब्दमा
ला राजभेदः इति हेमचन्द्रः ॥
शोभनमंगलयुक्ते त्रि सुभद्रकः
पुं देवरथः यथा ॥
व्योमयानं दिव्यरथो विमानो ॥
स्त्री सुभद्रकः इति शब्दरत्नाव ।
ली विल्ववृक्षः इति शब्दच ॥
न्द्रिका ॥
सुभद्रा स्त्री श्यामालता इति
शब्दमाला चूतमंजरा इति श
ब्दचन्द्रिका काश्मरी इति राज
निर्घण्टः श्रीकृष्णभगिनी सा
अर्ज्जुनभार्य्या यथा श्रीकृष्ण
उवाच ममैषा भगिनी पार्थ
सारणस्य सहोदरा सुभद्रा नाम
भद्रं ते पितुर्मे दयिता सुता य
दि ते वर्त्तते बुद्धिर्वक्ष्यामि पित
रं स्वयं अर्जुन उवाच दुहिता
वसुदेवस्य वासुदेवस्य च स्वसा
रूपेण चैषा संपन्ना ॥
कमिवैषा न मोहयेत्
निहत्य श्चार्जुन स्तत्र विवादं कृ
तवान् प्रभुः शेषं तद्वादशावर्षे
व खाण्डवप्रस्थमागतः इति महा ।
भारते आदिपर्वणि २२१ ॥ ॥

अध्यायः ॥
सुभद्राणी स्त्री त्रायन्तीवल्
ला इति ख्याता इति रत्नमाला
सुभद्रेशः पुं अर्ज्जुनः इति हे
मचन्द्रः ॥
सुभांजनः पुं शोभांजनवृक्षः
इति भरतद्विरूपकोषः
सुभाषितः पुं बुद्धभेदः यथा
कोमाभो द्वादशाख्यश्च वीत
रागः सुभाषितः इति त्रिकाण्ड
शेषः सुन्दरकथिते त्रि सुभि
क्षः त्रि सुलभभैक्ष्यं सुल
भभैक्ष्ययुक्तकालादिश्च ॥
यथा द्वाविमौ पुरुषौ लोके सू
र्य्यमंडलभेदिनौ दातान्नस्य तु
दुर्भिक्षे सुभिक्षे वस्त्रदो नरः ॥
इति वह्निपुराणे आह्निकतपो
नामाध्यायः किंच श्विते हेमसु
भिक्षे वलिना पीडांच निर्द्दिशे
द्राष्ट्रे इति तिथ्यादि तत्त्वं ॥
सुभिक्षा स्त्री धातृपुष्पिका ॥
इत्य ॥ मरः ॥
सुभीरकः पुं पलाशवृक्षः
इति हारावली ॥
सुभ्रूः त्रि सुजन्मा ॥
इति मुग्धबोधव्याकरणं ॥
उत् कुलभूमौ स्त्री

तत् संबन्धिनि त्रि ॥
सुभूतिकः पुं विल्ववृक्षः इति
राजनिर्घण्टः ॥
सुभूमः पुं कार्त्तवीर्य्यः सत्
जिनानां अष्टमचक्रवर्त्ती इति
हेमचन्द्रः ॥
सुभृशं क्ली वाढं अतिशयं
इति शब्दरत्नावली तद्वति त्रि
सुभ्रूः स्त्रीनारी इति जटाधरः
सुभ्रूः सुन्दरभ्रुयुक्ते त्रि ॥
सुम क्ली पुष्पं इत्यमरटीका
यां भरतः ॥
सुमः पुं चन्द्रः नभः इति
संक्षिप्तसारोणादिवृत्तिः ॥ राण
सुमंगला स्त्री वायसोलीमा
कउहाला इति माकडिया इ
ति च भाषा इति रत्नमाला अ
र्हतां माता इति हेमचन्द्रः ॥
अतिशयहेमयुक्ते त्रि ॥
सुमतः त्रि सुन्दरज्ञानविष
यः सुशब्द पूर्वक मनधातोः
क्तप्रत्ययेन निष्पन्नः ॥
सुमतिः पुं वर्त्तमानकल्पीया
र्हद्भेदः भूतकल्पीयार्हद्भेदः
इति हेमचन्द्रः सुन्दरमति
युक्ते त्रि शोभनमतौ स्त्री ॥
सुमतिः स्त्री विष्णुयशसः पत्नी

सा कल्किमाता यथा संभले
विष्णुयशसो गृहे प्रादुर्भवाम्य
हं सुमत्यां मातरि विभोः क
न्यायां तन्निदेशतः चतुर्भि
र्भ्रातृभि र्देव करिष्यामि कलि
क्षयं इति कल्किपुराणे २
अध्यायः अपिच सुमत्यां वि
ष्णुयशसा गर्भमाधत्त वैष्णवं
इति सुमति स्तं सुते लब्ध्वा
विष्णुं जिष्णुं जगत् पतिं पूर्ण
कामा विप्रमुख्यैनाहूयादा
द्गवां शतं इति च तत्रैव
सुमदनः पुं आम्रवृक्षः इति
राजनिर्घण्टः ॥
सुमदात्मजा स्त्री अप्सराः इ
ति त्रिकाण्डशेषः ॥
सुमधुरं क्ली अत्यर्थमधुरवा
क्यं तत् पर्य्यायः सांत्वं २ इति
हेमचन्द्रः अतिशयमधुररस
युक्ते त्रि ॥
सुमधुरः पुं जीवशाकः इति
राजनिर्घण्टः ॥
सुमनः पुं गोधूमः इत्यमरः
धुस्तूरः इति शब्दमाला मनो
हरे त्रि इति शब्दरत्नावली ॥ ॥
सुमनं क्ली पुष्पं इत्यमरः ॥ ॥

उत्तममनश्च ॥ शोभनमनो
युक्ते त्रि ॥
सुमनःपत्रिका स्त्री जातीपत्रि
का इति राजनिर्घण्टः ॥
सुमनःफलं क्ली जातीफलं
इति राजनिर्घण्टः ॥
सुमनःफलः पुं कपित्थवृक्षः
इति शब्दचन्द्रिका ॥
सुमनसः स्त्री पुष्पं इत्यमरः
सुष्ठु प्रीणं मनश्चाभि रिति सुमन
सः नित्य बहुवचनान्तत्वात्
बहुवचन निर्द्देशः भूम्नि स्त्रियः
सुमनसः इति रत्नकोषः वह
वश्च समा सिकता अप्सुमनसोः
प्सरस इति भूम्नि वामनोपिभू
म्नि भूम्नि प्रयोगः एकत्वे च द्व
श्यते सुमनाः पुष्प माल
त्योः स्त्रियां नाधीर देवयोरि
ति मेदिनी वेश्या श्मशानसु
मना इव वर्ज्जनीया इति शूद्र
कप्रयोगश्च सुमनसः क्लीव
त्वमपि पुष्पं सुमनसं कुसुम
मिति नाममालादि दर्शनात्
अप्सराश्चैव दधि सुमनसी
ति क्लीवत्वं छान्दस मित्ये
के इति भरतः सुमना स्त्री जा
तीपुष्पवृक्षः इति ॥ ॥

शब्दरत्नावली ॥
सुमनाः पुं देवता इत्यमरः
सुष्ठु मन्यते सुमनः अस्
शोभनं मनोऽस्य इतिवा इ
तिभरतः पंडितः इति
मेदिनी पूतिकरंजः इति।
शब्दमाला निम्बः महाकरंज
गोधूमः इति राज॥
निर्घंटः ॥
सुमनाः स्त्री पुष्पं मालती ॥
इति मेदिनी जाती शत
पत्री इति राजनिर्घंटः ॥
सुष्ठु मन्यते जनै मनोहरत्वात्
शोभनं मनोऽस्यामितिवास
मनाः सान्ता स्त्रीलिंगा च
स्त्रियां सुमनसोभूम्नि पुष्प
जातौ च भेदतः विद्युत्पिपर्य
इस्स्तदा भेदेन शिष्यते ॥
इति व्याडिः सुमनाः पुष्प
मालत्योः स्त्रियां नाधीर देव
योः इति सान्तेषु देदिनी ॥
आवन्नापि सुमनास्ति सुम
नायाश्च पत्राणि पलोलोहि
योस्तथा इति सुश्रुतः इत्य
मरटीकायां भरतः ॥
सुमनोरजः स्त्री परागः इत्य
मरः ॥ ॥ ॥॥

सुमंतः पुं मुनिशेषः सथा
थर्ववेदशाखाप्रचारकः वज्र।
वारकश्च यथा तत्रर्ग्वेदधरः
पैलः सामगो जैमिनिः कविः
वैशंपायन एवैको निष्णातो
यजुषा मुत अथर्वांगिरसा
मासीत् सुमंतु दारुणोमुनिः
इतिहास पुराणानां पिता मे
रोमहर्षणः इति श्रीभागव
ते १ स्कंधेः ४ अध्यायः जैमि
निश्च सुमंतुश्च वैशंपायन ए
वच पुलस्त्यः पुलहश्चैव पंचै
ते वज्रवारकाः इति पुराणं
अन्यपराधिनि त्रि ॥
सुमन्त्रः पुं कल्किदेवस्य ज्ये
ष्ठभ्राता यथा कल्केर्ज्येष्ठास्त्र
यः शूराः कवि प्राज्ञ सुमंत्रा।
काः तातमातृ प्रियकरा गुरु
विप्रतिष्ठिताः इति श्रीकल्कि
पुराणे २ अध्यायः अपिच वि
शाखयूपभूपालः माधात सा
धुजनप्रियः कल्किं द्रष्टुं देवेर्
षा माविर्भूतेव संगले ॥
कवि प्राज्ञे सुमंत्रेच हरस्हास
महाप्रभं गार्ग्यभार्ग्यविशाले
सुज्ञातिभिः परिवारित इतित
त्रैव ३ अध्यायः दश ॥

दशरथराजस्य सारथिः मंत्री च
यथा तद्गच्छ त्वरितं सूतराज
पुत्रं यशस्विनं राममानयभा।
द्रं तेनात्रकार्या विचारणा अ
श्रुत्वा राजवचनं कथं गच्छा।
मि भामिनि तच्छ्रुत्वा मंत्रिणो
वाक्यं राजा मंत्रिण मब्रवीत्
सुमंत्र रामं द्रक्ष्यामि शीघ्रमा।
नय सुन्दरं इति वाल्मीकीये
रामायणे अयोध्याकांडे १४
सर्गः ॥
सुमित्रः पुं चतुर्विंशतितमा
र्हत् पितृनर्गतविंशार्हतृपि
ता इति हेमचन्द्रः इक्ष्वाकुवंशी
यबृहद्बलान्वयः सुरथराजपुत्र
इति विष्णुपुराणे ४ अंशे २२
अध्यायः ॥
सुमित्रभूः पुं सगरः सन्तु जि
नानां चक्रवर्त्तिभेदः इति
हेमचन्द्रः ॥
सुमित्रा स्त्री दशरथराजपत्नी
सा तु लक्ष्मणशत्रुघ्नमाता यथा
प्रासोष्ट शत्रुघ्न मुदारचेष्टमे ॥
का सुमित्रा सह लक्ष्मणेन इ
ति भट्टि १ सर्गः तत् पर्य्यायः
लक्ष्मणप्रसूः २ इति शब्द
रत्नावली ॥ ॥ ॥

सुमुखं क्ली नखक्षतविशेषः
इति शब्दरत्नावली उत्तमास्यंच
सुमुखः पुं गरुडपुत्रः गणे
शः शाकभेदः नागभेदः इति
शब्दरत्नावली पंडितः इति
विश्वः सिताज्जकः ॥
वनवर्वरिका वर्वरः इतिराज
निर्घंटः ॥
सुमुखः त्रि मनोज्ञः सुंदरा ॥
ननः इति शब्दरत्नावली ॥
सुमुखसूः पुं गरुडः इति
त्रिकांडशेषः उत्तमाननपुत्र
पिता च
सुमुखा स्त्री सुन्दरीनारी सुंद
रासुमुखी नाना इतिभरतद्वि
रूपकोषः सुमुखा शाला इति
मुग्धबोधव्याकरणं दर्पणः
इतिकेचित् ॥
सुमुषिः पुं विषमुषिक्षपः
इति राजनिर्घंटः ॥
सुमूलः पुं श्वेतशिग्रुः इति
राजनिर्घंटः ॥
सुमूलकं क्ली गर्जरं इति रा
जनिर्घंटः ॥
सुमूला स्त्री शालपर्णी पृश्नि
पर्णी इति राजनिर्घंटः सु
न्दरमूलयुक्ते त्रि ॥ ॥

सुमेखलः पुं मुंडः इति रा
जनिर्घण्टः ॥ शोभन मेखला
युक्ते त्रि ॥
सुमेधाः स्त्री ज्योतिष्मती सु
बुद्धौ त्रि इति मेदिनी ॥
सुमेरुः पुं पर्वतविशेषः तत्
पर्य्यायः मेरुः २ हेमाद्रिः ३
रत्नसानुः ४ सुरालयः ५ स्व
मरः अमराद्रिः ६ भूस्वर्गः ७
इति जटाधरः तद्विवरणं य
था एषां मध्ये इलावृतं नामा
भ्यन्तरवर्षं यस्य नाभ्यामवस्थि
तः सर्वतः सौवर्णः कुलगिरि
राजो मेरु द्वीपायामसमुन्नाहः
कर्णिकाभूतः कुवलय क
मलस्य मूर्द्धनि द्वात्रिंशत् स
हस्रयोजन विततो मूले षोड
शसाहस्रं तावतान्तर्भूम्यां प्र
विष्टः मन्दरो मेरुमन्दरः सुपा
र्श्वः कुमुद इत्ययुतयोजन वि
स्तारोन्नाहा मेरोश्चतुर्दिशमव
ष्टम्भगिरय उपक्लृप्ताः चतुर्ष्वेते
षु चूतजम्बूकदम्बन्यग्रोधाश्चत्वा
रः पादपप्रवराः पर्वत केतव इ
वाधिसहस्रयोजनोन्नाहास्ता
वद्विटप विततयः शतयोजन
परिणाहाः ह्रदाश्चत्वारः पयो
मध्विक्षुरस मृष्टजलाः देवोद्या
नानि च भवंति चत्वारि नन्दनं
चैत्ररथं वैभ्राजकं सर्वतोभद्र
मिति मेरो मूर्द्धनि भगवत आ
त्मयोनेर्मध्यत उपक्लृप्तां पुरी
मयुतयोजन साहस्रीं समचतु
रस्रां शातकौम्भीं वदन्ति
तामनु परितो लोकपालाना
मष्टानां यथादिशं यथारू
पं तुरीयमानेन पुरोऽष्टावु
पक्लृप्ताः इति श्रीभागवते ५
स्कंधे १६ अध्यायः
आसीत्त्वैन्द्री पुरी पूर्वस्यां मे
रो देवधानी नाम दक्षिणा
तो याम्या संयमनी नाम प
श्चाद्वारुणी निम्लोचनी नाम
उत्तरतः सौम्या विभावरी ना
म इति तत्रैव २१ अध्यायः
अपि च परिमंडलस्तयो र्म
ध्ये मेरुः कनकपर्वतः चातु
र्वर्ण्यः स सौवर्णश्चतुरस्रः स
मुच्छ्रितः नानावर्णः स पार्श्वे
तु पूर्वान्तेन सितउच्यते पी
तन्तु दक्षिणे तत्र भृंगपत्रनि
भं परे उत्तरे तस्य रक्तं वै इति व
र्णैः समन्वितः मेरुस्तस्य शुभे
दिव्यो राजवत् समधिष्ठितः ॥

आदित्यतरुणाभासो विधूम इव
पावकः योजनानां सहस्राणि च
तुरशीति रुच्छ्रितः प्रविष्टः
षोडशाधस्तादष्टाविंशति विंशा
तिः विस्ताराद्विगुणस्तस्य परि
णाहः समंततः सपर्वतो महा
दिव्योदिव्यौषधिसमन्वितः भु
वनैरावृतः सर्वैर्जातरूपपरि
ष्कृतैः तत्र देवगणाः सर्वे ग
न्धर्वोरगराक्षसाः शैलराजे
प्रमोदन्ते सर्वतोऽप्सरसस्तथा
स तु मेरुः परिवृतो भुवनै भूत
भावनैः यस्येमे चतुरो देशा ।
नानापार्श्वेषु संस्थिताः भ
द्राश्वो भारतश्चैव केतुमाल
श्च पश्चिमे उत्तराश्चैव कुरवः
कृतपुण्य प्रतिश्रयाः विष्क
म्भपर्वतास्तद्वन्मन्दरो गंधमाद
नः विपुलश्च सुपार्श्वश्च सर्वरत्न
विभूषितः इति मात्स्ये १५
अध्यायः किंच मध्ये पृथि
व्या सद्रीन्द्रो भास्वान् मेरु र्हिर
ण्मयः योजनानां सहस्राणि
चतुरशीतिः समुच्छ्रितः प्रवि
ष्टः षोडशाधस्तात् धारणार्थं धर
णीधरः तावत्प्रमाणा पृथिवी प
र्वतस्य समंततः तस्य शृंगत्रयं मूर्द्धि
स्वर्गो यत्र प्रतिष्ठितः नानाद्रुम
लताकीर्णं नानारत्नोपशोभि ।
भितं मध्यमं पश्चिमं पूर्वं मे
रोः शृंगाणि त्रीणि वै प्रयुतो
च्छितमात्राणि हे शृंगे तस्य
मध्यतः मध्यस्थं स्फाटिकं शृं
गं वैदूर्य्यं कारकामयं इन्द्रनील
मयं पूर्वं माणिक्यं पश्चिमं स्मृतं
योजनानां सहस्राणि नियुतानि
चतुर्दश उच्छितं मध्यमं शृंगं
स्वर्गो यत्र प्रतिष्ठितः प्रयुता
न्तरितं शृंगं मूर्द्ध्निच्छत्राकृति
स्थितं पूर्वमध्यमशृंगाणां म
कोले मध्यमस्य च त्रिपृष्ठो नाकपृ
ष्ठो वा अप्सरःपुरांति निर्वृती
आनन्दोथ प्रमोदश्च स्वर्गाः ।
शृंगे च मध्यमे शैलस्य प्रोष्ठिक
श्चैव उपशोभनमन्मथो आ
ह्लादः स्वर्गराजश्च स्वर्गाः शृंगे
तु पश्चिमे निर्म्ममो निरहंकारः
सौभाग्यश्चातिनिर्मलः स्वर्गा
श्चैते द्विजश्रेष्ठ पूर्वशृंगे समा
श्रिताः एकविंशत्यमी स्वर्गा
निविष्टा मेरुमूर्द्धनि अ
हिंसादानकर्त्ता च यज्वानां तप
सां तथा तेषु तेषु वसंति स्म ज
नाः क्रोधविवर्ज्जिताः जल ॥

प्रवेशी चानन्दं प्रमोदं विन्दि
साहसः भृगुप्रपाते सौम्यस्तु
रणे चैवास्य निर्मलः अनश
नेन सन्न्यासेन्मृतो गच्छेत्त्रिपिष्ट
पं क्रतुयाजी नाकपृष्ठमग्नि
होत्री च निर्वृतिं तडागकूपक
र्त्ता च लभते पौष्टिकं द्विज
सौवर्णदायी सौभाग्यं लभे
त् स्वर्गं महातपाः शीतकाले
महावह्निं प्रज्वालयति यो नरः
सर्वसत्त्वहितार्थाय स्वर्गं चा
प्सरसं लभेत् हिरण्यगोप्रदाने
न निरहंकारमाप्नुयात् भूमिदा
नेन पुण्येन लभते शान्तिकं पदं
रौप्यदानेन पुण्येन स्वर्गं ग।
च्छति निर्मलं अश्वदानेन
पुण्याहं कन्यादानेन मंगलं
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा व
स्त्राणि भक्तितः श्वेतं तु लभते
स्वर्गं यत्र गत्वा न शोचति क
पिलागोप्रदानेन परार्थं चानु
भूयते गोवृषस्य प्रदानेन स्वर्गं
मन्मथसम्प्रभुते स पुमान् सम
रित् स्वाधीतिलधेनुप्रदस्तथा
छत्रोपानहदाता च स्वर्गं तत्फ
लं शोभनं देवायतनकर्त्ता चो
पभ्रम्यपापरस्तथा तीर्थया
त्रापरश्चैव स्वर्गराजे महीयते
एकान्नभोजी प्रोमत्स्यो नक्त।
भोजी च नित्यशः उपवा
सी त्रिरात्राद्यैः शान्तस्वर्गमु
मं लभेत् सरित् स्नायी जि
तक्रोधो ब्रह्मचारी दृढव्र
तः निर्मलं स्वर्गमाप्नोति
तथा भूतहिते रतः विद्या
दानेन मेधावी निरहंकारमा
प्नुयात् येन येन हि भावेन य
द्यद्दानं प्रयच्छति तत्तत् स्व
र्गे समाप्नोति यद्यदिच्छति।
मानवः यस्तु सर्वाणि दाना
नि ब्राह्मणेभ्यः प्रयच्छति सं
प्राप्य न निवर्त्तेत दिवं शान्तम
नामयं शृंगं तु पश्चिमं यस्य
ब्रह्मा तत्र स्थितः स्वयं पूर्व
शृंगे स्वयं विष्णुर्मध्ये चैव शिवः
स्थितः इति वाराहे ८० अ
ध्यायः अन्यत् कौर्मे ४२ ४४
अध्याययोः वाराहे रुद्रगी
तासु च द्रष्टव्यं ॥
सुपलाणः पुं कर्पूरकः इति
शब्दचन्द्रिका ॥
सुह्मः पुं देशविशेषः इति
शब्दरत्नावली ॥
सुयामुनः पुं विष्णुः वत्स

राजः प्रासादः अद्रिवि ॥
शेषः इति हेमचन्द्रः मेघ
विशेषः इति मेदिनी
सुयोधनः पुं दुर्योधनराजः
इति त्रिकाण्डशेषः ॥
सुर शा भौऽश्वर्ययोः इति कवि
कल्पद्रुमः दंत्यादिः शा सुर
ति सोरिता सुषोर सुसोर।
आदीप्तिः पप्रपे पस्पर्द्धे ॥
इति दुर्गादासः ॥
सुरः पुं देवः इत्यमरः सूर्य्यः
पंडितः इति केचित्
सुरकरीन्द्रदर्पापहा स्त्री गं।
गा यथा भगीरथपथानुगा सु
रकरीन्द्रदर्पापहा महेशमुकुट
प्रभा गिरिशिरः पताकासिता
सुरासुरनरोरगैरजभवाच्यु।
तैः संस्तुता विमुक्तिफलदा
यिनी भगवती स्वयं राजते ॥
इति कल्किपुराणे ३४ अध्या
यः सुरकारुः पुं विश्वकर्मा सु
राणां कारुः शिल्पीति वक्रव्री
हिसमासनिष्पन्नः ॥
सुरकृता स्त्री गुडूची इति रा
जनिर्घण्टः ॥
सुरक्तः त्रि शोभनरागयुक्तः
अतिशयरक्तविशिष्टः अत्य॥
अनुरक्तः इति केचित् सुपूर्व
करञ्जधातोः क्त प्रत्ययेन
निष्पन्नः ॥
सुरक्तकः पुं कोषाम्रः स्वर्ण
गैरिकं इति राजनिर्घण्टः ॥
सुरखेडनिका स्त्री वीणाभेदः
इति शब्दरत्नावली सुरमंड
लिका इति पाठान्तरं
सुरगण्डः पुं रोगविशेषः रा
जगाड इति भाषा इति भूरि
प्रयोगः ॥
सुरगुरुः पुं बृहस्पतिः इति
त्रिकाण्डशेषः ॥
सुरग्रामणीः पुं इन्द्रः इति
त्रिकाण्डशेषः ॥
सुरंगं क्ली पतङ्गं हिंगुले
इति राजनिर्घण्टः ॥
सुरंगः पुं नागरंगः इति
राजनिर्घण्टः ॥ गर्त्तविशेषः
सुरंगयुक् शब्ददर्शनात् ॥
सुरंगदं क्ली पतङ्गं इति राज
निर्घण्टः ॥
सुरंगधातुः पुं गैरिकं इति
राजनिर्घण्टः ॥
सुरंगयुक् पुं सुरंगकृता
अपहारतियः यथा कृञ्जम्भि
लः सुरंगादिवधस्तोरः सुरंगयुक्

इति शब्दरत्नावली ॥
सुरंगा स्त्री सन्धिः सीँध
इति भाषा इति हलायुधः के
वर्त्तिका इति राजनिर्घण्टः
सुरंगिका स्त्री मूर्वा इति रा
ज निर्घण्टः ॥
सुरंगी स्त्री काकनाशा इति
राजनिर्घण्टः रक्तशोभाञ्जनः
इति रत्नमाला ॥
सुरजःफलः पुं पनसवृक्षः
इति भूरिप्रयोगः ॥
सुरजनी स्त्री रात्रिः इतिश
ब्द चन्द्रिका ॥
सुरज्येष्ठः पुं ब्रह्मा इत्यम
रः सुरंजनः पुं गुवाकवृक्षः इ
ति त्रिकाण्डशेषः ॥
सुरतं क्लीं निधुवनं इति मे
दिनी दयालौ त्रि इत्यमर ॥
टीकासारसुन्दरी सुरते वर्ण
नीयानियथा सुरते सात्त्विका
भावाः शीत्काराः ऊँ इत्यला
नाकांचीकंकणमंजीररवाः
धरनखक्षतिः इतिकविकल्प
लतायां १ स्तवके २ कुसुमं
सुरतताली स्त्री दूती शिरस्स
क् इति मेदिनी ॥
सुरता स्त्री देवत्वं इतिमेदिनी

सुरसमूहः इति व्याकरणं ॥
सुरतोषकः पुं कौस्तुभमणिः
इति शब्दरत्नावली देवप्री ॥
तिकारके त्रि ॥
सुरथः पुं चन्द्रवंशीयराज
विशेषः यथा श्रीनारायणउ
वाच अत्रिस्तु ब्रह्मणः पुत्र
स्तस्य पुत्रो निशाकरः सचकृ
त्वा राजसूयं द्विजराजोबभूव
ह गुरुपत्न्यांच तारायां तद्भूव
बुधः सुतः बुधपुत्रश्च चैत्र।
स्य तत् पुत्रः सुरथस्य सः इ
ति ब्रह्मवैवर्त्ते ५५ अध्यायः
सुरदारु क्लीं देवदारु इति
रत्नमाला ॥
सुरदीर्घिका स्त्री स्वर्गगंगा इ
त्यमरः ॥
सुरदुन्दुभी स्त्री तुलसी इति
राजनिर्घण्टः ॥
सुरद्रुमः पुं देवनलः इति
राजनिर्घण्टः देवदारुच ॥
सुरद्विट् पुं असुरः इत्यम।
रः देवद्वेषकश्च ॥
सुरद्विपः पुं देवहस्ती इति
केचित् ॥
सुरधनुः क्लीं इन्द्रधनुः इति
जटाधरः ॥

सुरधूपः पुं रालः इति राज
निर्घण्टः ॥
सुरनदी स्त्री गंगा इतिभू
रि प्रयोगः ॥
सुरनन्दा स्त्री नदीविशेषः
इति शब्दरत्नावली ॥
सुरनालः पुं देवनलः इति
राजनिर्घण्टः ॥
सुरनिम्नगा स्त्री गंगा इत्यमरः
सुरनिर्गन्धं क्लीं पत्रकं इति
राजनिर्घण्टः ॥
सुरपतिः पुं इन्द्रः इत्यमरः
सुरपथं क्लीं आकाशं इति
हेमचन्द्रः ॥
सुरपर्णं क्लीं औषधिविशे
षः माचीपत्री इति ख्यातः त
त् पर्यायः देवपर्णं २ वीर
पर्णं ३ सुगंधिकं ४ माचीप
त्रं ५ सूक्ष्मपत्रं ६ देवार्हं ७ गं
धपत्रकं ८ अस्य गुणाः कटु
त्वं उष्णत्वं कृमिश्वासबलास
कफकासनाशित्वं दीपनत्वं व
ण्यत्वं वातहितत्वंच इतिराज
निर्घण्टः सुरपर्णिकः पुं सुरपु
न्नागः इतिराजनिर्घण्टः ॥
सुरपर्णिका स्त्री पुन्नागः इति

हेमचन्द्रः ॥
सुरपर्णी स्त्री पलाशी इति
राजनिर्घण्टः ॥
सुरपादपः पुं कल्पवृक्षः दे
वतरुशब्ददर्शनात् ॥
सुरपुन्नागः पुं पुन्नागवृक्ष
विशेषः तत्पर्यायः नेमे
रुः २ सुरेष्टः ३ सुरपर्णिकः
४ सुरतुंगः ५ अस्य गुणाः
पुन्नागवत् इतिराजनिर्घ
ण्टः सुरपुरी स्त्री अमराव
ती इति त्रिकाण्डशेषः ॥
सुरप्रियः पुं अगस्त्यपुष्प
वृक्षः इति राजनिर्घण्टः इन्द्रः
वृहस्पतिः इति केचित्
देवहृद्ये त्रि ॥
सुरप्रिया स्त्री जाती स्वर्ण
रम्भा इति राजनिर्घण्टः ॥
सुरभि क्लीं स्वर्णं गंधाश्म
इतिशब्दरत्नावली सुन्दरः
साधुगंधः इति धरणी ॥
सुरभिः पुं सुगंधिः इत्यमरः
चंपकः वसंतर्त्तुः जातीफ
लवृक्षः इति मेदिनी ॥ ॥
शमीवृक्षः कदम्ववृक्षः काण
गुग्गुलुः गंधतृणं बकुलवृक्षः
रालः इति राजनिर्घण्टः ॥ ॥

चैत्रमासः धीरः इति धर
णी गन्धफलः इति शब्दर।
त्नावली ॥
सुरभिः स्त्री शल्लकी मातृ
भेदः मुरा गौः इति मेदिनी
पुस्तकान्तरे मुरास्थाने स
रा इतिपाठः रुद्रजटा वन
मालिका तुलसी यावी इ
तिराजनिर्घण्टः पृथिवी।
इति धरणी गोमाता तस्या
उत् पत्त्यादिर्यथा नारद उ
वाच स्थाकावासुरभी देवी
गोलोकादागता चया तज्ज
न्मचरितं ब्रह्मन् श्रोतुमि।
च्छामितत्त्वतः श्रीनारायण
उवाच गवामधिष्ठातृदेवी
गवामाद्या गवां प्रसूः गवां
प्रधाना सुरभी गोलोके सा
समुद्भवा सर्वादिसृष्टिकथनं
कथयामिनिशामय वभूव।
येनतज्जन्म पुरावृन्दावने वने
एकदा राधिकानाथो राधया स
ह कौतुकात् गोपांगनापरिवृतः
पुण्यवृन्दावनं ययौ सहसातत्र
रहसि विजहार च कौतुकात्
वभूववीरपानेच्छा तदास्वेच्छा
मयस्यच सस्तजे सुर।


भिंदेवो लीलया वामपार्श्वतः
वत्सयुक्तां दुग्धवती वत्
सोनाम्ना मनोरथः दृष्ट्वा सव
त्सां सुदामा रत्नभांडेदोह
चतीरं सुधातिरिक्तंच जन्म
मृत्युजरापहं तदुत्तंच पयः
स्वादु पपौ गोपीपतिः स्वयं स
रोवभूव पयसा भांडविस्रंस
नेनच दैर्घ्यं च विस्तृतेचैव परि
तः शतयोजनं गोलोके सु
प्रसिद्धश्च सच क्षीरसरोवरः
गोपकानांच राधायाः क्रीडा
वापीवभूवसा रत्नेन खचिता
तूर्णं भूता वा पीश्वरेच्छया ॥
वभूवुः कामधेनूनां सहसा ल
क्षकोटयः तावन्तो हिच वत्
साश्चसुरभी लोमकूपतः तासां
पुत्राः प्रपौत्राश्च संवभूवुरसं
ख्यकाः कथिता च गवां सृ
ष्टि स्तया च पूजितं जगत् पू
जांचकार भगवान् सुरभ्याश्च पु
रा स्मृति ततोवभूव तत्पूजात्रि
षु लोकेषु दुर्लभा दीपान्विता
परदिने श्रीकृष्णस्याज्ञया हरेः
वभूव सुरभी पूजा धर्मवक्त्रा
दितिश्रुतं ध्यानं स्तोत्रं मूलमंत्रं
यद्यत् पूजाविधिक्रमं वेदो।

क्तंच महाभाग निवोध कथ
यामि ते ॐ सुरभ्यै नम इतिमं
त्रस्तस्याः षडक्षरः सिद्धो लक्ष
जपेनैव भक्तानां कल्पपादपः
ध्यानं यजुर्वेदोक्तं तत सृज्य
च सर्वसम्मतं ऋद्धिदं वृद्धिदं
चैव मुक्तिदं सर्वकामदं ल
क्ष्मीस्वरूपां परमां राधासह
चरीं परां गवामधिष्ठातृदे
वीं गवामाद्यां गवां प्रसूं पवि
त्ररूपां पूज्यांच भक्तानां सर्वा
कामदां यया पूतं सर्वविश्वं
तां देवीं सुरभीं भजे घटेवा
धेनुशिरसि वत्सस्तम्भेगवा
मपि शालग्रामे जले वाग्नौ सु
रभीं पूजयेद्द्विजः दीपान्वि
तापरदिने पूर्वाह्णे भक्तिसं
युतः यः पूजयेच्च सुरभिं सच
पूज्योभवेद्भुवि एकदा त्रिषु
लोकेषु वाराहे विष्णुमायया
क्षीरं जहार सहसा चिन्तिता
श्च सुरादयः तेगत्वा ब्रह्मलो
कंच ब्रह्माणं तुष्टुवुस्तदा त
दाज्ञयाच सुरभीं तुष्टाव पाक
शासनः महेन्द्र उवाच नमो दे
व्यै महादेव्यै सुरभ्यै च नमोन
मः गवां वीजस्वरूपायै नम ॥

स्तेजगदम्बिके नमोराधा ॥
प्रियायैच पद्मांशायै नमो नमः
नमः कृष्णप्रियायैच गवां मा
त्रे नमो नमः कल्पवृक्षस्वरूपा
यै सर्वेषां सततं परं श्री
दामधनदायैच वुद्धिदायैन
मोनमः यशोदायै कीर्त्तिदा
यैधर्मदायैनमोनमः स्तोत्र
श्रवणमात्रेण तुष्टा हृष्टा
जगत्प्रसूः आविर्वभूव तत्रै
व ब्रह्मलोके सनातनी महेन्द्रा
यवरं दत्वा वांछितंचातिदुर्ल
भं जगाम साच गोलोकं ययु
र्देवादयो गृहं वभूव विश्वंस
हसा दुग्धपूर्णंच नारद दुग्धा
द्घृतं ततो यज्ञस्ततः प्रीतिः सु
रस्य च इदं स्तोत्रं महापुण्यं भक्ति
युक्तश्च यः पठेत् स गोमान् ध
नवांश्चैव कीर्त्तिमान् पुण्यवान्
भवेत् सस्नातः सर्वतीर्थेषु सर्व
यज्ञेषु दीक्षितः इहलोके सु
खं भुक्त्वा यात्यन्ते कृष्णमन्दिरं
सुचिरं निवसेत्तत्र करोति कृ
ष्णसेवनं न पुनर्भवनं तस्य
ब्रह्मपुत्रो भवेद्भवेत् इति श्री
ब्रह्मवैवर्ते प्रकृतिखण्डे सुरभ्यु
पाख्याननाम षष्ठ अध्यायः ॥

सुरभिः त्रि सुगन्धिः कांतः इति मेदिनी धीरः विख्यातः इति धरणी ॥
सुरभिका स्त्री स्वर्णकदली इतिराजनिर्घण्ट ॥ ॥
सुरभिगन्धिः त्रि शोभनगंधयुक्तः इति केचित् ॥
सुरभित्रिफला स्त्री सुगन्धत्रिफला इतिराजनिर्घण्टः
सुरभित्वक् स्त्री वृहदेला इतिराजनिर्घण्टः ॥
सुरभिदारुः पुं सरलवृक्षः इतिराजनिर्घण्टः ॥
सुरभिपत्रा स्त्री जंबूः वृक्षः राजजंबूः इतिराजनिर्घण्टः ॥
सुरभिवल्कलं स्त्री गुडत्वक् इति शब्दरत्नावली ॥
सुरभिबाणः पुं कामदेवः इति केचित् ॥
सुरभिस्रवा स्त्री सल्लकी इति राजनिर्घण्टः ॥
सुरभी स्त्री सुगंधिः इत्यमरटीकायां भरतः शल्लकी इति शब्दचन्द्रिका गोमाता यथा साकावा सुरभी देवी गोलोकादागताच या तज्जन्मचरितं ब्रह्मन् श्रोतमिच्छामितत्वतः इति ब्रह्मवैवर्ते प्रकृतिखण्डे षष्ठ अध्यायः कृतेकारांतसुरभिशब्दार्थोप्यत्र ॥
अथ गो यात्रा प्रवेश विक्रयदिनं तत्र तिथय अमावास्याष्टमी चतुर्द्दशी विष्टिभिन्नाः तत्र नक्षत्राणि रोहिणी पूर्वफल्गुणी उत्तराषाढा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्व्यतिरिक्तानि योगाः व्यतीपातवैधृतिभिन्नाः तत्रवाराः क्रूरग्रहभिन्नाः इति ॥ ज्योतिषतत्वं ॥
सुरभीरसा स्त्री शल्लकीवृक्षः इत्यमरटीकायां मथुरेशः सुरभूरुहः पुं देवदारुः इति भावप्रकाशः ॥
सुरमृत्तिका स्त्री तुवरी इति राजनिर्घण्टः ॥
सुरमेदा स्त्री महामेदा इति राजनिर्घण्टः ॥
सुरर्षिः पुं देवर्षिः सनत्कुमारदनंकुरु कोलाहलादिः यथाब्रह्मर्षि ॥
राजर्षि महर्षि परमर्षिकाण्डर्षि श्रुतर्षि भेदात् सप्तप्रकार ऋषय स्तत्र नारदायाः सुरर्षय उक्ताः इत्यमरभरतो

सुरलता स्त्री महाज्योतिष्मती इति राजनिर्घण्टः
सुरला स्त्री गंगा इतिहारावली नदीविशेषः इति ॥ शब्दचन्द्रिका
सुरलासिका स्त्री वंशीवाद्यं यथा शालेयिकाच शालेयीसालिका सुरलासिका इति शब्दरत्नावलीति केचित्
सुरलोकः पुं स्वर्गः इत्यमरः
सुरवर्त्म क्ली आकाशं इत्यमरः
सुरवल्लभा स्त्री श्वेतदूर्वा इतिराजनिर्घण्टः ॥
सुरवल्ली स्त्री तुलसी इति राजनिर्घण्टः ॥
सुरवैरी पुं असुरः इतिशब्दरत्नावली ॥
सुरशत्रुः पुं असुरः इतिहलायुधः ॥
सुरशाखी पुं कल्पवृक्षः इतिजटाधरः ॥
सुरश्रेष्ठा स्त्री ब्राह्मी इतिराजनिर्घण्टः ॥
सुरसं क्ली बोलं त्वचं गंधतृणं इति राजनिर्घण्टः तुलसी इतिमेदिनी ॥
सुरसः पुं सिंधुवारः इति शब्दरत्नावली मोचरसः इति राजनिर्घण्टः सुरसः त्रिस्वादुः इतिमेदिनी सुष्ठुरसयुक्तश्च सुरसमञ्जरी सर्पः इतिहलायुधः ॥
सुरसम्भवा स्त्री आदित्यभक्ता इति राजनिर्घण्टः ॥
सुरसरित् स्त्री गंगा इति हलायुधः ॥
सुरसर्षपकः पुं देवसर्षपः इतिराजनिर्घण्टः ॥
सुरसा स्त्री तुलसी यथासुरसा स्त्री तु पर्णासे तु नपुंसके इति सद्वाक्ति मेदिनीपर्णासे पुं नपुंसके इतिहलायुधः मेदिनी सुरसस्त्रिषु स्वादौ पर्णासे न नपुंसके इति व कस्यांचिन्मेदिन्यां पाठः रास्ना नागमाता इतिमेदिनी मिश्रेया इति शब्दचन्द्रिका ब्राह्मी इति रत्नमाला ॥ महाशतावरी ॥ इति ॥ ॥



राजनिर्घण्टः दुर्गा इति के
चित् नागमाता यथा ततो
देवाः सगन्धर्वाः सिद्धाश्च पर
मर्षयः अब्रुवन् सूर्य्यसंका
शां सुरसां नागमातरं अयं वा
तात्मजः श्रीमान् प्लवते साग
रोपरि हनूमान्नाम तस्य त्वम्
हूर्त्तं विघ्नमाचर राक्षसं रूप
मास्थाय सुघोरं पर्वतोपमं
दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृ
त्वा नभस्पृशं बलमिच्छामहे
ज्ञातुं भूयश्चास्य पराक्रमं त्वां
विजेष्यत्युपायेन विषादं वा
गमिष्यति इति वाल्मीकी
ये रामायणे सुन्दरकाण्डे १ स
र्गः नदीभेदः इति श्रीभागव
ते ५ स्कन्धे १९ अध्यायः ॥
सुरसाष्टः पुं वृक्षगणविशे
षः यथा निर्गुण्डी तुलसी ब्रा
ह्मी वृहती कण्टकारिका पु
नर्णवेति मुनिभिः सुरसाष्टः
प्रकीर्त्तितः इति शब्दचन्द्रिका
सुरसिन्धुः पुं गङ्गा इति केचि
त् सुरसुन्दरी स्त्री अप्सरसः
दुर्गा इति केचित् योगिनी
विशेषः तद्विवरणं योगि
नीशब्दे द्रष्टव्यं ॥ ॥

सुरा स्त्री चंपकं मद्यं इति मेदि
नी अस्याः पर्य्यायः गु
णादिश्च मदिराशब्दे मद्यशब्दे च
द्रष्टव्यं सुरायाः विशेषगुणाः
यथा कृशानां सक्तमूत्राणां
ग्रहण्यर्शोविकारिणां सुरा प्र
शस्ता वातघ्नी स्तन्यरक्तक्षये
षु च इति राजवल्लभः तत्पा
ने प्रायश्चित्तं यथा ब्रह्मघ्नश्च
सुरापश्च स्तेयी च गुरुतल्प
गः सेवं दृष्ट्वा विशुद्ध्यन्ते तत्
संयोगी च पंचमः ततो धेनु
शतं दद्यात् ब्राह्मणानां तु
भोजनं इति गारुडे २२६
अध्यायः तत्पाने शु
क्राचार्य्यशापो यथा सुरा
पानाद्गुरुं प्रापयित्वा सं
ज्ञानाशं चैव मत्वाति घोरं दृ
ष्ट्वा कचं चापि तथाभिरूपं पी
तं यथा सुरया मोहितेन स
मन्युरुत्थाय महानुभाव
स्तदोशना विप्रहितं चिकी
र्षुः काव्यः स्वयं वाक्यमिदं जगा
द सुरापानं प्रति वै जातशंकः
यो ब्राह्मणोऽद्य प्रभृतीह कश्चि
त् मोहात् सुरां पास्यति मन्दबु
द्धिः अपेतधर्मा ब्रह्महा चैव

स स्यात् अस्मिन् लोके गर्हि
तः स्यात् परे च मया चेमां वि
प्रधर्मोक्तसीमां मर्य्यादां वै स्था
पितां सर्वलोके सन्तो विप्राः
शुश्रुवांसो गुरूणां देवा दै
त्याश्चोपशृण्वन्तु सर्वे इति मा
तस्ये २५ अध्यायः ब्राह्मणक्ष
त्रियवैश्यानां त्रिविधसुराणा
न प्रायश्चित्तादि यथा सुरां पी
त्वा द्विजो मोहादग्निवर्णां सुरां
पिबेत् तथा स्वकाये निर्दग्धे
मुच्यते किल्बिषात्ततः गोमू
त्रमग्निवर्णं वा पिबेदुदकमे
व वा पयो घृतं वा मरणाद्गोस
कृद्रसमेव वा कणान् वा भ
क्षयेदब्दं पिण्याकं वा सकृन्नि
शि सुरापानापनुत्त्यर्थं बाल
वासा जटी ध्वजी सुरा वै मलम
न्नानां पाप्मा च मलमुच्य
ते तस्माद्ब्राह्मणराजन्यौ वैश्य
श्च न सुरां पिबेत् गौडी पैष्टी च मा
ध्वी च विज्ञेया त्रिविधा सुरा यथै
वैका तथा सर्वा न पातव्या द्वि
जोत्तमैः यक्षरक्षःपिशाचा
न्नं मद्यं मांसं सुरासवं त
द्ब्राह्मणेन नात्तव्यं देवानाम
श्नता हविः अमेध्ये वा पतेत् ॥

मत्तो वैदिकं वाप्युदाहरेत् ।
अकार्य्यमन्यत् कुर्य्याद्वा ब्रा
ह्मणो मदमोहितः यस्य काय
गतं ब्रह्म मद्येनाप्लाव्यते स
कृत् तस्य व्यपैति ब्राह्मण्यं
शूद्रत्वं च स गच्छति यथा वि
चित्राभिहिता सुरापानस्य निष्कृ
तिः इति मानवे ११ अध्यायः
अन्यत् प्रायश्चित्तशब्दे द्रष्टव्यं
सुरापाने वर्ण्णनीयानि ॥
यथा सुरापाने विकलता स्ख
लनं वचने गतौ लज्जामानच्यु
तिः प्रेमाधिक्यं रक्ताक्षताभ्रमः
इति कविकल्पलतायां १
स्तवके ३ कुसुमं ॥
सुराः पुं स्त्री धनवान् सुशो
भनो राधनं यस्येति वक्रव्री
ही कृते रेफाद्रूपस्य रादेशेन नि
ष्पन्नः ॥
सुराकरः पुं नारिकेलवृक्षः
इति केचित् मद्योत्पत्ति
स्थानं यथा आकराः शु
चयः सर्वे वर्जयित्वा सुराकरं
इति शुद्धितत्त्वे बौधायनवचनं
सुराङ्गना स्त्री देवपत्नी अप्स
रसः इति केचित् यथा सु
रद्रुमूलमपि विचित्ररत्ननि ।

मिते लसद्विलासभूषिते सली
लविभ्रमालसं सुरांगनाभव।
लवीकरमपंचचामरस्फुरत्
समीरवीजितं सदाच्युतं भजा
मितं इति छन्दोमंजरी २
स्तवकः सुराचार्य्यः
पुं बृहस्पतिः इत्यमरः
सुराजकः पुं भृंगराजः
इतिशब्दमाला ॥
सुराज्ञा पुं शोभनो
राज इति ॥
मुग्धबोधव्याकरणं ॥
सुराजीवी पुं शौण्डिकः य
थाकल्यपालः सुराजीवी शौ
ण्डिको मण्डहारकः वारिवासः
पानवणिक् ध्वजो ध्वज्यास्तु
जीवलः इति हेमचन्द्रः ॥
सुरापः त्रि सुरापानकर्त्ताय
थाब्रह्महा जायते यक्ष्मी सु
रापः श्यावदन्तकः स्वर्णहा
री कुनखी दुश्चर्म्मा गुरुतल्प
गः इति प्रायश्चित्तविवेकः
सुरापगा स्त्री गंगा इति जटा
धरः ॥
सुरापाणः पुं भूम्नि पूर्व्वदे
शस्थाः यथा सुरापाणाः प्रा
च्याः इति संक्षिप्तसारटीकायां गो
यीचन्द्रः ॥
सुरापानं क्ली मद्यदंशः इ
ति शब्दरत्नावली मद्यपानं य
था ब्रह्महत्या सुरापानं स्तेयं गु
र्व्वंगनागमः महान्ति पातका
न्याहुः संसर्गश्चापि तैः सह
इति प्रायश्चित्तविवेकः सुरा
भागः पुं सुराया अग्रभागः
इतिशब्दचन्द्रिका ॥
सुरामण्डः पुं सुराया अग्रभा
गः तत्पर्य्यायः कारोत्तरः २
इत्यमरः कारोत्तमः २ इति त
ट्टीका कालोत्तरः ४ सुराभा
गः ५ इति शब्दचन्द्रिका ॥
सुरारिः पुं असुरः इतिश
ब्दरत्नावली ॥
सुरारिहन्ता पुं विष्णुः यथा
मैत्रायगादे स्वपितीह वि
ष्णुर्वैशाख्यमध्ये परिवर्त्तते च
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन इति
तिथ्यादितत्त्वं ॥
सुराष्टं क्ली हरिचन्दनं इ
ति राजनिर्घण्टः स्वर्णं इति
केचित् ॥
सुरालयः पुं सुमेरुः इत्य
मरः स्वर्गः यथा गारुडे ॥

गंगां येऽत्रावगाहन्ते विधि
नाचनराधिप चतुर्युगसहस्रं
तेन पतन्ति सुरालयात् इति ति
थ्यादितत्त्वं सुरानिलयश्च स
राष्ट्रः पुं देशविशेषः सूरत
इति ख्यातः स तु भारतवर्षस्य
प्रतीच्यां दिशि वर्त्तते इति
सौराष्ट्रिकशब्दटीकायां भर
तः श्रीरामचन्द्रस्य परिवारवि
शेषः स तु श्रीरामयन्त्रे पद्मदल
मध्यतः पूज्यः यथा अगस्त्यसं
हितायां धृष्टिं जयन्तं विजयं सु
राष्ट्रं राष्ट्रवर्द्धनं अकोपं धर्म्म
पालाख्यं सुमन्त्रं दलमध्य
तः इति तिथ्यादितत्त्वं ॥
सुराष्ट्रजं क्ली तुवरिका इत्य
मरः ॥
सुराष्ट्रजः पुं कुलत्थकः इति
राजनिर्घण्टः विषभेदः इति।
शब्दचन्द्रिका तद्देशजाते त्रि
सुराष्ट्रजा स्त्री तुवरी इति
राजनिर्घण्टः ॥
सुराह्वः पुं देवदारु इति
शब्दरत्नावली हरिद्रुद्रुः म
रुवकः इति राजनिर्घण्टः
सुरि त्रि शोभनधनवत् इति
मुग्धबोधव्याकरणं ॥ ॥
सुरुंगः पुं शोभाञ्जनः इति
शब्दमाला ॥
सुरुंगा स्त्री सुरंगा सीँध इति
सुडंग इति च भाषा तत्प
र्य्यायः संधिला २ संधिः ३
इति जटाधरः सुरुंगादिः पुं चौरवि
शेषः यथा [illegible]
चौरः सुरंगयुक् इति शब्द
रत्नावली ॥
सुरूपं क्ली तूलं इति राज
निर्घण्टः ॥
सुरूपः त्रि शोभनरूपविशि
ष्टः यथा सुन्दरं रुचिरं चारु
मनोज्ञं मंजु मञ्जुलं कान्तं
मनोरमं रुच्यं सुषमं साधु
शोभनं वल्गु हारि सुरूपा
भिरूप दिव्य मनोहरं इति
विद्वान् यथा विद्वान् विप
श्चिद्दोषज्ञः सन् सुधी कोवि
दो बुधः व्यक्तो मनीषी ज्ञः
प्राज्ञः संख्यावान् पण्डितः क
विः धीमान् सूरिः कृती कृ
ष्टिर्लब्धवर्णो विचक्षणः प्रा
ग्रूपसुरूपाभिरूपदूरदृशाः
समाः इति च जटाधरः ॥
सुरूपा यथा नकुलः १
पुरूरवाः २ अश्वि

नीकुमारो ३ नलकूवरो ४ क
न्दर्पः ५ शाम्बः ६ इति कवि
कल्पलता॥
सुरूपा स्त्री शालपर्णी भार्गी
इतिराजनिर्घण्टः॥
सुरूहकः पुं गर्द्दभाभाश्वः इ
ति हेमचन्द्रः॥
सुरेज्यः पुं वृहस्पतिः इति
केचित्॥
सुरेज्या स्त्री तुलसी इतिराज
निर्घण्टः॥
सुरेन्द्रः पुं इन्द्रः इति केचि
त् सुरेन्द्रजित् पुं गरुडः इति
हलायुधः इन्द्रजिच्च॥
सुरेभं क्ली रंगं इति त्रिकां
डशेषः
सुरेवटः पुं रामपूगः इति
त्रिकाण्डशेषः
सुरेश्वरः पुं रुद्रः इतिजटा
धरः॥
सुरेश्वरी स्त्री स्वर्गगंगा इति
शब्दरत्नावली दुर्गाच॥
सुरेष्टः पुं शिवमल्ली शालः
सुरपुन्नागः इति राजनिर्घण्टः
सुरेष्टा स्त्री ब्राह्मी इतिरा
जनिर्घण्टः
सुरोत्तमः पुं सूर्य्यः इति
केचित् देवश्रेष्ठश्च ॥
सुरोत्तरः पुं चन्दनं इति
शब्दचन्द्रिका॥
सुरोदः पुं सुरासमुद्रः इति
जटाधरः॥
सुलभः त्रि सावलभ्यः अना
यासप्राप्यः यथा सुलभंस
कलं पुण्यं यत्र दानादिजं
फलं गंगातोयेषु सलिले।
दुर्लभं पितृतर्पणं इत्याह्नि
कतत्वं॥
सुलभा स्त्री माषपर्णी धूम्रप
त्रा इति राजनिर्घण्टः॥
सुलक्षणा स्त्री उमासखिवि
शेषः इति शब्दमाला सुन्दर
लक्षणयुक्ते त्रि॥
सुलोचनः पुं हरिणः इति
राजनिर्घण्टः दुर्य्योधनः
इति केचित् सुन्दरचक्षुर्यु
क्ते त्रि॥
सुलोचना स्त्री माधवराज
पत्नी यथा माधव उवाच श्री
मद्विक्रमभूमर्त्तुः पुत्रोऽहं
माधवाह्वयः सर्वभावैर्भवि
ष्यामि वशगस्तव सुन्दरि च
न्द्रकलेवावसस्तद्रूपारत्नरूणामु
स्वस्त्युरोगमा सुतहीचेऽस्तिविर्य्यिका

दिव्यन्ती सेत्तया पुरी गुण
कराह्वयस्तत्र राजा श्रेष्ठो म
हायशाः सुशीला नाम तद्भा
र्य्या सर्वलक्षणसंयुता सुलोच
नाह्वया कन्या वीर तत् कुदि
सम्भवा गृहाण तां विवाहेन
स्वर्गभोगं यदीच्छसि इत्युपक्र
म्य ततः शुभेक्षणे तस्मिन्नृष्ट
ष्टमारुह्य वाजिनः प्रचेष्टाख्ये
नभूत्येन विलज्यजलधिंययौ
ततो गंधर्वविधिना सराज
तनयसुधीः चक्रे विवाहं।
तां कन्यां तत्रैव ग्रामकौतुकः
इति पाद्मे क्रियायोगसारे ५
अध्यायः॥
सुलोमशा स्त्री काकजङ्घा इ
तिराजनिर्घण्टः शोभनलोम
युतेत्रि॥
सुलोमा स्त्री ताम्रवल्ली मांस
च्छदा इति राजनिर्घण्टः ॥
सुलोहकं क्ली पित्तलं इति
हेमचन्द्रः॥
सुलोहिता स्त्री अग्निजिह्वावि
शेषः इतिशब्दमाला सुन्दरर
क्तवर्णे पुं तद्वति त्रि सुवक्त्रः
पुं वनवर्वरी इति राजनि
र्घण्टः सुन्दराननेत्रि ॥॥
सुवचनं क्ली शोभनोक्तिः इत
पर्य्यायः सुप्रलापः २ इत्य
मरः॥
सुवचनी स्त्री देवीविशेषः
विपदिस्त्रियायस्याः पूजां म
न्वते कुर्वंति च आचारमार्त्तंडे।
शुभसूचनीतिवर्ण्णते॥
सुवचाः त्रि वाग्मी इति जटा
धरः
सुवनः पुं सूर्य्यः अग्निः इत्यु
णादिकोषः चन्द्रः इति के॥
चित्
सुवर्च्चकः पुं स्वर्जिकाक्षारः
इतिजटाधरः॥
सुवर्च्चला स्त्री सूर्य्यपत्नी इति
त्रिकाण्डशेषः अतसी इति र
त्नमाला सूर्य्यमुखीपुष्पं इति
केचित् आदित्यभक्ता
ब्राह्मी इति राजनिर्घण्टः दे
शविशेषे पुं॥
सुवर्च्चाः त्रि शोभनतेजोवि
शिष्टः शोभनं वर्च्चोयस्य ॥
ति बहुव्रीहिसमासनिष्पन्नः
सुवर्च्चिकः पुं स्वर्जिकाक्षारः
इतिराजनिर्घण्टः॥
सुवर्च्चिका स्त्री जतुका इति
राजनिर्घण्टः॥

सुवर्च्ची ९ स्वर्ज्जिकाक्षारः इति
राजनिर्घण्टः ॥
सुवर्णं क्ली धातुविशेषः सो
ना इति भाषा तत् पर्य्यायः स्व
र्णं २ कनकं ३ हिरण्यं ४ हेम
५ हाटकं ६ तपनीयं ७ शातकु
म्भं ८ गाङ्गेयं ९ भर्म्म १० कर्व्वुरं
११ चामीकरं १२ जातरूपं १३
महारजतं १४ काञ्चनं १५
रुक्मं १६ कार्त्तस्वरं १७ जाम्बू
नदं १८ अष्टापदं १९ इत्य
मरः शातकौम्भं २० भर्म्म
२१ कर्व्वूरं २२ कर्व्वुरं २३ रुक्मं
२४ इति तट्टीका भद्रं २५ भू
रि २६ पिञ्जरं २७ द्रविणं २८
गैरिकं २९ चाम्पेयं ३० भ
रुः ३१ चन्द्रः ३२ कलधौत
३३ इति जटाधरः अभ्रकं ३३।
अग्निवीजं ३४ लोहवरं ३५
उद्धसारुकं ३६ स्पर्शमणिप्र
भवं ३७ सव्यधातु ३८ इति
शब्दरत्नावली उज्वलं ३९ क
ल्याणं ४० मनोहरं ४१ अग्नि
वीर्य्यं ४२ अग्नि ४३ भास्करं ४
पिञ्जानं ४५ अपिञ्जरं ४६ ते
जः ४७ दीप्तं ४८ अग्निभं
४९ दीप्तकं ५० मंगल्यं ५१ सौम्यं
जकं ५२ भृंगारं ५३ जाम्बवं ५४
आग्नेयं ५५ निष्कं ५६ अग्नि
शिखं ५७ अस्य गुणाः स्निग्धत्वं
कषायत्वं तिक्तत्वं मधुरत्वं दो
षत्रयध्वंसनत्वं शीतत्वं स्वा
दुत्वं रसायनत्वं रुचिकारित्वं
चक्षुष्यत्वं आयुष्प्रदत्वं प्र
ज्ञा वीर्य्य वल स्मृतिकरत्वंच
तद्धारणस्य गुणाः कान्तिरुचि
नत्वय श्रीकारित्वं ॥ तत्
परीक्षादि यथा दाहेतिरक्तं
मथ यत्तु सितं छिदायां काश्मी
रकान्ति च विभाति निकाष प
ट्टे: स्निग्धंच गौरव मुपैति च य
त्तुलायां जानीत देवकनकं मृ
दुरक्त पीतं तत्रैकं रसवेधजं
तदपरं जातं स्वयं भूमिजं किं
चान्यदरु लोहसंकरभवं चे
ति त्रिधा कांचनं तत्राद्यं कल
पीत रेक्तमपरं वृक्तं ततो॰
न्यद्यथा गौराभं तदिति क
मेण गदितं स्यात् पूर्व पू
र्व्वोत्तमं इति राजनिर्घण्टः
अपिच सुवर्णस्योत्पत्ति
नामलक्षण गुणाः पुरानि
ज्ञाश्रमस्थानां सप्तर्षीणां जितात्म
नां पत्नी र्विलोक्य लावण्यलक्ष्मीं

पन्नयौवनाः कंदर्पदर्पविध्व
स्तचेतसो जातवेदसः पतितं त
दुरापृष्ठे रेतस्तु हेमता मगात्
कृत्रिमं चापि भवति तद्रसेन्द्र।
स्य वेधतः स्वर्णं सुवर्णं कन
कं हिरण्यं हेमहाटकं तपनी
यं कलधौतं गांगेयं भर्म्मकाच
नं चामीकरं शातकुंभं तथाका
र्त्तस्वरंच तत् जाम्बूनदं जातरूपं
महारजतमित्यपि दाहेरक्तं
सितं छेदे निषेके कुंकुमप्रभं
तार शुल्वोभिझतंस्निग्धं को
मलं गुरु हेमसत् सतउत्तमं
तच्छ्वेतं कठिनं रूक्षं विवर्णं स
मलं दलं दाहेछेदेऽसितं ॥
श्वेतं कषेत्याज्यं लघुस्फुटंदले
(स्फुटति) दोष[illegible]सुवर्णं
शीतलं वृष्यं वल्यं गुरुरसा
यनं स्वादु तिक्तंच तुवरं पाके
च स्वादु पिच्छिलं पवित्रं वृंह
णं नेत्र्यं मेधास्मृति मतिप्रदं
हृद्य मायुष्करं कांति वाग्विशु
द्धिस्थिरत्वकृत् विषद्वयक्षयो
न्मादत्रिदोषज्वरशोषजित्
वलं सवीर्य्यं हरते नरा।
णां रोगव्रजं पोषयती ह
काये असौख्य ॥
कार्य्येव सदा सुवर्णमशुद्धमे
तन्मरणंच कुर्य्यात् असम्यङ्
मारितं स्वर्णं वलं वीर्य्यंच नाश
येत् करोति रोगान्मृत्युंच त
त्तद्धन्याद्यत्नतस्ततः इति भा
वप्रकाशः अथ सुवर्णक
रणं सध्वाज्यं गुड ताम्रंच क
रेण मात्रिकं रसं धमता स्व
भवेद्रोप्यं सुवर्णकरणं मृ।
श्रीतं धुस्तूरपुष्पंच सीसकं
च पलं मतं पाठा लांगलशा
खाचमूलमावर्त्तनाद्भवेत् इ
ति गारुडे १८८ अध्यायः
अपिच श्रीपार्वत्युवाच आ
नीय पारदं देवि स्थापयेत् प्र
स्तरोपरि अस्योपरि जपे त्त
न्त्रं सर्ववंध मयात्मकं साष्ट स
हस्रं देवेशि प्रजपेत् साध
काग्रणीः स्वयम्भुपुष्पसंयुक्ते
वस्त्रे चारुणसन्निभे संस्थाप्य
पारदं देवि मत्तपात्रे युगले
शिवे पुष्पयुक्तेन सूत्रेण व
ध्नीयात् वज्रयत्नतः सतिकया
रजेनैव धान्यस्य पद्मेश्वरि ले
पयेद्रूपयत्नेन रौद्रे शुष्काणि
कारयेत् पुनश्च लेपयेद्धीमा
नतत्नावक्तौ विनिःक्षिपेत् ॥

अष्टमी नवमी रात्रौ लिपे
त्रैवसरेस्वरि अथवा परमेश्वा
निस्रत् पात्रे स्थापयेद्रसे वल्ली
रसेन तद्द्रव्यं शोधयेद्रक्त यत्न
तः छुतनारी रसेनैव तथैव शो
धनं चरेत् एवं कृते तु शुद्धि।
का यदि स्यात् हेम्नं धनं धुस्तू
रेच समानी यमथ्ये स्पृष्टं चका
रयेत् कृत्वा तुलसीयोगे
तथा हृतकुमारिका एवं कृ
ते वह्नियोगे भस्मसात् जाय
ते किल भस्मयोगे भवेत् स्वर्ण
धनदायाः प्रसादतः विवर्णं
जायते द्रव्यं यदि पूजां न चाचरे
त् इति मातृकाभेदतंत्रे ५ पट
लः तस्य धार्यत्वं सर्वदेवतात्म
कत्वं च यथा रामायणे महाभा
रते च परशुरामं प्रति वशिष्ठ
वाक्यं सर्वरत्नानि निर्मथ्य ते
जोराशिसमुत्थितं सुवर्णं मे
भ्यो विप्रेन्द्र रत्नं परमत्तमं प
तस्मात् कारणाद्देव गंधर्वोरग
राक्षसाः मनुष्याश्च पिशाचाश्च
प्रयता धारयन्ति तत् तथा तस्मा
त् सर्वपवित्रेभ्यः पवित्रं परमस्मृ
तं तथा अग्निर्वै सकला देवाः सु
वर्णं च तदात्मकं तस्मात् सुवर्णं

ददता दत्ताः स्युः सर्वदेवताः॥
तस्मात् प्रदानेन धार्यं दे
वतात्मकत्वात् इति सुवर्णतत्त्वे
तद्दानफलं यथा अंबरीषं वाच
न सुवर्णं विना दानं तिलैर्वा
मुनिसत्तम कस्मात् पवित्र
मित्युक्तं भवानेतत् ब्रवीतु
मे वशिष्ठ उवाच अत्र ते क
थयिष्यामि इतिहासं पुरातनं
जामदग्न्यस्य रामस्य मुनिभिः
सह पार्थिव त्रिःसप्तकृत्वः पृ
थिवीं सुनीन् पप्रच्छ पार्थिव
कृत्वा तु कृपयाविष्टो निःक्ष
त्रां भार्गवः पूर्वा राम उवाच
क्रोधादिदं कृतं कर्म मया मु
निवरोत्तमाः कथं कस्माद्विमु
च्येऽहं पापात् तद्वधादतः इ
त्युक्ता धर्मतत्त्वज्ञाः पापात्पा
वनं परं दानं चेह सुवर्णस्य ते
नमूचु र्महर्षयः एतत् पवि
त्र मतुलं संभूतमिह सुश्रुम
शंभोर्वीर्यात् परं तेजोऽस्य परं
जातवेदसः सद्दर्जे कार्तिकेय
साहद्रश्चक्र समुद्भवं पवित्रं
यत् सर्वैः सर्वैर्धार्यन्ते सुकृता
दिभिः अग्निस्तु देवताः सर्वाः
श्रीयते सर्वदेवताः तस्मात्

सुवर्णं ददतां सुवर्णं च तदात्मकं
दश पूर्वापरांश्चैव प्रोवाचेदं बृ
हस्पतिः सुवर्णं ये प्रयच्छं।
ति नरकं तारयंति ते सर्वा
न् कामान् प्रयच्छेत पितामह
सुतोः ब्रवीत् मरीचिर्भगवान्
पूर्वं ये प्रयच्छन्ति कांचनं
यः सुवर्णं नरो नित्यं ब्राह्म
णेभ्यः प्रयच्छति सचिरं विरजा
विद्वान् देववद्दिवि मोदते स
र्वेषामेव दानानामेकजन्मानु
गं फलं हाटकक्षितिगौरीणां
सप्तजन्मानुगं फलं विद्य
मानं सुवर्णं तु यो लोभान्न प्रय
च्छति स सदा जन पापैस्तु वेष्टि
तो नरकं व्रजेत् कृत्वापि सु
महत् पापं जातरूपं ददाति यः
स सद्यस्तेन पापेन मुच्यते नात्र
संशयः एवं ज्ञात्वा तमुत्थं
सुवर्णं देहि भार्गव तेन।
मा कृत कायस्य समानमा
त्मनस्तथा इत्युक्तो मुनिभि
र्दिव्यै रामो धर्मभृतां वरः प्रा
दात् सुवर्णं विप्रेभ्यः ततः पा
पाद्रमुच्यत तस्मात्त्वमपि राजे
न्द्र द्विजेभ्यो देहि कांचनं वि।
षकसेन सुहृदिष य

दीच्छेः शाश्वतीं गतिं इति
वह्निपुराणे तुलापुरुषदानना
माध्यायः अपि च सुवर्णदा
नं गोदानं भूमिदानं तथैव
चे नाशयत्याशु पापानि म
हापातकजान्यपि इति प्राय
श्चित्ततत्त्वे उतस्तु स्वर्णस्य।
गृहे चिरस्थापननिषेधो यथा
न चिरं स्थापयेद्गेहे हेम सं
प्राप्तिं बुधः तिष्ठत् भया
वहं यस्मात् शोक व्याधिकरं
नृणां यौ च्छे परस्त्रीकरणात्
श्रेयः प्राप्नोति पुष्कलं संप्रो
क्तं मात्र महिषपत्यक्तं अत
एव विष्णुपुराणे तस्मात् सर्वा
त्मना पात्रे दद्यात् कनक मु
त्तमं अपात्रे पातयेद्दत्तं सु
वर्णं नरकार्णवे प्रमादतस्तु
तन्नष्टं तावन्मात्रं नियोजयेत्
अन्यथा स्तेययुक्तः स्यात् हेम्न
देवे विनाशिनि तद्धेम ब्राह्मणा
य उत्सृष्टं ॥ ब्राह्मणसाद्धृतं ते
यदि चौरादिना अपक्रियते त
दा तावदेव पुनः कृत् स्वज्य देय
मिति दानसागरः तत्र
अग्निर्दैवतं यथा आग्नेयं क
नकं प्रोक्तं सर्वलौहानि॥ ॥

वाप्यञ्च इति मुद्रितत्वे
सुवर्णं क्ली हरिचन्दनं इति
मेदिनी स्वर्णगैरिकं इति
रत्नमाला धनं इति हेमचन्द्रः
नागकेशरं इति
राजनिर्घण्टः ॥
सुवर्णः पुं क्ली हेम्नोऽशीतिरक्तिका परिमितस्वर्णं
तत् पर्य्यायः बिस्तः २ इत्यमरः कर्ष सुवर्णस्य सुवर्णसंज्ञं इति लीलावती कर्षपरिमाणं इति वैद्यकपरि ॥ ॥
भाषा ॥
सुवर्णः पुं स्वर्णकर्षः यज्ञविशेषः इति मेदिनी धुस्तूरं
इत्यमरः कणगुग्गुलुः इति राज निर्घण्टः ॥ सुष्ठुवर्णे त्रिं
इति शब्दरत्नावली ॥ ॥
सुवर्णकं क्ली पित्तलं इति हेमचन्द्रः सुन्दरवर्णयुक्ते त्रि
सुवर्णकः पुं आरग्वधवृक्षः
इत्यमरः ॥
सुवर्णकदली स्त्री कदलीविशेषः चाँपाकला इतिभाषा तत्
पर्य्यायः सुवर्णरम्भा २ कनकमोचा ३ पीता ४ सुवर्णमोचा ५
चंपकरंभा ६ सुरभिका ७ सुभगा ८ हेमफला ९ स्वर्णफला
१० कनकरंभा ११ पीतरम्भा १२
गौरी १३ गौररम्भा १४ कांचनकदली १५ सुरप्रिया १६ अस्या गुणाः मधुरत्वं हेमत्वं स्वल्पाशने दीपनकारित्वं तृष्णा
दाहनाशित्वं कफावहत्वं दुष्पकरित्वं गुरुत्वंच इति
राजनिर्घण्टः ॥
सुवर्णकारः पुं स्वर्णकारः सेकरा इतिभाषा इति हलायुधः
सुवर्णगैरिकं क्ली गैरिकभेदः वर्णकमाटि इति वंगभाषा
पीतगेरु इति हिंदीभाषा तत्
पर्य्यायः स्वर्णधातुः २ सुरक्तकः ३ संध्याभ्रं ४ वभ्रुधातुः ५ शिलाधातुः ६ अस्य गुणा
गैरिकं मधुरं शीतं कषायं व्रणरोपणं विस्फोटार्शोऽग्निदाहघ्नं वरं स्वर्णादिकं शुभं ॥
इति राजनिर्घण्टः
सुवर्णनकुली स्त्री महाज्योतिष्मती इतिराजनिर्घण्टः ॥
सुवर्णपुष्पः पुं राजतरुणी इति राजनिर्घण्टः ॥
सुवर्णमकरं क्ली पलवालुकं
इति वैद्यकं ॥ ॥

सुवर्णवणिक् पुं जातिविशेषः सोनारवेणिया इतिभाषा
सत्तु अम्बष्ठाद्वैश्यायां जातः
क मध्यमवर्णसंकरः इति केचित्
तस्य पातित्यकारणं यथा
काश्चिद्दुर्णाम विशेषस्य संसर्गात् स्वर्णकारिणः स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०
अध्यायः अपिच गान्धिकः ॥
शाङ्खिकश्चैव कांस्यको मणिकारकः सुवर्णजीविकश्चैवं पंचैते वणिजः स्मृताः अम्बष्ठाद्वैश्यकन्यायां जायते गान्धिको
वणिक् गंधचंदन धूपादिक्रयविक्रयकारकः गान्धिकाद्वैश्यकन्यायां संजातः शाङ्खिको
वणिक् शांखं दत्वा मुनेः पत्नीं शांखजीवी प्रकीर्त्तितः शाङ्खिकाद्गान्धिकाज्जातस्ताम्र
कांस्योपजीविकः शाङ्खिकात् कांस्य कन्यायां मणिकारः
प्रजायते कांस्यकाराच्च माणिक्यां सुवर्णजीविकोऽभवत्।
इति पराशरपद्धतौ भार्गवरामकृत वर्णसंकरजातिमाला
सुवर्णयूथी स्त्री पीतवर्णयूथिका स्वर्णयूई इतिभाषा तत्पर्य्यायः सुगन्धा २ हेमयूथिका ३
युवतीष्टा ४ रक्तगंधा ५ शिखंडी ७ नागपुष्पिका ८ हरिणी ९ पीतयूथी १० मीतिका
११ कनकप्रभा १२ मनोहरा १३ गणधाम्ना १४ अस्या गुणाः स्वादुत्वं शिशिरत्वं शार्करान्निपित्त दाह तृषा नानात्वग्दोषनाशित्वंच इतिराजनिर्घण्टः
अपि च यूथिका गणिकाम्बष्ठा पीता हेमपुष्पिका यूथीयुगं हिमं तिक्तं कटुपाके
रसेलघु मधुरं तुवरंहृद्यंपित्तघ्नं कफवातलं व्रणास्रस्त्राव दन्तादि शिरोरोग विषापहं इतिभावप्रकाशः
सुवर्णवर्णः पुं विष्णुः यथा
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी इतितस्यसहस्रनामस्तोत्रे ॥
सुवर्णवर्णा स्त्री हरिद्रा इति शब्दचन्द्रिका स्वर्णवर्णयुक्ते त्रि सुवर्णविन्दुः पुं विष्णुः
इति हेमचन्द्रः ॥
सुवर्णा स्त्री कृष्णा गुरु इति
मेदिनी वाल्मीलकः इतिशब्द ॥

चन्द्रिका स्वर्णाहीरी हरिद्रा
इति राजनिर्घण्टः ॥ ॥
सुवर्णाख्यः पुं नागकेशरः
इतिरत्नमाला धुस्तूरवृक्षः
इति कनकाह्वयशब्ददर्शनात् सुवर्णा स्त्री स्वर्णावुक
नी इति राजनिर्घण्टः ॥
सुवर्षाः स्त्री शौण्डाह्वी इ
तिराजनिर्घण्टः ॥
सुवल्लिः स्त्री सोमराजी इ
त्यमरटीका भरभरतो ॥
सुवसन्तः पुं चैत्रावली इ
ति त्रिकाण्डशेषः सुन्दरवसन्तकालः सुजातीयवसन्तेश्च सुवसन्तकः पुं वासन्ती
मदनोत्सवः इति मेदिनी ॥
सुवहः त्रि सुखवाह्यः इति
मेदिनी सम्यग्वहः इति हे
मचन्द्रः ॥
सुवहा स्त्री शेफालिकारा
स्नागोधापदी पलायणी इ
त्यमरः शल्लकी वीणा
इतिमेदिनी त्रिवृता इति
शब्दचन्द्रिका भरतश्च रुद्र
जटा हंसपदी गंधनाकुली सुशली नीलसिंधुवा
रः इति राजनिर्घण्टः ॥

सुवासः पुं शोभनगंधः उ
त्तमनिवासः इतिकेचित्
सुवासिनी स्त्री चिरिण्टी इत्य
मरः सुखेन वसतीति सुवा
सिनीतिश्रवित्राः पितृकुल
स्नेहात् चिर मेटति गच्छति
चिरिण्टी इतिगतो अन्यमती
वादिः सुवासिन्यां चिरंटीस्या
त् द्वितीयवयसि स्त्रियामितिरु
द्रः चरंटीत्यके इति तट्टीका।
यांभरतः ॥
सुविद्‌ पुं पंडितः गुणयुक्त
नार्य्यां स्त्री इत्यमरे सौविद
लशब्दटीकायांरामाश्रमः
सुविदः पुं सौ विदः इत्यम
रटीकायां रायमुकुटः राजा
इतिभरतः ॥
सुविदत् पुं राजा इत्यमरे
सौविदल्लशब्द टीकायां रा
य मुकुटः ॥
सुविदत्रं त्रि कुटुंवः इत्युणा
दि कोषः
सुविदलं क्ली यन्तः पुरं इ
त्यमरटीकायां रायमुकुटः
सुविदला स्त्री कुलनारी इ
त्यमरे सौविदल शब्दटीकायां
रायमुकुटः ॥ ॥ ॥।

सुविधिः पुं अर्हद्विशेषः
इति हेमचन्द्रः उत्तमविधाने
च सुविनीता स्त्री सुकरागौः
इति शब्दरत्नावली अतिशय
विनय विशिष्टेत्रि ॥
सुवीजः पुं खसखसः इतिराज
निर्घण्टः सुन्दरवीजेक्ली त
द्वतित्रि ॥
सुवीरकं क्ली सौवीराञ्जनं
इतिशब्दचन्द्रिका ॥
सुवीराम्लं क्ली कांजिकं इति
जटाधरः ॥
सुवीर्य्यं क्ली वदरीफलं इति
जटाधरः उत्तमवीर्य्यंच ॥
सुवीर्य्या स्त्री वनकार्पासी
इतिशब्दरत्नावली ॥
सुवृत्तः पुं शूरणः इतिराज
निर्घण्टः सुन्दरवर्त्तुलश्च ॥
सुवृत्ता स्त्री शतपत्री काक
लीद्राक्षा इति राजनिर्घण्टः
सुवेगा स्त्री महाज्योतिष्म
ती इति राजनिर्घण्टः ॥ ॥
सुवेलः पुं त्रिकूटपर्वतः इ
तिहेमचन्द्रः ॥
सुवेलः त्रि प्रणतः शान्तः
इतिमेदिनी ॥
सुवेशः पुं सेतेक्षुः इति

राजनिर्घण्टः सुन्दरवेशयुक्ते
त्रि यथा सुवेशं पुरुषं दृष्ट्वा
भ्रातरं यदिवा सुतं योनिः
क्लिद्यति नारीणां सत्यं सत्यं
हि नारद इतिमहाभारतं ॥
सुवेशी त्रि सुन्दरवेशयुक्तः
सुवेशशब्दादिन् प्रत्ययेन नि
ष्पन्नः ॥
सुव्रतः पुं भाविकल्पीयार्ह
द्विशेषः इति हेमचन्द्रः शो
भनव्रतयुक्ते त्रि ॥
सुव्रता स्त्री सुखसंदोह्यागौः
इत्यमरः शोभनव्रता इति
मेदिनी वर्त्तमानकल्पीयपंच
दशजिनमाता इति हेमचन्द्रः
सुशर्म्मा पुं निन्दितब्राह्मण
विशेषः यथा सुशर्म्मानाम
कोदेव किंजातीयः किमात्म
कः कृतस्तस्य च वैमुक्तिं के
नवाप्यत्र देवता श्रीभगवानु
वाच सुशर्म्मानामदुर्मेधाः सी
मा पापात्मनामभूत् अनाम्ना
यविदांवंशे विप्राणां ॥
क्रूरकर्म्मणां इति
पाद्मोत्तरखंडे द० अध्या
यः राजविशेषः इति
पुराणं
सुषरणति यः इति।




मुग्धबोधटीकायां दुर्गादा
सः शोभनस्वभावविशिष्टे त्रि
सुशाल्यः पुं खदिरः इति रा
जनिर्घण्टः
सुशवी स्त्री कारवेल्लः कृ
ष्णजीरकः इत्यमरटीकायां
भरतः ॥
सुशाकं क्ली आर्द्रकं इति
राज निर्घण्ट ॥
सुशाकः पुं चंचूः भिंडा
तण्डुलीयः इति राजनिर्घ
ण्टः सुशान्ता स्त्री शशिध्व
जराजपत्नी यथा शशिध्वजो
महातेजा राजा युतबलः सुधीः
तस्य पत्नी महादेवी विष्णुव्रत
परायणा सुशान्ता स्वामिनं प्रा
ह कल्किनायो दुरुयतं नाथ
कान्तं जगन्नाथं सर्वान्तर्यामिनं
प्रभुं कल्किं नारायणं साक्षात्
कथं त्वं प्रहरिष्यसि इति क
ल्किपुराणे २२ अध्यायः सु
शिखः पुं अग्निः इति जटा
धरः उत्तमशिखायुक्ते त्रि ।
सुशिखा स्त्री मयूरशिखा
इति राज निर्घण्टः ॥
सुशीतं क्ली
पीतचन्दनं इति शब्द
चन्द्रिका अतिशयशीतं च

तद्वतिति त्रि ॥
सुशीतः पुं प्लक्षवृक्षः इति
राजनिर्घण्टः ॥
सुशीतलं क्ली गंधतृणं इ
ति रत्नमाला अतिशीतगुण
विशिष्टे त्रि ॥
सुशीता स्त्री शतत्री इति
राजनिर्घण्टः
सुशीविका स्त्री कन्दविशेषः
वाराहीकन्दः इति शब्दचन्द्रि
का सुशीमः पुं शीतगुणः
इत्यमरटीकायां स्वामी तद्व
ति त्रि सुशीलः पुं चोलराजः
यथा यो विष्णुदासः सत्वगुणप्र
शीलो यश्चोलभूपः सश सुशी
लनामा आवां सुभौ तत् सम
नूपभाजौ दास्येन कृतौ तेन र
मापियेण इति पाद्मोत्तर
खण्डे ५४ अध्यायः शोभन
शीलविशिष्टे त्रि ॥
सुशीलता स्त्री सत्स्वभा
वः सुशीलत्वं सुशीलस्वभा
व इत्यर्थे तत्प्रत्यये आकानि
ष्पन्ना सुशीला स्त्री श्रीकृष्ण
स्याष्टमहिष्यन्तर्गतमहिषी
विशेषः यथा अष्टौ महि
ष्यस्ताः सर्वा रुक्मिण्याद्या
महात्मनः कृष्णस्य ॥

भामा च कालिन्दी च सुवि
स्मिता मित्रविन्दा च बभौ ना
ग्नजिती सुलक्षणा सुशीला
नाम तन्वंगी महिष्य स्याः समा
स्मृताः इति पाद्मोत्तरखण्डे ८८
अध्यायः यमभार्या इति
केचित् ॥
सुश्रीका स्त्री सल्लकी इति रा
ज निर्घण्टः सुन्दरश्रीयुक्ते त्रि
सुश्रुतः पुं विश्वामित्रमुनि
पुत्रः सत्वचिकित्साशास्त्र
कर्त्ता यथा तथा धन्वन्तरि र्वं
शे जातः क्षीराब्धिमंथने देवा
दीनां जीवनाय आयुर्वेद मवा
च दविश्वामित्रसुतायैव सुश्रु
ताय महात्मने इति गारुडे १५०
अध्यायः अथ सुश्रुतस्याद्
र्भावः अथ ज्ञानदृशा विश्वा
मित्र प्रभृतयोऽवदन् अयं
धन्वन्तरिः काश्यां काशिराजो
ऽयमुच्यते विश्वामित्रो मुनि
स्तेषु पुत्रं सुश्रुत मुक्तवान्
वत्स वाराणसीं गच्छत्वं वि
श्वेश्वर वल्लभां तत्र नाम्नादि
वोदासः काशिराजोऽस्तिबा
हुजं महि धन्वन्तरिः साक्षा
दायुर्वेदविदां वरः आयुर्वे

दं ततोऽधीत्य लोकोपकृ
तिहेतवे सर्वप्राणिदयाती
र्थे मपकारो महमावः पित
वचनमाकर्ण्य सुश्रुतः का
शिकां गतः तेन सार्द्धं समध्ये
तं मुनिसूनुशतं ययौ अथध
न्वन्तरिं सर्वेषाम् अस्य आश्रमे स्थि
तं भगवन्तं सुरश्रेष्ठं मुनिभि
र्वृत्तं मिल्लते काशिराजं दिवो
दासं तेऽपश्यन् विनयान्विताः
स्वागतं व इति स्माह दिवोदा
सो यशोधनः कुशलं परिप
प्रच्छ तथा गमनकारणं तत
स्ते सुश्रुतद्वारा कथयामासु
रुत्तरं भगवन् मानवान् दृष्ट्वा
व्याधिभिः परिपीडितान् क्रन्द
तो म्रियमाणांश्च जाता स्माकं
हृदि व्यथा आमयानां शमोपा
य विज्ञातुं वयमागताः आयु
र्वेदं भवानस्मान् अध्यापयतु
यत्नतः अंगीकृत्य वच स्तेषां
नृपति स्तानुपादिशत् व्याख्या
तं तेन तेयत्नात् जगृहुः तेन
योग्यदा काशिराजं ययाचो
र्मि रश्मिनं यामदान्विताः सु
श्रुताद्याः सुसिद्धार्थास्तथा
गेहं स्वकं स्वकं प्रथमं सु
श्रुत स्तेषु सत्तन्त्रं ॥ ॥



कृतवान् स्फुटं सुश्रुतस्सु
त्वायोपि पृथक् तंत्राणिते
निरे सुश्रुतेन कृतं तंत्रं सु
श्रुतं बहुभिर्यतः तस्मात्त
त् सुश्रुतं नाम्ना विख्यातं
क्षितिमंडले इति भावप्रका
शः सुषमः त्रि शोभनं इत्य
मरः समः इति मेदिनी
सुषमा स्त्री परमाशोभा
इत्यमरः जिनानां कालभे
दः इति हेमचन्द्रः ॥
सुषवी स्त्री कारवेल्लः इत्य
मरः कृष्णजीरकः जीरकः
इति मेदिनी [illegible] कारवेल्लः
इति राजनिर्घण्टः ॥
सुषिः स्त्री सुषिः इत्यमर
टीकायां भरतः ॥
सुषिरं क्ली सुषिरं इत्यम
रटीकायां भरतः ॥
सुषीमः पुं सर्पविशेषः इ
ति मेदिनी चन्द्रकान्तमणिः
इति जटाधरः ॥
सुषीमः त्रि शीतगुणयुक्तं
इत्यमरः मनोज्ञः इति मेदिनी
सुषुप्तं क्ली सुषुप्त्यवस्थाय
यां जागरे वह्नि रसतलमथ
सिंगोर्ध्वीन भुंक्ते समस्तकरणै

र्दिनत् महत्वात् सर्वे सुषु
प्त उपसंहरते स नकः स्मृतत्व
यात्रिगुणहृद्विदमिन्द्रियेषाः
इति श्रीभागवते ११ स्कंधे १३
अध्यायः सुषुप्तियुक्ते त्रि सु
षुप्तिः स्त्री सत्वप्रधानं अज्ञा
नं तस्य नामान्तरं कारणशरी
रं आनंदमयकोषश्च इति वे
दान्तसारः सर्वस्य स्थूल सू
क्ष्मोपाधेः कारणोपाधौ ली
नत्वं सुषुप्तित्वं इति तट्टीका
अवस्थाविशेषः यथा स्वप्ना
वस्था परीक्षिता सुषुप्तावस्थे
दानीं परीक्ष्यते तत्रैताः सुषु
प्तिविषाः श्रुतयो भवन्ति यत्र
ैतत् सुप्तः समस्तः संप्रसन्नः
स्वप्नं न विजानात्यासु नाडी
षु सृप्तो भवतीति नाडीस्त्वक्र
स्य प्रक्रमते ताभिः प्रत्यवसृ
प्य पुरीतति शेते इति विक
ल्पमानेषु तु सुषुप्तिस्थानेषु क
दाचित् पुरीततः कदाचिदा
त्मन इत्यपेक्षितव्यत् तस्मा
दप्यात्मैव तु सुषुप्तिस्थानमि
ति इति शारीरिकभाष्ये
३ अध्यायः २ पादः किं
च यत्र सुप्तो न कंचन ॥॥

कामं कामयते न कंचन स्व
प्नं पश्यतितत् सुषु इति मां
डुक्योपनिषत् सुनिद्रा च
सुषुम्ना स्त्री मेरुदंडवाह्ये इडा
पिंगलानाडीमध्यस्थनाडीवि
शेषः यथा मेरोर्वाह्यप्रदेशे
शशि मिहिर शिरे सव्यद ॥
क्षेनिषण्णे मध्ये नाडी सुषुम्ना
त्रितयगुणमयी चन्द्रसूर्या
ग्निरूपा इति षट्चक्रभेदः
तस्या अशुभलक्षणं यथाह
णं वामेतरे दक्षे यदा वहति
मारुतः सुषुम्ना सा च विज्ञेया
सर्वकार्यहरा शुभा तस्यां ना
ड्यां स्थितो वह्निर्ज्वलन्त काल
रूपिणः विषमं तं विजानी
यात् सर्वकार्यविनाशनं य
दानुक्रमस्सुल्लङ्घ्य तस्यां ना
ड्यां द्वयं वहेत् तदा तस्य वि
जानीयादशुभं समुपस्थितं इ
ति ब्रह्मयामले मेरुवाह्ये इडा
नाडी पिंगलया समन्विता सु
षुम्ना भानुमार्गेण ब्रह्मद्वारंव
धिस्थिता इति योगस्वरोदयः
सुषेणः पुं करमर्दकः इत्य
मरः विष्णु वानरराज सुग्री
ववैद्यः इति मेदिनी ॥॥

वेतसः इतिराजनिर्घण्टः
सुषेणिका स्त्री कृष्णत्रिवृता
इत्यमरः ॥
सुषेणी स्त्री त्रिवृत् इतिरा
जनिर्घण्टः
सुषोमा स्त्री नदीभेदः इति
श्रीभागवते ५ स्कन्धे १९ अ
ध्यायः सुष्ठु अ प्रशंसा अति
शयं इत्यमरः सत्यं इति सं
क्षिप्तसारोणादिवृत्तिः
सुष्ठु क्ली स्तुतः इत्यमरटीका
यां स्वामी ॥
सुसंयः त्रि यथाविधिसंयम
विशिष्टः यथा ब्रह्मपुराणे यो
यः कश्चित्तीर्थयात्रां तु गच्छेत्
सुसंयतः स च पूर्वं गृहे स्व
कृतोपवासः शुचिः प्रयतः
संपूजयेत् भक्तिनम्रो गणेशं
इति प्रायश्चित्ततत्वं ॥
सुसंस्कृतं त्रि घृतादिनानाद्र
व्येणप्रयत्नेन संस्कृतव्यंजनादि
तत् पर्यायः प्रयस्तं २ इत्यम
रः तैलपाक सुसंस्कारे प्रयस्त
सुपसंस्कृतं इति शब्दरत्नाव
ली उत्तमसंस्कारविशिष्टश्च ॥
सुसत्या स्त्री जनकराजभार्या
यथा जानामि पितरं चाहं ॥॥

विदेहाधिपतिं नृपं तस्य भा
र्यां सुमत्या महं जानामि
मातरं भ्रातरं स्वतः सुताः स
र्वसीता मे भगिनी सुभा सुस
त्या मम मातेति लोको जाना
ति सम्मतं इति कालिका पु
राणे ३० अध्यायः ॥ ॥
सुसवी स्त्री सुषवी इत्यम
रटीकायां रायमुकुटः ॥
सुसमत् स्त्री सौभाग्यं त
त् सुसंपदः पर्यायः परमा
२ इति त्रिकाण्डशेषः ॥
सुसहः त्रि सुखसहः दुःस
हमित्रः सुखेन सह्यते सावि
ति सहधातोः कर्मण्यल् प्र
त्ययेन निष्पन्नः ॥
सुसारः पुं रक्तखदिरः इति
राजनिर्घण्टः अतिशयसार
विशिष्टे त्रि ॥
सुसारवत् क्ली स्फाटिकं इति
त्रिकाण्डशेषः ॥ अतिशयसार
सुसिकता स्त्री शर्करा इति रा
जनिर्घण्टः उत्तमवालुका च
सुसीमा स्त्री पद्माभस्य माता सा
त्व षष्ठजिनजननी इति हेमच
न्द्रः उत्तमसीमा च ॥
सुस्थः त्रि सुखेन तिष्ठतीयः ।
अरोगी यथा मर्त्यो मृत्यु ॥
व्यालभीतः पलायन् सर्वान्
लोकान् निर्भयं नाध्यगच्छत
त्वत् पादाब्जं प्राप्य यदृच्छया
द्य सुस्थः शेते मृत्युरस्मादपै
ति इति श्रीभागवते १० स्कन्धे ३
अध्यायः ॥
सुस्थता स्त्री आरोग्यं इति
शब्दचन्द्रिका ॥
सुस्थिरः त्रि स्थिरतरः यथा
न ह्येकस्मादगुणोत्तानं सुस्थि
रं स्यात् सुपुष्कलं बलेन तद्
द्वितीयं वैणीयते वकृथर्षिभिः
इति श्रीभागवते ११ स्कन्धे ९
अध्यायः ॥
सुस्ना पुं शमीधान्यभेदः खे
सारी इति भाषा अस्य गुणाः
सुस्ना दुर्वातलो रूक्षः कषायो
विशदो गुरुः इति राजनि॥
र्घण्टः ॥
सुस्नातः पुं यज्ञान्तस्नानकृत्
इति शब्दरत्नावली सम्यक्नृप
कृतस्नाने त्रि यथा अथाहं
सुनिवृत्तेषु सुस्नाताः कृतमं
गलाः आप्लुत्याद्विप्रमच्यन्ते
ब्राह्मणान् स्वस्ति वाच्य च इ
ति मुद्रितवं ॥


सुस्मिता स्त्री स्त्रीभेदः इति हे
मचन्द्रः सुन्दर ईषद्धास्यमस्याः त्रि
सुहस्तिः पुं बौद्धभेदः यथा
महागिरि सुहस्त्याद्या वज्रा
न्तादश पूर्विणः इति हेमचन्द्रः
सुहितः त्रि विहितः तृप्तः
इति विश्वः ॥
सुहिता स्त्री अग्निजिह्वावि
शेषः इति जटाधरः
सुहृत् पुं मित्रं सखा इत्यमरः
सुहृद पकस्मालग्नात्चतुर्थ
लग्नं यथा पाताले हिबुकं चै
व सुहृदं भस्तुतुर्थकं इति ज्यो
तिस्तत्त्वे शशिजः सुहृद्गृह
गतः करोति चानर्थ्यं हास्य ध
नवन्तं वचसामधिपं इत्यादि को
ष्ठीप्रदीपः ॥
सुहृदयः त्रि प्रसन्नमनाः
तत् पर्यायः हृदयालुः २ इत्य
मरः सुहृदयः ३ इति शब्दर
त्नावली ॥
सुहोत्रः पुं चन्द्रवंशी यदुहदि
पुराजपुत्रः यथा हहदिषो
बृहदायादः सुहोत्रो नामधार्मि
कः सुहोत्रस्यापि दायादो हस्ती
नाम बभूव ह इति महाभारते ह
रिवंशे पौष्यजकल्पे २० अध्यायः ।
सूः स्त्री सूतिः तेपः सूधातोः
क्विप्प्रत्ययेन निष्पन्नेति के
चित् ॥
सूकः पुं वाणः वातः उत्
पलं इति मेदिनी ॥
सूकरः पुं वराहः कुम्भकारः
इति शब्दरत्नावली मृगभेदः
इति जटाधरः
सूकरी स्त्री वराहक्रान्ता इति
शब्दमाला सूकरभार्या च ॥
सूक्तं क्लि त्रि शोभनोक्तिवि
शिष्टं वेदोक्तस्तोत्रमन्त्रादि य
थाऋग्वेदस्य अग्निमीळे इत्या
दि अग्निसूक्तं सहस्रशीर्षेत्या
दि पुरुषसूक्तं अहं रुद्रेभिरि
त्यादि देवीसूक्तं हिरण्यव
र्णा मित्यादि श्रीसूक्तं रात्रि
र्दहायतीत्यादि रात्रिसूक्तं
आतून इन्द्रक्षुमन्त मित्यादि
गणेशसूक्तं इयमददाद्रभ
सहेत्यादि सरस्वतीसूक्तं अतो
देवा अवन्तु न इत्यादि विष्णु
सूक्तं मेदिनी देवीत्यादि भू
सूक्तं आदित्यानामित्यादि
आदित्यसूक्तं त्वं सोम इत्या
दि सोमसूक्तं इत्यादि ऋग्वे
दस्य सूक्तसकलं यथा ॥॥

सहस्रमेकं सूक्तानामित्या
दिचरणव्यूहः यजुर्वेदस्य वि
शामेश मित्यादि कुमारसूक्तं
सोमाय पितृमते इत्यादिपि
तृसूक्तं पवमान स्वर्जन इ
त्यादिपावमानीसूक्तं इत्या
दिवेदप्रसिद्धं तथा जप्यानि
सूक्तानि तथैव चैषां मन्त्र
क्रमेणापि यथास्वरूपं इति
मलमासतत्वं अपिच सन्द
र्शनार्थं मन्वाया नदीपुलिन
संस्थितः सचैवैश्यस्तपस्तेपे
देवीसूक्तं परं जपन् इति
मार्कण्डेयपुराणे देवीमाहात्म्यं
सूक्ता स्त्री शारिका यथा सू
क्ता मदनशलाका चित्राटीशा
रिकावचंडाच इति त्रिकाण्ड॥
शेषः॥
सूचत् कपैशुन्ये इतिकविक
ल्पद्रुमः दीर्घी असूसूचत् क
श्चोलोकं कथितवान् इत्यर्थः
इतिरमानाथः पैशुन्यमेतद्धी
हूरित्येके इतिदुर्गादासः सूचकं
पुं कृणाकुरः इतिकेचित्
सूचकः त्रि पिशुनः इत्यम
रः अस्य विवरणं कर्णेजप
शब्दे द्रष्टव्यं॥ ॥ ॥

सूचकः पुं सीवनद्रव्यं बोध
कः कुक्कुरः विडालः काकः
इतिमेदिनी पिशुनः बुद्धः
सिद्धः पिशाचः
इति शब्दरत्नावली सूत्रधारः
कथकः इति हेमचन्द्रः सूल
शालिः इतिराजनिर्घण्टः
सूचनं क्ली गन्धनं ज्ञापनं
इतित्रिकाण्डशेषः॥
सूचना स्त्री व्यधनं दृष्टिः ग
न्धनं अभिनयः इति विश्वमे
दिन्यौ॥
सूचिः स्त्री सीवनी इत्यमरः नृ
त्यप्रभेदः शिखा यथा सूचि
र्नृत्यप्रभेदे चव्यधनी शिखयो
रपि इतिरत्नकोषः
सूचिकः पुं सूच्या जीवति
यः सौचिकः २ सौचिः ३ तन्त्र
वायः ४ सूत्रभित् ५ इतिश
ब्दरत्नावली॥
सूचिका स्त्री सूचिः हस्तिशु
ण्डः इतिकेचित्॥
सूचिकाधरः पुं हस्ती
इतिशब्द माला
सूचिकाभरणं क्ली औ
षधविशेषः यथा
विषं पलमितं सूतः शा॥

णिक शूणाये द्वयं तच्चूर्णं सं
पुटे कृत्वा काचलिप्तशराव
योः मुद्रां कृत्वाथ संशोष्यत
तश्चुल्ल्यां निवेशयेत् वह्निं श
नैः शनैः कुर्यात् प्रहरद्वयसं
ख्यया तत उद्घाट्य तन्मुद्रामुप
रिस्थशरावकात् संलग्नो यो
भवेद्धूमस्तं गृह्णीयाच्छनैः श
नैः वायुस्पर्शो यथा नस्यात्त
तः कूप्यां निवेशयेत् या
वत् सूच्या मुखे लग्नं कूप्यानि
र्याति भेषजं तावन्मात्रो रसो
देयो मूर्च्छिते सन्निपातिनि
क्षुरेण प्रच्छते मूर्द्धि तत्रांगुल्या
च घर्षयेत् रक्तभेषजसंपर्का
त् मूर्च्छितोपि हि जीवति
तथैव सर्पदष्टोपि मृतावस्थो
पि जीवति यदा तापो भवेत्त
स्य मधुरं तत्र दीयते इतिसू
चिकाभरणोरसः इति
भैषज्यरत्नावली॥
अपिच विषं पलं रसं शाणं
तच्चूर्णं काचलेपिते मृत्सं
पुटे च संरुध्य चुल्ल्यां संस्थाप्य
पाचयेत् शनैर्यामद्वयं पक्वा
न्ते समुद्घाट्य शीतलं ऊर्द्ध्वपात्र
गतं धूमं गृहीत्वा एष॥

मारुते यावत् सूच्या मुखलग्नं
कूप्या आयाति भेषजं त्व
रेण प्रवते शीर्षे तत्रांगुल्या
च घर्षयेत् त्रिदोषे मूर्च्छितो।
जीवो रक्तभेषजसंगमात्
सर्पदष्टो मृतावस्थः सोपि
जीवति तत्तापात् दद्याच्च
मधुरं तोयं सूचिकाभरणोर
से इतिसूचिकाभरणरसः संनि
पाते इतिरसप्रदीपः॥
सूचिकामुखं क्ली शंखः इ
तिहारावली सूच्यास्येत्रि॥
सूचितः त्रि कथितः बोधि
तः सूचधातोक्तप्रत्ययेन नि
ष्पन्नः सूचिपत्रकः पुं सिता
वरशाकः इतिराजनिर्घण्टः
सूचिपुष्पः पुं केतकवृक्षः
इति जटाधरः॥
सूचिरोमा पुं वराहः इति
हारावली॥
सूचिवदनः पुं नकुलः मश
कः इतिराजनिर्घण्टः॥
सूचिवान् पुं गरुडः इति
शब्दरत्नावली॥
सूचिशालिः पुं सूक्ष्मशालिः
इति राजनिर्घण्टः॥
सूची स्त्री सीवनद्रव्यं सूचयति



भाषा आङ्गिकाभिनयविशेषः
अङ्गद्वाराचेष्टा इति मेदिनी ॥
करणं इति हेमचन्द्रः दृष्टिः
इति केचित् ॥
सूची त्रि सूचकः सूचधातो
र्णिन् प्रत्ययेननिष्पन्नः ॥
सूचीदलः पुं सितावरः इति
राजनिर्घण्टः ॥
सूचीपुष्पः पुं केतकी इति
रत्नमाला ॥
सूचीमणिं क्ली हीरकं इति
हेमचन्द्रः सूच्यास्येत्रि सूची
मवत्तुखितकृष्णः इतिराजनिर्घण्टः
सूचीरोमा पुं शूकरः इति
त्रिकाण्डशेषः सूचीतुल्यलो
मविशिष्टेत्रि
सूच्यग्रस्थ लकः पुं त
णविशेषः उलू इति भा
षा यथा सूच्यग्रस्थूलको
दर्भोजूर्णाख्यश्चत्वरछः ॥
दः इतिरत्नमाला ॥ ॥
सूच्यास्यः पुं मूषिकः ॥
इति हेमचन्द्रः ॥
सूचीसुखे त्रिसू
च्याकः पुं सितावरः ॥
इतिराज निर्घण्टः

सूतः पुं सारथिः त्वष्टा इत्य
मरः तत्रियात् ब्राह्मणीसु
तः वन्दी पारदः इतिमेदिनी
सूर्य्यः इत्यनेकार्थकोषः पु
राणवक्ता यथा सवान्तेसू
तमनघं नैमिषीयामहर्षयः
पुराणसंहिता पुण्या पप्रच्छ
र्लोमहर्षणं त्वयासूतमहाबु
द्धे भगवान्ब्रह्मवित्तमः इति
हासपुराणार्थं व्यासः सम्यगु
पासितः अस्पते सर्वरोमा
णि वचसा कर्षिताणि ते द्वै
पायनस्य भगवांस्ततोवै रो
महर्षणः भवन्तमेव भगवान्
व्याजहार स्वयंप्रभुः मुनीनां
संहितां वक्तुं व्यासः पौराणि
कीं पुरा तद्दिस्वायेभवेय
ज्ञे सत्यादौ वितते सति सं
भूतः संहितां वक्तुं स्वांशेन
पुरुषोत्तम इति कौर्म्मे १
अध्यायः अपिच नि
योगाद्ब्रह्मणः साई देवेन्द्र
णमहौजसः वेणपुत्रस्य वि
तते पुरा पैतामहे मखे सूतः
पौराणिको जज्ञे मायारूपः
स्वयं हरिः प्रवक्ता सर्वशास्त्रा
णां धर्म्मज्ञो गुणवत्सलः त

मांविद्धि मुनिश्रेष्ठाः पूर्वोद्भूतं
सनातनं एतस्मिन्नन्तरे व्यासः
कृष्णद्वैपायनः स्वयं आजगाम
स याः प्रीत्या पुराणपुरु
षो हरिः मदन्वये च येसूताः
संभूता वेदवर्जिताः तेषापु
राणवक्तृत्वं वृत्तिरासीदज्ञा
ज्ञया इति कौर्म्मे १२ अध्यायः
किंच ब्रह्मणः पौष्करे यज्ञे
सूत्याहे वितते सति पृषदाज्या
त् समुत्पन्नः सूतः पौराणि
को द्विजः वक्ता वेदादिशास्त्रा
णां त्रिकालामलतत्त्ववित् ॥
तीर्थयात्राप्रसङ्गेन नैमिषारण्य
मागमत् इति वह्निपुराणे १
अध्यायः अन्यच्च हस्तेनदक्षि
णे चक्रं दृष्ट्वा तस्य पितामहः
विष्णोरंशं पृथुं मत्वा परितो
षं परं ययौ तस्य वै जातमात्र
स्य यज्ञे पैतामहे शुभे सू
तः सूत्यां समुत्पन्नः सौत्ये
ऽहनि महामते तस्मिन्नेव महा
यज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥
प्रोक्तौ तदा मुनिवरैस्तावुभौ
सूतमागधौ स्तूयतामेष नृप
तिः पृथुर्वैण्यः प्रतापवान् ॥
इति विष्णुपुराणे १ अंशे

१३ अध्यायः सूत एव प्र
थो जीतत्वात् जातमात्रस्य
यज्ञ इत्युच्यते पृथुरेवाभवत्
यस्मात्ततः पृथुरजायत इति
मात स्वामी: पैतामहे पिता
महदैवत्ये पृथोरेव यज्ञेनत
पितामह कर्तृके यथाह वायुः
वैण्यस्य हि पृथोर्यज्ञे वर्तमा
नेमहात्मनः सूतः सूत्यां स
मुत्पन्न इति सूत्यामितिसूति
रभिषूतिः अभिषूयते कंड्य
ते सोमो ऽस्यामिति सूतिः सोमा
भिषवभूमिस्तस्यां सौत्ये
ऽहनि तस्मिन्नेवहिने इतिटी
का किंच एतस्मिन्नेव
काले तु यज्ञे पैतामहे शुभे
सूतः सूत्यां समुत्पन्नः सौ
त्येऽहनि पुराणवित् तेषां यज्ञे
पुनस्त्वेव सुतपत्नी सूतमाग
धौ पृथोस्तवार्थे तौ तत्र समा
हूतौ महर्षिभिः तेऊचुः ऋषि
यः सर्वस्तू यता येष पार्थिवः
नैर्निर्युक्तौ स्वकर्म्माणि पृथोर्यो
निमहात्मनः तुष्टवुस्तानि सर्वा
णि आशीर्वादांस्ततः परान् त
योस्तान्ने सम्प्रीतः पृथुः प्रादात्
जनेश्वरः अनूपदेशं सूताय

मागधान् मागधायच तंदृष्ट्वा
परमप्रीताः प्रजाः प्राहु मैत्रमैत्रे
येयः वृत्तीमा मेष वोदाता भवि
ष्यति नरेश्वरः इति वह्नि
पुराणे पृथोरुपाख्यान नामा
ध्यायः ॥
सूतः पुं क्ली पारदः इत्यमरः
सूतः त्रि प्रसूतः प्रेरितः इति
मेदिनी ॥
सूतकं क्ली जन्म इति मेदिनी ॥
जननाशौचं यथा मृतेन सू
तकं गच्छेन्नतरत् सूतकेन त
इति वृद्धमनुरपि शावस्योपरि
शावे तु सूतकोपरि सूतके शे
षाहोभिर्विशुद्धिः स्यादुदक्यां
सूतिकां विना ॥
मरणाशौचं यथा सर्वं गोत्र
मसंस्पृष्टं तत्र स्यात् सूतके
सति मध्येपि सूतकेदद्यात्
पिंडान् प्रेतस्य तृप्तये इति
शुद्धितत्वं प्रतिवंधकं यथा
व्रप यज्ञ विवादेषु श्राद्धे हो
मेऽर्चने जपे आरब्धे सूतकं न
स्यादनारब्धे तु सूत कं इ
ति तिथ्यादितत्वं ॥
सूतकं क्ली पारदः इति
मेदिनी॥ ।। ॥ ॥

सूतका स्त्री सूतिका इति सू
तकागृहशब्द दर्शनात् ॥
सूतकागृहं क्ली सूतिका
गृहं इत्यमरटीकायां भरतः
सूततनयः पुं कर्णः इति हे
मचंद्रः ॥
सूतपुत्रकः पुं कर्णः इति
हेमचंद्रः ॥ शब्दरत्नावली
सूतपुत्रकः पुं कर्णः इति
त्रिकांडशेषः ॥
सूतराट् पुं पारदः इति राज
निर्घंटः
सूतिः स्त्री सोमाभिषवभूमिः
यथा अभिषूयते कंडूते सो
मोऽस्यामिति सूतिः सोमा
भिषवभूमिः इति सूतशब्दे
विश्वप्रकाशटीका जनने से
वनं सीवनं इति केचित्
सूतिका स्त्री नवप्रसूता य
था शावस्योपरि शावे तु सू
तकोपरि सूतके शेषाहोभि
र्विशुद्धिः स्यादुदक्यां सूतिकां
विन इति शुद्धितत्वं तदन्न
भोजन प्रायश्चित्तं यथा शावं
चांडालान्नं भूमिपान्नं अजन्नी
विप्रजीविनां शौंडिकान्नं सूति
कान्नं भुक्त्वा मासं व्रती॥ ॥

भवेत् इति प्रायश्चित्ततत्वं
तदवलोकन तदालपनतत्
संस्पर्शनिषेधो यथा ना
लपेत् जनविद्विष्टान् वीर
हीनां तथा स्त्रियं देवतापितृ
सच्छास्त्र यज्ञ सत्रादिनिन्दकैं
कृत्वा तु स्पर्शनालापं शुद्ध्य
तार्कावलोकनात् अवलोक्य
तथोदक्यामंत्यजं पतितं
शवं विधर्मिसूतिकाषंड
विवस्त्रांत्यावसायिनः मृतनि
र्यातकांश्चैव परदाररतांश्च
ये एतदेवहि कर्तव्यं प्राज्ञैः
शोधनमात्मनः पा
रिभाषिक सूतिका लक्षणंय
था अभोज्यसूतिका एवमाज्ञो
शादंस्पृक्कुक्कुटान् पतिताप
विद्धचांडाल मृतहारांश्च ध
र्मवित् संस्पृश्य शुद्ध्यते स्ना
नात् उदक्याग्रामसूकरौ त
द्वच्च सूतिकाशौचदूषितौ पु
रुषावपि अलर्क उवाच भव
ता कीर्तिता भोज्या ये एते सू
तिकादयः अमीषां श्रोतुमि
च्छामि तत्वतो लक्षणानि हे म
दालसोवाच ब्रह्मणी ब्राह्मणश्चै
व यावच्छेषत्वमागतो तावद्भोज्य

तिके स्त्रीपुंसौ तयोरन्नं विग
र्हितं इति मार्कंडेयपुराणे
सदाचाराध्यायः वामनपुरा
णे १४ अध्याय च द्रष्टव्यं ॥
सूतिकागारं क्ली प्रसवगृ
हं इति जटाधरः ॥
सूतिकागृहं क्ली प्रसवालय
तत् पर्यायः अरिष्टं १ त
ल्पः २ सूतकागृहं ३ इति
तट्टीका सूतीगृहं ४ सूति
गृहं ५ इति जटाधरः तस्या
कृतिर्यथा अष्टहस्तायतं चा
रु चतुर्हस्त विशालकं प्राची
द्वारमुदग्द्वारं विदध्यात् सू
तिकागृहं इति भावप्रकाशः
तत्र पिशाचानां वासो यथा
सर्वत्र गान प्रतिचान् सूति
कागृहसेविनः पृष्ठतः पा
णिपादांश्च पृष्ठग्रीवान् सु
रेश्वरः एवं विधान् पिशाचां
श्च दृष्ट्वा ब्रह्मानुकंपया अंत
र्ध्यानं वरं प्रादात् कामरूपि
त्वमेव च इति वह्निपुराणे
प्रजापतिसर्गनाम्ना अध्या
यः सूतिकागेहं क्ली प्रस
वगृहं यथा जाताम सूतिका
गेहं नारी रूपं विधाय भूः जयशब्द

शंखशाह्वोहरिशाह्वोवभूवह॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ७ अध्यायः ॥
सूतिकाभवनं क्ली प्रसवगृ
हं इति हलायुधः ॥
सूतिकावासः पुं प्रसवगृहं
यथा सूतिकावासनिलयागो
जन्मदानामदेवताः तासांया
गतिमित्तंत्तद्धि जन्मनि कीर्ति
ता षष्ठः क्लिशत्रियागंतज॥
न्मदानांतकारयेत् इति ॥
स्मृतितत्वं ॥
सूतिकारोगः पुं नवप्रसूता
याव्याधिभेदः तन्निदानादिय
थामिथ्योपचारात् संक्लेशा
त् विषमाजीर्णाभोजनात् सू
तिकायास्तुये रोगा जायंतदा
रुणास्तु ते मिथ्योपाचारात्
अनुचिताचरणात् मवानादि
सेवनात् संक्लेशात् संक्लि
श्यंते दोषा अनेन इति संक्ले
शः दोषजनक मन्न तस्मात्
दारुणाः कष्टसाध्याः केते
व्याधय इत्याकांक्षाया माह
अंगमर्दो ज्वरः कासः पिपासा
गुरुगात्रता शोथः शूलातिसा
रोच सूतिकारोगलक्षणं ॥

एतेंऽगमर्दादयः प्रायेण सूति
कायाभवंतः सूतिकारोगत्वे
न लक्ष्यंते ज्वरादीनां रोगा
विशेषाणां निदानविशेषमा
ह ज्वरातीसार शोथास्तु शू
लानाहबलयाः तन्द्रारुचि प्रसे
काद्यावात श्लेष्म सम्भवाः
कृच्छ्रसाध्या हिते रोगाः क्षीण
मांस बलाश्रिताः तेसर्वे सूति
कानाम्ना रोगा स्ते चाप्युपद्र
वाः सूतिकाभवत्वेन सूतिका
नाम्ना ते रोगाः आश्रयाश्रि
तयोरभेदोपचारात् तेचाप्यु
पद्रवा इति तएव ज्वरादय उ
क्तानां रोगाणामन्यतमं प्र
धानीकृत्योपद्रवाश्च अथ
सूतिकारोगचिकित्सा सू
तिकारोग शांत्यर्थं कुर्या
द्वातहरीं क्रियां दशमूलकृ
तंक्वाथं कोष्णं दद्यात् घृता
न्वितं अमृतानागरसहचरभद्रो
त् कटपंच मूलकं जलदं शृ
तशीतं मधु युक्तं शमयत्यचि
रेण सूतिकातंकं देवदारुवचा
कुष्ठं पिप्पली विश्वभेषजं भूनिं
बकट्फलं मुस्तं तिक्ता धान्यं हरी
तकी गजकृष्णा दुःस्पर्शा गोक्षुरं

धंवयासकः वृहत्यतिविषा
छिन्नाकर्कटः कृष्णजीरकः स
मभागान्वितैरेतैः सिंधुरामठसं
युतैः क्वाथमष्टावशेषंत प्रसूतां
पाययेत् स्त्रियं शूलकासज्वर
श्वास मूर्च्छा कंपशिरोर्तिभिः
युक्तंप्रलापतृड्दाह तन्द्राती
सार वांतिभिः निहंति सूति
कारोगं वात पित्त कफोद्भवं
कषायो देवदार्वादिः सूतायाः
परमौषधं देवदार्वादिकाथः
जीरकः स्थूलजीरश्च शतपु
ष्पाद्वयं तथा यवानीचाजमो
दाच धान्यकं मेथिकापिच
शुंठी कृष्णा कणामूलं चित्रकं
हपुषापिच वदरीफल चूर्णं
च कुष्ठं कंपिल्लकं तथा एतानि
पलमात्राणि शुडं शतलं मते
क्षीरे प्रस्थद्वयं दद्यात् सर्पिषः
कुडवं तथा पंचजीरकपाकोऽ
यं प्रसूतानां प्रशांतये युज्याते
सूतिकारोगे योनिरोगे ज्वरे
क्षये कासे श्वासे पांडुरोगे कार्श्य
वातामये षु च पंचजीरकपा
कः आज्यस्य — लिप्रस्थम
त्र पयसः प्रस्थद्वयं खंडतः
पंचाशत्पलमत्र चूर्णितमथ

प्रतिप्यनेनागरं प्रस्थार्द्धं गुडव
द्विपाच्य विधिना सच्छित्रयं
धान्यकात् मिश्याः पंचपलं
पलं कृमिरिपोः साज्जाजि जी
रादपि श्चोवाभोद दलोरगो
त्रुसमन स्तत् द्राविडीनां प
लं पृथक् नागरखंडसंज्ञकमि
दंसौभाग्यदं घोषितां तृट्
श्वासज्वरदाह शोषशमनं
सश्वासकासापहं प्लीहव्या
धिविनाशनं कृमिहरं मन्दा
ग्निसन्दीपनं दलं पत्रकं उ
रगेन्द्रः समनः नागकेशरं द्रावि
डी सूक्ष्मैला सौभाग्यशुंठी
सूतिकाषष्ठी स्त्री सूतिका
गारेजातबालकस्य षष्ठदिने
जूज्यदेवी विशेषः अथ सूति
काषष्ठीपूजाविस्तु धर्मोतरे
सूतिकावासनिलया जन्मदा
नामदेवताः तासां यागनिमित्ता
र्थं शुद्धिर्जन्मनि कीर्तिता षष्टेः
क्लिशत्रियागंत जन्मदानां च
कारयेत् रक्षणीया सदा षष्ठी
निशातत्रविशेषतः रात्रजाग
रणं कार्यं जन्मदानां तथाव
लिः रामेतिसम्बोधनं ॥
तत्रापे ॥ ॥

वान्तरदोषोपिनास्ति अशौचे ॥
वे तु सञ्जत पत्रे पुत्रजन्मय
दाभवेत् कर्त्ते स्नात् कालि
की शुद्धिः पूर्वाशौचादिशुध्य
ति इति प्रजापति वचनात्
पुत्रजन्मतिश्रवणात् पित
रेवाशौचाभावः ननमावः क
न्नेरिति पुंलिंगनिर्देशात्र काम
येदिति अन्यगोत्रजाभिप्राये
ण तत्रादौ विनायकादिस
हितषोडशमातृका पूजनेन
ष्याच कृत्यविन्यासोगोरक्षार्थ
जागरणं कार्यं खड्गो धार्य्यः
समीपतः आवाह्य पूजयेद्दे
वीं गणेशं मातरं गिरिं देवीं
षष्ठीं गिरिं मस्थानदंडं मातृ
नामान्याह बहृचगृह्यपरिशि
ष्टे गौरी पद्मा शची मेधा सावि
त्री विजया जया देवसेना स्वधा
स्वाहा मातरो लोकमातरः धृ
ति पुष्टि ईति स्तुष्टिरात्मदेवता
या सह आदौ विनायकः पूज्यो
अन्ते च कुलदेवता तास्याभि
धाय भविष्ये पूज्या षष्ठिदे
अष्टादिकार्या वरदाभयपा
णयः मातर इति सर्वासां दिशे
षणं अत एव गौर्य्य मात्रे नमः

इत्यादि प्रयोगः एता मातरो
लोकमातरो ज्ञेयाः अ
तएव तयोर्वेकत्वेन निर्देशः
गणेशपूजायां प्रार्थनमं
त्रो यथा सर्वविघ्नहरो देव
एकदन्तो गजाननः षष्ठीगृहे
स्थितः प्रीत्यापियं दीर्घायुषं
कुरु इति ततः आषाढि वर
दे देवि महाषष्ठीति विश्रुता
शक्तिरूपेण मे पुत्रं रक्षजाग
रवासरे इति एष्टा आवाहनं
ततः षष्ठीं पूजयेत् गौर्य्याः
पुत्रो यथा स्कन्दः सदा संर
क्षितस्त्वया तथा ममाप्ययं
वालो रक्ष्यतां षष्ठि ते नमः इ
ति त्रिः पूजयेदिति भोजरा
जः गणेशश्चैव नन्दा च पूत
ना मुखमंडिका विडालिका
शकुनिका मुष्ककन्दा च जंभि
का आचार्य्यका रेवती च पिलि
पिंडा ततः परं स्कन्दा च डाशे
ने ज्ञाः रक्षार्थं मातृकाग्रहाः
कृत्वविंन्यासमाणे स्तुतिः जयदे
विजगन्मातर्जगदानन्दका
रिणि प्रसीद मम कल्याणि
नमोस्तु षष्ठि देवि ते वरप्रा
धनं रूपं देहि यशो देहि भाग्यं भग
वति

देहि मे पुत्रान्देहि धनं देहि
सर्वान्कामांश्च देहि मे धात्री
त्वं कार्त्तिकेयस्य महाषष्ठीति
विश्रुता त्वत्प्रसादादविघ्नेन
चिरं जीवतु बालकः देवताना
मृषीणां च सर्वेषां हितकारि
णि समर्पितं रतं महाषष्ठिन
मोः स्तुते इत्यनेन वालं अज
नस्य कृत्वा समर्पयेत् मस्या
नदंड- पूजयेत् मस्थान मे
दरोसि त्वं मथितः सागरस्त्वया
तथा ममापि पुत्रस्य मेघवि
घ्नेनमोऽस्तु ते ततः षट्कृत्ति
काः पूजयेत् तास्तु शिवासं
भूति नाम्री च कीर्त्तिः संतति
रेव च अनसूया क्षमाचैव षडे
ताः कृत्तिकाः स्मृताः ॥
मार्कंडेयपुराणे अग्न्येवुप
मुसूल्येच निर्धूपे सूतिकागृहे
अदीप शस्त्रमुषले भूति सर्व
प्रवर्जिते अत्र प्रविश्य या जात
म पहृत्यात्मसंभवं क्षणप्रस
विनी वालं तत्रैवोत् सृज्यते
द्विज सा जातहारिणी नाम ॥
सुघोरा पिशिताशना तस्मात्
संरक्षणं कार्यं यत्नतः सूतिका
गृहे सूर्पौ वद्धछागस्तम्भं ॥

पशुः छागः छागजागरणं का
र्य्यमित्येकवाक्यत्वात् ॥
पाद्मे पायसं सर्पिषामिश्रं
द्विजेभ्यो यः प्रयच्छति गृहे
तस्य नरक्तांसि धर्षयंति कदा
चन इति ज्योतिस्तत्वं अन्यत्
षष्ठीशाद्रष्टव्यं सूतिगृहं ॥
स्त्री प्रसवगृहं इति
शब्दरत्नावली ॥
सूतिमासः पुं प्रसवमासः त
त् पर्य्यायः वैजननः २ इत्य
मरः सूतिमासो वैजननो न
वमो दशमोपि च इति
जटाधरः ॥
सूतीगृहं स्त्री प्रसवागारं ॥
इति शब्दरत्नावली ॥
सूतकारं स्त्री अनुकरणश
ब्दविशेषः सूत् इति शब्दं करो
ति यथा सीत् कारादि ॥
सुत्वानः त्रि चतुवः इत्यमरः
सुन्दरोवाने स्त्री ॥
सूत पदं स्त्री शरसंधानं इ
ति शब्दचन्द्रिका ॥
सूत्या स्त्री यज्ञस्नानं तत् ॥
तत् पर्य्यायः अभिषवः २
सवनं ३ इत्यमरः सोमलता
रसपानं इति भरतः ॥ ॥

सूत्याशौचं क्ली जननाशौचं यथा दशाहाभ्यंतरे वाले प्रमीते तस्य वान्धवैः शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते इति शुद्धितत्वं ॥
सूत्रनक ग्रंथने इति कविकल्पद्रुमः दीर्घी दंत्यवर्गाद्यमध्यः वेष्टने इत्यन्ये सूत्रयति सूत्रापयति सूत्रेण हंतं लोकः इति दुर्गादासः ॥
सूत्रं क्ली वस्त्रारंभकं सूता इति भाषा तत्पर्य्यायः तंतुः २ इत्यमरजटाधरौ सूत्रतंतुः ३ इति भरतधृतहारावलीव्यवस्था शास्त्रादिसूचना ग्रंथः इति मेदिनी सूत्रलक्षणं यथा स्वल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखं अस्तोभमनवद्यंच सूत्रं सूत्रविदो विदुः इति मुग्धबोधटीकायां दुर्गादासः ॥
सूत्रकण्ठः पुं विप्रः खंजरीटः कपोतः इति मेदिनी ॥
सूत्रकोणः पुं डमरुः इति हारावली ॥
सूत्रकोणकः पुं डमरुः इति त्रिकांडशेषः ॥ ॥

सूत्रगंडिका स्त्री तंत्रवायोपकरणविशेषः तत्पर्य्यायः पषाणी २ इति शब्दमाला ॥
सूत्रतंत्रं पुंसूत्रे इति हारावली ॥
सूत्रतर्कुटी स्त्री तर्कुटी टेका इति भाषा इति जटाधरः ॥
सूत्रधरः पुं सूत्रधारः इति केचित् ॥
सूत्रधारः पुं शचीपतिः इन्द्रः नान्द्यन्तरसंचारी सन्तरंगभूमि परिक्रम्य नाटकीयकथा ॥
सूत्रसूचकः शिल्पिप्रभेदः छुतार इति भाषा इति मेदिनी सच शूद्रागर्भे विश्वकर्म्मणो रसेन जातः इति ब्रह्मवैवर्त्ते ब्रह्मखंडे १० अध्यायः ॥
सूत्रपुष्पः पुं कार्पासः इति त्रिकांडशेषः ॥
सूत्रभित् पुं सौचिकः इति शब्दसूत्रभिद् रत्नावली ॥
सूत्रमध्यभूः पुं यक्षधूपः इति शब्दचन्द्रिका ॥
सूत्रयंत्रं क्ली सूत्रवेष्टनकाष्ठ ताना इति भाषा यथा आवापनं सूत्रयन्त्रं यत् सूत्रैरभिवेष्टते इति शब्दमाला ॥

सूत्रला स्त्री तर्कुटी इति हारावली ॥
सूत्रवीणा स्त्री वीणाभेदः तत्पर्य्यायः लाबुकी २ इति हारावली ॥
सूत्रवेष्टनं क्ली तंत्रवायोपकरणं नासनी इति भाषा तत्पर्य्यायः त्रसरः इत्यमरः त्रसरः इति भरतः सूत्रामा पुं इन्द्रः इत्यमरः ॥
सूत्राली स्त्री गलसूत्रं तत्पर्य्यायः गलमेखला २ इति ॥ हारावली ॥
सूत्री पुं काकः इति त्रिकांडशेषः सूत्रविशिष्टे त्रि ॥
सूदः पुं सूपकारः व्यंजनं इत्यमरः सूपः इति विश्वः ॥ सारथ्यं अपराधः लोध्रं पापं इत्यजयपालः ॥
सूदनं क्ली अंगीकरणं हननं क्षिः क्षिपणं सूदधातो रनट्प्रत्ययेन निष्पन्नं तद्वति त्रि
सूदशाला स्त्री पाकशाला यथा सूदशाला रसवती पाकस्थानं महानसं इति हेमचन्द्रः
सूदाध्यक्षः पु पाकशालाध्यक्षः तत्पर्य्यायः पौरोगवः २ ॥ इति हेमचन्द्रः पुरोगमः ३ इति शब्दरत्नावली तल्लक्षणं यथा अनाहार्य्यः शुचि र्दक्षशिक्षितः सितविदांवरः सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते इति मात्स्ये १८९ अध्यायः ॥
सूनं क्ली प्रसवः पुष्पं विकसिते त्रि इति विश्वमेदिन्यौ ॥
सूनः त्रि जातः इति मुग्धबोधव्याकरणं सूना स्त्री पुत्री वधस्थानं गलशुण्डिका इति मेदिनी मृगमांसविक्रयः मृगपक्षिवधस्थानं मांसविक्रयः इति सं क्षिप्तसारोणादिवृत्तिः जात इति सूनशब्दार्थदर्शनात् सूना प्रकाराणि तत् पापनाशकानि चपचसूना शब्दे द्रष्टव्यानि ॥ ॥
सूनी पुं व्याधः मांसविक्रयी सूनाशब्दादिन् प्रत्ययेन निष्पन्नः ॥
सूनुः पुं पुत्रः अनुजः ॥ सूर्य्यः इति मेदिनी अर्कवृक्षः इत्यमरः
सूनृः
सूनुः स्त्री कन्या इति हेमचन्द्रः

सूनृतं क्ली सत्यप्रियवाक्यं इ
त्यमरः मंगलं इत्यजयः ॥
तद्वतित्रि ॥
सूत्मदः त्रि उन्मत्तः उन्मादि
सुः इत्यमरे उन्मदशब्दटीका
यां भरतः ॥
सूत्मादः त्रि उन्मादरोगविशि
ष्टः इत्यमरे उन्मदशब्दटीका
यां रमानाथः ॥
सूपः पुं व्यंजनविशेषः डा
लि इतिभाषा सूदः इति मेदि
नी भांडः पात्रकं इति श
ब्दरत्नावली अध्यमाली ॥ ॥
दलितंतत शमीधान्यं दालिर्दा
लीस्त्रिया मुभे दाली तसलि
लेसिद्धा लवणाद्रक हिंगुभिः
संयुक्ता सूपनाम्नी स्यात् कथ्य
ते तद्गुणाश्च सूपोविष्टंभ
कोरूक्षः शीतस्तु सविशेषतः
निस्तुषो भृष्टसिद्धः स लाघवे
स्वतरां व्रजेत् इति भाव प्र
काशः ॥
सूपकारः पुं पाककर्त्ता तत्
पर्य्यायः वल्लवः २ आरालिकः
३ आन्धसिकः ४ सूदः ५ औद
निकः ६ गुणः ७ इत्यमरः पा
चकः ८ इति शब्दरत्नावली॥
पाककः ९ इत्युणादिकोषः भ
त्संकारः १० इति हेमचन्द्रः त
स्य लक्षणं यथा इंगिताकार
तत्त्वज्ञो बलवान् मिष्टपाचकः
शूरश्च कठिनश्चैव सूपकारः॥
स उच्यते इति॥
चाणक्ये शूद्रपाकोपजीविय
था देवोपजीवाजीवीयः देवा
लश्च प्रकीर्त्तितः शूद्रपाको
पजीवीषः सूपकारः प्रकी
र्त्तितः सन्ध्यापूजा विहीनश्च
प्रमत्तः पतितः स्मृतः उ
क्त पूर्वप्रकारेण लक्षणं वृष
लीपतेः एते महापातकिनः
कुंभीपाकं प्रयान्ति ते ब्रह्मण्या निते
यानि निबोधकर्य्यमितान् इति ब्र
ह्मवैवर्त्ते प्रकृतिखंडे २१
अध्यायः ॥
सूपधूपनं क्ली हिंगु इति ॥
त्रिकांडशेषः ॥
सूपपर्णी स्त्री मुद्गपर्णी
इतिरत्नमाला ॥
सूपश्रेष्ठः पुं मुद्गः इति
राजनिर्घण्टः ॥
सूपांगं क्ली हिंगु इति रा
जनिर्घण्टः ॥

सूमं क्ली क्षीरं आकाशं इति
मेदिनी जलं इति
शब्दरत्नावली ॥
सूरः पुं सूर्य्यः अर्कवृक्षः ॥
इत्यमरः दृष्ट्वार्हत् पितृविशेषः
इति हेमचन्द्रः पंडितः
इतिकेचित् ॥
सूरणः पुं शूरणः इति शब्द
रत्नावली कार्त्तिकमासे मस्यभ
क्षणनिषेधो यथा मकरे मूल
कंचैव सिंहे चालाबुकं तथा का
र्त्तिके शूरणंचैव सद्यो गोमां
सभक्षणं इति कर्म्मलोचनं ॥
सूरतः त्रि कृपालुः इत्यमरः
सूरसूतः पुं अरुणः सूर्य्य
सारथिः इत्यमरः ॥
सूरिः पुं पंडितः इत्यमरः
यादवः सूर्य्यः इत्युणादि॥
कोषः ॥
सूरी पुं पंडितः इति शब्द
रत्नावली ॥
सूरी स्त्री राजसर्षपः इति र
त्नमाला ॥
सूर्पः पुं क्ली शूर्पः इति शब्द
रत्नावली कुंभपरिमाणं द्वि
द्रोणपरिमाणं इति वैद्यक
परिभाषा ॥ ॥
सूर्म्मी स्त्री शूर्म्मी इति केचित्
सूर्य्यः पुं अर्कपर्णः इति मे
दिनी वलि पुत्रः इति केचित्
दानवविशेषः यथा अभव
न् दनुपुत्राश्च वंशे ख्याता ॥
महासुराः विप्रचित्ति प्रधाना
स्तेशतं तीव्रपराक्रमाः स्वर्भा
नु र्वृषपर्वा च ऊहृदश्च महासु
रः धृतराष्ट्रश्च सूर्य्यश्च
दनुमानिन्द्रतापनः इति व
ह्निपुराणे काश्यपीयवंशाः
ग्रहविशेषः तत् पर्य्यायः सूरः २
अर्य्यमा ३ आदित्यः ४
द्वादशात्मा ५ दिवाकरः ६ भा
स्करः ७ अहस्करः ८ व्रध्नः ९
प्रभाकरः १० विभाकरः ११ भा
स्वान् १२ विवस्वान् १३ सप्ताश्वः
१४ हरिदश्वः १५ उष्णरश्मिः १६
विकर्त्तनः १७ अर्कः १८
मार्त्तंडः १९ मिहिरः २० अरु
णः २१ पूषा २२ द्युमणिः
२३ तरणिः २४ मित्रः २५ चि
त्रभानुः २६ विरोचनः २७ वि
भावसुः २८ ग्रहपतिः २९
त्विषांपतिः ३० अहः पतिः ३१
भानुः ३२ हंसः ३३ सहस्रांशुः
३४ तपनः ३५ सविता ३६ रविः

३७ इत्यमरः ३८ सूरः ३८ नगः ३९ द्युम्नः ४० पद्मिनीवल्लभः ४१ हरिः ४२ दिनमणिः ४३ चंडांशुः ४४ सप्तसप्तिः ४५ गभस्तिमान् ४६ अंशुमाली ४७ काश्यपेयः ४८ खगः ४९ भानुमान् ५० लोकलोचनः ५१ पद्मबंधुः ५२ ज्योतिष्मान् ५३ अव्ययः ५४ तापनः ५५ चित्ररथः ५६ खमणिः दिवामणिः ५८ गभस्तिहस्तः ५९ हेलिः ६० पतंगः ६१ अर्चिः ६२ दिनप्रणीः ६३ वेदोदयः ६४ कालकृतः ६५ ग्रहराजः ६६ तमोनुदः ६७ रसाधारः ६८ प्रतिदिवा ६९ ज्योतिःपीथः ७० इनः ७१ इति शब्दरत्नावली कर्मसाक्षी ७२ जगच्चक्षुः ७३ त्रयीतपः ७४ प्रद्योतनः ७५ खद्योतः ७६ लोकबांधवः ७७ पद्मिनीकांतः ७८ अंशुहस्तः ७९ पद्मपाणिः ८० हिरण्यरेताः ८१ पीतः ८२ अत्रिः ८३ अगः ८४ हरिवाहनः ८५ अंबरीषः धामनिधिः ८७ हिमारातिः ८८ गोपतिः ८९ कुंजारः ९० प्लवगः ९१ सूरः ९२ तमोपहः ९३ गभस्तिः ९४ इति जटाधरः अस्य वर्णः रक्तः ॥ ॥

पामभिश्रितः सच पूर्वदिक्प्रभुष क्षत्रियजाति सत्वगुणकटुरत्नसिंहवाशीनामधिपतिः धाम्यादि सुवर्णद्रव्य चतुष्पद गोभूमि स्वामी चतुष्कोणाकृतिः मध्याह्नकाले प्रबलः वृद्धः रणचारीतिक्रूरसप्रियश्च इति बृहज्जातकादयः प्रदृश्यते तर्त्तुलाकारः मंगलमध्यस्थः तस्य जन्मभूमिः कलिंगदेशः गोत्रं काश्यपः वर्णः रक्तः पूर्वमुखः जातिः ब्राह्मणः बलिर्गुडोदनं धूपो गुग्गुलुः गन्धो रक्तचन्दनं समित् अर्कः अस्य ध्यानं क्षत्रियं काश्यपं रक्तं कालिंगं द्वादशांगुलं पद्महस्तद्वयं पूर्वाननं सप्ताश्ववाहनं शिवाधिदेवतं ध्यायेद्वह्निप्रत्यधिदेवतं अस्य मंत्रः आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यंच हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् दक्षिणाधिदुः हेतिग्रहयागसंस्कारतत्त्वे ॥ ॥ तस्मात् पद्मादि यथा अथ्या तरीक्षादातापर्य कश्यपं मुनि सप्तमं सतोष मे च गंभीरा ॥ ॥

वायुवाचाशरीरिणी मामिते वयतः मोक्षमेतद्दं त्वया दिति तस्मान्तने सत स्तेऽयं मार्त्तंडाख्यो भविष्यति सूर्य्याधिकारं च विभुर्जगत्येष करिष्यति हनिष्यत्यसुरां श्चायं यज्ञभागहरानरीन् देवा निशम्येतिवचो गगनात् समपागतं प्रहर्षमतुलं याता दानवाश्च हतौजसः ततो युद्धाय देतेयानाजूहाव शतक्रतुः सह देवैर्मुदायाक्तो दानवाश्च तमभ्ययुः तेषां युद्धमभूद्घोरं दिवानां ॥ संदीप्त समस्तभुवनांतरं तस्मिन् युद्धे भगवता मार्त्तंडेन ॥ निरीक्षिताः तेजसा दह्यमानास्तु भस्मीभूता महासुराः ततः प्रहर्षमतुलं प्रापुः सर्वे दिवौकसः तुष्टुवुस्तेजसो योनिं मार्त्तंड मदितिं तथा स्वाधिकारं ततः प्राप्त यज्ञभागाश्च पूर्ववत् भगवानपि मार्त्तंडः स्वाधिकारमथाकरोत् कदंबपुष्पवद्भास्वानधश्चोर्द्धं च रश्मिभिः वृत्तोऽग्निपिंडसदृशो दध्ये नातिस्फुटवपुः इति मार्कंडेयपुराणे मार्त्तंडोत्पत्तिः ॥ ॥

मार्कंडेय उवाच अष्टतस्यैद दौ कन्यां संज्ञां नाम विवस्वते प्रसाद्य प्रणतो भूत्वा विश्वकर्मा प्रजापतिः विवस्वतस्तु संभूतो मनुर्द्वौ च पितं तयोः पूर्वमेवतवाकाल मस्येतदखिलं द्विज श्राद्धपपत्या न्वसौ तस्यां जनयामास गोपतिः द्वौ पुत्रौ सुमहाभागौ कन्यां च यमुनां नदी मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः तेषां यमो यमी चैव यमलौ संबभूवतुः ॥ ततेजोऽभ्यधिकं चैव मार्त्तंडस्य विवस्वतः असहद्धी त्वत तेजः स्वां छायां वीक्ष्य सात्रवीत् संज्ञोवाच अहं यास्यामि भद्रं तेस्वकं च भवनं पितुः निर्विकारं त्वयाप्यत्र स्थेयं मच्छासनात् शुभे इमौ च बालकौ मह्यं कन्या च वरवर्णिनी संभाव्या नैव चाख्येयमिमं भगवते त्वया छायोवाच आकेशग्रहणाद्देवि आशापान्नैव कर्हिचित् आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वांछितं इत्युक्ता छायया सा ॥

जगाम पितृमन्दिरं तत्रावसत्
पितुर्गृहे कालं शुभेक्षणा
भर्त्तुः समीपं याहीति पित्रो
क्ता सा पुनः पुनः अगच्छद्
वडवा भूत्वा कुरून् विप्रोत्तरां
स्ततः तत्र तेपे तपः साध्वी नि
राहारा महामुने पितुः स
मीपं यातायां संज्ञाया वाक्य
मत् परा तद्रूपधारिणी छा
याभास्करं समुपस्थिता तस्यां
च भगवान् सूर्य्यः संज्ञेयमिति
चिन्तयन् तथैव जनयामास पुत्रौ
द्वौ कन्यकां तथा पूर्वजस्य स
मोऽस्तस्याः सावर्णिः स तेन सोऽभ
वत् यस्तयोः प्रथमं जातः पु
त्रयो द्विजसत्तम द्वितीयो योऽ
भवत्तात्यः स ग्रहो भूतः शनै
श्चरः कन्याभूत्तपती या तां
वव्रे संवरणो नृपः संज्ञा तु
पार्थिवी तेषां मात्मजानां
यथाऽकरोत् स्नेहं न पूर्व
जातानां तथा कृतवती स
ती मनुस्तत् क्षान्तवां स्तस्याप
मस्यास्या न चक्षमे बहुशोऽभी
ऽमानस्तु पितुः पत्न्या सदुःखि
तः सर्वे कोपात्तु बाल्याच्च भावि
नोऽर्थस्य वै बलात् पदा॥

संतर्जयामास छायां संज्ञासुतो
यमः तं शशाप ततः क्रुद्धा सं॥
ज्ञा सा पार्थिवी भृशं छायेवा
च पदा तर्जयसे यन्मां पितृभा
र्यां गरीयसीं तस्मात्तवैष चर
णः पतिष्यति न संशयः पीडित
मानसः मातुः सह धर्म्मात्मा स
र्वं पित्रे न्यवेदयत् यम उवाच ॥
स्नेहेन तुल्य मस्मासु माता देव
न वर्त्तते विसृज्य ज्यायसोऽस्मा।
स्मान् कनीयांसौ बुभूषति तस्या
मयोद्यतः पादो न तु
देहे निपातितः बाल्याद्वाय
दि वा मोहात् तद्भवान् क्षन्तुम
र्हसि शप्तोऽहं तात कोपेन ज
नन्या तनयो यतः ततो नम
न्ये जननी ममैषा तपतां वर
निर्गुणेष्वपि पुत्रेषु न माता नि
र्गुणा भवेत् पादस्ते पततां ॥
पुत्र कथमेतत्त्वयोदितं तव
प्रसादाच्चरणो न पतेत् भगव
न् यथा मातृशापादयं मे यतया
चिन्तय गोपते रविरुवाच
असंशय मिदं पुत्र भविष्यत्य
त्र कारणं येन त्वा माविशत् क्रो
धो धर्म्मज्ञं सत्यवादिनं स

र्वेषा मेव शापानां प्रतिघातो हि
विद्यते न तु मात्राभिशप्तानां
क्वचिच्छापनिवर्त्तनं ॥ न
शक्य मेतन्मिथ्या तु कर्त्तुं मातु
र्वचस्तव किं चित्ते संविधास्या
मि पुत्रस्नेहादनुग्रहं कृमयो।
मांसमादाय प्रयास्यन्ति महीत
ले कृते तस्या वचः सत्य त्वंच
त्राता भविष्यसि मार्कण्डेय उवा
च आदित्यस्त्वब्रवीच्छायां किम
र्थं तनयेषु वै तुल्येष्वप्यधिक
स्नेह एकत्र क्रियते त्वया नूनं
नैषां जननी संज्ञा क्वापि त्व ॥
मागता विगुणेष्वप्यपत्येषु
माता शापं न दास्यति मातत् ॥
परिहरन्तीव नाचचले विवस्वतं
स चात्मानं समाधाय युक्तस्तत्र
मवैक्षत तं शापमुद्यतं दृष्ट्वा छा
या संज्ञा दिनाधिपं भयेनकं॥
पिता ज्वलन् यथा वृत्तं न्यवेद
यत् विवस्वां स्तु तदा क्रुद्धः श्व
त्वा श्वशुरमभ्यगात् स चापि तं
यथान्याय्यमर्च्चयित्वा दिवाकरं
निर्द्दग्धुकामं रोषेण शान्तयामा
स सुव्रतः विश्वकर्म्मा उवाच ॥
तवातितेजसा व्याप्त मिदं रूपंसु
दुःसहं असहन्ती ततः संज्ञा ॥


वने चरति वै तपः द्रक्ष्यते तां भ।
वानद्य स्वां भार्य्यां शुभचारि
णीं रूपार्थं भवतोऽरण्ये च
रन्ती समस्त तपः मतं मे ब्रह्मणो
वाक्यात् यदि ते देव रोचते
रूपं निवर्त्तयाम्यद्य तव कान्तं
दिवस्पते मार्कण्डेय उवाच य
तो हि भास्वतो रूपं प्रागासी
त् परिमण्डलं ततस्तथेति तं प्रा
ह त्वष्टारं भगवान् रविः वि
श्वकर्म्मा त्वनुज्ञातः शाकद्वी
पे विवस्वतः भ्रमिमारोप्य तत्ते
जः शातनायोपचक्रमे देवाश्च
ब्रह्मणा सार्द्धं भास्वन्तमभितु
ष्टुवुः लिख्यमानं महस्रांशु
प्रणेमुः सर्वदेवताः ततः को
लाहले तस्मिन् सर्वदेव समा
गमे तेजसः शातनं चक्रे विश्व
कर्म्मा शनैः शनैः इति मार्कण्डे
य पुराणे सूर्य्यतेजः शातनं ॥
शातितं चास्य यत्तेजस्तेन चक्रं
विनिर्म्मितं विष्णोः शूलं च सर्व
स्य शिबिका धनदस्य च दण्डं
प्रेतपतेः शक्तिं देव सेनापते
स्तथा अन्येषां चैव देवानामा
युधानि स विश्वकृत् चकार
तेजसा भानोः भास्वराण्यरिषा

न्वये इति पाणितलेजाः सम्य
ग्रूपेणातिशोभनं वपुर्दधार
मार्त्तण्डः पुष्पचाप मनोरमं स
ददर्श समाधिस्थां स्वां भार्य्यां व
डवाकृतिं अपापां सर्वभूतानां
तपसा नियमेनच ततोजगा
म भास्वान् वै संज्ञा यत्रव्यव
स्थिता सा चदृष्ट्वा तमायां
तं परपुंसो विशङ्कया जगाम
संमुखं तस्य पृष्ठरक्षण तत्प
रा ततश्च नासिकायोगात् तु
योस्तत्र समेतयोः नासत्यदस्रौ
तनयावश्ववक्त्राद्विनिर्गतौ रे
तसोऽन्तेच रेवन्तः खड्गी धन्वीच
तत्र धूक् अश्वारूढः समुत्
पन्नो बाणतूणसमन्वितः त
तः स्वरूप मतुलं दर्शयामास
भानुमान् तस्याश्च सा समालो
क्य स्वरूपं मुदमादधौ स्वरूपधा
रिणीं चैना मानिनाय निजालयं
संज्ञां भार्य्यां प्रीतिमतीं भास्क
रो वारितस्करः ततः पूर्वसुतो
योऽस्याः सोऽभूद्वैवस्वतो म
नुः द्वितीयश्च यमः शापात्
पापदर्शनतत् परः हम
यो मांसमादाय पादतलेम
हीतलं पतिष्यतीति शापा।

न्तस्य चक्रे पितास्वयं धर्म्मदृष्टि
येनस्त्रासोसमोमित्रेतयादिते
ततो नियोगेतं याम्येचकार॥
तिमिरापहः यम॥
तांच नदींचक्रे कलिन्दान्तर
वाहिनीं अश्विनौ देवभिषजौ
कृतौपित्रा महात्मना गुह्यका
धिपतित्वे च रेवन्तो विनियो
जितः रेवन्तस्य प्यादत्ततो भग
वान् लोकभावनः त्वमप्यशे॥
षलोकस्य पूज्योवत्स भविष्य
सि अरण्येऽग्नौ महादावे वै॥
रिदस्युभयेषुच त्वां स्मरिष्य
ति येमर्त्या मोक्ष्यन्ते ते
महापदः क्षेमं बुद्धिं सुखं॥
राज्यं आरोग्यं कीर्त्तिं सुन्नतिं
नराणां परितुष्टस्त्वं पूजितः॥
संप्रदास्यसि छायासंज्ञा सु
त आपि सावर्णिः सुमहायशाः
भाव्यः सोऽनागते काले मनुः॥
सावर्णिकोऽष्टमः मेरुपृष्ठेत
पो घोरमद्यापि चरति प्रभुः
भ्राता शनैश्चरस्तस्य ग्रहोऽभू
त्सोमनाद्देवैः यवीयसी च या
कन्या तस्य चासीद्विजोत्तम॥
अभवत् सा सरित् श्रेष्ठा तपती
लोकपावनी यस्तज्येष्ठा मह॥

भाग सर्पो यसेह सांप्रतं वि
स्तरं तस्य वक्ष्यामि मनो वैव
स्वतस्य ह यदंजन्म देवानांश्च
णुयाद्वा पठेत्तथा विवस्वतस्तु
जातानां रवेर्माहात्म्यमेवच आ
पदं प्राप्य मुच्येत प्राप्नुयाच्च
महद्यशः अहोरात्रकृतं पाप
मेतत् शमयति श्रुतं माहात्म्य
मादिदेवस्य मार्कण्डेयपुराणे
मार्त्तण्डमाहात्म्यनामाध्यायः
अपिच प्रजापाल उवाच श
रीरस्य कथं मूर्त्तिग्रहणं ज्यो
तिषो द्विज एतन्मे संशयं छिं
धि प्रणतस्य द्विजोत्तम म
हातपा उवाच योसावात्माज्ञा
नशक्तिरेक एव सनातनः स
द्वितीयं यदा चैच्छत् तदाते
जः समुत्थितं तत् सूर्य्य इति
भाषां सा अन्योऽन्येन महात्म
नः लोलीभूतानि तेजांसि भा
सयंति जगत्त्रयं तस्मिन् सर्वे
सुराः सिद्धा गणाः सर्वे महर्षि
भिः स्वयं भूता इति विभो तस्मा
त् सूर्य्यस्तु सोऽभवत् लोलीभू
तस्य तस्माच्च तेजसोऽभूच्छ्री
रकं पृथक्त्वेन रविः सोय॥

कीर्त्यते वेदवादिभिः भासय
न्सर्वलोकांस्त्वयतोऽसावुपि
तोदिवि अतोऽसौभास्करः प्रो
क्तः प्रकर्षाच्च प्रभाकरः दि
वा दिवस इत्युक्तस्तत् कारि
त्वाद्दिवाकरः सर्वस्य जगतस्त्वा
दिरादित्य स्तेनउच्यते एतस्य
द्वादशादित्याः संभूता स्तेजसा
पृथक् प्रधान एक एवायं
जगतस्तु परिवर्त्तते तं दृष्ट्वा
जगतो व्याप्तिं कुर्वाणं परमे
श्वरं तत्रैवांतः स्थिता देवा
विनिष्क्रम्य स्तुतिं जगुः इति
वाराहे आदित्योत्पत्तिनामा
ध्यायः॥ उत्तरायणदक्षि
णायनयो रत्नलोम प्रतिलोमं
गतव्यानि मंडलानि प्रतिमासं
सूर्य्यं भ्रमणाधिकारिमणाश्च
यथा अश्वीतिमंडलप्रान्ते काष्ठ
योरंतरं द्वयोः आरोहणावरो
हाभ्यां भानो रथेन या गतिः॥
सप्ताश्वोऽधिष्ठितो देवैरादित्यै
र्ऋषिभिस्तथा गन्धर्वैरप्स
रोभिश्च ग्रामणी सर्पराक्षसैः
धाता कृतस्थला चैव पुलस्त्यो
वासुकि स्तथा रथकृद्ग्राम
णीर्हेतिस्तुम्बुरुरेव सप्तमः एते



वसन्ति वै चैत्रे मधुमासे सदै
व हि मैत्रेय स्यन्दने भानोः स
प्तमासाधिकारिणः अर्य्यमा
पुलहश्चैव रथौजाः पुञ्जिक
स्थला प्रहेतिः कच्छनीरश्च ना
रदश्च रथे रवेः माधवे नियस
न्त्येते शुचिसंज्ञे निबोध मे मित्रो
ऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ
मेनका हाहा रथस्वन
श्चैव मैत्रेयैते वसन्ति वै ॥
वशिष्ठो वरुणो रम्भा सहजन्या
हूहूर्बुधः रथचित्रस्तथा
शुक्रे वसन्त्याषाढसंज्ञिते इ
न्द्रो विश्वावसुः स्रोत एलापत्र
स्तथाङ्गिराः प्रम्लोचा च नभ
स्येते सर्पश्चार्के वसन्ति हि विवस्वा
नुग्रसेनश्च भृगुरापूरणस्तथा
प्रम्लोचा शङ्खपालश्च व्याघ्रो भा
द्रपदे तथा पूषा च सुरुचिर्वातो
गौतमोऽथ धनञ्जयः सु
षेणोऽन्यो घृताची च वसन्त्याश्व
युजे रवौ विश्वावसुर्भरद्वाजः
पर्जन्यैरावतौ तथा विश्वाची
सेनजित् सह्यो कार्त्तिके चा
धिकारिणः अंशुकश्यपता
र्क्षस्तु महापद्मस्तथोर्वशी चि
त्रसेनस्तथा विद्युत् मार्गशीर्षा
धिकारिणः क्रतुर्भगस्तथोर्णायु
स्फूर्जः कर्कोटकस्तथा अरिष्ट
नेमिश्चैवाप्सरा पूर्वचित्तिर्वराप्स
राः पौषमासे वसन्त्येते सप्त भास्क
रमण्डले लोकप्रकाशनार्थाय
विप्रवर्य्याधिकारिणः त्वष्टा च
जमदग्निश्च कम्बलोऽथ तिलो
त्तमा ब्रह्मापेतोऽथ ऋतजित्
धृतराष्ट्रश्च सप्तमः माघमा
से वसन्त्येते सप्त मैत्रेय भा
स्करे श्रूयतां चापरे सूर्य्ये फा
ल्गुने निवसन्ति ये विष्णुरश्वत
रो रम्भा सूर्य्यवर्चाश्च सत्यजि
त् विश्वामित्रस्तथा रक्षो यज्ञा
पेतो महामुने मासेष्वेतेषु मै
त्रेय वसन्त्येते तु सप्तकाः ॥
सवितुर्मण्डले ब्रह्मन् विष्णुश
क्त्युपबृंहिताः स्तुवन्ति मुनयः सू
र्य्यं गन्धर्वैर्गीयते पुरः नृत्यन्त्यप्स
रसो यान्ति सूर्य्यस्यानु निशाच
राः वहन्ति पन्नगा यक्षैः क्रियतेऽ
भीषुसंग्रहः वालखिल्यास्तथै
वैनं परिवार्य्य समासते सोऽय
सप्तगणः सूर्य्यमण्डले मुनिस
त्तम हिमोष्णवारिवृष्टीनां हेतु
स्वसमयागतः इति विष्णुपुरा
णे २ अंशे १० अध्यायः ॥

सूत उवाच पव मेय ॥
महादेवो देवदेवः पितामहः ॥
करोति नियते काले काला ॥
त्माहेश्वरीमन्त्रं तस्य येर ॥
श्मयो विप्राः सर्वलोकप्रदी ॥
पकाः तेषां श्रेष्ठाः पुनः स ॥
प्त रश्मयो ग्रहयोनयः सुषु
म्नो हरिकेशश्च विश्वकर्म्मा
तथैव च विश्वव्यचाः पुनश्चा
न्यः संयद्वसुरतः परः अर्वाग्
वसुरिति ख्यातः स्वराडन्यः प्रकी
र्त्तितः सुषुम्नः सूर्य्यरश्मिस्तु पु
ष्णाति शिशिरद्युतिं तिर्य्यगू
र्द्ध्वप्रचारोऽसौ सुषुम्नः परिगी
यते हरिकेशस्तु यः प्रोक्तो
रश्मिर्नक्षत्रपोषकः विश्वक
र्म्मा तथा रश्मिः बुधं पुष्णाति स
र्वदा विश्वव्यचास्तु यो रश्मिः शु
क्रं पुष्णाति नित्यदा संयद्वसुरि
ति ख्यातः स पुष्णाति च लोहितं
बृहस्पतिं प्रपुष्णाति रश्मिरर्वा
ग्वसुः प्रभोः शनैश्चरं प्रपुष्णा
ति सप्तमश्च स्वराट् तथा एवं सू
र्य्यप्रभावेन सर्वा नक्षत्रतारकाः
वर्द्धन्ते वर्द्धिता नित्यं नित्यमाप्या
ययन्ति च दिव्यानां पार्थिवानां
नैशानां चैव सर्वशः आदानान्नित्यमा
दित्य स्तेजसां तमसां प्रभुः आदत्ते स तु
नाडीनां सहस्रेण समन्ततः ॥ ॥
नादेयांश्चैव सामुद्रान् कूप्यां ॥ ॥
श्चैव सहस्रशः स्थावरान् जंग
मांश्चैव यच्च कुल्यादिकं पयः
तस्य रश्मिसहस्रं तु शीत वर्षोस्र
निस्रवं तासां चतुःशतं नाड्यो ॥
वर्षन्ते चित्रमूर्त्तयः छन्दनाश्चै
व याह्याश्च केतना हकनास्तथा
अमृता नाम ताः सर्वा रश्मयो
वृष्टिसर्जनाः ॥ हिमोद्वहाश्च ता
मेध्या रश्मय स्त्रिशतं पुनः र
श्म्यो मेघ्याश्च मेध्याश्च ह्रादिन्यो ॥
हिमसर्जनाः चन्द्रास्ता नामतः
सर्वाः पीताभाः स्युर्गभस्तयः
शुक्लाश्च ककुभश्चैव गावो वि
श्वभृतस्तथा शुक्लास्ता नामतः
सर्वा स्त्रिविधा घर्म्मसर्जनाः समं
बिभर्त्ति ताभिः स मनुष्यपितृदे
वताः मनुष्यानोषधेनेह स्वध
या च पितॄनपि अमृतेन सुरान्
सर्वान् तिसृभिस्तर्पयत्यसौ
वसन्ते ग्रैष्मिके चैव षड्भिः स
न्तपति त्रिभिः शरद्यपि च वर्षा
सु चतुर्भिः संप्रवर्षति हेमन्ते
शिशिरे चैव हिममुत्सृजति ॥

त्रिभिः वरुणो माघमासे त
सूर्यः पूषा तु फाल्गुने ॥ चैत्रे
मासि भवेदंशो धाता वैशाखतापु
नः ज्यैष्ठमूले भवेदिन्द्र आषा॥
ढे सविता रविः विवस्वान् श्रा
वणे मासि प्रोष्ठपद्यां भगः स्मृ॥
तः पर्ज्जन्योऽश्वयुजि त्वष्टा कार्त्ति
के मासि भास्करः मार्गशीर्षे भवे
न्मित्रः पौषे विष्णुः सनातनः पं
चरश्मिसहस्राणि वरुणस्यार्क
कर्म्मणि षड्भिः सहस्रैः पूषा तु
देवोऽंशुः सप्तभिस्तथा धाताष्ट
भिः सहस्रैस्तु नवभिस्तु शतक्र
तुः विवस्वान् दशभिः पाति
पात्येकादशभिर्भगः सप्तभिस्त
पते मित्रस्त्वष्टा चैवाष्टभिस्त
पेत् अर्य्यमा दशभिः पाति प
र्ज्जन्यो नवभिस्तपेत् षड्भि
रश्मिसहस्रैस्तु मित्रस्तपति विष
भृक वसंते कपिलः सूर्य्यो ग्री
ष्मे कांचनसप्रभः श्वेतो
वर्षासु वर्णेन पांडुरः शरदि
प्रभः हेमन्ते ताम्रवर्णः स्यात्
शिशिरे लोहितो रविः ओषधी
षु बलं धत्ते स्वधामपि पितृष्वथ
सूर्य्योऽमरत्वममृते त्रयं त्रिषु
नियच्छति अन्येचाष्टौ ग्रहा॥

स्तेयाः सूर्य्ये चाधिष्ठिता द्विजाः
चंद्रमाः सोमपुत्रश्च शुक्रश्चैव
बृहस्पतिः भौमो मंदस्तथा
राहुः केतुमानपि चाष्टमः सर्वे
ध्रुवे निबद्धा ये ग्रहास्ते वातरश्मि
भिः भ्राम्यमाणा यथायोगं भ्र
मंत्यनु दिवाकरं अलातच
क्रवद्यान्ति वातचक्रेरिता द्वि
जाः यस्माद्वहति तान् वायुः
प्रवहस्तेन वै स्मृतः रथस्त्रिच
क्रः सोमस्य कुंदाभास्तस्य वा
जिनः वामदक्षिणतो युक्ताद
श तेन निशाकरः वीथ्याश्रया
णि चरति नक्षत्राणि रविर्यथा
ह्रासवृद्धी च विप्रेन्द्रा ध्रुवाधा
राणि सर्वदा स सोमः शुक्लपक्षे
तु भास्करे परतः स्थिते आपूर्य्य
ते परस्यांतः सततं दिवसक्रमा
त् क्षीणं पीतं सुरैः सोमम
प्याययति नित्यदा एकेन रश्मि
ना विप्राः सुषुम्नाख्येन भास्करः
एषा सूर्य्यस्य वीर्य्येण सो
मस्याप्यायिता तनुः पौर्णमा
स्यां स दृश्येत संपूर्णो दिवस
क्रमात् संपूर्णमर्द्धमासेन तं सोमम
मृतात्मकं पिबंति देवता विप्रा यतस्ते
ऽमृतभोजनाः॥

ततः पंचदशे भागे किंचिच्छि
ष्टे कलात्मके अपराह्णे पि ॥
तृगणाः जघन्यं पर्य्युपासते
पिबंति द्विकलं कालं शिष्टा
तस्य कला तु या सुधामृतमयीं
पुण्यां तामिन्दोरमृतात्मिकां
निःसृतं तदमावास्यां गभस्ति
भ्यः स्वधामृतं मासतृप्तिमवा
प्याग्र्यां पितरः संति निर्वृताः न
सोमस्य विनाशः स्यात् सुधा
देवैस्तु पीयते एवं सूर्य्यनिमि
त्तोऽस्य क्षयो वृद्धिश्च स
त्तमाः इति कौर्म्मे ४० अध्या
यः अस्य भार्य्यापत्यानि यथा
सूत उवाच अदितिः सुषु
वे पुत्रमादित्यं कश्यपात्
प्रभुं तस्यादित्यस्य चैवासी
द्भार्य्याणां तु चतुष्टयं संज्ञा रा
ज्ञी प्रभा छाया पुत्रांस्तासां
निबोधत संज्ञा राज्ञी च सुषु
वे सूर्य्यान्मनुं मनूत्तमं यमं
च यमुनां चैव राज्ञी रेवंतमेव च
प्रभा प्रभातमादित्याच्छाया
सावर्णिमात्मजं शनिं चैव तप
तीं च विष्टिं चैव यथाक्रमं इति
कौर्म्मे १८ अध्याय तस्य मंड
लपरिमाणं यथा सूत उ॥

वाच सूर्य्याचन्द्रमसावेतौ भ्रम
तो यावदेव तु सप्तानां च समु
द्राणां द्वीपानां भाति विस्तरः
विस्तारार्द्धं पृथिव्यास्तु भवेदन्य
त्र बाह्यतः पर्य्यासपारिमाणा
द्धि चंद्रादित्यौ प्रकाशतः प
र्य्यास पारिमाण्येन तु बुधैस्त
ल्यं दिवं स्मृतं अवतीमान् त्रयो
लोकान् यस्मात् सूर्य्यः परिभ्र
मात् अविशब्दः प्रकाशे तु अव
नात् स रविः स्मृतः ततो भूयः
प्रवक्ष्यामि प्रमाणं चन्द्रसूर्य्य
योः महित्वान्महीशब्दोऽस्मि
न् वर्षे निपात्यते अस्य भारतव
र्षस्य विष्कंभात्तुल्य विस्तृतं॥
मंडलं भास्करस्याथ योजनैस्त
न्निबोधत नवयोजनसाहस्रो
विस्तारो मंडलस्य तु विस्तारा
त्रिगुणश्चापि परिणाहोऽत्र
मंडले विष्कम्भमंडलाच्चैव भा
स्करात् द्विगुणः शशी तस्य
गतिनिरूपणं यथा मानसस्यो
त्तरे पृष्ठे लोकपालाश्चतुर्दिशं
स्थिता धर्म्मव्यवस्थार्थं लोकसं
रक्षणाय च लोकपालोपरिष्टा
त्तु सर्वतो दक्षिणायने काष्ठा
गतस्य सूर्य्यगतिस्य निबो॥

यत दक्षिणोपक्रमः सूर्य्यःक्षि
प्तेषुरिवसर्पति ज्योतिषांचक्र
मादाय सततंपरिगच्छति ॥
मध्यत स्त्वामरावत्यां यदाभव
तिभास्करः वैवस्वते संयमने
ऊर्द्ध्वं तत्र प्रदृश्यते सुखाया
मर्द्धरात्रन्तु विभावर्य्यास्त मेति
चवैवस्वते संयमने मध्याह्नेतु
रविर्यदा सुखायामथवारु॥
णामुत्तिष्ठन् सतुदृश्यते विभा
वर्य्या मर्द्धरात्रं माहेन्द्र्या मस्त
मेतिच सुखायामथवारुणां
मध्याह्ने चार्य्यमायदा विभा
वर्य्यां सोमपुर्य्यां उत्तिष्ठतिवि
भावसुः रात्र्यर्द्धं चामरावत्या
मस्तमेति यमस्यच सोमपु
र्य्यां विभावर्य्यां मध्याह्ने चार्य्य
मायदा अमरावत्यां महेन्द्र
स्य तद्गच्छति दिवाकरः अ
र्द्धरात्रं संयमने वारुण्यामस्त
मेतिच सर्व्वाद्वीमेव पर्य्येति
भास्करोऽलातचक्रवत् भ्रम
न्वैभ्रममाणानि ऋक्षाणिचर
न्रविः एवंचतुर्षुपार्श्वेषुदक्षि
णान्तेषु सर्पति उदयास्तमये
चासावुत्तिष्ठति पुनःपुनः पू
र्व्वाह्नेचापराह्नेतद्वौ द्वौदे॥

वालयौतमः तपत्येकंचमध्या
ह्ने ताभिरेव चरश्मिभिः ॥
उदितो वर्द्धमानाभि र्मध्याह्ने
तपतेरविः अतःपरंह्रसन्ती
भिर्गोभिरस्तन्नियच्छति उद
यास्तमयाभ्यांच स्मृते पूर्व्वाप
रेत्वै यावत् पुरस्तात्तपतित॥
यत् पृष्ठेऽथपार्श्वयोः यैरर्कों
यत्रदृश्यत तेषां सउदयः स्मृ
तः प्रणाशंगच्छतेयत्र तेषा
मस्तःसउच्यते सर्व्वेषामुत॥
रेमेरुर्लोकालोकश्च दक्षिणे
विदूरभावादर्कस्य भूमे र्लेखा
गतस्यच ह्रियंतेरश्मयो य
स्मात्तेन रात्रौनदृश्यते ऊर्द्ध्वं
शतसहस्रांशु स्थितस्तत्र प्रदृ
श्यते एवं पुष्करमध्येनयदाभ
वतिभास्करः त्रिंशद्भागंतु मेदि
न्यामुहूर्तेन सगच्छति योज
नानां मुहूर्तस्य इमां संख्यां
निबोधत पूर्णाशतसहस्राणा
मेकत्रिंशत्तु ताः स्मृताः पंचा
शच्च सहस्राणि तथान्यान्यधि
कानिच मौहूर्त्तिकी गतिर्ह्येषा
सूर्य्यस्यतु विधीयते ॥ एतेन
गतियोगेन यदा काष्ठांतुदक्षि
णां पर्य्यागच्छत् पतंगोऽसौ

वामकोष्ठेऽन्तरेऽहनि मध्येन ॥
पुष्करस्याथ भ्रमते दक्षिणाय
ने मानसोत्तरमेरोस्तु अंतरं
त्रिगुणंतुतत् सर्पतो दक्षिणा
यांतु काष्ठायांतु निबोधत न
वकोट्यः प्रसंख्याता योज
नैः परिमंडलं तथाशतसह
स्राणि चत्वारिंशच्च पंचच अ
होरात्रा पतंगस्य गति रेषावि
धीयते दक्षिणाद्विनिवृत्तोऽसौ
विषुवस्थो यदा रविः क्षीरो
दस्य समुद्रस्य उत्तरातो दिशश्च
रन् मंडलं विषुवच्चापि यो॥
जनै स्तान्निबोधत तिस्रः कोट्य
स्तुसंपूर्णा विषुवस्याथमंडलं त
था शतसहस्राणां विंशत्येका
धिका पुनः श्रावणेचोत
रां काष्ठांचित्रभानुर्यदा॥ ॥
भवेत् गोमेदकस्यद्वीपस्य उत्त
रांस्तु दिशञ्चरन् उत्तरायाः ॥
प्रमाणंतु काष्ठाया मंडलस्य
तु दक्षिणोत्तर मध्यानि तानि
विद्याद्यथाक्रमं स्थानं जर
द्गवं मध्ये तथैरावत मुत्तमं
वैश्वानरं दक्षिणतो निर्द्दिष्ट
मिह तत्वतः नागवीथ्युत्तरा
वीथी अजवीथ्यास्तु दक्षिणे॥

उभेआषाढे मूलंच अजवीथ्यु
दयास्त्रयः अभिजित् पूर्व्वतः
स्वाती नागवीथ्युत्तरा स्त्रयः अ
श्विनी कृत्तिका याम्या नागवी
थ्युत्तरास्मृता रोहिण्यार्द्रा मृग
शिरो नागवीथीरितिस्मृता
पुष्याश्लेषा पुनर्व्वस्वो वीथी
रैरावती स्मृता तिस्रस्तुवीथयो
ह्येता उत्तरो मार्ग उच्यते पूर्व्वा उ
त्तरफल्गुण्यो मघा चैवार्षभी
भवेत् पूर्व्वोत्तरे प्रोष्ठपदे गो
वीथी रेवती स्मृता श्रवणाच
धनिष्ठाच वारुणंच जरद्गवं
एतास्तुवीथयस्तिस्रो मध्य
मोमार्ग उच्यते हस्ता चित्रात
थास्वाती नागवीथीरितिस्मृ
ता विशाखास्वमित्रं ऐन्द्रंतु नागवी
थीरिहोच्यते मूलं पूर्व्वोत्तराषा
ढा वीथी वैश्वानरी तथा॥
स्मृता स्तिस्रस्तुवीथ्यस्तामार्गो
वैदक्षिणो बुधैः काष्ठयोरन्तरं
त्वेता वक्ष्यंते योजनैः पुनः॥
एतच्छतसहस्राणा मेकत्रिंश
द्वैस्मृतं शतानित्रीणिचान्या
नि त्रयस्त्रिंशाच्च योजनैः काष्ठा
योरन्तरं ह्येवं योजनाग्रात् प्र
कीर्त्तितं काष्ठयो र्लेखयो॥॥



ष्ठेव अयने दक्षिणे तवे ते
वक्ष्यामि प्रसंख्याय योजनैस्त
न्निबोधत एकैकमन्तरं तद्वेषु
क्रान्त्येतानि सप्ततिः सहस्रे द्वे रति
रिक्ताच ततोन्या एव
विंशतिः लेखयोः काष्ठयोर्द्वे
व वाह्याभ्यंतरयो स्मरन् अभ्य
न्तरे सपर्य्येति मंडलान्युत्तरायु
णे वाह्यतो दक्षिणेनैव सततं
सूर्य्यमंडलं चरत्यसौ प्रतीच्या
त्र्यशीतिमंडलशतं त
रणि र्दक्षिणे तावत् क्रमतेमं
डलानित्र प्रमाणं मंडलस्यापि
योजनाग्रान्निबोधत योजनानां
सहस्राणि दशचाष्टौ ततः स्मृ
तं अधिकान्यष्टपंचाशात् योज
नानि चवै पुनः विष्कंभोमंडल
स्यैन तिर्य्यक् सत्र विधीयते अ
हस्तच्चरते साभिः सूर्य्योवै मंडल
क्रमात् कुलालचक्रपर्य्यंतं ॥
यथा रविः शशी तथा दक्षि
णे चक्रवत् सूर्य्य स्तथा शीघ्र
निवर्त्तते तस्मात् महतीं भू
मिं त कालेनाल्पेन गच्छति सू
र्य्यो द्वादशभिः शीघ्रं मुहूर्तैः द
क्षिणायने ॥ त्रयोदशार्द्धमृक्षा
णांमध्ये चांतर मंडलं मुहूर्तैः॥
क्षानि ऋक्षाणिनक्तमष्टादशैर्म्मु॥
रन् कुलालचक्रमध्यस्या यथाम
न्दंप्रसर्पति उदगयने तथा सू
र्य्यः सर्प्पति मन्दविक्रमः तस्मा
त्दीर्घेण कालेन भूमिं सोल्पां
प्रसर्पति सूर्य्योष्टादशभिर्वह्ना
मूहूर्तैरुदगायने त्रयोदशानां
मध्येतु ऋक्षाणां चरतेरवि ॥
मुहूर्तैस्तानि ऋक्षाणिरात्रौ
द्वादशभिश्चिरं ततोमन्दतरं
नाभ्यां चक्रंत भ्रमतांपुनः मृ
तपिंड इव मध्यस्थोभ्रमतेऽसौ
ध्रुवस्तथा ॥ मुहूर्तैस्तावत ॥
त्रिंशद्भिरहोरात्रं ध्रुवंभ्रमन् ॥
उभयोः काष्टयोर्म्मध्येभ्रमते ॥
मंडलानित उत्तरेप्रक्रमेऽर्कः
सदिवामन्दगतिः स्मृता तस्यै
वत्र पुनर्नक्तं शीघ्रा सूर्य्यस्य
वैगतिः दक्षिणे क्रमणे
चापि दिवा शीघ्रं विधीयते ग
तिः सूर्य्यस्यवैनक्तं मन्दा चापि
पुनः स्मृता एवं गतिविशेषे
णाविभजेद्रात्र्यहानित् अजवी
थ्याद दक्षिणां यलोकालोकस्यचो
त्तरं लोकसन्तानको ह्येषवैश्वा
नरपथाद्वहिः ब्रह्मा यावत्
प्रभास्तोरीपुष्करात् संप्र ॥॥

काशते पार्श्वेभ्यो वाह्यतस्ता
वत् लोकालोकस्तु पर्वतः ॥
योजनानां सहस्राणि दशोर्द्ध्वो
च्छ्रितो गिरिः प्रकाशश्चाप्रका
शश्च सर्वतः परिमंडलः ॥
नक्षत्र चन्द्रसूर्य्याश्च ग्रहास्ता
रागणैःसह अभ्यंतरे प्रकाशंते
लोकालोकस्य वै गिरेः इति ॥
मात् से ९९ अध्यायः ॥ ॥
अस्यराहुग्रस्तत्वादिकारणं च
या नन्द उवाच राहुग्रस्तः कथं
सूर्य्यश्चन्द्रो वापि जगत्प्रभो न
ष्टश्चन्द्रः कथंभाद्रे चतुर्थ्यां च मि
तास्ति ते वेदानां जनकस्त्वं च
क एच्छामि त्वया विना ॥
श्रीभगवानुवाच शृणुनन्द प्र
वक्ष्यामि कथामेतां पुरातनीं
यां श्रुत्वा निष्कलत्वश्च तीर्थस्ना
यी भवेन्नरः एकदा यमदग्नि
श्च महाकोपहलोबितः रेणुका
सहितस्त्वेषाजगाम नर्मदातटं
निर्ज्जने नर्म्मदातीरे विजहार
तयासह चन्दनोक्षितसर्वां
गं वस्त्र माल्यधरं मुनिं महा
रासरसाप्लं तमुवाच भास्करं
स्वयं वेदकर्त्तं सर्वोत्रत्वंत्वत्
णाश्च जगत्पतेः चत्र ॥
वेद विधेयेषु सुनिस्नातः सदा
शुचिः वेदप्रणिहितो धर्म्मो ह्य
धर्म्मस्तद्विपर्य्ययः धर्म्मत्यज
ति धर्म्मात्मा अधर्म्मेण रतः कथं
दिवामैथुनदोषं च वक्ति वेदो
विशेषतः अहंच कर्म्मणां सा
क्षी तेन त्वां कथयामि ते सू
र्य्यस्य वचनं श्रुत्वा तत्याज मे
थुनं द्विजः दृष्ट्वा पुरो विप्ररूपं स
[illegible]
लज्जामर्मन्तरेणकालज्ञिता तत्रवि
धाय वाससी सती यमदग्निरु
वाच अद्य मे निर्ज्जनस्थाने रस
भंग स्त्वया कृतः मम शापात्
पापरूपस्त्वं राहुग्रस्तो भविष्य
ति दृष्ट्वा त्वामेव गणाः सर्वे हरी
भूता भवंति ते त्वामाच्छन्नेकरि
ष्यति वायुना प्रेरितास्तथा ॥
स्वतेजसा भवान् गर्वी हततेजा
भविष्यति मेघाच्छन्नः सत्यते
जा राहुग्रस्तोभवान्भव ॥ श्रु
त्वाऽस्य वचः श्रुत्वा भगवान् भास्क
रः स्वयं त्रस्तः पुटांजलिर्भूत्वा त
दाव मुनिपुंगवं सूर्य्य उवाच
च अद्य मेव त्वया शप्तो मया
शप्तो भवान्भव अन्यथा मां
॥ ॥ ॥ ॥ ॥

विं

वदंत्येवं सूर्यं नि–जसं ज
नाः पराभूतः त्वत्प्रियेणभवि
ष्यसि द्विजेश्वरः मरणं तव्रेया
स्त्रेण भवतस्तु भवितिं सूर्य॥
स्य वचनं श्रुत्वा तु कोपत्रात
णः पुनः तं शापातिरक्षास्यः
शंभुना चजितोभवान् उभ
योः कलहं ज्ञात्वा कश्यपेन स
हत्रत आजगाम स्वयं ब्रह्मा
विधाता जगतामपि आगत्य ब्र
ह्मा संज्ञसं वोधयामास भास्करं
मुनिश्रेष्टं च धर्मज्ञं धर्मज्ञानां
गुरोर्गुरुः ब्रह्मोवाच तमसभा
स्कर त्वचसा तान्नारायणो भ॥
वान् युष्माकं परिपालयस्वा॥
एवं धात्रा ब्राह्मणः सदा अहं
करोमि भवतो विप्रशापास्त्वमु
त्वणं शंतो भवस्व रश्रेष्ट सा
लीनं सर्वकर्मणां ऊत्र विदि
वसे ब्रह्मन् त्रतो तेऊत्र वितत॥
णं भविष्यसि च नाछन्नः सद्यो
मुक्तो भविष्यसि सूनातिरिक्ते
वर्षे वा राज्य यस्तो भविष्यसि त
त्राद्दष्टपस्तु केषांचित् पुण्य
दृष्टो हि कस्यचित् अन्यथा
सर्वकाले नापुण्यदृष्टो भवा
न भुवि त्वां दृष्ट्वा च नमस्कृत्वा

सर्वे निष्पापिणो जनाः जन्मस
माष्ट रिपुकांक चतुर्थे दशमे
विधौ जन्मस्ते निधने ऽहणं अ
दृष्टस्त्वं भविष्यसि अस्तका
ले च नाद्ष्ट्रे मध्याह्नस्ये जले ऽ
पि वा अर्द्धोदिते च काले च पाप
दृष्टो भविष्यसि भार्या दुःख
निमित्तेन भार्यया दैवभूतया
सम्पूर्णेन इपालकेन हततेजा
भविष्यसि अन्यथा तव तेजस्तु
संज्ञा सहिव महत्मा मालि
सूमालि युद्धे च शंभुना तेप
राजितः इत्येव मुक्ता सूर्यं च
वोधयामास ब्रह्माणं इति ब्र
ह्मवैवर्ते श्री कृष्णजन्मखण्डे १९
अध्यायः ब्रह्माण्डपुराणे ५९
अध्याये ऽ प्येवं अथ सू
र्यमंत्राः तारो हृणिर्भृगुः
पद्मा द्वा मकाणि विभूषितः वह्ना
सन्तो मरुत् पोष्ठं मनेत्रो ऽ दि
त्य पश्चिमः अष्टाक्षरो मनुः।
प्रोक्तो भानो रभिमतः पर ऽ ॐ
हृणिः सूर्य आदित्य अस्य र
जा प्रातः कृत्वादि प्राणायामा
न्ते विधाय पीठन्यासं कुर्यात
तत्र विशेषः हृदयस्य पूर्वादि
दिक्षु मध्ये च प्रभूतं विमलं सारं॥

समाराध्यं परमसुखं विन्यस
आधारशक्त्यादि अं सूर्यमंड
लाय द्वादशकलात्मने नमः इ
त्यंतं विन्यसेत् तथा च निव
न्धे पीठे कुर्ते च मध्यमे दिक्षु
मध्ये च संयजेत् प्रभूतं वि
मलं सारं समाराध्यं मनंतरं
परमादि सुखं पीठं स्वविंदान्
प्रकल्पयेत् ततः केशरेषु म
ध्ये च वां दीप्तायै नमः एवं
वीं सूक्ष्मायै वूं जयायै वैं भद्रा
यै वैं विभूत्यै वों विमलायै
वौं अमोघायै वं विद्युतायै
वः सर्वतोमुख्यै तथा च निबं
धे दीप्ता सूक्ष्मा जया भद्रा
विभूति विमला पुनः अ
मोघा विद्युता सर्वतोमुखी
पीठशक्तयः दीप्तदीर्घशिखा
काद्या वीजान्यासां विदुः क्रमात्
अर्को वह्निस्तथितय स्वरान् वि
न्दुनिसंयुतान् तद्परिवृत्त
विसृणिवात्मकाय सौराय यो
गपीठाय नमः तथा च शारदा
यां वदेत् पदं ततः पर्यन्ते व्रत
विसृणिवात्मकं प्र सौराय यो
गपीठाय नमः पद्मं तनं पीठ
मंत्रो ऽ यमाख्यातो दिनेशस्य ज॥५

गतपतेः ततो ऋष्यादिन्यासः॥
शिरसि देवभाग ऋषये नमः
मुखे गायत्री छंदसे नमः हृदि
आदित्याय देवतायै नमः नि
वन्धे देवभागो मुनिः प्रोक्तो॥
गायत्री छन्द ईरितं आदित्यो
देवता प्रोक्तो दृष्टफलप्रदः
ततः करांगन्यासौ सत्या॥
य तेजोज्वालामणे हूं फट्॥
स्वाहा अंगुष्ठाभ्यां नमः एवं ब्र
ह्मणे ऽ तर्जनीभ्यां स्वाहा वि
ष्णवे ऽ मध्यमाभ्यां वषट्
रुद्राय ऽ अनामिकाभ्यां हूं
अग्नये ऽ कनिष्ठकाभ्यां वौ
षट् सर्वाय ऽ करतलपृष्ठाभ्यां
फट् एवं हृदयादिषु तथा च
शारदायां सत्याय हृदयं प्रो
क्तं ब्रह्मणे शिर ईरितं विष्ण
वे स्याच्छिखा वर्म रुद्राय प
रिकीर्तितं अग्नये नेत्रमा॥
ख्यातं सर्वायास्त्रमुदीरितं ते
जो ज्वालामणे हूं फट् द्विठा
न्तः परिकीर्तितः ततो मूल
न्यासः यथा शिरसि ॐ मआ
दित्याय नमः मुखे ऽ रवये हृ
दये ॐ भानवे गुह्ये ई भास्कराय
चरणयोः अं सू॥

हृष्टा ७

र्याय तथाच निबंधे आदित्यं
बिम्बसंस्थं मूर्त्तिरविं शुद्धगतं न्य
सेत् हृदये भानुनामानं भास्क
रं गुरुदेशतः सूर्यचरणं॥
यो न्यसेद् ह्रौँः सत्यादि पंच
भिः ततो मंत्रन्यासः शिर
सि ओम् ओम् नमः मुखे ओम्
घृ नमः कंठे ओम् णि नमः
हृदि ओम् सू नमः कुक्षौ ओ
मः र्य नमः नाभौ ओम् आ नमः
लिंगे ओम् दि नमः पादयोः॥
ओम् त्य नमः तथाच मूर्द्धास्य
कण्ठ हृदय कुक्षि नाभि ध्वजां
घ्रिषु मंत्रवर्णान्न्यसेद् बौधः प्रत्ये
कं प्रणवादिकान् ततो ध्यानं
रक्ताब्जयुग्माभयदानहस्तं के
यूरहारांगद कुंडलाढ्यं मा
णिक्यमौलिं दिननाथमीडे
बंधूककांतिं विलसत् त्रिनेत्रं
एवं ध्यात्वा मानसैः संपूज्य अ
र्घ्यस्थापनं कृत्वा गुरुपंक्तिं
संपूज्य पीठपूजां कुर्यात् त
तः खखोल्काय नमः इति मं
त्रेण मूर्त्तिं संकल्प्य पुनर्ध्या
त्वावाहनादि पंचपुष्पांजलिदा
नपर्यंतं विधायावरणपूजामार
भेत् तथाच निबंधे ताराद्विखखो
ल्काय मनुना मूर्त्तिकल्पना सादि
णां सर्वलोकानां तस्मादावाह्य पूज
येत् केशरेष्वग्न्यादिकोणेषु
मध्ये दिक्षु च सत्याय तेजोज्वा
लामणे हुं फट् स्वाहा हृदयाय
नमः एवं ब्रह्मणे शिरसे स्वाहा
विष्णवे शिखायै वषट् रुद्राय क
वचाय हुं अग्नये नेत्रत्रयाय वौष
ट् सर्वाय अस्त्राय फट् दिक्पत्रे
षु पूर्वादि ॐ आदित्याय नमः
एवं यं रवये ॐ भानवे ईं भास्क
राय विदिक्पत्रेषु अग्न्यादिषु
उषायै पं प्रज्ञायै पं प्रभायै
सं संध्यायै तथाच अंगानि
पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्त
यः आदित्याद्या स्वतस्तोऽर्च्याः
शक्तयः कोणपत्रगाः स्वस्व
नामादि वर्णाः स्वस्वासां बीजा
न्यनुक्रमात् उषा प्रज्ञा प्रभा
संध्या शक्तयः परिकीर्तिताः
ततः पत्राग्रेषु ब्राह्म्याद्याः
संपूज्य पुरतोः रुणं मर्च्चये
त् तथाच शारदायां पत्राग्र
संस्था ब्राह्म्याद्याः पुरतोऽरु
णमर्चयेत् तद्बहिश्चेन्द्रादीन्
पूजयेत् यथा चन्द्राय नमः
एवं मंगलाय बुधाय बृहस्पतये

शुक्राय शनैश्चराय राहवे के
तवे तथाच शारदायां चन्द्रा
दीन् पूजयेत् पश्चात् ग्रहान
ष्टौ ततो बहिः इति ततः इन्द्रा
दीन् वज्रादींश्च संपूज्य धूपा
दिविसर्जनांतं कर्म समापये
त् अस्य पुरश्चरणं मष्टलक्ष
जपः तथाच वसुलक्षं जपे
न्मंत्रं समिद्भिः क्षीरशाखिनां
तत् सहस्रं जुहुयात् जि
ताक्षोभिर्जितेन्द्रियः वाचनि
क एवा सहस्रहोमः मंत्रांत
रं यथा आकाश मग्निदीर्घेन्दु
सं युतंभवेत्सरो सगीर्वाणो
भृगुर्भानो स्वलरोः यसमीरि
तः ह्रां ह्रीं सः अस्य पूजाप्र
योगः प्रातः कृत्यादि पूर्वम
न्त्रोक्त पीठन्यासं विधाय पूर्वो
क्त ऋष्यादिन्यासं कुर्यात्
ततो मंत्रन्यासः यथा आधा
रादि पादपर्यंतं ह्रां नमः क
ष्ठादाधारपर्यंतं ह्रीं नमः म
हृदादिकंठपर्यंतं सः नमः शार
दायां आधारादिपदाग्रांतं कंठा
दाधारकावधि मूर्द्धादि कंठप
र्यंतं क्रमाद्बीजत्रयं न्यसेत् ततः
करांगन्यासो ह्रां अंगुष्ठाभ्यां॥
नमः ह्रीं तर्जनीभ्यां नमः स्वाहा
हुं मध्यमाभ्यां नमः वषट् हैं अना
मिकाभ्यां हुं ह्रौं कनिष्ठाभ्यां वौ
षट् ह्रः करतलपृष्ठाभ्यां फट्
एवं हृदयादिषु अथा च निब
न्धे यडुदीर्घभाजा मध्येन वी
जेनांगानि कल्पयेत् ततो ध्या
नं रक्ताम्बुजासनमशेषगुणैक
सिन्धुं भानुं समस्तजगतामधि
धिपं भजामि पद्मद्वयाभयव
रान्दधतं कराब्जैर्माणिक्यमौ
लिमरुणांगरुचिं त्रिनेत्रं एवं
ध्यात्वा मानसैः संपूज्य अर्घ्य
स्थापनं कृत्वा पूर्वोक्तक्रमेण
पीठपूजां विधाय मूर्त्तिमंत्रेण
मूर्त्तिं संकल्प्य पुनर्ध्यात्वावाहनादि
पंचपुष्पांजलिदानपर्यंतं विधा
यावरणपूजामारभेत् अग्निनि
ऋतिवाय्वीशानेषु मध्ये दिक्षु च
ह्रां हृदयाय नमः इत्यादिना पू
जयेत् पत्रेषु चेन्द्रादीन् पूजये
त् ततः इन्द्रादीन् वज्रादींश्च पू
जयेत् ततो धूपादिविसर्ज
नांतं कर्म समापयेत् अस्य
पुरश्चरणं द्वादशलक्षजपः त
थाच भानुलक्षं जपेन्मंत्रमा
ज्येन च दशांशतः तिलैर्वा॥

मधुयासिक्ते जेऊयाद्धितेन्द्रियः
मंत्रांतरं आकाशमग्नि प
वन सत्यांतावीशाविन्दुमत् मा
र्तंडभैरवं नाम वीज मेतदुद्दा
हृतं प्रुटितं विंववीजेन सर्व
कामफलप्रदं विंववीजमाह
दांतं दहन नेत्रेन्दुसहितं तद
दाह्वं ह्रिं स्रोउं ह्रिं अस्य पू
जाप्रयायोगः प्रातः कृत्यादि
पूर्ववत् एतन्मंत्रोक्त पीठन्या
सांतं कर्म विधाय ऋष्यादि
न्यासं कुर्यात् ततो मूर्तिन्या
सः ह्रं सूर्याय नमोः अंगुष्ठ
योः ह्रिं भास्कराय नम तर्ज्ज
न्योः ह्रुं भानवे नमः मध्यम
यो ह्रैं रवये नमो नामिका
योः ह्रौं दिवाकराय नमः क
निष्ठयोः ततः शिरसि वदने हृ
दये गुह्ये पाददेशेषु तास्त
न्वीजादिका न्यसेत् तथाच
निवन्धे पंचकृत्स्नात्मवीजेन
पंचमूर्तीः प्रविन्यसेत् अंगुष्ठा
दिकनिष्ठांतं अंगुलीषु क्रमादि
माः सूर्यस्त भास्करो भानुस्त
तो रवि दिवाकरो शिरो वदन
हृद् गुह्य पाददेशेषु ताः क्रमा
त् ततः करांगन्यासो ॥ ॥ ॥

ह्रां अंगुष्ठाभ्यां नमः ह्रीं त
र्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्यां
वषट् ह्रैं अनामिकाभ्यां हूं ह्रौं
कनिष्ठाभ्यां वौषट् एवं हृ
दयादिषु ह्रां हृदयाय नमः
इत्यादि तथा च निवन्धे दी
र्घयुक्तेन वीजेन नेत्रांतांगानि
विन्यसेत् ततो मूलवीजेन
व्यापकं कृत्वा ध्यायेत् तथा
च व्यापकं मूलवीजेन कुर्वी
ततदनंतरं ध्यानं हेमांभोज
प्रवालप्रतिम निजरुचिं चा
रु खट्वांग पद्मो चक्रशक्तिं
सपाशं सृणि मतिरुचिरा म
क्षमालां कपालं हस्तांभोजैर्द
धानं त्रिनयनविलसद्देववक्त्रा
भिरामं मार्तंडं वल्लभार्द्धं मणिमयमुकु
एवं ध्यात्वा मानसैः संपूजामः एवं
ध्यात्वा मानसैः संपूज्यार्घ्यस्था
पनं कुर्यात् ततः पूर्वोक्त
क्रमेण पीठं ॐ उषायै नमः प्र
वं पं प्रभायै पं प्रज्ञायै संसं
ध्यायै इति संपूज्य मूर्त्तिं
मूलेन कल्पयेत् ततः पूर्वा
दिदिक्षु सूर्यं भास्करं भानुं
रविं च पूजयेत् कोणेषु
दिवाकरं ॥ ॥ ॥ ॥

ततः पूर्वदलेषु पश्चमोदीच्येषु
दिक्षु ह्रां हृदयाय नमः इत्यादि
ना पूजयेत् ईशाने ह्रौं नेत्रत्रा
य वौषट् शारदायां सूर्यादी
न् चतुरो दिक्षु विदिक्षु न्य सम
र्चयेत् अंगपूजा यथापर्वा नेत्र
मीशान दिग्गतं इति ततः
पूर्ववच्चन्द्रादिग्रहान् पूजयेत्
ततो लोकपालानर्चयेत् त
थाच निवन्धे ग्रहानष्टौ तथा
वाह्ये लोकपालाः स्मृतः परं ॥
ततो धूपादिविसर्ज्जनान्तं क
र्म समर्पयेत् अस्य पुरश्चरणं जपो
लक्षत्रय संख्यः त्रिमधुरोपेतैः
कमलैः दशांश होमः तथा
च लक्षत्रयं जपेन्मंत्री वीजं
विम्वपुटीकृतं दशांशं कम
लैः फुल्लैः जुहुयान्मधुरोक्षितैः
इमं मंत्रं जपन्मर्त्यः कीर्तिं पु
त्रान् धनं द्युतिं वाक्सिद्धिममि
तां लक्ष्मीं सौभाग्यमपि साधये
त् इति तंत्रसारः अस्य प्र
कारांतर मंत्रध्यान पूजादिकं
गरुड पुराणे ३९ अध्याये द्र
ष्टव्यं सूर्य्यवर्णनीयानि
यथा अरुणाना १ रविमणि
प्रकाशः १ च ॥ ॥ ॥

कवाकप्रीतिः ३ पद्मप्रकाशः ४
पथिकप्रीतिः ५ लोचनप्रीतिः
६ तारार्त्तिः ७ चन्द्रप्रकाशः ८
दीपप्रकाशः ९ औषध्यप्रकाशः
१० प्रेचकार्त्तिः ११ तमोऽभावः
१२ चौरार्त्तिः १३ कुमुदार्त्तिः १४
जलदार्त्तिः १५ इतिकविक
ल्पलता ॥
सूर्य्यकान्तः पुं स्फटिकः इति
हलायुधः मणिविशेषः तत्
पर्य्यायः सूर्य्यमणिः २ सूर्य्या
श्मा ३ दहनोपमः ४ इति हे
मचन्द्रः तपनमणि ५ तापनः ६
रविकान्तः ७ दीप्तोपलः ८
अग्निगर्भः ९ ज्वलनाश्मा १० अर्को
पलः ११ अस्य गुणाः उष्णत्वं ति
क्तत्वं रसायनत्वं वातश्लेष्म
हरत्वं मेध्यत्वं पूजनाद्रविनुष्टि
दत्वं च इति राजनिर्घण्टः पु
ष्पवृक्ष विशेषः तत् पर्य्यायः
सूर्य्यमणिः २ पुष्परक्तः ३
पद्मनपुटः ४ इति शब्दचन्द्रि
का सूर्यकान्तिः स्त्री पुष्पवि
शेषः यथा सूर्यकान्ति स्ताम्र
वर्णा ओड्रपर्य्याय इत्यपि इति
शब्दचंद्रिका ॥
सूर्य्यस दीप्तिश्च ॥ ॥ ॥

सूर्य्यकालः पुं दिवसः इति शब्दचन्द्रिका ॥
सूर्य्यकालानलचक्रं क्ली नराणां शुभाशुभज्ञानार्थं नरत्रचरितचक्रविशेषः यथा ऊर्द्ध्वगास्त्रि त्रिशूलस्याग्रा स्त्रिस्रस्तिर्य्यग्व्यवस्थिताः द्वेद्वेनाड्यौ स्थिते कोणे शृंगयुग्मं तथैकया ॥ ॥
मध्यत्रिशूलदंडादौ भानुभाद्यं भमंडलं स्थापयित्वात्र दात व्यं सव्यमार्गेण सर्वदा नाम ऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभं श्रयोगाने स्त्रिनक्षत्रे रुद्रेगोवधबन्धनं ॥
रेखाष्टके जयो लाभ ऋक्षषट्के तथा धुनः शृंगयुग्मेरुजाभंगो मृत्युः शूलत्रयेस्फुटं विवादे व्यसने युद्धे रोगार्त्ते गमने तथा सूर्य्य ॥ कालानलं चक्रं ज्ञातव्यंत प्रयत्नतः इति स्वरोदयः
सूर्य्यग्रहः पुं नवग्रहाणां प्रथमग्रहः सूर्य्योपरागः य॥ थागारुडे सूर्य्यग्रहः सूर्य्यवारे सोमग्रहो भवेत् चूडामणि रयं योग स्तत्रानन्तफलं स्मृतं इतिति॥ ॥

यादितत्वं ॥
सूर्य्यग्रहणं क्ली सूर्य्योपरागः तत्कारणंयथा सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत् अन्योन्ययो स्तयो रेव व्यापयो रेव कारणात् ग्रासमो॥ तो न जायेते तत्रातः सूर्य्य पश्चिमो तत्र पुण्यफलाद्वागः कृतो राहोस्तु विस्तना इतिवह्निपुराणे गणभेदनामाध्यायः अन्यात् ग्रहणशब्दे द्रष्टव्यं सूर्य्यजः पुं सुग्रीववानरः इतिजटाधरः शनिग्रहश्च ॥
सूर्य्यजा स्त्री यमुनानदी इति हेमचन्द्रः ॥
सूर्य्यतनयः पुं शनैश्चरग्रहः यमः यथा तस्य पत्नीत्रयन्तु संज्ञा राज्ञी प्रभा तथा रेवतस्य सुता राज्ञी रेवंतं सुषुवेसुतं प्रभा प्रभातं सुषुवेत्वाष्ट्री संज्ञातथा मनुं यमश्चयमुना चैव यमलौतु बभूवतुः ॥ ततः शनिंच तपतिं वृष्टिंचैव क्रमेणतु छायायां जनयामास संज्ञेय मिति भास्करः इति मात् स्ये ११ अध्यायः ॥ ॥ ॥ ॥

सूर्य्यतनया स्त्री यमुनानदी इत्यमरः ॥
सूर्य्यपत्रः पुं आदित्यपत्रः इति राजनिर्घंटः ॥
सूर्य्यपुत्रः पुं वरुणः शनिः इति केचित् यमः यथा धर्म्मराजनम स्तुभ्यं नमस्तेयमुनाग्रज पाहिमां किंकरैः सार्द्धं सूर्य्यपुत्रनमोऽस्तुते इति तिथ्यादितत्वं अन्यत् सूर्य्यतनयशब्दे द्रष्टव्यं ॥
सूर्य्यपुत्री स्त्री यमुना यथाम हाभारते यमस्वस नेमस्तेऽस्तुयमुने लोकपूजिते वरदाभव मेनित्यं सूर्य्यपुत्रिनमोऽस्तुते इति तिथ्यादितत्वं॥ विद्युत् इति केचित् ॥
सूर्य्यफणिचक्रं क्ली सर्वकार्य्यशुभाशुभज्ञापकचक्रविशेषः यथा सप्तविंशति भानित्रपंक्तिषु न्यासक्रमेण नखत्वार ञ्चन्तरेवेधः फणिचक्रं त्रिनाडिकं यत्रऋक्षे स्थितोभानुर्भेदादोगणयेद्बुधः नामऋक्षं स्थितं यत्रज्ञेयं तत्र शुभाशुभं ऊर्ध्वान्त्यस्यैव दोषंच नाडीवेधगतेनृणां वर्जयेत् सर्वका

र्य्येषु युद्धकाले विशेषतः ॥ ॥
निर्वेध ऋक्षमध्यस्थं यस्य नाम प्रजायते सिध्यंति सर्वकार्य्याणि संग्रामे च जयो भवेत् ॥
इति स्वरोदयः ॥
सूर्य्यभक्तः पुं बंधूकपुष्पवृक्षः सूर्य्यपूजकेत्रि इति मेदिनी
सूर्य्यभक्तकः पुं बंधूकपुष्पवृक्षः इति शब्दमाला सूर्य्यपूजके त्रि ॥
सूर्य्यमणि पुं सूर्य्यकांतमणिः इति हेमचन्द्रः पुष्पवृक्षविशेषः यथा सूर्य्यकांतः सूर्य्यमणिपुष्परक्तः पचत् पदः इति शब्दचन्द्रिका ॥
सूर्य्यमंडलं क्ली सूर्य्यसन्निधिवेष्टनं तत् पर्य्यायः परिवेषः ॥१ परिधिः २ उपसूर्य्यकं ३ मंडलं ४ इत्यमरः सूर्य्यस्यपरिधिः यथा साम्बाक्षेशिवरूपांच वृद्धां वृषभवाहिनीं सूर्य्यमंडलमध्यस्थां सामवेद समायुतां इत्याह्निकतत्वं ॥
सूर्य्यलता स्त्री आदित्यभक्ता ॥ इति राजनिर्घंटः ॥
सूर्य्यलोकः पुं सौरभुवनं ॥ यथा विनोधर्येर्विना वैदैः॥ ॥

विनापथ्यपरिग्रहैः कालेन
निधनं प्राप्य सूर्य्यलोके महीयते इति काशीखण्डे सूर्य्यार्घ्यदा
नफलं अपि च सौरं लोक मथावा
प्य तेन स विमानगः
यथा कदंवकुसुमं किंजल्कैः सर्व
तोवृतं देदीप्यमानं हितथा सम
ताद्भानुभिः
उपदृश्विं सविज्ञायथ ॥
ततामरसहृद्यं नवभियोज
नानांच सहस्रैः संमितेन चवि
चित्रेणैकचक्रेण समस्तशियते
नच अनूरुणाधिष्ठितेन सर्व
तो धृतरश्मिना. अप्सरोस्तुनि
गंधर्वं सर्पग्रामणी नैर्ऋतैः
स्यन्दनेनातिजविना प्रणनाम।
कृतांजलिः तस्य प्रणामं देवो
पि भ्रुभंगेनानुमन्यच अतिदूरं न
भोवर्त्मप्रतिच क्रामं सहस्रेणत
प्रक्रांतेत्युमणौ उरं शिवशर्म्मा
निशम्यतावृ प्रोवाच भगद्भृत्यौ
कथं लभ्यं रवेः पदं इति स्कन्द
पुराणे काशीखंडे सूर्य्यलोक
वर्णनं नाम ९ अध्यायः सूर्य्य
वंशः पुं सूर्य्यस्य संभानः तद्धि
वरणं यथा परमेश्वरात ॥ ॥

ब्रह्माजातः तस्य पुत्रो मरीचिः
तस्य कश्यपः तस्य सूर्य्यः ॥
तस्य वैवस्वतो मनः सत्य
युगे मनु रेवराजासीत त्रेतायु
गे तस्य पुत्रः इक्ष्वाकुः अयो
ध्यायां राजासीत अस्मिनयुगे
अतिदीर्घायुषो राजानोवहुका
लं राज्यं कृतवंतः त्रेता
द्वापरयोः संधौ श्रीरामचन्द्रो
दशरथस्य तनूपेण अवतीर्णः
द्वापरयुगस्य प्रथमे तस्य
पुत्रः कुशो जातः तद्वंशः ॥
सुमित्रांतः कलेः सहस्रवर्षप
र्य्यंतं राज्यं कृतवंतः एतत प
र्य्यंतं सूर्य्यवंश विश्रांतिः पुनः
सत्ययुगे मरुः तद्वै सूर्य्यवंशः
भावयिष्यति यः योगः सिद्धः
सन् कलापग्रामे आस्ते इति
श्रीभागवतमतं वंशाव ॥
णानविस्तारस्तु मत स्य पुराणे ११
अध्यायादौ गरुडपुराणे १४३
अध्यायोवद्रष्टव्यः ॥
सूर्य्यवल्ली स्त्री अर्कपुष्पिकाह
तः इतिरत्नमाला ॥
सूर्य्यसंज्ञं क्ली कुंकुमं इति
त्रिकांडशेषः
सूर्य्यसारथिः पुं अरुणः इति ॥

शब्दरत्नावली ॥
सूर्य्यहृदयं क्ली सूर्य्यस्तवविशेषः यथा अथोपनिषदादि
त्यहृदयंतं समाहितः मंत्रैस्तु
विविधैः सौरैः ऋग्यजुः साम
संभवैः उपस्थाय महायोगं देव
देवं दिवाकरं कुर्वीत ॥ ॥
प्रणतिं भूमौ मूर्द्धा नित्यमंत्रतः
ॐ भद्रं खखोल्काय शांताय का
रणत्रय हेतवे निवेदयामि
चात्मानं मम स्तेस्तानरूपिणे क
चित पुस्तके खखोल्कायेतिच
पाठः नमस्ते ज्ञानरूपिणे ॥
सूर्य्याय ब्रह्मरूपिणेत्वमेव ब्रह्म
परम मापो ज्योती रसोऽमृतं भू
र्भुवः स्वस्त्वमोंकारः सर्वेरुद्राः स
नातनाः पुरुषः संमहोऽन्तस्त्वां
प्रणमामि कपर्द्दिनं त्वमेव विश्वं
वहुधाजातं वै जायते च न
नमो रुद्राय सूर्य्याय त्वामहं श
रणं गतः प्रचेतसे नमस्तुभ्य ॥
सुमायाः पतये नमः
नमोनम स्ते रुद्राय त्वामहं शर
णं गतः हिरण्यवाहवे तुभ्यं
हिरण्यपतये नमः अंवि
कापतये तुभ्य सुमायाः प

तये नमः नमस्ते नीलकंठाय
नमस्तुभ्यं पिनाकिने
विलोहिताय भर्गाय सहस्राक्षा
यते नमः नमो हंसाय ते नित्य
आदित्याय नमोऽस्तु ते प्रप
द्ये त्वां विरूपाक्ष महंतं परमे
श्वरं हिरण्मये गृहे गुप्तमा
त्मानं सर्वदेहिनां नमस्यामि प
रं ज्योति ब्रह्माणं त्वां परामृतं
विश्वं पशुपतिं भीमं नरनारी
शरीरिणं नमः सूर्य्याय रुद्रा
य भास्वते परमेष्ठिने उग्राय स
र्वभक्षाय त्वां प्रपद्ये सदैव हि
एतद्वै सूर्य्यहृदयं
जप्त्वा स्तव मनुत्तमं प्रातः का
लेऽथ मध्याह्ने नमस्कुर्य्याद्दिवा
करं इदं पुत्राय शिष्याय धा ॥
र्म्मिकाय द्विजातये प्रदेयं ॥
सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शि
तं सर्वपाप प्रशमनं वेदसारं स
मुद्भृतं ब्राह्मणानां हितं पुण्यं
ऋषि संघैर्निषेवितं यस्तु ॥
नित्यं पठेद्धीमान् भेरत्नादि
त्यमंडलं महापातकयुक्तोपि
मुच्यतेनात्र संशयः तथापस्मा
रकुष्ठाद्यै व्याधिभिः पीडितोऽ
पिसन् जपात्मा नरणं स्तो ॥

त्रेमस्ताच्यो भवति द्रुतं ॥
भवतग्रह विशावाधिवीमय्यसन
कर्षिभिः स्तुवन् ध्यात्वा हरिं
विप्रो मुच्यते महतो भयात् इति
कूर्म्मपुराणे उपरिभागे ९ अ
ध्यायः गारुडे ५९ अध्याये च
द्रष्टव्यं ॥
सूर्य्या स्त्री सूर्य्यभार्य्या संज्ञा
इति शब्दरत्नावली इन्द्रवारुणी
इति राजनिर्घण्टः नवोढा इति शब्दमाला
वर्त्तमायद्यानस्याः हिकर्द्दिविच्छोपि
विश्वेदेवः कृतोद्वाहः देवकन्यासू
र्य्यया सार्द्धं प्रयाणे रथमारु
ढ़त् इति श्रीभागवते ९
स्कन्धे १ अध्यायः ॥
सूर्य्यार्घ्यं क्ली सूर्य्यसंप्रदानका
र्घ्य यथा पूजायां अच्छिद्राव
धारणार्थं सूर्य्यार्घ्यदानं यथा
ततो भास्करबीजेन सहितेना
मुना पुनः मन्त्रेण भास्करायां
र्घ्यमच्छिद्रार्थं निवेदयेत् नमो
विवस्वते ब्रह्मन् भास्वते विष्णु
तेजसे जगत् सवित्रे शुचये
सवित्रे कर्म्मदायिने ॥
ततः कृताञ्जलि भूत्वा पठित्वा
मन्त्रमीरितं स्वकाग्रमनसा ॥
वाग्भिरच्छिद्र॥

मवधारयेत् यन्नाच्छिद्रं तत्पच्छि
द्रं यच्छिद्रं पूजने मम ॥ ॥
सर्वं तदच्छिद्रमस्तु भास्करस्य प्र
सादतः इति कालिकापुराणे ५९
अध्यायः रोगादि ॥
प्रात्यर्घ्यं सूर्य्यस्य द्वादशसमति
नामभिः समतिधार्य्यप्रदानमस्मा
ण्येषय हंसो भानुः सहस्रांशु
स्तपनस्तापनो रविः विकर्त्तनो
विवस्वांश्च विश्वकर्म्मा वि
भावसुः विश्वरूपो विश्वक
र्त्ता मार्त्तण्डो मिहिरोऽंशुमान्
आदित्यश्चोष्णगुः सूर्य्योऽर्य्य
मा ब्रध्नो दिवाकरः द्वादशात्मा
सप्तहयो भास्करोऽहस्करः खगः
सूरः प्रभाकरः श्रीमान् लोक
चक्षुर्ग्रहेश्वरः त्रिलोकेशो लो
कसाक्षी तमोरिः शाश्वतः
शुचिः गभस्तिहस्तस्तीव्रांशुस्त
रणिः सुमहोरणिः द्युमणिर्हरि
दश्वोऽर्क्को भानुमान् भयनाशनः
छन्दोश्वो वेदवेद्यश्च भास्वान्
पूषा वृषाकपिः एकचक्ररथो
मित्रो मन्देहारिस्तमिस्रहा
दैत्यहा पापहर्त्ता च धर्म्मो धर्म्म
प्रकाशकः हेलिकश्चित्रभानुश्च
कलिघ्नस्तार्क्ष्यवाहनः दिक्पति

पद्मिनीनाथः कुशेशयकरो ॥
हरिः चर्म्मरश्मिर्दुर्निरीक्ष्यमण्डलं
कश्यपात्मजः प्रभिः
सप्तति संख्यकैः पुण्यैः सूर्य्य
स्य नामभिः प्रणवादिच
तुर्थ्यन्तैर्न्नमस्कारसमन्वितैः ॥
प्रत्येक मथ्वरन्नाम दृष्ट्वा प्रादि
वाकरं विरत्य पाणियुग्मेन ता
म्रपात्रं सुनिर्म्मलं जानुभ्यां प्र
वनीं गत्वा परिपूर्य्य जलेन च
करवीरादि कुसुमै रक्तचन्दन॥
मिश्रितैः दूर्वाङ्कुरै
रक्षतैश्च तिलैर्मिश्रैः पात्रमथ
तः दद्यादर्घ्यमनर्घ्याय सवित्रे
ध्यानपूर्वकं उपमौलिसमानी
य तत् पात्रं नान्यदृष्टिमनाः ॥
प्रतिमन्त्रं नमस्कुर्य्यादुदया
स्तमये रविं अनया नामस
प्तत्या महामन्त्ररहस्यया ॥
एवं कुर्वन्नरो जातु न दरिद्रो न
दुःखभाक् व्याधिभिर्म्मुच्यते
तैः विनौषधैर्विना वैद्यैर्विना
पथ्यपरिग्रहैः कालेन
निधनं प्राप्य सूर्य्यलोके म
हीयते इति स्कन्दपुराणे काशी
खण्डे ९ अध्यायः ॥

सूर्य्यालोकः पुं आतपः इति
राजनिर्घण्टः ॥
सूर्य्यावर्त्तः पुं क्षुपविशेषः हुड़
हुड़िया इति भाषा अस्य गुणाः
सूर्य्यावर्त्तो विवन्धघ्नः इति
राजवल्लभः शाकविशेषः
सुलचिया इति भाषा तत्
पर्य्यायः पार्वतेयश्च करभो
वल्लिरः कपिपिप्पली नामा
न्तरो क्वचित् प्रोक्तः सूर्य्या
वर्त्तः सितोऽपरः इति र
त्नमाला वराहकाली कथितं
सूर्य्यावर्त्तस्तु शाकिकैः इति
हारावली ॥
सूर्य्यावर्त्ता स्त्री आदित्यभक्ता
इति राजनिर्घण्टः ॥
सूर्य्याश्मा पुं सूर्य्यकान्तमणिः
इति हेमचन्द्रः ॥
सूर्य्याश्वः पुं सूर्य्यवाहकः तत्
पर्य्यायः वातादः २ हरितः ३
इति त्रिकाण्डशेषः ॥
सूर्य्यास्तं क्ली सूर्य्यस्यास्ताच
लगमनं यथा निशीथादय र
सेनेन अर्द्धरात्रपूर्वकालत्वेन सू
र्य्यास्तमयकालस्यापि लाभात्
इति तिथ्यादितत्त्वं सूर्य्याह्व क्ली
ताम्रं इति त्रि ॥

काण्डशेषः सूर्य्यनामकेत्रि ॥
सूर्य्याह्वः पुं अर्कवृक्षः इति राजनिर्घण्टः ॥
सूर्य्येन्दुसंगमः पुं अमावास्या इत्यमरः सूर्य्यचन्द्रमेलनञ्च ॥
सूर्य्योढः पुं सूर्य्यास्तकालमाप्तोऽतिथिः यथा सूर्य्योढस्तु सम्प्राप्तोयं सूर्य्येऽस्तंगतेऽतिथिः इति हेमचन्द्रः अस्तगतसूर्य्यः यथा विष्णुपुराणे दिवातिथौ तु विमुखे गते यत् पातकं भवेत् तदेवाष्टगुणं विद्यात् सूर्य्योढे विमुखे गते इत्याह्निकाचारतत्त्वं ॥
सूर्य्योदयः पुं सूर्य्यस्य प्रकाशः यथा विष्णुधर्म्मोत्तरे सावने चतथा मासि त्रिंशत् सूर्य्योदयाः स्मृताः आदित्यराशिभोगेन सौरो मासः प्रकीर्तितः इति मलमासतत्त्वं ॥ तत्र प्राणन निषेधो यथा सूर्य्योदये चास्तमिते च शायिनं विमुञ्चति श्रीरपि चक्रपाणिनं इति लक्ष्मीचरित्रे तत्र काले स्नानादेः कर्त्तव्यत्वं यथा सूर्य्योदये विना नैव स्नान॥

दानादिकाः क्रियाः इति मायश्चित्ततत्त्वं ॥
सूर्त्तनादरे इति कविकल्पद्रुमः रेफयुक्तः षष्ठस्वरी दन्त्यादिः सूर्त्तति दुष्टं लोकः ससूर्त्त ॥ इति दुर्गादासः ॥
सूर्त्तणं क्ली अनादरः इति शब्दरत्नावली ॥
सूर्क्ष्य अनादरे ईर्षे इति ॥ कविकल्पद्रुमः दन्त्यादिदीर्घी रेफमध्यः सूर्क्ष्यति ससूर्क्ष्य ॥ इति दुर्गादासः ॥
सूर्त्सः पुं माघः इति शब्दरत्नावली ॥
सूष प्रसवे सूषति इतिकविकल्पद्रुमः षष्ठस्वरी सूषति इति दुर्गादासः ॥
सूक्ष्मं क्ली कैकैतवं अध्यात्मं इति मेदिनी अलंकारविशेषः यथा सूक्ष्मं पराशया भिज्ञेत्वरसाकूत चेष्टितं मयि प्रपश्यति सा केशैः सोमं तमसि माह्णेण इति चन्द्रा ॥ लोकः ॥
सूक्ष्मः पुं कतकवृक्षः इति शब्दरत्नावली अणुः अल्पेत्रि इति मेदिनी तत् पर्य्यायः ॥

अल्पे स्तोके दलं सूक्ष्मं दलं कंच कृशं तनु दभ्रं खुलंखुलकंच स्त्रियां मात्रा त्रुटी काणमुभा नवुर्लवो लेशः कणोपिच निगद्यते इति शब्दरत्नावली ॥
सूक्ष्मकक्षफला स्त्री मध्यमजम्बुवृक्षः इति रत्नमाला ॥
सूक्ष्मतण्डुलः पुं खसखसः इति राजनिर्घण्टः ॥
सूक्ष्मतण्डुला स्त्री पिप्पली इति राजनिर्घण्टः ॥
सूक्ष्मदर्शी त्रि अतिशयबुद्धिमान् तत् पर्य्यायः कुशाग्रीमतिः १ नन् कालधीः २ मतुत् पन्नमतिः ४ इति हेमचन्द्रः
सूक्ष्मदारु क्ली तवकाष्ठं तत् पर्य्यायः कलिंजः २ इति त्रिकाण्डशेषः
सूक्ष्मपत्रः पुं धान्यकं वनजीरकः देवसर्षपः लघुवदरः सुरपर्णी वनवर्वरी लोहितेक्षुः कुक्कुन्दुः इति राजनिर्घण्टः वावलवृक्षः यथा वावलः स्वर्णपुष्पश्च सूक्ष्मपत्रश्च कंटलः इति शब्दचन्द्रिका ॥

सूक्ष्मपत्रिका स्त्री शतपुष्पा शतावरी लघुब्राह्मी ह्रद्रोपोदकी दुरालभा आकाशमांसी इति राजनिर्घण्टः
सूक्ष्मपर्णा स्त्री जीर्णफंजी डोडी इति राजनिर्घण्टः ॥
सूक्ष्मपर्णी स्त्री रामदूती वृक्षः यथा रामदूती पर्वपुष्पी विशल्यानागदन्तिकाण्डली सूक्ष्मपर्णी चभरण्यका फणिज्ज‾का इति शब्दचन्द्रिका ॥
सूक्ष्मपिप्पली स्त्री वनपिप्पली इति राजनिर्घण्टः ॥
सूक्ष्मपुष्पी स्त्री यवतिक्ता इति राजनिर्घण्टः
सूक्ष्मफल पुं भूकर्बुदारः इति राजनिर्घण्टः
सूक्ष्मफला स्त्री भूम्यामलकी इति रत्नमाला
सूक्ष्मवदरी स्त्री भूवदरी इति राजनिर्घण्टः
सूक्ष्मभूतं क्ली अपञ्चीकृताकाशादिभूतं इति वेदान्तसारः
सूक्ष्ममक्षिकः पुं मशकः इति राजनिर्घण्टः
सूक्ष्ममूला स्त्री जयन्ती इति राजनिर्घण्टः ॥

सूक्ष्मवल्ली स्त्री ताम्रवल्ली जतुका इति राजनिर्घण्टः
सूक्ष्मवस्त्रं क्ली सूक्ष्मवसनं मिहि कापड इति भाषा यथा उपभोगोपि न सूक्ष्मवस्त्रपरिधानादिना इति दायभागः ॥
सूक्ष्मबीजः पुं खसखसः इति राजनिर्घण्टः
सूक्ष्मशरीराणि क्ली ज्ञानेन्द्रियपंचकं कर्मेन्द्रियपंचकं वायुपंचकं बुद्धिमनसी चेति सप्तदशावयवानि इति वेदान्तसारः
सूक्ष्मशर्करा स्त्री वालुका इति राजनिर्घण्टः ॥
सूक्ष्मशाखः पुं जालवर्बूरः इति राजनिर्घण्टः
सूक्ष्मशालिः पुं अन्नधान्यविशेषः तत्पर्यायः सूक्ष्मविशालिः २ पावशालिः ३ सूचकं ४ अस्य गुणाः सुमधुरत्वं लघुत्वं पित्तास्रदाहनाशित्वं च इति राजनिर्घण्टः
सूक्ष्मषट्चरणः पुं पत्तसूकः इति राजनिर्घण्टः
सूक्ष्मा स्त्री यूथिका इति शब्दचन्द्रिका सूक्ष्मैला करुणी ॥ वालुका इति राजनिर्घण्टः ॥
सूक्ष्मैला स्त्री क्षुद्रैला गुजराटी एलाचि इति भाषा तत्पर्यायः वयस्था २ तीक्ष्णगन्धा ३ त्रुपुटी ४ त्रुटिः ५ इति रत्नमाला ॥
सृ क गतौ स्मृतौ इति कविकल्पद्रुमः कसारयति इति दुर्गादासः
सृ र ति गतौ इति कविकल्पद्रुमः वैदिकः लिससर्त्ति ॥ इति दुर्गादासः
सृ गतौ इति कविकल्पद्रुमः सरति नालाने करिणा सते इति रश्चौकर्मकत्वादिति रमानाथः तन्निंत्यं कर्तृस्पृभावधानत्वं तन्निषेधात् वस्तुगत्याकृतःऽनित्यत्वादालाने पदं नालानेरितिवा पाठान्तरं कर्म्माविवक्षायां भावे प्रत्ययः इति दुर्गादासः ॥
सृक पुं स्पष्टिक क्ली सृजधातोः क्विप्प्रत्ययेन निष्पन्नं तस्य रूपान्तराणि सृग् सृक् सृट् सृड् इति सिद्धान्तकौमुदी ॥
सृकः पुं कैरवं वाणः इ शुणादिकोषः पमवायुः ॥

इति सिद्धान्तकौमुद्या सूणादिवृत्तिः ॥
सृकण्डुः स्त्री कण्डूरोगः इति शब्दरत्नावली ॥
सृकालः पुं सृगालः इति शब्दचन्द्रिका ॥
सृक्क स्त्री सृक्कणी इति सुभूतिः सृक्कं इत्यमरटीकायां भरतः सृक्कणी स्त्री ओष्ठयोः प्रान्तभागः इति पाणिनिः इत्यमरटीकायां भरतः ॥
सृक्कि स्त्री सृक्कणी इत्यरुणः इत्यमरटीकायां भरतः
सृक्व स्त्री ओष्ठप्रान्तभागः यथा प्रान्तावोष्ठस्य सृक्कणी इत्यमरः ओष्ठयोर्वामदक्षिणे प्रान्तौ सृक्कणीउच्येते उष्मेति ज्ञानादेकत्वं सृजन्तो लालादि सृक्काणि ज्ञानमिति क्वनिपनिपातनात् केड् सृक्कणकोऽति प्रयोगात् वसंयोगः अन्यथा टाया महानोऽल्लोप इत्यल्लोपः स्यात् महासृक्काय श्रोभितो नृसिंहनखाग्रवत् इति श्रेषात् ककारद्वयसंयोगोऽपि सृक्कनान्तं क्लीवं सृक्कणी क्लीवे इति सुभूतिः प्रान्तावोष्ठस्य सृक्कणी क्लीवकाण्डेऽमरदत्तश्च इवन्नापि सृक्कणी सृक्कणी विलिहति जिह्वया तथैवेति रुचिनिश्चयः सम् सृक्कणी प्रान्ते मसृक मदिरार्धं प्रलेलिहानो हरिणा विरुद्धेरिति पाणिनिः सृक्कि क्लीवमिदं तं च सृक्कग्मिनी दधि ससृक्कि तथावारिः स्यादित्यरुणः सृक्कं क्लीवमदन्तं च सृक्के द्वे चैव विज्ञेये चत्वारिंशाञ्च वक्त्रजाः इत्युक्तेः वामे लिहन् सृक्कमरण्य चूर्णे इति वसन्तराजप्रयोगाच्च इति भरतः ॥
सृक्व स्त्री ओष्ठप्रान्तभागः इति वसन्तराजप्रयोगः इत्यमरटीकायां भरतः सृक्कि स्त्री क्ली उष्ठयोः प्रान्तभागः कक्कखिमाघा इति पाणिनिः इत्यमरटीकायां भरतः सृक्कि क्ली उष्ठयोः प्रान्तभागः इत्यरुणः इत्यमरटीकायां भरतः
सृक्किणी स्त्री ओष्ठयोरन्तरं इति राजनिर्घण्टः ॥
सृगः पुं भिन्दिपालः इत्यमरः ॥

सृगालः पुं जंबुकः इति शब्दरत्नावली दैत्यविशेषः इति केचित्

सृज य औ ऊ विसर्गे इति कविकल्पद्रुमः यं ऊ सृज्यते औ स्रष्टा सर्गः सृज्यते विसर्गस्त्यागः त्यागो बुद्धिपूर्वक एव अत्र करोतीत्यर्थः यथा उपासना मेत्य पितुः स्म सृज्यते इति नैषधं संपूर्वोऽयम कर्मकः यथा संसृज्यते सरसिजैररुणांशुभिन्नैः क्रियापविणाम वायुरितिरघुः ॥ इति दुर्गादासः ॥

सृज औ श विसर्गे इति कविकल्पद्रुमः औ अस्राक्षीत् श सृजति इति दुर्गादासः

सृजिकाक्षारः पुं सर्जिकाक्षारः इत्यमरटीकायां रमानाथः

सृणिः पुं शत्रुः इति शब्दमाला सृणिका स्त्री अंकुशः इत्यमरः सृणिका स्त्री लाला इत्यमरः सृणी स्त्री अंकुशः इत्यमरः सृणीका स्त्री लाला इत्यमरः टीकायां रामाश्रमः ॥

सृतः त्रि गतः सृधातोः क्त प्रत्ययेन निष्पन्नः ॥

सृतिः स्त्री गमनं मार्गः इति मेदिनी ॥

सृत्वरः त्रि गमनकर्त्ता सृधातोः क्वरप् प्रत्ययेन तागमेन निष्पन्नः इति मुग्धबोधव्याकरणं सृत्वरी स्त्री माता इति संक्षिप्तसारोणादिवृत्तिः गमनकर्त्री इति मुग्धबोधव्याकरणं सृत्वा स्त्री विसर्पः बुद्धिः प्रजापतिः इति संक्षिप्तसारो ॥ णादिवृत्तिः ॥

सृदरः पुं सर्पः इति सिद्धांतकौमुद्यामुणादिवृत्तिः ॥

सृदाकुः पुं वायुः वज्रं अग्निः प्रतिसूर्यकः इति मेदिनी स्रगः इति संक्षिप्तसारोणादिवृत्तिः ॥

सृदा—ः स्त्री नदी इत्युणादिकोषः ॥

सृप ऌ ङ गत्यां इति कविकल्पद्रुमः ऌ असृपत् असृप्सत ऌदित्वेपि रूपमसृपदिति विशेष विधानात् पक्षे त्यासिः तेन असार्प्सीत् असृप्सीत् इत्यपि ओ सर्प्ता इति दुर्गादासः ॥

सृपाटः पुं सृपाटी इति स्त्री पुंलिङ्गसंग्रहटीकायां भरतः ॥

सृपाटिका स्त्री चंचुः इति हेमचंद्रः ॥

सृपाटी स्त्री परिमाणभेदः इति स्त्री पुंलिंगसंग्रहटीकायां भरतः वृक्षधारा इति तत्रैव ॥ गोवर्द्धनः ॥

सृमः पुं चन्द्रः इत्युणादिकोषः ॥

सृभ ऊ हिंसे इति कविकल्पद्रुमः समस्वरी ऊ असर्भित्वा सृब्ध्वा इति दुर्गादासः

सृमरः पुं पशुविशेषः इत्यमरः बालमृगः इति केचित्

सृष्टं त्रि निर्मितं युक्तं ॥ ॥ निश्चितं बहुले इति मेदिनी भूषितं इत्यजयः त्यक्तं सृजधातोः क्तप्रत्ययेन निष्पन्नं ॥

सृष्टिः स्त्री निर्मितिः स्वभावः इति मेदिनी निर्गुणः इति शब्दरत्नावली ब्रह्माण्ड सृष्टि र्यथा सृष्टेः पूर्वं मन ॥ मनोवाक्यागोचरो भगवान् एक एवासीत् यदा स स्वेच्छया द्रष्टा सन् द्रष्टव्यं नापश्यत् तदा त्रिगुणामयीं मायां प्रकाशयामास ततो भगवान् स्वांशेन पुरुषरूपं कृत्वा तस्यां मायायां स्ववीर्यं चैतन्यमाधत्त सा समष्टिजीवरूपं महत्तत्वं जनयामास तस्मात् त्रिविधोऽहंकारो जातः तत्र सात्विकाहंकारात् मन इन्द्रियाधिष्ठातृदेवताश्च जाताः राजसाहंकारात् दशेन्द्रियाणि जातानि तामसाहंकरात् ॥ पंचमहाभूतानि तेषां पंचगुणाश्च जाताः एवं प्रकृत्यादिभि रेतैश्चतुर्विंशतितत्वै ब्रह्मांडं निर्माय भगवान् तस्मिन्नेकेनांशेन प्रविश्य गर्भोदक संज्ञकं जलं ससर्ज स जलमध्ये योगनिद्रया सहस्रयुगमितं कालं स्थितवान् तदन्ते अवाय स्वय मंशेन ब्रह्मा भूत्वा सर्वान् सृष्ट्वा नानावताराः कृत्वा पालयति कल्पान्ते रुद्ररूपेण संहरति च इति श्रीभागवतमते संक्षेपसृष्टिः ॥ अपि च स्थावराणां सत्वाचल प्रजाः ब्रह्मसृष्टविधाः ब्रह्मणः कुर्वतः सृष्टं जातिरेस्मान् सीत्तताः ततो देवासुरपितॄन् मनुष्यांश्च चतुष्टयं ॥ सिसृक्षु ॥

रंभांस्येतानि स्वमात्मानमयूयु
जत् युक्तात्मनस्तमोमात्रा उ
द्रिक्ताभूत् प्रजापतेः सिसृ
क्षोर्जघनात् पूर्वमसुरा जज्ञि
रे ततः उत्ससर्ज ततस्तान्तु
तमोमात्रात्मिकां तनुं सा तत्य
क्ता तनुस्तेन मैत्रेयाभूद्विभा
वरी सिसृक्षुरन्यदेहस्थ प्रीति
माप ततः सुराः सत्वोद्रिक्ताः
समुद्भूता मुखतो ब्रह्मणो द्वि
ज त्यक्ता सापि तनुस्तेन सत्व
प्राय मभूद्दिनं ततो हि
बलिनो रात्रावसुरा देवता दिवा
सत्वमात्रात्मिका मेव ततोन्यां
जगृहे तनुं पितृवन्मन्यमानस्य
पितरस्तस्य जज्ञिरे उत्सस
र्जे ततस्तां पितॄन् सृष्ट्वापि स
प्रभुः सा चोत्सृष्टा भवत्
संध्या दिन नक्तांतर स्थितिः
रजोमात्रात्मिका मन्यां जगृहे
स तनुं ततः रजोमात्रोत्
कटा जाता मनुष्या द्विजसत्तम
तामप्याशु स तत्याज तनुमाद्यः
प्रजापतिः ज्योत्स्ना समभवत्
सापि प्राक् सन्ध्या याभिधीयते
ज्योत्स्नोद्गमे तु बलिनो मनु
ष्याः पितरस्तथा मैत्रेय स ॥

न्ध्यासमये तस्मादेते भवन्तिवै
ज्योत्स्ना रात्र्यहनी संध्या चत्वार्ये
तानि वै प्रभोः ब्रह्मणस्तु ॥
शरीराणि त्रिगुणोपाश्रयाणि
तु रजोमात्रात्मिकामेव ततोन्यां जगृहे
ततः ब्रह्मणो जाता जज्ञे कोपस्त
या ततः क्षुत्क्षामानंधकारे
थ सोऽसृजद्भगवां स्ततः वि
रूपाः श्मश्रुला जाता स्तेऽभ्यधा
वंस्ततं प्रभुं मैवं भो ॥ ॥
यतास्तु यक्षणात् अप्रियेण
यतान् दृष्ट्वा केशाः शीर्यन्त
वेदसः हीनाश्च शिरसो भूयः स
मारोहंत तच्छिरः सर्पणात्तेभ
भवन् सर्पा हीनत्वादहयः स्मृ
ताः ततः क्रुद्धो जगत्स्रष्टा क्रो
धात्मानो विनिर्ममे वर्णेन ॥
कपिशेनोग्राः भूता
स्ते पिशिताशनाः ध्यायतो
गां समुत्पन्ना
गंधर्वा स्तस्य तत्क्षणा
त् पिबंतो जज्ञिरे वाचं
गंधर्वा
स्तेन ते द्विज ॥
एतानि सृष्ट्वा भगवान् ब्र
ह्मा तच्छक्ति चोदितः ततः
स्वच्छन्दतोऽन्यानि वयांसि

वयसोऽसृजत् अवयो वक्षस
श्चक्रे मुखतोऽजाः ससृष्टवान्
सृष्टवानुदराद्गाश्च पार्श्वाभ्यां च
प्रजापतिः पद्भ्यां चाश्वान् स
मातंगान् रासभान् गवयान्
मृगान् उष्ट्रानश्वतरांश्चैव न्यंकू
नन्याश्च जातयः ओषध्यः फ
लमूलानि रोमभ्यस्तस्य जज्ञिरे
त्रेतायुगमुखे ब्रह्मा कल्पस्या
दौ द्विजोत्तम सृष्ट्वा पश्वोषधीः
सम्यक् युयोज स तदाध्वरे
गौरजो पुरुषो मेषो अश्वाश्व
तरगर्दभाः एतान् ग्राम्यप
शूनाहुरारण्यांश्च निबोध मे
श्वापदो द्विखुरो हस्ती वानरः
पक्षिपंचमः औदकाः पशवः
षष्ठाः सप्तमास्तु सरीसृपाः
गायत्रं च ऋचश्चैव त्रिवृत्साम
रथंतरं अग्निष्टोमं च यज्ञानां नि
र्ममे प्रथमान्मुखात् यजूंषि त्रै
ष्टुभं छन्दः स्तोमं पंचदशं तथा
बृहत्साम तथोक्थं च दक्षि
णादसृजन्मुखात् सामानि ज
गतीछन्दः स्तोमं सप्तदशं तथा
वैरूपमतिरात्रं च पश्चिमादसृज
न्मुखात् एकविंशमथर्वाणमाप्तो

र्यामाणमेव च अनुष्टुभं सवैराज
मुत्तरादसृजन्मुखात् उच्चावचा
नि भूतानि गात्रेभ्यस्तस्य जज्ञिरे
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च
प्रजापतिः ततः पुनः ससर्जादौ
संकल्पात् स पितामहः यक्षान्
पिशाचान् गंधर्वान् तथैवाप्स
रसां गणान् नरः किंनररक्षांसि
वयः पशुमृगोरगान् अव्ययं
च व्ययं चैव यदिदं स्थाणुजंगमं
तत् ससर्ज तदा ब्रह्मा भगवाना
दिकृत् प्रभुः तेषां ये यानि क
र्माणि प्राक् सृष्ट्यां प्रतिपेदिरे
तान्येव ते प्रपद्यंते सृज्यमानाः
पुनः पुनः हिंस्राहिंस्रे मृदु
क्रूरे धर्माधर्मावृतानृते
तद्भाविताः प्रपद्यंते तस्मात्
तस्य रोचते इन्द्रियार्थेषु भूते
षु शरीरेषु च स प्रभुः
नानात्वं विनियोगं च धातैवं व्य
सृजत् स्वयं नाम रूपं च भूता
नां कृत्यानां च प्रपंचनं वेदश
ब्देभ्य एवादौ देवादीनां चका
रसः ऋषीणां नामधेयानि
यथा वेदश्रुतानि वै तथानि
योगयोग्यानि अन्येषामपि
सोऽकरोत् यथार्त्तावृतु ॥

लिंगानि नानारूपाणि पर्य्याये
दृश्यन्ते तानि तान्येव तथाभा
वा युगादिषु करोत्येव विश्वा
सृष्टिं कल्पादौस पुनः पुनः
सिसृक्षाशक्तियुक्तोऽसौ सृज्य
शक्तिप्रचोदितः इति विष्णु
पुराणे १ अंशे ५ अध्यायः
सृष्टिप्रदा स्त्री गर्भदात्रीक्षुपः
इति राजनिर्घण्टः
सृणि हिंसे इति कविकल्पद्रुमः
दन्त्यादि एकारोपधः तद्र
हितोऽपीति केचित् सिस्र
णाति सीर्णः सीर्णिः इति
दुर्गादासः
सेक ऋ ङ गत्यां इति कवि॥
कल्पद्रुमः ऋ असिसेकत
सेकते इति दुर्गादासः
सेकः पुं सेचनं तत्पर्य्यायः
वार्ः २ इति हेमचन्द्रः ॥
सेकपात्रं क्ली जलसेचनाधारः
सिउनी इति भाषा तत्पर्य्या
यः सेचनं २ इत्यमरः सेकि
म क्ली मूलकं इति हेम
चन्द्रः
सेक्ता पुं भर्त्ता इति हेम
चन्द्रः सेचनकर्त्तरि त्रि ॥
सेक्त्रं क्ली सेकपात्रं पिचधा ॥


तोष्ट्रन् प्रत्ययेन निष्पन्नं ॥
इति सिद्धान्तकौमुदी ॥
सेचकः पुं मेघः सेककर्त्तरि
त्रि इति मेदिनी ॥
सेचनं क्ली क्षरणं सेकः ॥
नौकायाः सेकभाजने इति
मेदिनी ॥
सेडुः पुं फलविशेषः तरमुज
इति भाषा तत्पर्य्यायः चेला
नः २ चित्रफलं ३ सुवाशः ४
राजतेमिषः ५ लतापनसः ६
नाटाम्रः ७ इति त्रिकाण्डशेषः
जटाधरश्च
सेतिका स्त्री अयोध्या इति
भूतशुद्धितन्त्रं
सेतुः पुं देशादेरालिः इ
त्यमरः तत्पर्य्यायः आली २
इति भरतं धृतः ३
पिंडलः ४ इति हारावली ॥
पंकारः ५ जांगालः ६ संचरः ७
इति जटाधरः पिण्डिलः ८ इ
ति शब्दरत्नावली धरणः ९
इति त्रिकाण्डशेषः तद्दानादि
फलं यथा सेतुप्रदानादिन्द्र
स लोकमाप्नोति मानवः
प्रपाप्रदानाद्वरुणलोकमा
प्नोत्यसंशयं संक्रमाणांत ॥

यः कर्त्ता स स्वर्गं लभेन्नरः
स्वर्गलोके च निवसेदिष्टकाले
तद्धृतं सदा इति मठादिप्र
तिष्ठातत्त्वे वरुणवचनं
इति मेदिनी राजनिर्घण्टश्च
प्रणवः इति तन्त्रसारः अ
पि च मन्त्राणां प्रणवः सेतु
स्तत् सेतुः प्रणवः स्मृतः स्र
वत्यनोंकृतं पूर्वं परस्ताच्च
विशीर्य्यते नमस्कारो महा
मन्त्रो देव इत्युच्यते स्त्रैः
द्विजातीनामयं मन्त्रः शूद्रा
णां सर्व्वकर्म्मणि अकारं वाप्यु
कारं च मकारं च प्रजापतिः वे
दत्रयात् समुद्धृत्य प्रणवं निर्म्म
मे पुरा स उदात्तो द्विजातीनां
शूद्राणां स्यादनुदात्तकः स्वरि
त स्त्रीरुजातानां मन
साऽपि तथा स्मरेत् चतुर्द्दश
स्वरो योऽसौ सेतु रौकारसं
ज्ञकः सचानुस्वारचन्द्राभ्यां शू
द्राणां सेतु रुच्यते किं सेतुं च
यथा तोयं ह्यगाविसूत्रं प्रसर्प
ति मन्त्रस्तथैव निःसेतुः क्षणात्
क्षरति यज्वनां तस्मात् सर्व्वेषु मं
त्रेषु चतुर्वर्णा द्विजादयः पार्थ्य

योः सेतुमादाय जपकर्म्म स
मारभेत् शूद्राणामादिसेतु
र्वी हि सेतवो यथोक्ततः हे से
तवः समाख्याताः सर्व्वदैव हि
जातयः इति कालिकापुराणे
५५ अध्यायः ॥
सेतुकः पुं वरुणवृक्षः इति
शब्दरत्नावली
सेतुबन्धः पुं लंकागमनार्थ
श्रीरामकृतसमुद्रबन्धनसेतुः
तत्पर्य्यायः समुद्रारूः २ इति
जटाधरः तद्विवरणं यथा त
तोऽब्रवीद्रघुश्रेष्ठं सागरो वि
नयान्वितः नलः सेतुं करोत्व
स्मिन् जले मे विश्वकर्म्मणः
सुतो धीमान् समर्थोऽस्मिन्
कार्य्ये लब्धवरो हरिः कीर्त्तिं
गायन्तु ते लोकाः सर्व्वलोकम
लापहां इत्युक्त्वा राघवं नत्वा
ययौ सिन्धुरदर्शनं ततो रा
मस्तु सुग्रीवलक्ष्मणाभ्यां स
मन्वितः नलमाज्ञापयत्तत्र
वानरैः सेतुबन्धने ततोऽति
हृष्टः प्लवगेन्द्रमुख्यैः महा
नगेन्द्रप्रतिमैः युतो नलः बब
न्ध सेतुं शतयोजनायतं सुवि
स्तरं पर्व्वतपादपैर्दृढं ॥

इति श्रीमध्यात्मरामायणे लंका
कांडे ३ अध्याय सेतुमारभ्य
माणस्तत्र रामेश्वरं शिवं
संकल्प नियतो गत्वा पुरीं वा
राणसीं नरः आनीय गंगास
लिलं रामेशमभिषिच्य च
तिम्मा समुद्रे तद्धारि ब्रह्मप्राप्नो
त्यसंशयः कृतानि प्रथमेना
ह्ना योजनानि चतुर्दश द्विती
येन तथा चाह्ना योजनानि च
विंशतिः तृतीयेन तथा चाह्ना
योजनान्येकविंशतिः चतुर्थे
न तथा चाह्ना द्वाविंशति
तथाकृतं पंचमेन त्र
योविंशद्योजनानां समेततं
ववंध सागरे सेतुं नलो वानर
सत्तमः तेनैव जग्मुः
कपयो योजनानां शतं द्रुतं
असंख्याताः सुवेलाद्रिं
रुरुहुः प्लवगोत्तमाः आरु
ह्य मारुतिं रामो लक्ष्मणोप्यंग
दं तथा ददृशुः राघवो लंकां
नानाचित्रध्वजाकुलां ॥
इति तत्रैव ४ अध्यायः सेतु
भेदी पुं दंतीवृक्षः इति
शब्दचन्द्रिका ॥
सेतुवृक्षः पुं वरुणवृक्षः इति
शब्दमाला राजनिर्घंटश्च ॥
सेंदुः स्त्री निगडः बेडी इति
भाषा षिधातोर्द्रुन् प्रत्यये
न निष्पन्नं इति सिद्धांतकौ
मुदी
सेना स्त्री चतुर्विंशतिवृत्ता
द्वन्मातॄणां तृतीया माता इति
हेमचन्द्रः इनेन प्रभुना सह
वर्त्तते या सिनोति शत्रुमिति
न प्रत्ययेन निष्पन्ना वा
फौज इति पारस्यभाषा तत्
पर्य्यायः ध्वजिनी २ वाहिनी ३
पृतना ४ अनीकिनी ५ चमूः ६
वरूथिनी ७ वलं ८ सैन्यं ९
चक्रं १० अनीकं ११ इत्यमरः
वाहना १२ सूतना १३ गुल्मि
नी १४ वरचक्रः १५ इति शब्द
रत्नावली केचित्तु ध्वजिन्यादि
समकं सेनायां वलादिचतुष्क
सेनांगे इत्याहुः अतएव ध्व
जिन्यादि समकं सामान्येन
सेनायां वलादिचतुष्कं तु सा
मान्येन सेनायां सेनांगे च
इति मतं इति भरतः ॥
सेनांगं क्ली हस्त्यश्वरथपदा
तीनां समूहः यथा हस्त्यश्वर
थपादातं सेनांगं स्याच्चतुष्टयं

इत्यमरः
सेनाचरः त्रि सैन्यानुगामी
सेनया सह गंता इति केचि
त् सेनानीः पुं कार्त्तिकेयः
वाहिनीपतिः इत्यमरः ॥
सेनापतिः पुं कार्त्तिकेयः
अनीकाधिपतिः इति मेदि
नी शेषस्य पर्य्यायः सेनानीः
२ वाहिनीपतिः ३ इत्यमरः
सेनापतिलक्षणं यथा कुली
नः शीलसंपन्नो धनुर्वेदविशा
(स्तिशिताश्व शिरदः) हस्त्यकुशलः श्लक्ष्णभाषणः
निमित्ते शकुनज्ञाने वेत्ता चैव
चिकित्सिते कृतज्ञः कर्म
णां शूरस्तथा क्लेशसहो ऋ
जुः व्यूहतत्त्वविधानज्ञः फल्गु
सारविशेषवित् राज्ञा सेनापतिः
कार्य्यो ब्राह्मणः क्षत्रियोऽथ
वा इति मात्स्ये राजधर्मे १८९
अध्यायः सेनापतौ वर्णनीया
नि यथा सेनापतिर्जितश्वासः
स्वामिभक्तः सुधी शुभीः ॥
अभ्यासी वाहने शस्त्रेशास्त्रे च
विजयी रणे १ इति कविकल्प
लतायां १ स्तवके वर्णयिष्य
तिनोम ३ कुसुमं ॥ ॥
सेनामुखं क्ली पत्तित्रयः स
त्रसेनासंख्याविशेषः तद्यथा
हस्ती ३ रथः ३ अश्वः ९ प
दातिः १५ समुदायेन त्रिंशत् ३०
इत्यमरः पुरद्वारसंमुखावह
त्रिपथः इति केचित् ॥
सेनारक्षः पुं सेनारक्षकप्रह
रिकादिः तत्पर्य्यायः सै
निकः २ इत्यमरः ॥
सेफः पुं शेफः इति जटाध
रः सेमंती स्त्री पुष्पविशेषः
सेउती इति भाषा यथा चंप
कानां पुष्पशतादशोकं पु
ष्पमुत्तमं अशोकानां सह
स्त्राद्धि सेमंती पुष्पमुत्तमं इ
ति नारसिंहे ५२ अध्यायः
सेरहः पुं पीतवर्णोऽश्वः
सितद्युधवल्लितवर्णः इति
हेमचन्द्रः ॥
सेरुः त्रि बन्धनकर्त्ता षिधा
तोः रु प्रत्ययेन निष्पन्नः इति
मुग्धबोधव्याकरणं ॥
सेल ऋ चाल गत्यां इति
कविकल्पद्रुमः ऋ असिसे
लत् इति दुर्गादासः ॥
सेलः पुं शेलवृक्षः सतश्ले
ष्मातकः इति भरतद्विरूप ॥



कोषः
सेव ञ ऋ ङ सेवने इति
कविकल्पद्रुमः ञ सेवति से
वते ङ सेवते ऋ असिसेव
त सेवनं आराधनं उपभोगः
आश्रयणञ्च विष्णुसेवने
र्वि साधुः अन्ये त्वस्मात् पर
स्मैपद ममन्यमानाः नीचं
समृद्धमपि सेवति नीच प
वस्याधीने विभवे प्यहो नर
पतिं सेवंति किं मानिनः इ
त्यादौ गणकृतानित्यत्वमा
हुः इति दुर्गादासः
सेवक्री स्त्रि विफलं इति
राजनिर्घण्टः
सेवकः पु प्रसेवकः इति
मेदिनी ॥
सेवकः त्रि अनुजीवी भृत्यः
इति मेदिनी शब्दरत्नावल्यो
तस्य प्रभुसन्निधौ प्रम्नकर
णात्मकं यथा किंकरः किं
करी वापि सर्वथा प्रभुमीश्व
रं यो यस्य सेवानिरतः सकं
एकुलितं विना इति ब्र
ह्मवैवर्ते श्रीकृष्णजन्मखण्डे
२३ अध्यायः सेवकालुः पु
निशाभंगावृतः ॥

द्रुग्धपेया इति ख्यातः इति
शब्दचंद्रिका
सेवधिः पु निधिः इत्यमर
टीकायां भरतः तालव्यशका
रादिरप्ययं
सेवनं क्ली सूच्यादिना वस्त्रा
दिसीवनं सेलाइ इति भाषानी
इति च भाषा तत् पर्यायः
सीवनं २ स्यूतिः ३ इत्यमरः
ऊतिः ४ स्यूतिः ५ इति शब्द
रत्नावली उपास्तिः उपासना
इति मेदिनी
सेवनी स्त्री सूची इति हेम
चन्द्रः शरीरावयवसंयोग
विशेषः यथा सेवन्यः सप्त
तासां तु भवेयुः पंच मस्तके
एका शेफसि जिह्वायामेका
विहन्तव्याः क्वचित् इति भाव
प्रकाशः
सेवा स्त्री सेवनं तत् पर्यायः
श्ववृत्तिः २ इत्यमरः आराध
ना उपभोगः आश्रयणं इ
ति सेवधात्वर्थदर्शनात्
अथ माघादिद्वादशमासेषु
विष्णुसेवाविधि स्तत्फलं
च व्यास उवाच विप्र द्वादश
मासेषु माघादिषु सनातनः

पूजितव्यो विधानेन मृगणतानि
वहास्य हे माघे मासि समायाते
सर्वमासोत्तमे शुभे आमिषं
मैथुनं चैव वर्जयेद्वैलभोजनं
प्रातः स्नायी भवेन्नित्यं तैलाभ्य
ङ्गं च वर्जयेत् द्विर्भोजनं परा
न्नं च माघे मासि परित्यजेत्
प्रातः शुक्लाम्बरधरः हुतपंच
महाध्वरः सपर्यामारभेद्विष्णोः
स्मरन्नादौ हरिं मुदा इषुदुतज
लैर्दिव्यैः स्नापयेद्विमलमव्यय अ
तिशुक्लेन चन्दनेन ॥
विष्णो रंगं च लेपयेत् पुष्पार्थे
जगदीशस्य देवदेवस्य चक्रिणः
प्रक्षालितानि पात्रा
निर्मलानि कारयेत् स्ना
पयित्वा जगन्नाथ मीषदुष्ण
जलैस्ततः श्रोतं तस्य तस्य
दिव्यवस्त्रेण यत्नतः सलि ॥
लैरीषदुष्णैश्च यः स्नापयति केशा
वं माघे मासि द्विज श्रेष्ठफलं
तस्य मयोच्यते विमुक्तः पातकैः
सर्वैर्जन्मजन्मान्तरार्जितैः इह
भुक्त्वा सदा सर्वं शोके यातिहरे
र्गृहं यत्नात् महात्म्यपात्राणि
कृत्वा हीनानि वारिभिः यः पू

जयेज्जगन्नाथं तस्य पुण्यं निशा
मय इह भुक्त्वा वसन् भोगान्
रोग शोक विवर्जितः अन्ते यु
गसहस्राणि तिष्ठेत् केशव
मन्दिरे प्रभातेपि च संध्यायां
पुरतः शार्ङ्गपाणिनः ज्वलंतं
स्थापयेद्वह्निं निर्धूमं वैष्णवो
जनः शीतस्यावरणार्थाय
माताः सायं च योजनः माघेवि
ष्णनो वह्निज्वालयेत्तत्फलं
शृणु इह भुक्त्वा खिलान् भोगा
न् पुत्रपौत्रसमन्वितः अन्ते वि
ष्णुपुरं याति देवतैरपि दुर्लभं प
थे कान्तया विष्णुः सन्देहो ना
त्र विद्यते तस्मादात्मानुमानेन
विष्णुसेवा विधीयते प्रभाते
रौद्रदेशे च पवित्रे स्थापयेद्ध
रिं नभन्ति द्विजश्रेष्ठ यावत्
शीतं सहेः सह स्वपन्तं देवदे
वेशं पर्यंकोपरि केशवं स्था
पयेन्निशि निर्वाते देशे च वैष्ण
वो जनः नभा शेति यथा
शीतं देवदेवो जगद्गुरुः
तूलैः पवित्रैः दिव्यैर्वा व
स्त्रै राच्छादयेद्बुधः आतनः
ऊनलेमस्तो यथा शीतमिवा
रणं तथा शीतत्वं कृ ॥

र्ष्णो देवदेवस्य चक्रिणः क्षी
रेण स्नापयेद्यस्तु माघेमासि
जनार्द्दनं तस्मै देवाग्रमोविष्णुः
संतुष्टो नददातिकिं ॥
यः पूजयेत् सकृन्माघे स्नाप
यित्वाजनार्द्दनं नारिकेलोद
कैर्दुग्धैः फलं तस्य वदाम्यहं
नरकाद्धौ मज्जमानान् इस्त
रे स्वेन कर्मणा उद्धृत्य कोटि
पुरुषान् मन्दिरं याति चक्रि
णः माघेमासि च शुक्लायांप
चम्यां द्विजसत्तम एकादृश्यां
चसप्तम्यां हरिः पूज्यो विशेष
तः दातव्यो देवदेवाय सप्तम्यां
यस्तु वासरे पायसोऽ त्रूपसंहि
तो माघे मासि दिनेदिने अपू
पं पायसं तस्य पुण्यमहं वत्रि
ष्याम वैस्नव जैमिने अंते वि
स्नु पुरं गत्वा मन्वन्तरचतुष्टयं
भुंक्ते मनोरथान् भोगान् प्र
सादाच्चक्रपाणिनः पुनरागत्य
धरण्यां चक्रवर्त्ती नृपो भवेत्
भुंक्ते भोगंच सुचिरं स्नानोप्या
तिहरेर्गृहे पंचम्यांचैव सप्त
म्यां मेकादृश्यांच जैमिने श्र
वाम्भा वैस्नवो दद्यात् ॥
परमान्नं ॥ ॥ ॥

मुरारये कृष्णपक्षाद्द्विजश्रेष्ठ
शुक्लपक्षो विशिष्यते शुक्ल
पक्षे तिथिष्वासु दद्यादन्नं मुरा
रये एकाहमपि योमाघे वि
ष्णवे दैत्यजिन्नरे साज्यंपाय
सं दद्यान्न तस्य दुर्लभोहरिः
यत् किंचित् विस्तरमर्थ्यं मा
घेमासि प्रदीयते तदक्षयं भवेत्
सर्वं कोपिनास्त्यत्र संशयः ॥
माघेमासि कृतं कर्म शुभंवाशुभ
मेवच तस्यनास्तिक्षयं विप्र
मन्वन्तर शतैरपि माघे चपक्
ष्योणा योऽर्च्चयेत् कमलापतिं
सगच्छेत् परमंधाम विमुक्तः
सर्वपातकैः यावन्तिस्वर्णपुष्पा
णि दीयंते चक्रपाणये तावत्
युगसहस्राणि स्थीयते विष्णु
मन्दिरे मेरुतुल्य सुवर्णानिद
त्ता भवति यत्फलं एकेन स्व
र्णपुष्पेण दत्ता भवति तत्फ
लं स्वर्णपुष्पं विप्रेन्द्र सर्वदा
केशवप्रियं माघे मासि विशे
षेण पवित्रे केशवापमे स्व
र्णाञ्जस्तमे द्विज्यै येन नाराधि
तो हरिः रत्नैर्हीनः सुवर्णा
द्यैः सभवेज्जन्मजन्मनि इतिपा
मेक्रियायोगसारे ९·९ ॥॥

अध्यायः व्यासउवाच फाल्गुने ॥
ब्राह्मणश्रेष्ठ श्रीकृष्णं सर्वविन्दि
तं पूजयेद्भक्तिभावेन मत्स्य
दं वैस्नवोनः फाल्गुनेस्नापये
द्यस्तु सर्पिसा देवकीसुतं फलं
तस्य प्रवक्ष्यामि मत्तः सम्यक्
निशामय सर्वव्रतफलं प्राप्य
सर्वदानफलं तथा अन्तेयाति
हरेः स्थानं सर्वपापविवर्जितः
युगकोटि सहस्राणि भक्त्वाभो
गं हरेर्गृहे तत्रैव सोऽमाश्नो
ति संप्राप्यस्नानमुत्तमं यस्तुय
च्छति कृष्णाय पिष्टिरे गोप
मूर्त्तये तिलानांमोदकं दिव्यं
सगच्छेद्धरिमन्दिरं योऽगुध
लड्डुकं दद्यात् केशवायमहा
त्मने सपिवेदमृतं स्नात्वा म
न्वन्तरशतावधि हरये ललितं
खंडं यस्तु यच्छति जैमिने त
स्य विष्णुः प्रसन्नात्मा छिनत्ति
भववन्धनं विचित्रफाणितं
यस्तु दद्याद्भगवते द्विजश्र
ते शक्रपुरं गत्वा सभवेत्स
र्ववन्दितः निर्म्मलां शर्कराय
च्छेद्यस्तु कृष्णाय भक्तिमान्
सकिंनलभते विप्र वासुदेव
प्रसादतः सुपक्वं फाल्गुने ॥॥

मासि मधुरं वदरीफलं यस्तु
यच्छति कृष्णाय फलं तस्यप्रो
च्यते इह भुंक्ते सुखं सर्वं पुत्रपौ
त्रसमन्वितः अंतेहरेर्गृहं या
ति रथ मारुह्य शोभनं ॥ ॥
दद्याद्गुडसंयुक्तं हरयेव
दरीफलं अन्नानाद्धानाद्ब्राह्मण
श्रेष्ठ दद्याद्विन्नारकी भवेत् फ
ल्गुने मासि यो दद्याद्धरयेदा
डिमीफलं सुपक्वं तत्फलं
विप्रवदतो मेनिशामय तत्र
यावन्ति वीजानि तिष्ठंति दाडि
मीफले तावन्मन्वन्तरं विष्णो
र्गृहेतिष्ठति वैस्नवः फाल्गुने
मासि योदद्याद्धरये गुडपिष्ट
कं स विज्ञेयो द्विजश्रेष्ठ वाजि
मेधसहस्रकृत् चैत्रेमासि द्विज
श्रेष्ठ मधुना मधुसूदनं स्नाप
यल्लभते मर्त्यस्तु द्विजोः प्रस्म
पदं मधुना स्नापयेद्यस्तु नारा
यणं मनामयं न चक्षाः क्रियते
तस्य कदाचिद्विष्णुना चैत्रे
किंशुकपुष्पेण योऽर्च्चयेत्
कमलापतिं तन्नाम चित्रगु
प्तेन पंजिकायां न लिख्यते
चैत्रिके जगतामीशं कृष्णं
तिलकपुष्पकैः यजतो नास्ति

वैजन्म पुन रस्मिन् महीतले ॥
कुसं वंजलपुष्पेण सर्वदेवशि
रोमणिं पूजयन्मनुजो विमल
मते नापदं क्वचित् वासंतीभिः
सुगंधाभिर्वसंते यस्तु पूजयेत्
भगवंतं परात्मानं सदेवैरपिपू
ज्यते जयाकिणलये हिं व्यैर
खंडै योर्च्चयेद्धरितं वन्दते स
सुरावाय स्वयं पीठाद्यमोपि
च धात्रीपत्रैर्नवीनैस्तु को
मलै र्हरिं मर्च्चयन् अचिरे
णैव लभते सकलं वांछि
तं जनः पांडित्यार्खंडपत्रै
स्तु सूक्ष्मैर्वै श्वार्कपुष्पकैः
योऽर्च्चयेद्धरिं मीशं च स संसा
राद्विपारगः योदद्याद्धरिवे
विप्र कदम्बाः सर्वे वन्दते त
मद्दन्निम यो दद्याच्चैत्रके
मासि भक्त्या गोपालतृपि
णोगोभूमपिष्टकं विप्रसर्वपा
पैः प्रमुच्यते आयाते माध
वे मासि पवित्रे माधवप्रिये
आमिषं मैथुनं तैलं ॥
विल्वभक्तं परित्यजेत्
प्रातः समाचरेत् स्ना
नं माधवे मासि वैसवः
परित्यजेत् परान्नं च न च॥

कुर्यात् द्विभोजनं प्रभाते मज्ज
येद्विद्वं पूर्वोक्त विधिना द्विजः
वैशाखे स्नापयेद्विष्णुमम्बा
सितवारिणा स्नापयेत् प्रीततो
येन संध्यापर्य्यन्तमच्युत त्रि
संध्यं पूजयेद्भक्त्या नैवेद्यैर्वि
विधैः मधुं वैशाखे अमलस्तु
द्विर्लक्ष्मीपति रलंकृतं नकिं
ददाति विप्रर्यै प्रसन्नं परमेश्व
रः वैशाखे मासियो दद्यात्
यवान्नं चक्रपाणये तस्य पुण्य
नि संख्यातुं कः समर्थोस्ति पं
डितः यत् किंचिन्माधवे मासि
माधवप्रीति हेतवे दीयते ॥
मानवै र्विप्रतत् सर्व मक्षयं
भवेत् यदन्यत् सुकृतं कर्म
क्रियते मासि माधवे मादव प्री
तये विप्रतयं तस्य न विद्यते
वैशाखो दुर्लभो मासः सर्व
कामफलप्रदः पूजितव्यो ह
विस्तत्र हित्वा कार्य्यशतान्यपि
एकादशं पियः पूजां वैशाखे
कुरुते हरेः शतवर्षं हरिं ॥
यष्ट्वा यत् फलं लभते स तत्
वैशाखे मासियः कुर्यात् प्र
पां माधवतुष्टये दिने दिनेऽश्वमेध
सफलं प्राप्नोति मानवः ॥ ॥

वैशाखे सिंचयेन्नित्यं विस्नुम
शाखे भूमिणं चतुर्वर्गफलावा
सिहे तवेवैसवो जनः गंडूयमा
त्रतोयेन कुर्य्याद्योऽश्वत्थसेच
नं सोऽपियाति परंस्थानं वि
मुक्तः पापकोटिभिः व्यासउ
वाच साक्षाद्देवः स्वयं विष्णु
रश्वत्थोऽखिलविश्वराट् तद्भ
क्तिं कुतः पुंसो विद्यते मासुभे
कचित् अश्वत्थं सेवते यस्तु
विस्नुबुद्ध्या नरोत्तमः तस्य प्रस
न्नो भगवान् ददाति परमं पदं
इति पाद्मे क्रियायोगसारे ॥
अध्यायः व्यासउवाच ज्येष्ठे
मासि द्विजश्रेष्ठ भगवंतं जना
र्दनं पूजयद्भक्तिभावेन जलैः
संस्थाप्य शीतलैः उद्वर्तनं च
दातव्यं सुगन्धामलकैस्तथा
तैलं सुगंधद्रव्ये श्रीपका
ले दिने दिने सुवासितेप्रीत
ले च मन्दिरे तिमनोहरे
प्रत्यहं कमलाकांतं स्थापये
त् जलमंडपे नरोद्देशे विमे
न्दसूमे रन्धनालये नं
सूतिकागृहे चैव स्थापयेत्
कमलापतिं चामरै वीजितं श्रे

तैः सुदीर्घैः कमलापतिं ज्येष्ठेमा
सि द्विजश्रेष्ठ सप्रीतः किं नपश्य
ति मयूरपुच्छव्यजनैर्निदाये पू
जितो हरिः ददात्यभिमतः सर्वं
अचिरेणैव सत्तम तालवृन्तकवा
तेन पवित्राम्बरवायुना ये ग्रीष्म
वीज्यन्ते विस्नु ते सर्वे स्वर्गगा।
मिनः यो गात्रलेपनं कुर्यात् सु
गंधैर्येत्त कर्दमैः ग्रीष्मे दरेश्च
न्दनैस्तु सविशेषान्माधवी तनुं
गंधैर्मृगमदाद्यैश्च योलिपे
न्माधवीं तनुं उष्मागमे द्विज
श्रेष्ठ स मुक्तो नात्र संशयः
प्रफुल्ल कुसुदोद्याने तुलसी
कानने तथा संध्यायांस्थापये
द्विस्नुं देशे धीरसमीरणे सु
रभिः पाटलिपुष्पाणां येन
विस्नुरलंकृतः ज्येष्ठे मासि स
विज्ञेयो वाजिमेधसहस्रकृत्
यस्तु शक्तावलीं दद्यात् ग्रीष्मे
श्रीपतये जनः भूपालत्वं दरि
स्तस्मै पश्चेजन्मनि जन्मनि ॥
यस्तु मंडयति ग्रीष्मे श्रीकृष्णं
मणिमालया तस्य पुण्यफलं
विप्रवदतो मे निशामय याव
द्ब्रह्मा हजत्यंतत् जैमिने सकलं ज
गत् तावद्विस्नुपुरे तिष्ठेन्मणि

मालाविभूषितः सुवर्णाभरणै
र्यस्तु रजताभरणैस्तथा कुसु
मंडयति ग्रीष्मे सोपि तत् फल
माप्नुयात् विचित्रं यस्तु पर्यंकं
सगंडूकं प्रयच्छति हरये देव
देवाय नस्या दुःखी कदापि सः
ग्रीष्मकाले न देयानि गुडूणि व
सनानि च हरये ब्राह्मणश्रेष्ठ
देयं तन्वेसुकं सुचि यस्तु चूत
फलैर्हद्यैः सुपक्वैः पूजयेद्ध
रिं अंतिमाक्र पुरं गत्वा सपिवे
दमृतं मुदा पियालानां फलैः
पक्वै र्योऽर्चयेत् कमलापति
तिं सोपि तत् फलमाप्नोति
किमन्यै र्बहुभाषितैः निदा
वे हरये दद्याद्यस्तु वारू मति
पशीतलां नाना व्यंजनसंयुक्तां
श्रद्धया वैष्णवो जनः आषा
ढे मासि विप्रेन्द्र देवदेवं जग
त्पतिं दधिभिः स्नापयित्वा
तु पूजयेद्भक्तितो बुधः
दधिभिः स्नापयेद्यस्तु भग
वंतं जनार्दनं मातुः पयो
धरपयः पुनस्तेन न पीय
वनाराम वनश्याम कदंब
कुसुमैर्हरिं आराध्य याति वि
प्रेंद्र पापिनोऽपि परां गतिं ॥

कदंबपुष्पमालाभि र्मंडयत्पज
लोचनं यस्तस्य ब्राह्मणश्रेष्ठ
पुण्यं वच्मि निशामय ॥
तस्या यावंति मालायां तिष्ठंति
कुसुमानि वै प्रतिपुष्पे द्विज
श्रेष्ठ वाजिमेधफलं लभेत् ॥
सुगन्धैः केतकीपुष्पैः पूजि
तः कमलेक्षणः सर्वदुःखविहर
ते यमानवानो द्विजोत्तम प
नसानां फलैर्हद्यैः सुपक्वै
र्घृतमिश्रितैः पूजितो भगवा
न् विलहंदात्येस्वर्गमुत्तमं
आषाढेमासि दध्यन्नं हरयेप्र
तिवासरं श्रद्धया वैष्णवो द
द्यात्मुक्तिमिच्छु र्द्विजोत्तम कृ
ष्णाय नवनीतं योददाति वैष्ण
वो जनः तस्य [illegible] नसं [illegible]
[illegible] स्यदृष्टते रपि हैयंगवी
नं यो दद्यात्गोपालाय महा
त्मने आमिक्षां सगुडां चैव स
महात्मा हरेः प्रियः सर्षार्क
शाणि डुग्धानि कृष्णाय यस्तु
यच्छति तस्य प्रसन्नो भगवान्
ददात्यभिमतं फलं श्रावणे मा
सि विप्रेन्द्र देवकीनन्दनं प्रभुं
स्नापयेन्निर्मलै स्तोयैः सुगंधैः क
लशवर्जितैः ॥

मल्लिकाकुसुमै र्विष्णुं योऽर्चये
त् वैष्णवो जनः विमुक्तः सकलैः
पापै र्ब्रह्मलोकं सगच्छति प्रो
फालिका प्रसूनैश्च यूथिकाकु
सुमैस्तथा अर्चयन् कमलाकां
तं मनुजो नावसीदति सागरे ॥
सागरैः पुष्पैः समल्लाकुसुमैः ॥
स्तथा योऽर्चयेत् कमलाकां
तं तस्य वश्यं जगत्त्रयं प्रफुल्ल
मालतीपुष्पैः सुगंधैर्योऽर्च
येद्धरिं तत् पुण्यं नास्ति तत्र
त्यो येन स्याद्भुवि मानवाः कुं
दपुष्पैश्च बंधूकैर्जगद्गुरुं
जनार्दनं अर्चयन् सकलं
काममाप्नोति भुवि मानवः ॥
सहासहास प्रसूनैश्च तथा कुरु
वकैर्हरिं कुरुंटकैः पूजये
द्यस्तु तस्य तुष्टः सदा हरिः पो
तीय कुसुमै र्विष्णुं प्रस्य पुष्पै
श्च योऽर्चयेत् करवीरप्रसू
नैश्च स याति हरिसन्निधिं श्रा
वणे मासि यो दद्यात् लाजान्
तत्सममन्विता न् हरये तस्य वि
मर्षे न विपत्ति र्गृहे भवेत् श्राव
णे पिष्टकं यस्तु हरये सुमधु
रकं ददाति तस्य विमर्षे गृहे श्री

र्निश्चला भवेत् भाद्रे मासि द्विजश्रे
ष्ठ नारायणमनामयं श्रद्धया पू
जयेत् प्राज्ञश्चतुर्वर्गफलप्रदं नि
वीभेन्नूतनागारे सर्वोपद्रववर्जि
ते स्थापयेत् पुंडरीकाक्षं भगवं
तं जनार्दनं दंशैश्च मसकैश्चैव
मक्षीणैर्मल्लिकादिभिः इति
पुरातनागारे स्थापयेन्नहि ॥
भक्तिमान् सकर्दमे प्रतद्घावि
गलादिभि र्गृहे तथा हरिं ॥
नस्थापयेत् प्राज्ञो वर्षासु पर
मेश्वरं विद्यालये द्विजश्रेष्ठ व
र्धीयाद्यस्तु मानवः चन्द्रातपं
विचित्रं च चन्द्रलोकं सगच्छति
रात्रौ नानाविधैः धूपैर्मन्दि
रे जगतीपतेः दंशांश्च मसकां
श्चैव वर्षाकाले निवारयेत् म
सारिकाभिः प्रावृत्य मंचं स्थापि
ते मच्युतं प्रावृषि स्थापयेद्वि
ष्णु निवार्याश्च दिव्यमन्दिरे ॥ ॥
कह्लारपत्रै र्दैवेशं सुगंधैर्नूतनै
स्तथा समुतः पूजयेद्योभा
द्रे मासि दिने दिने नमाद्रे ।
केतकीपुष्पैः पूजितव्यो ज
नार्दनः यतो भाद्रपदे ॥
मासि केतकी स्यात् हरा
समा पक्वै स्तालफलैर्हृद्यैः ॥

यैः श्रेयेच्छ्ऽनन्दनं गर्भवा
समाड्ः एवं सम्भूयो लभते नहि
संयुक्तं हृत ऊर्ध्याभ्यां पक्तना
भंमुरारये योदद्यात् अद्ययाम
यैः सगच्छेत्मन्दिरं हरेः ॥
भाद्रेमासि द्विजश्रेष्ठ हरयेता
लम्रिष्टकं सहृतं वैसवो द
यात् कैवल्यमाप्तिहितवे ॥
मासि भाद्रपदे विप्र न कुर्याच्छ्रा
कभक्ताणं नरात्रौ भोजनं कु
र्यान्मस्तवैसवोजनः ॥
आश्विने मासि विप्रेन्द्र केशा
वं क्लेशनाशनं पूजयेद्भक्ति
भावेन पूर्वोक्तविधिना जनः
पूर्वाह्णे पूजयेद्यस्तु भक्त्याल
क्ष्मीपतिं हरिं तेन लभ्यते ब
तोयं दीयते विप्र पूर्वाह्णे हर
ये जनैः पीयूषमिव तत्तोयं
गृह्णाति कमलापतिः मध्याह्ने
दीयते बहु सलिलं चक्रपाणये
तोयं सोमिव स्वामीन्द्र गृह्णा
ति द्विजोत्तम अपराह्णे तूय
तोयं गोविन्दाय प्रदीयते
तत्तोयं रक्तवत्स्यात् गृह्णा
तियतो हरिः अतएव द्विज
श्रेष्ठ पूर्वाह्णे हरिमर्चयेत् सक

* विष्णुपूजाफलं विप्रसंपूर्णं

लभते कामं केशवस्यानुकम्पा
या एकवस्त्रेण विप्रेन्द्र न कुर्या
त् पूजनं हरेः कुर्याच्चापि त
दा पूजां तां न गृह्णाति केशवः
अर्धेनैव च वस्त्रेण या पूजा
कमलापतेः विफला सा च
पूजा स्याच्च च विष्णुः प्रसीदति
यस्त्ववहुभिरवैः पूजां चक्रिणः
कुरुते जनः पूजाफलं न चाप्नो
ति अतिग्राह्या च सा भवेत्
असंस्कृत गृहे पूजा क्रियते या
जगत्पतेः सा पूजा ब्राह्मणश्रे
ष्ठ अतिग्राह्या भवेत् खलु
स्नानं देवार्चनं चैव दानं चपि
तूतर्पणं तिलकेन विना विप्र
न च कुर्याद्विचक्षणः तिलका
न्नगृहीत्वा यत् सर्वं कर्म च
नारकी भवेत् शंखचक्रगदा
पद्मैरंकितं यस्य दृश्यते श
रीरं ब्राह्मणश्रेष्ठ विज्ञेयः सोऽ
च्युतः स्वयं इत्यादि त्रिपत्री
कृतदूर्वाभिराश्विने योऽर्चये
द्धरिं दूर्वेव संततिस्तस्य अवि
छिन्ना प्रवर्तते आश्विने मासि
यो दद्याद्धरये कर्कटीफलं यो
को न जायते तस्य कदाचि ॥

हृदये द्विज कार्त्तिकेन समा
याते सर्वमासोत्तमे शुभे ॥
दामोदरं देवदेवं भक्त्या मासं
म पूजयेत् कार्त्तिके मासि वि
प्रेन्द्र विष्णुप्रीणनहेतवे यथा
क्तविधिना मासं प्रातः स्नानं
समाचरेत् आमिषं मैथुनं चैव ॥
कार्त्तिके मासि यस्त्यजेत्
जन्मान्तरार्जितैः पापैर्मुक्तो
याति परां गतिं तुलाराशि
गते सूर्ये प्रातः स्नानं द्विजो
त्तमः हविष्यं ब्रह्मचर्यं च म
हापातकनाशनं ॥ आमि
षं मैथुनं चैव कार्त्तिके यस्तु
तत्यजेत् जन्मजन्मनि विप्रेन्द्र
स भवेत् ग्राम्यशूकरः द्विभो
जनं परान्नं च तैलं च वैसवो
जनः आयाते कार्त्तिके मासि ॥
यत्नादपि परित्यजेत् दामोद
राय नभसि प्रदीपं यस्तु यच्छ
ति फलं तस्य प्रवक्ष्यामि समा
सेन शृणु द्विज ब्रह्महत्यादि
भिः पापैर्विमुक्तः क्लेशदायकैः
दामोदरपुरं गत्वा तिष्ठेत् कोटि
युगावधि दीपं ज्वलन्तं नभसि
त्रिदशा वासवादयः विलोक्य
हर्षिताः सर्वे वदन्तीति परस्परं ॥

जसौ शुभात्मनां श्रेष्ठ केशवा
यैनतत् परः प्रदीपं कार्त्ति
के मासि यतो यच्छति चक्रि
णे आगमिष्यति शुभात्मा क
दायं त्रिदिवं प्रति करिष्यामि क
दासख्यमनेन हरिसेविना नूनं
नेमपि योदद्याद्दीपं नभसि च
क्रिणे कार्त्तिके मासि विप्रेन्द्र त
स्य तुष्टः सदा हरिः दद्याद्दलय
दीपयः कार्त्तिके हरिमन्दिरे
दिने दिनेऽश्वमेधस्य फलं स प्रा
प्नोति मानवः तुलसीदललक्ष
यैः कार्त्तिके पूजयेद्धरिं
लक्षैकवाजिमेधस्य मानवो ल
भते फलं विल्वपत्रदललक्षेण
योऽर्चयेत् विष्णुमव्ययं का
र्त्तिके पंकरं वापि लभते सो
पि तत्फलं कार्त्तिकेय कश
येण हरिपूजनकृन्नरः प
रमं मोक्षमाप्नोति प्रसादात्
स्तन्मनेः यत्किंचित् कार्त्ति
के मासि विष्णुमुद्दिश्य दीयते त
दक्षयं भवेत् सर्वं सत्यमेतन्म
योच्यते हुताकं शूरणं तथा
कार्त्तिके विप्रवेनरः दद्याद्दि
ने दिने विप्र तस्य विष्णुः प्रसी
दतिः प्रफुल्लपद्मपत्रेण स ॥

तेनाश्वसितेनवा योऽर्चयेत्
कमलाकान्तं तस्य किंभूवि
दुर्लभं कमलैः कार्त्तिकेमा
सि सितैर्वा लोहितैस्तथा सं
पूज्य यमिनं मर्त्यो लभते
परमं पदं मदनं कार्त्तिके
मासि हरये येन पंकजं न
दत्तं तेन किं विप्र विष्णवे दे
त्यजिष्णवे एकमेवाम्बुजं यस्तु
ददाति कैटभारये तस्मै किं
भगवान् विष्णुर्न ददाति श्रि
यः पतिः कमलैः कार्त्तिके
मासि येन वाराधितो हरिः
जन्मजन्मनि तद्गेहे कमला न
हि तिष्ठति पद्मवीजानि योद
द्यात् केशवाय महात्मने स
जायते विप्रकुलेषु च प्रति
जन्मनि ब्रह्मणास्यकुलेजा।
तः स चतुर्वेदविद्भवेत् धन
वान् बहुपुत्रश्च कुटुम्बानां च पोष
कः नास्ति पद्मसमं पुष्पं जैमिने
सत्यमुच्यते येन संपूज्यमानो विंद
पापात्मापि च मोक्षभाक् सत्यं
सत्यं पुनः सत्यं सत्यमेव मयो
च्यते कमलैर्हि विप्र ये चार्चित
भं ते परमं पदं एकमेवा
रविन्दं यः प्रददाति मुरारये

तस्य नास्ति पुनर्जन्म संसारेऽ
स्मिन् सुभैरवे इति पाद्मे क्रिया
योगसारे १२ अध्यायः ॥ ॥
व्यास उवाच मार्गशीर्षे द्वि
जश्रेष्ठ महालक्ष्मा समन्वितं पू
जयेदच्युतं विष्णुं भक्तिभावेन
वैष्णवः उच्छिष्ट देशे विप्रेन्द्र
तथैव पतितालये दुर्गन्धे
श्च परित्याज्य स्थाने विष्णुं न ॥
पूजयेत पाषण्डानां समीपेन
महापातकिनां तथा ॥
असत्यभाषिणां चैव न कुर्या
द्विष्णुपूजनं तस्मादेकमना भू
त्वा भक्तिश्रद्धा समन्वितः पू
जयेत् कमलाकान्तं चतुर्वर्ग
फलाप्तये शाल्यन्नं सघृतं चैव म
धुपूपसमन्वितं सर्वाण्याकादिशा
कं च दद्यात् सदसि विष्णवे ना
गरंगफलं दिव्यं सपत्रं यस्तु
यच्छति केशवाय द्विजश्रेष्ठ सोऽ
स्माभिरपि पूज्यते पायसं नूतन
सर्पिर्भगवते हरेः तदेवाग्र
हायणे मासि भक्त्या दद्यान्मुरा
रये पौषे मासि समायाते
श्रीकृष्णं वरदं प्रभुं नित्यमि
क्षुरसैर्दिव्यैः स्नापयेद्वैष्णवो
जनः यः स्नापयति ॥ ॥

6313

विप्रेन्द्र विष्णुमिक्षुरसैः प्रभुं इह
भुंक्ते सुखं सर्वं मृतो याति ब्र
ह्मागारं योदद्यादिक्षुनैवेद्यं
देवदेवाय विष्णवे नैवेद्यो॥
पिनत् फलमाप्नोति किम
न्यैर्बहुभाषितैः सद्गुडं पृथु
कं पौषे दधिभिर्वा समन्वितं
दत्वा मुरारये मर्त्यः सर्वान् का
मानवाप्नुयात् सर्वं पुरातनं
वस्त्रं दुर्गीकृत्य मुरारये शी
तस्य वारणार्थाय दद्याद्वस्त्र
च नूतनं पौषे संक्रमणे विप्र स
लक्ष्मीकाय विष्णवे दद्यान्नूत
न कम्बलं द्विजोद्भावर्णं च पिङ्गलं य
स्तु एवं विधानि कुर्वीत सप्तप
कमलापतिं तस्य पुण्यफलं व
क्ष्यामि वत्स समाहितः अश्व
मेधागमनान्नैव विमुक्तः सर्व
पातकैः शेषे विष्णुपुरं याता
विष्णुना सह मोदते वैनतेयांकि
ता घंटा यस्तु वादयते हरेः पू
जाकाले द्विजश्रेष्ठ तस्य पुण्यं
वदाम्यहं अश्वमेधसहस्रं चैव
मुक्तः पापैः सदा कलौ अया
ति मन्दिरं विष्णो रत्नमालाश्लेषो
भितं तत्र भुक्त्वाखिलं भोगं क
ल्पकोटिशतावधि पुनरागत्य

धरण्यां चतुर्वेदी द्विजो भवेत् ॥
तत्र भुक्त्वा सुखं सर्वं शोकदुः
खविवर्जितः पुनर्विष्णुपुरं ग
त्वा मोदते प्राप्नोत्यवत्समं वीणां
वादयते यस्तु पूजाकाले जग
त्पतेः पंडितानामग्रणीः
स्यात् प्रतिजन्मनि जन्मनि मृ
दंगवाद्यं कुर्याद्यस्तु पूजायां केट
भद्विषः तस्य मनसो देवे मोद
ते अभिमतं फलं डमरुं डिंडि
मं चैव वाजनी तथा पटहं डुंडु
भिं चैव काहलं सिंधुवादनं कां
स्यं च करतालं च वेणुं वादयते च
यः पूजाकाले महाविष्णोस्तस्य
पुण्यं निशामय स्वर्णघाटैः यान
कैर्युक्तो मन्दिरं याति चक्रिणः
परमं स्थानमासाद्य तत्रैव ॥
परिमुच्यते कल्पानां चयः ॥
कुर्यात् पूजाकाले जगद्गु
रोः मुखवाद्यं च विप्रेन्द्र त
स्य पुण्यं मयोच्यते कोटिको
टिकुलैर्युक्तः प्रयाति हरिमं
दिरं स्नानमासाद्य तत्रैव मो
दते मन्वन्तरमाप्नुयात् विष्णो
रायतने यस्तु भक्तियुक्तः प्र
नृत्यति प्रयाति ब्राह्मणश्रेष्ठ
तद्विष्णोः परमं पदं यस्तु गा
यति ॥

गीतानिभक्त्या नारायणाग्रतः
सनत्केकल्प माप्नोति गंधर्वा‸
णां पुरेषु च स्तौति स्तोत्रैर्जग
न्नाथं यो भक्त्या वैस्नवो जनः वस्य
मान् प्रयच्छति मासे मासे हरिं
यस्तु विधिनानेन पूजयेत्
अचिरेणैव विप्रर्षे प्रसादयति
सोऽच्युतं जगद्दधिमिमं येन
न्नैमिच्छन्ति मर्त्याः प्रचुरतरग
भीरं सर्वदुःखमर्दच परमपुरु
षमादौभोजयुग्मं मनोज्ञं त्रिदश
निवह सेव्यं तेन सर्वे येन इति
पाद्मे क्रियायोगसारे १२ अथा
यं अथ द्वात्रिंशत् सेवाप
राधाः भगवद्भक्तानां त्रिय
सिद्धान्नभोजनं १ अनिषिद्धदि
नेदंतधावन मकृत्वा विस्नो
रुपसर्पणं ३ मैथुनं कृत्वाऽस्ना
त्वा विस्नुकर्म्मकरणं ४ रजस्व
लां स्पृष्ट्वा विस्नुगृहप्रवेशनं ५
मानवं शवं स्पृष्ट्वाऽस्नात्वावि
स्नुसन्निधावपस्थानं ६ वि
स्नुस्मरणतः पायुवायुप्रयोगः
७ विस्नोः कर्म्म कुर्वतां पु
रीषत्यागः ८ विस्नुशास्त्रम
नादृत्य शास्त्रान्तर ॥॥

(margin: सत्रोभगवत्सर्वोका)

प्रशंसा ९ अतिमलिनं वासः प
रिधाय विस्नुकर्माचरणं १० अ
विधानेनाचम्य विस्नोरुपस
र्पणं ११ विस्नोरपराधं कृत्वा
विस्नोरुपसर्पणं १२ क्रुद्धस्य वि
स्नुस्पर्शनं १३ निषिद्धपुष्पेण
विस्नुसेवनं १४ रक्तं वासः परिधा
य विस्नोरुपसर्पणं १५ अन्धका
रे दीपेन विना विस्नोः स्पर्शनं
१६ कृष्णवस्त्रं परिधाय विस्नोः
कर्म्माचरणं १७ वायसो हृतवा
सः परिधाय विस्नोः कर्म्माच
रणं १८ विस्नवे ऽकुक्कुरोच्छि
ष्टदानं १९ वराहमांसं भुक्त्वा वि
स्नोरुपसर्पणं २० हंसजालपद
मराविमांसं भुक्त्वा विस्नोरुपसर्प
णं २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य
विस्नोः सपर्शनं कर्म्मकरणं वा
२२ श्मशानं गत्वाऽस्नात्वा विस्नू
पसर्पणं २३ पिण्याकं भुक्त्वा वि
स्नोरुपसर्पणं २४ विस्नवे वरा
हमांस निवेदनं २५ मद्यमाद्य
य पीत्वा वा स्पृष्ट्वा विस्नुगृहप्र
वेशनं २६ परकीयेनाशुचि
नावस्त्रेण परिहितेन विस्नुकर्मा
चरणं २७ विस्नवे नवान्न मप्र
दाय तद्भोजनं २८ गन्धपुष्पे‸

ऽप्रदाय धूप दीपदानं २९ उ
पानद्वावाहस्य विस्नुस्थानप्रवे
शनं ३० भेरीशब्देन विना विस्न
प्रबोधनं ३१ अजीर्णे सति वि
स्नुस्पर्शनं ३२ पनडुपल लक्षणं‸
इत्यादिकाचारतत्त्व
अपिच वराहुवाच तथापरा
धान् देवेश वर्ज्जयन् यान्वैस्न
वैनच निरपराधो मनुजः सा
पराधश्च जायते कर्म्मणा
चरणे येनकरणेनस्त्यक्तिं न
च पूजाफलं सर्वं जायते तद्वद
स्व मे वाराह उवाच कर्म्मणा
मनसा वाचा येकपकचयो
जनं भक्षणं दंतकाष्ठस्या
ज्ञान्नस्य तु भोजनं मैथुनं पा
वसंस्पर्शं पुरीषोत्सर्गमेवच
मूत्रस्युदक्याः तपणास्पर्शनं
मेहनं तथा अभाष्यभाषणं को
पं पिण्याकस्य च भक्षणं ॥
रक्तं पारक्यं मलिनं वस्त्रधा
रित नीलिजं शवस्यालोक॥
निर्वत्यं पतितान्नस्य भक्षणं
अभक्ष्यभक्षणं चैव तंडुलीय
विभीतकं अदानं तवरान्नस्य
जालपादवराकयोः भक्षणं
देवतागारे सोपानत् ॥ ॥

कोपसर्पणं तथैव देवपूजायां
निषिद्धकुसुमाद्येनं अनुला
ध्येच निर्म्माल्यं पूजा जीर्णान्य
कारयोः पानं स्तपा देवस्य अ
न्धकारे प्रबोधनं वातकर्म्मा
द्यैर्नैः विस्नो रनमस्करणं तथा
अपराधास्वयस्त्रिंशात् समाख्या
तास्तयायेरे पश्चिर्कुकृतः पुरुषो
विस्नुर्नैव प्रपश्यति कुरस्योनन
मस्कारं कुर्यात् पूजान्तयाद
स्मी तत् प्रायश्चितं यथोपकरा
त्रे त्रिरात्रं वा त्रिरात्रं स्नानमेवच
सवासा पंचगव्याशी मलवस्त्रा
तिकं क्रमात् ॥
नीलीरंगापनोदार्थं गोमयेनप्र
घर्षणं प्रजापत्येन शुद्धिः स्ना
ने नीलीवस्त्रस्य धारणात् चान्द्रा
यणद्वयं कुर्यात् गुरोः तमि
तज्जलमं चान्द्रायणं पराकच
पतितान्नस्य भक्षणात् चान्द्रा
यणं पराकंच प्राजापत्यं तथै॥‸
वच गोप्रदानंच भोज्यच अभ
क्ष्यस्य च भक्षणे उपवासस्तु पंचा
ह पंचगव्येन शुद्ध्यति सोपानत्
कस्पृशेत् पादं कृत्वा स्य हिरभो‸
जनं पुष्पाभावेऽर्चनं स्नानं दे
वस्पर्शंच कार॥ ॥ ॥

येत् अनिर्माल्ये नमस्कारं स्ना
नं पंचामृतेन च सुरापाने हि ।
जातीनां चान्द्रायणव्रतमेवं
तथैव द्वादशाहोत्तप्राजापत्य
ं चरेत् अलक्तकेन शुद्धिः स्या
त् गोप्रदानत्रयेण च त्रयाणा
मेकरात्रेण पंचामृतनिषेवणा
त् अच्युतेत्वपराधेस्तु तथावि
धोः स्तवपठने सततं कथितं
गुह्यं किमेतत् श्रोतुमिच्छसि
धरण्युवाच अस्ति कश्चिदुपा
योऽत्र येन त्वं तुष्यसि पूजि
तः सफल स्यासि अपराधविशो
धनः वराह उवाच ॥
संवत् सरस्य मध्ये तु तीर्थे सौ
करे मम कृतोपवासः स्नाने
न गंगायां शुद्धिमाप्नुयात् म
थुरायां तथाप्येवं सापराधः शु
चिर्भवेत् अनयोस्तीर्थयो रेवं यः
सेवेत सकृन्नरः सहस्रजनितान
पराधान् जहाति सः स्नानात् पा
नात् तथा ध्यानात् कीर्तनाद्वा
रणात्तथा श्रवणात् मननाच्चै
व दर्शनात्पाति पातकं
इति वाराहपुराणे अपरा
धप्रायश्चित्तनामध्यायः ॥ ॥।

सेवि क्ली फलविशेषः सेव इ
ति हिन्दीभाषा तत् पर्य्यायः
वदरं २ सिंचितिकाफलं ३ मु
ष्टिप्रमाणं ४ सेवितं ५ सेवं ६
अस्य गुणा वातपित्तहरत्वं
गुरुत्वं वृंहणत्वं कफकरत्वं
वृष्यत्वपाकेमधुरत्वंरुचित्वंच इतिराजनिर्घं
सेविका स्त्री मिष्टान्नविशेषः
सेवइयाकि इति भाषा यथास
मितावर्त्तिकाः कृत्वा सूक्ष्मा
यवसन्निभाः शुष्काः दीर्घाः स
साध्या भोज्या घृतसितान्विताः
अस्या गुणाः सेविकातर्पणी
बल्या गुर्वी पित्तानिलापहा ग्रा
हिणी सन्धिकृद्रुच्या तान्तु
देन्नातिमात्रया इति भावप्र
काशः ॥
सेवितः त्रि सम्यगुपासितगुर्वा
दिः तत् पर्य्यायः वरिवसितः २
वरिवस्यितः ३ उपासितः ४
उपचरितः ५ इति शब्दरत्ना
वली आराधितः उपभुक्तः ॥
आश्रितः इति सेवधात्वर्थद
र्शनात् सेविफले क्ली
इति राजनिर्घंटः ॥
सेव्यं क्ली वीरणमूले इत्यमरः ॥

सेव्यः पुं अश्वत्थवृक्षः इति
राजनिर्घंटः हिज्जलवृक्षः इति
शब्दरत्नावली ॥
सेव्यः त्रि सेवार्हः इति
मेदिनी ॥
सेव्या स्त्री वन्दावृक्षः इति
शब्दरत्नावली
सै स्त्रियां इति कविकल्पद्रुमः
सायति स्तितिः स्तपः इति
दुर्गादासः ॥
सैंहः त्रि सिंहतुल्यः इति
सिंहशब्दात् अण् प्रत्ययेन नि
ष्पन्नः इति सिद्धान्तकौमुदी
सैंहली स्त्री सिंहपिप्पली तत्
पर्य्यायः सर्पदंष्ट्रा २ सर्पांगी ।
३ जलभूमिजा ४ पार्वती ५
शैलजा ६ ताम्रा ७ लेवीभा ८
उत् कटा ९ अद्रिजा १० सिंह
लस्था ११ लेवदन्ता १२ जीवला
१३ जीवाला १४ जीवनेत्री १५
ऊरुव्वी १६ अस्या गुणाः कटु
त्वं उष्णत्वं मेहनाशित्वं दी
पनत्वं कफश्वाससमीरार्त्तिश
मनत्वं कोष्ठशोधनत्वं च इ
ति राजनिर्घंटः
सिंहलद्वीपभवे त्रि ॥
सैंहिकः पुं राहुः इति शब्द॥

रत्नावली ॥
सैंहिकेयः पुं राहुः इत्य
मरः
सैकतं क्ली वालुकामयतटं
इत्यमरः
सैकतः त्रि सिकतामयः तत्
पर्य्यायः सिकतिलः २ सिक
तावान् ३ इति राजनिर्घंटः ॥
सैकतिकं क्ली मात्रयात्रामं
गलसूत्रकं इति मेदिनी सै
कतिकः पुं संन्यासः तप
णकः सन्देहजीविनि त्रि
इति मेदिनी ॥
सैकतेष्टं क्ली आर्द्रकं इति
राजनिर्घंटः वालुकामय ॥
प्रियेत्रि ॥
सैनवाहिनी स्त्री वाहुदानदी
इत्यमरः ॥
सैद्धान्तिकः त्रि सिद्धान्तज्ञः
इति हेमचन्द्रः कौमुदी च
सैनापत्यं क्ली सेनापतेर्भावः
तत् कर्म च तत् सम्बन्धिनि त्रि
पत्येत पुरोहितादिभ्यो यक्
इत्यनेन यक् प्रत्यय निष्पन्नं
इति सिद्धान्तकौमुदी ॥
सैनिकः पुं सेनायां समवे
तः इत्यमरः सितितहस्त्यश्वा
रथः ॥

पादातं सेना तत्र ये समवे-
ताः एकदेशीभूता स्ते सैन्याः
सैनिकाश्च इति भरतः सैन्य
रक्षकः इति मेदिनी अप
रश्च प्राणिवधनियुक्तः य
था श्रीभागवते पंचमस्कंधे
गद्यं ये त्विह वै पुरुषाः पु
रुषमेधेन यजंते याश्च स्त्रियो
नृपशून् खादंति तांश्च ताश्च
ते पशव इह निहता यमस
दने यातयंतो रक्षोगणाः सै
निका इव स्वधितिना अवदा
या स्रक् पिबंतीति सैनिकाः
प्राणिवधनियुक्ताः इति नि
घ्यादिनत्वं सेनासंबन्धिनि
त्रि सैंधवं क्ली पुं लवणविशे
षः सत्र सिंधुनद्युपलतितदे
शोद्भवः तत्पर्यायः शीत
शिवं २ माणिमन्थं ३ सिंधु
जं ४ इत्यमरः वशिरं ५
सिंधुदेशजं ६ माणिबंधं ७
इति जटाधरः शिवशिवं ८ इ
ति शब्दरत्नावली नादेयं ९
शिवं १० सिद्धं ११ पिवात्म
कं १२ पथ्यं १३ अस्यगु
णाः सैंधवं लवणं हृद्यं
चक्षुष्यं दीपनं रुचि एतं
स्वादु त्रिदो॥ ॥ ॥

षघ्नं व्रणदोष विबन्धजित्॥
सैन्धवं द्विविधं ज्ञेयं सितं रक्त
मितिक्रमात् रसवीर्य्य
विपाकेषु गुणाश्च कथितं सि
तं इति राजनिर्घंटः॥
अपिच सैन्धवं लवणं स्वादु
दीपनं पाचनं लघु स्निग्धं रु
च्यं हिमं वृष्यं सूक्ष्मनेत्र्यं त्रिदोषहृत् इति भावप्रका
श सैंधवं दोषजिद्धृष्यं चक्षुष्यम
दाहि च अग्निसन्दीपनं स्निग्धं
रोचनं मधुरं
लघु इति राजवल्लभः ॥॥
तत्र हविष्यान्नं यथा स्मृतिः
लवणे सैन्धवं सामुद्रे गव्येच
दधिसर्पिषी इति हविष्यान्न
गणेनेत्यादितत्त्वे सैन्धवः पुं घोटकः सत
सिन्धौ रहूरभवः विकारसेयेति
अहूरभवार्थेज्ञः इत्यमर
भरतो
सैन्धी स्त्री तालादिरसनिर्यासः
तत्पर्यायः हाला २ अस्या
गुणाः शीतत्वं कषायत्वं
अम्लत्वं पित्त दाह ना
शित्वं
वातदत्वंच ॥
इति राजनिर्घंटः ॥
सैन्यं क्ली सेना
इत्यमरः ॥ ॥ ॥

सैन्यः पुं सेनासमवेतः ॥
इत्यमरः मिलितहस्त्यश्वरथ
पादातं सेना तत्र ये समवेता
एकदेशीभूता स्ते सैन्याः सैनि
काश्च इति भरतः
किंच सैन्यं क्लीवे बले ऽथ सेना
समवेते तु वाच्यवत् इति
मेदिनी॥
सैन्यपृष्ठं क्ली सैन्यस्य पश्चाद्भा
गः यत्र स्थित्वे राजा स्वसैन्यं प्रति
गृह्णाति राज्ञा स्वसैन्यं प्रतिग्रहः
२ इत्यमरः परिग्रहः ३
इति भरतः पतद्ग्रहः ४ इ
ति टीकान्तरं सैमंतिकं क्ली
सिन्दूरे इति
केचित् सीमंतशब्दात् ठिक
प्रत्ययेन निष्पन्नं ॥
सैरन्ध्री स्त्री अन्यवेश्मस्था स्वतं
त्रा शिल्पजीविनी द्रौपदी इति
हेमचन्द्रः
सैरिकः पुं सीरेण लांगलेन च
रति यः कृषाण् इति भाषा सी
रस्य वोढा हेलेगरु इति भाषा
सीरस्य वोढा हेलेगरु इतिभा
षा सीरसंबन्धिनि त्रि तेषां पर्य्या
यः हालिकः २ लांगलिकः ३
इत्यमरः॥
सैरिन्ध्री स्त्री परवेश्मस्था स्वव

शिल्पकारिका इत्यमरः तत्
पर्यायः सैरन्ध्री २ सैरिन्ध्रिः
३ इति नट्टीका वर्णशंकर
संभूत स्त्री मल्लिका इति
मेदिनी द्रौपदी इति
धरणी॥
सैरिभः पुं महिषः इत्यमरः
स्वर्गः इति त्रिकांडशेषः सै
रीयः पुं झिंटी इति शब्द
रत्नावली
सैरीषकः पुं झिंटी इत्य
मरः अस्य गुणाः कफ वात
नाशित्व इति राजवल्लभः॥
सैरेयः पुं झिंटी इति शब्द
माला भरतश्च॥
सैरेयकः पुं झिंटी इतिरा
जनिर्घंटो भरतश्च॥
सैवालं क्ली शैवालं यथाया
पाम्बु शीकरवपुर्वित्रसा पुरा
मीन् सैवालकोत्तरलता मधु
नाविभर्ति वक्रं मसर्पतितनो
विभवोति स्त्री माया पयोध
र समुन्नतिरत्र हेतुः इति प्र
सिद्धश्लेषकाव्यं
सोः स्त्री पार्वती इति केचि
त् षो धातोः क्विप् प्रत्यये
न निष्पन्ना॥

सोढः त्रि क्षान्तः इत्यमरः
दुःखादिसहनशीलः इति तट्टी
कायांनीलकंठः ॥
सोढा त्रि क्षमायुक्तः शक्तः
इति मेदिनी ॥
सोत्कंठः त्रि उत् कंठायु
क्तः तत्पर्य्यायः उत्कः २ उ
न्मनाः ३ इति जटाधरः ॥
सोत्प्रासं क्ली प्रियवाक्यं ॥
यथा सोत्कंठनन्तु सोत्प्रासं
चटु चाटु प्रियोदितं इति
शब्दरत्नावली ॥
सोत्प्रासः पुं सशब्दहास्यं
यथा सोत्प्रास आच्छुरित
कमवच्छुरितकं तथा अट्टहा
सोमहाहासोहासः महास इ
त्यपि इतिशब्दरत्नावली ॥
सोदर्यं त्रि उदर्य्येनसहवर्त्तो
मानं वृद्धियुक्तं सवृद्धसमेत इति
भाषा यथा दत्त्वा कन्यांहर
न् दंड्यो व्ययंदद्याच्च सोदर्यं
मृतायां व्रजादद्यान् ॥
परिशोध्योभयव्ययं इत्यु
द्वाहतत्वधृतयाज्ञवल्क्यवचनं
सोदरः पुं सहोदरः इति
शब्दरत्नावली ॥
सोदरा स्त्री सहोदराभगिनी
इति सोदरशब्दादाप्प्रत्यये ॥
न निष्पन्ना ॥
सोदर्य्यः पुं सहोदरः इत्य
मरः
सोनहः पुं लसुनं इति श
ब्दरत्नावली ॥
सोन्मादः त्रि उन्मदः उन्मादि
तः तस्य रूपान्तराणि यथा
उन्मादः सून्मादः सून्मदः इ
त्यमरटीकायां भरतः ॥
सोपकरणं त्रि उपकरणेनस
ह वर्त्तमानं उपकरणविशिष्टं
यथा पदंच अन्नकाम इति
सोपकरणं वत् सतरीचन्द्रष्ट
यथुक्तं वृषमिति चाभिलप्य उ
त् सर्गः संगच्छते इति वृषोत्
सर्गतत्वं इदं सोपकरणमा
मान्ननैवेद्य मस्तकदेवतायै
नमः इति च पूजापद्धतिः ॥
सोपकारः त्रि उपकारविशिष्टः
उपकारेण सह वर्त्तमान इति
बहुव्रीहिसमासे कृते सहस्य
सस्य सादेशेननिष्पन्नः ॥
सोपधं त्रि सच्छद्मदानादि
यथा हारीतः भयामद्व्यदा
नमसमर्थं यच्च दत्वा पतितप्यते
तद्दानमफलं पश्चापकारिणे

ददाति तन्मात्रं परिक्लिष्टं यच्च
सोपधं ददाति अन्यश्चाविन
मत्स्य यच्चापात्राय ददाति अनि
ष्टदानं स्रवति यच्चदत्वा प्रकी
र्तितेस्मयदानं यच्चाश्रद्धयाददातिक्रो
क्रुध्य ददाति दत्वा वाक्रोशति
असत् कृतं पैशाचं यच्चावज्ञा
तंददाति पतेदानोपसर्गा ये
रूपस्तिष्ठ दान मप्रसिद्ध मव
र्ग्य मयशस्यमभुक्तिदं म
त्यल्पफलं वेति नहि त्यागा
नन्तरकाले हस्तार्पणसंभवेपि
प्रदानमसमर्पणं उपकारिणे
व्यसनोपकारिणो तन्मात्रं य
थोक्तोपकरणरहितं सोपधं
सच्छद्म अन्यश्चावितं
लोकसंभावनार्थं प्रकाशितं
अनिष्टदानं पात्रवेदानं स्मयो
मानभंगः अप्रकृतो भयादि
मान् इति शुद्धितत्वं ॥ ॥
सोमप्लवः पुं राहुग्रस्तच
न्द्रः सूर्य्यश्च इत्यमरः
सोपवासः त्रि
उपवासविशिष्टः यथा
मत् स्नात्वाकामतो जप्त्वा
सोपवासस्त्र्यहं वसेत् इति
तिथ्यादितत्वे याज्ञवल्क्यवचनं
सोपाकः पुं श्वपाकः इति
केचित् ॥
सोपाधिः त्रि उपाधियुक्तः
प्रतिलाभेच्छादिना दानादिः
यथा नारदः अदत्तंतभयक्रो
धकामशोकरुगादिभिः बाल
मूढास्वतंत्रार्त्त मत्तोन्मत्ताप
वर्जितैः कर्ताममेदं कर्मेति
प्रतिलाभेच्छया सोपाधिदत्त
मुपाध्यसिद्धावसिद्धमिति विवा
दचिंतामणिः इति शुद्धितत्वं
सोपानं क्ली आरोहणं इत्य
मरः इष्टकादिरचिते पथिढा
इति ख्याते देशांतरे खुड्डव
डीति यत् प्रसिद्धं अरुह्यते
अनेन आरोहणं अनट् उप
सर्गादतितेभावे अत् अने
कार्थत्वादुपानं ऊर्द्धगमनं ते
नसह वर्त्तते सोपानं सोपान
सिद्धसाध्याः संवाध समूढ
सञ्चाराणीति दंत्यादावुक्त विवे
कः इति भरतः किंच आरो
हणंच सोपानं पैठा इति
समाश्रये सोपाने काष्ठ
घटिते ॥ ॥ ॥

निः श्रेणिस्त्वधिरोहिणी निः
श्रेणीस्त्रियां श्रयणीतथानिः
श्रेयिणीत्यपि इति शब्दरत्ना
वली॥
सोभांजनः पुं शोभांजनः॥
इतिभरतटीकायां भरतः
सोमं क्ली कांजिकं स्वर्गः
इति केचित्॥
सोमः पुं चन्द्रः कर्पूरः
इत्यमरः वानरः कुवेरः
यमः वायुः वसुभेदः जलं
सोमलतौषधिः इति मेदि
नी पितृः दीधितिः ॥
इत्युणादिकोषः दिव्यौषधिः
सोमलतारसः इति हेमच
न्द्रः अमृतं पर्वतविशे
षः इतिकेचित् चन्द्रस्यवि
वरणं यथा सच वायुको
ण स्त्री वैश्यजाति सत्वगु
णात्मकस्स मृगशिरोनक्षत्र
समुद्राणामधिपतिः इति वृ
हज्जातकादयः एकदलसमा
णशरीरः श्वेतवस्त्रपरिधानः
सुक्लवर्णः दक्षिणहस्तवरदः
गदायुक्तवामहस्तः दशाश्वः
श्वेतपद्मस्थः उमाधिदेवतः
जलमध्याधिदेवतः सूर्याभि।
मुखः यथा साम्बुज वैश्यमात्रे
यं हस्तमात्रं सितांवरं ॥॥
श्वेतं द्विबाहुं वरदं दक्षिणा
मस्थं गदादेतरं दशाश्वं श्वे
तपद्मविर्विस्थोमाधिदैवतं ज
लाधिदैवंच सूर्यास्यमाग्नये
लमनथा इति ग्रहयागतत्त्वं
तस्योत्पत्त्यादि यथा ऋषय
ऊचुः सोमः पितृणामधिपः
कथंशास्त्रविशारदः तद्वंशेकेच
राजानो बभूवुः कीर्त्तिव ॥॥
इनाः सूतउवाच आदिष्टो ब्र
ह्मणा पूर्वं मत्रिः सर्गविधौ पु
रा अनुत्तमं नामतपः सृष्ट्य
र्थं तप्तवान् प्रभुः सदानं॥
न्दकरंब्रह्मजगतः क्लेशनाशनं
ब्रह्म विल्वकं रुद्राणां मध्येत
रमतीन्द्रियं शान्तिकृच्छांतम
नसस्तदात्रिनयनेस्थितं माहा
त्म्यात्तपसो विप्राः परमानंदका
रकं यस्मादुमापतिः सार्द्धमु
मयात्मधिष्ठितः तद्दृष्ट्वाऽष्टमं
शेनतस्मात् सोमोऽभवच्छिशुः
अथास्रवन्नेत्राभ्यां धामत
ज्ज्ञानवंशाये दीपयन् विश्व
मखिलं ज्योत्स्नया सचराचरं
तद्दिशो जगृहुर्दाम स्त्रीरूपेण

सुतेच्छया गर्भोभूत्तोदरेता
सा मास्थितोऽब्दशतत्रयं ॥
ता स्तमूत्सुर्वयं गर्भमशक्ता
धारणे ततः समादायाथतं ब्र
ह्मैकीकृत्यचतुर्मुखः युवान
मकरोद्ब्रह्मा सर्वायुधधरं वरं
स्यन्दने सहस्राश्वे वेदशक्ति
मयेप्रभुः आरोप्य लोक मनयदा
त्मीयं सपितामहः ततो ब्रह्मर्षि
भिः सोमस्मत्स्वामी भवत्वयं
ऋषिभि र्दिव गंधर्वै रोषधीभि
स्तथेवच तुष्टुवुः सोमदैवत्यै
र्वाल्हाद्यैमंत्रसंग्रहैः स्तूय
मानस्य तस्याभूदधिको म
हसांचयः तेजोवितानाद भ
वद्भुवि दिव्योषधीगणः त
द्दीप्तिरधिका तस्माद्रात्रौ भ
वतिसर्वदा तेनौषधीशः सो
मोऽभूत् द्विजेशश्चाभिग
द्यते वेदधामा रसश्चापि य
दिदं चन्द्रमंडलं क्षीयते व
र्द्धतेचैवशुक्ले कृष्णे च सर्वदा
ततो विंशत्तथा सप्त दक्षःप्रा
चेतसोददौ रूपलावण्यसंयु
क्ता स्तस्मै कन्याः सुवर्चसः
इति मात्स्ये २३ अध्यायः
अपिच महाभारते उवाच ब्रह्म
णोमानसः पुत्रो अत्रिर्नामम
हातपाः तस्य पुत्रोऽभवत् सो
मो दक्षयामाहृतां गतः
सप्तविंशति याः कन्या दक्षाय
णः सकीर्त्तिताः सोमपत्न्यो
पिमान्यास्तासां या श्रेष्ठात
रोहिणी तामेव रमते सोमो
नेतरा इति सुश्रुमः इतराः
प्रोचु राजत्य चन्द्रस्यासमतां
पितुः दक्षोप्यसकृदागत्य त
मुवाच स नाकरोत् समतां
सोपितं दक्षः शशापान्तर्हितो
भव एवमुक्तः स्वयं सोमो अ
गमच्छ्रमणतः देवा मनुष्याः
पशवो नष्टे सोमे सवीरुधः
क्षीणाभवं स्तदा सर्वाश्च
धाश्च विशेषतः स्वयं गच्छ
द्धिरण्याश्च सोषधीभिः सर
षभाः मूलेषु वीरुधां सोमः
स्थितरस्तु राजसः तेषांचिंता
भवतीश्च विसंच पारणं यपुः
भगवानाह तान् सर्वान् कृत
किंक्रियते मया ते चाब्रुदेव
दक्षेण शापः सोमो विनाशितः
तानुवाच तदा देवो मथ्यतां
कलसोदधिः उषध्यः स
र्वाता देवाः मथिष्यामृतं संय
तेः ॥ ॥ ॥ ॥

एवमुक्ता ततो देवान् दध्यौ
रुद्रं हरिः स्वयं ब्रह्माणंच त
था दध्यौबाहर्कि नेत्रकार
णात् तेसर्वेतत्रसहिता स
मेत्यवरुणालयं तस्मिंस्तम
थितेजातः पुनः सोमो महौ
षधेयोः सौतेत्रत्संज्ञोवै
देहेस्मिन् पुरुषः परः सएव
सोमो मंतव्यो देहिनांजीव
संज्ञकः परेच्छया समूर्त्ति
तं पृथक् सोमां प्रपेदिवा
न् तमेव देव मनुजाः षोड
शेमाश्च देवताः उपजीवंति
सृताश्च तथैवौषधयः सर्व
रुद्रस्तमेवसकलं दधारशि
रसा तदा तदात्मिकाभवंस्ता
यो विश्वमूर्त्ति रसो स्मृतंत
तस्य ब्रह्मा ददौ प्रीतः पौर्ण
मासीतिथिं प्रभुः तस्यां स
पोषयेद्राजन् तमर्थं प्रतिपा
दयेत् सचात्माह्लादकस्य भवेत्
तस्य स्नानं प्रयच्छति कांतिं
पुष्टिंच राजेन्द्र धनंधान्यंचके
वलं इति वाराहे सोमोत्
पत्तिर्नामाध्यायः तस्य
क्षयवृद्धिकारणं यथा ब्र
ह्मोवाच राकाचानुमतीचैव
द्विविधापूर्णिमामता सिनीकु
हूश्चैव अमावास्या द्विधैव
तु अमानामरवेरश्मिश्चन्द्रलो
केप्रतिष्ठिता यस्मात् सोमो
वसत्यस्या ममावासीततः स्मृ
ता एवोदित कलाभिन्न पौर्ण
मास्यानिशाकरे पूर्णिमानुमती
ज्ञेयापश्चात् स्तमितभास्करे य
स्मात्तामनुमन्यंते देवताः पितृभिः
सह तस्मादनुमतीनाम पूर्णिमा
प्रथमास्मृता यदा चास्तमिति
सूर्यः पूर्णचन्द्रस्य चोद्गमः यु
गपत् सोत्रराकाग तदानुमति
पूर्णिमा राकातामनुमन्यंते
देवताः पितृभिः सह रंजनाच्चै
व चन्द्रस्य राकेति कवयो श्रु
वन् सिनीवाली प्रमाणान्तु
क्षीणशेषो निशाकरः अमावा
स्या विशत्यर्कं सिनीवाली
ततः स्मृता कुहेति कोकिलेनो
क्तोयः कालस्तत्समाप्यते तत्
कालसंज्ञा तेषां वै अमावास्या
कुहूः स्मृता अनुमत्याः सरा
कायाः सिनीवाल्याः कुहेर्वि
नापतासां विरलः कालः कुमा
रेतिकुहूःस्मृता विरलस्याने
द्विलवेतिचपाठः कलाः षोडशा

सोमस्य शुक्ले वर्द्धयते रविः अ
स्तेतेनास्तत कृष्णेपीयते देवतैः
क्रमात् प्रथमां पिवतेवह्नि
द्वितीयां पवनः कलां विश्वेदेवा
स्तृतीयांत चतुर्थीन्तु प्रजापतिः
पंचमीवरुणश्चापि षष्ठीं पिव
ति वासवः सप्तमीमृषयो
दिव्या वसवोष्टौ तथाष्टमीं
नवमीं कृष्णपक्षस्य पिवतीन्द्रः
कलामपि दशमीं मरुतश्चापि
रुद्रा एकादशींकलां द्वाद
शींतु कलां विश्वधनदस्त्रयो
दशीं चतुर्दशीं पशुपतिः क
लां पिवति नित्यशः ततः पंच
दशींचैव पिवंति पितरः कलां
कलावशिष्टो निष्पीतः प्रवि
ष्टः सूर्यमंडलं अमायां विश
ते रश्मौ अमावास्या ततः स्मृता
पूर्वाह्णे विशतेचार्कं मध्याह्नेत
वनस्पतिं अपराह्णे विशत्यप्सु
स्वयोनिं वारिसंभवः आपः प्र
विष्टः सोमस्य शेषया कलया
कृषा तृणगुल्मलता वृक्षान्नि
ष्पादयति चौषधीः तमोषधिं
स्थितं गावश्चरंत्यापः पिवंतिच
तदंगानुगतं गोभ्यः क्षीरत्वमुप
गच्छति ततक्षीरममृतंभूत्वामं
त्रभूतं द्विजातयः स्वाहाकारव
षट्कारैर्जुह्वत्याहुतयः क्रमात्
हुतमग्निषु देवाय पुनः सोमं वि
वर्द्धयेत् एवं संक्षीयते सोमः
क्षीणश्चाप्याय्यते पुनः तस्मा
त्सूर्यः शशांकस्य क्षयवृद्धि
विधेर्विभुः इत्याद्ये देवीपुराणे
चन्द्रक्षयवृद्धिनामाध्यायः ॥
तस्य राहुग्रासकारणं यथा
ब्रह्मोवाच यत्पृष्टवदतोलोको
वालिशानाम्महामते तदहं
संप्रवक्ष्यामि चंद्रसूर्योपरागिकं
यदि सत्यमयं ग्रस्त स्तेजोराशि
दिवाकरः न कथं नोदरं स्यैन
राहोर्न भस्मसात्कृतः अथवा
राहुणोक्तस्य शत्रुवक्त्रे प्रवेशि
तः तत्कथं दर्शने क्षीणोः।
शतधानविदारितः विमुक्त
श्चपुनर्दृष्टे स्तथैवारविमंडलः
नचास्यापहृतं तेजो न स्थाना
तपसारितः यदिवाशेषनि
ष्पीतः कथंदीप्ततरो भवेत्
तस्मान्न तेजसां राशी राहोर्वक्त्रं
गमिष्यति भयार्थं सर्वदेवानां
सोमःसूर्यःस्वयंभुवा तत्रस्यम

मृतं चापि संभूतं सूर्य्यतेजसा पिबं
त्यमृतमयं देवाः पितरश्च स्वधामृतं
त्रयं च त्रिंशतं चैव त्रयस्त्रिंशत्तथैव
च त्रयश्च त्रिसहस्राश्च देवाः सोमं
पिबन्तिये राहोरप्यस्ततेभागं
पुरा सृष्टं स्वयम्भुवा तस्मात्तद्रा
हुरागत्य पातुमिच्छायामभ्याका
गं तमोमयं पातुमिच्छन् त
तमृतेन्दुमाच्छादयति छायया
स्तु लोके च चन्द्रमभ्येति कृत्स्ने पर्व
णि भास्करं सूर्य्यमण्डलमस्य
स्तु चन्द्रमेव जिघांसति तस्मा
त् पिबति तं राहुस्तत्तु मस्याभि
नाशायन् अविहिंसन् यथा पद्मं
पिबति भ्रमरो मधु चन्द्रस्यामृ
तं तद्वद्भेदाद्राहुरश्नुते चन्द्रका
न्तो मणिर्यद्वत्तु दिने तप्यतेतरां
न तस्य त्वपि न हीयेत तेजसा नैव
मुच्यते यथा सूर्य्यमणिः सूर्य्य
इतः पास्य पावकं शुभं न भवत्य
गृहीतोऽपि तेजसा नैव मुच्यते
एवं चन्द्रस्य सूर्य्यस्य छादिता
व पि राहुणा स्वतेजसा न
मुच्येते संगृहीतो बभूवतुः
पर्व्वस्वथ च चन्द्रस्य सापि का
कनकाकृतिः सोमो ॥॥

दैवतसंयोगात् छायायोगाच्च
पार्थिवात् राहोश्च वरलब्धादे
मृतेरेदमृतं शशी सदोहका
ले संप्राप्ते च संदृष्टा च सोऽ
या सांगादेवतेन [illegible]
क्षीरं तथोर्नुः स्तनेः मृतं
पिबेव सर्व्वे देवताः सोमो
माता लक्ष्यते यथा मातृ
स्तनं पीत्वा जीवन्ते सर्व्वजन्तवः
पीत्वामृतं तथा सोमात् तृप्य
न्ते सर्व्वदेवताः संभूतं सर्व्वया
गेषु तथायं स्मरते शशी ॥
तं स्वांतं यथाभागमुपजीवन्ति
देवताः तस्मिन् काले स्वभ्ये
ति राहुरपवकर्षति सर्व्वम
र्द्धं त्रिभागं च पादं पादार्द्धमेव
च आक्रम्य पार्थिवीं छायां
यां यावत्तं चन्द्रमण्डले स्थितः
स भागो राहोस्तु देवभागास्तु
शेषकाः तृप्तिं विधाय देवा
नां राहोः पर्व्वगतस्य च चन्द्र
तस्य समायाति तेजसा नैव मु
च्यते त्रिविभागमुपावर्त्तनः पु
नेत्यर्क प्रमाणतः सर्व्वच्छायास्थि
तं कालस्त्वावानेवमकीर्त्तितं अ
तो राहुभुजः सोमः सोमाहृष्टिर्दिवा
करः पर्व्वकाः ॥

लस्थितिस्त्वेवं विपरीता पुनः
पुनः अतश्छादयते राहुरभ्र
वच्छशिभास्करौ राहुरप्यकस्मा
स्पृशनः सोममाच्छादयातिहृति
उद्धृत्य पार्थिवीं छायां सूर्य्यम
चरत्वोस्थितः चन्द्रस्य यदृदृष्टं
राहुणा भास्करस्य च तत्त्वा।
व देहिनं तस्य केवलं श्यामी
कृतं कर्द्दमेन यथा वस्त्रम
म्लमप्युच्यते पङ्के दोष
सर्व्वं वा राहुणा चन्द्रमास्तथा
प्रक्षालितं तदेवेह पुनः स्वच्छ
तरं भवेत् राहुमुक्तं भवेत्तद्वत्
निर्म्मलं चन्द्रमण्डलं राहुणा
च्छादितो यापि दृष्टा चन्द्रदि
वाकरौ विप्राः शान्तिपरा भू
त्वा पुनराप्याययन्ति ते एवं
न गृह्यते सूर्य्य श्चन्द्रमास्तत्र
गृह्यते सूर्य्यश्चन्द्रमास्तत्र गृ
ह्यते अतुधास्तं नपर्व्वणि मा
नुषा सांसच्चतेषुः जगत् स्म्यो
हते चैतत् ग्रहणं चन्द्रस्यो
हते चैतत् ग्रहणं चन्द्रसूर्य्य
योः इति देवीपुराणे ग्रह
णविवेकनामाध्यायः सोमग
र्भः पुं विष्णुः इति त्रिकाण्डशेषः सो
मजं क्ली दुग्धं इति हेमचन्द्रः च


न्द्रजातेति सोमतीर्थं क्ली प्रभा
सतीर्थं इति त्रिकाण्डशेषः तस्य
विवरणं यथा यत्र तप्तं तप
स्तेन सोमेन सुमहात्मना पंच
वर्षसहस्राणि एकपादेन ति
ष्ठति पंचवर्षसहस्राणि त
थैवोर्द्धभुजः स्थितः एवं भूतः
पुनः पंच पंच सोमव्रतस्तथा त
थैवैकेन पादेन दशापंच तिष्ठति
एवमुग्रं तपः कृत्वा कान्तिमान्
भवन्नसः ममापराधान्मृतः
स्त्वब्राह्मणानां पतिस्तथा मा
प्नोति यन्महाभागे सोमतीर्थे
कृतोदकः त्रिंशद्वर्षसहस्रा
णि त्रिंशद्वर्षशतानि च जायते
ब्राह्मणः सुक्ष्म वेद वेदान्तपार
गः द्रव्यवान् गुणवांश्चैव संवि
भागी यशस्विनि मद्भक्तश्चैव
जायेत अपराधविवर्जितः स
एव ब्राह्मणो भूत्वा संसाराद्वि
प्रमुच्यते तस्य किंचित् प्रवक्ष्या
मि सोमतीर्थस्य सुन्दरि तत्तो
यं येन विज्ञेयं मम मार्गो
उत्सारिणः वैशाखस्य तु
मासस्य शुक्लपक्षस्य द्वाद
श्यां महेशेचान्धकारे त्वयवक
स्त्रिकदृश्यते सोमेन च विना ॥

भूमे दृश्यते चन्द्रमः प्रभा आ
लोकदेशे च दृश्येते सोमस्तत्र न
दृश्यते एवं त्वां वच्मि हे भ
द्रे एष वै विस्मयः पुरं पत
त्रिं महाभागे पुण्ये सौक
रे च मम सोमतीर्थं विशा
लाक्षि येन पश्यन्ति जन्तवः अ
न्यच्च ते प्रवक्ष्यामि तच्छृणुष्व
वसुन्धरे प्रभाव मम तेजस
विस्मयं परमं महत् अका
मात् मृता तीर्थे अ आत्मनः
कर्मनिश्चयात् मम क्षेत्रप्रभा
वेण शृगाली मानुषी भवत्
रूपवती गुणवती चतुःषष्टि
कलान्विता इति वाराहे सो
करवतीर्थमाहात्म्ये नामाध्या
यः सोमधारा स्त्री आकाशे इ
ति त्रिकाण्डशेषः ॥
सोमपः पुं यागे पीतसोमल
तारसः तत्पर्य्यायः सोमपीथी
इत्यमरः सोमपोऽपि च इति मधु
का सोमपत्रः पुं तृणविशेष
उलूखड इति भाषा यथा दर्भः
कुशस्वदः पामः सोमपत्रः प
रात् प्रियः इति शब्दचन्द्रि
का सोमपाः पुं
यज्ञे सोमलता ॥ ॥ ॥

रसपानकर्त्ता इत्यमरटीकायां
रामाश्रमः ॥
सोमपीती पुं सोमपः इत्य
मरः तस्य रूपान्तरे सोमपी
थी सोमपीवी इति
केचित्
सोमबन्धुः पुं कुमुदः इति
शब्दरत्नावली सूर्य्यः बुधः
यथा मित्राणि सूर्य्याच्छशिभौम
जीवाः सूर्य्यानुज्ञौ सूर्य्यशशाङ्क
जीवाः आदित्यशुक्रौ रवि
चन्द्रभौमाः बुधार्कजौ चन्द्रभा
र्गवौ च इति ज्योतिस्तत्त्वे सोम
भूः पुं जिनराजभेदः
इति हेमचन्द्रः बुधग्रहः
सोमपुत्रत्वात् सोमवंशोद्भ
वेत्रि ॥
सोमयागः पुं सोमलतारसपा
नाङ्गकत्रैवार्षिककर्मविशेषः
यथा नारद उवाच सोमयाग
विधानं च कथय मां मुनिसत्तम
कथं तत् कारयामास गुरुश्चकिं
फलं परं नारायण उवाच
ब्रह्महत्याप्रशमनं सोमया
गफलं मुने वर्षं सोम
लतापानं यतमानः करो
ति च वर्षमेकं फलं धत्ते
वर्षमेकं ॥

मलं मुदा त्रैवार्षिक इदं
यागं सर्वपापप्रणाशनं य
स्त्रैवार्षिकं धान्यं निदधीत भृ
त्यवृत्तये अधिकं वापि वि
द्येत स सोमं पातुमर्हति ॥
महाराजस्य देवो वा यागं
कर्त्तुमलं मुने न सर्वस्याध्यो
यज्ञो यं वस्त्रेशो वहदक्षिणः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ६० अध्यायः ॥
सोमयाजी पुं सोमयागकर्त्ता
सोमशब्दपूर्वकयजधातोर्णि
न् प्रत्ययेन निष्पन्नः चन्दनवि
शेषः यथा सुशीतलं चन्दनं
यत् तैलपर्णिकमुच्यते उभौ
तत्पर्य्यायौ सोमयोनि।
शिलोद्भवं इति शब्दचन्द्रिका
सोमराजिका स्त्री सोमराजी
इति शब्दरत्नावली ॥
सोमराजी पुं लताविशेषः
सोमराज इति हाकुच इति च
भाषा तत्पर्य्यायः अवल्
गुजः २ सुवल्लिः ३ सोमव
ल्लिका ४ कालमेषी ५ कृष्ण
फला ६ वाकुची ७ पूतिफ
ली ८ इत्यमरः सोमराजी ९
सुवल्ली १० सोम ॥ ॥

वल्लिः ११ कालमेषी १२ इति
भरतः सोमवल्ली १३ वागुजी
१४ वाकुजी १५ कालमेषिका
१६ सोमराजिका १७ इति शब्द
रत्नावली अन्यच्च वाकुजी चन्द्र
लेखा स्यात् सोमराजी सुवल्ल
गुजा कृष्णा पूतिफला कुष्ठ
नाशिनी सा तिक्ता परा इति
रत्नमाला अस्य गुणाः वात
कफकुष्ठत्वग्दोषनाशित्वं इ
ति राजवल्लभः अपि च अव
ल्गुजो वाकुची स्यात् सोमरा
जी सुपर्णिका शशिलेखा कृ
ष्णफला सोमा पूतिफलीति
च सोमवल्ली कालमेषी कुष्ठ
घ्नी च प्रकीर्त्तिता वाकुची मधु
रा तिक्ता कटुपाका रसायनी वि
ष्टम्भहृद्धिमा रुच्या सरश्लेष्मास्र
पित्तनुत् रूक्षा हृद्या श्वासकुष्ठ
मेहज्वरकृमिप्रणुत् तत्फ
लं पित्तलं कुष्ठकफानिलहरं
कटु केश्यं त्वच्यं कृमिश्वासका
सशोथामपाण्डुजित् इति भा
वप्रकाशः राजनिर्घण्टौ गुण
पर्य्यायौ वाकुचीशब्दे द्रष्टव्यौ
सोमराजी स्त्री वाकुजी इत्य
मरटीकायां भरतः ॥ ॥ ॥



सोमलता स्त्री स्वनामख्यातल
ता तत्पर्य्यायगुणाः सोमवल्ली
सोमलता सोमा क्षीरी द्विजप्रि
या सोमवल्ली त्रिदोषघ्नी कटु
स्तिक्ता रसायनी इति भा
वप्रकाशः अपि च सोमव
ल्ली महागुल्मा यज्ञश्रेष्ठा ध
नुर्लता सोमार्ही गुल्मवल्ली
च यज्ञवल्ली द्विजप्रिया सोम
क्षीरी च सोमा च यज्ञांगा रुद्र
संख्यया सोमवल्ली कटुः शी
ता मधुरा पित्तदाहहृत् तृष्णा
विशोषशमनी पावनी यज्ञ
साधनी इति राजनिर्घण्टः॥
सोमलतिका स्त्री गुडूची इति
राजनिर्घण्टः॥
सोमवंशः पुं युधिष्ठिरराजः
इति धरणी चन्द्रसन्तानः तद्वि
वरणं यथा हरिरुवाच सूर्य्य
स्य कथितो वंशः सोमवंशं शृ
णुष्व मे नारायणसुतो ब्रह्मा ब्र
ह्मणोऽत्रिसमुद्भवः अत्रेः सोम
स्तस्य भार्य्या तारा सुरगुरोः प्रि
या सोमात्तस्यां बुधो जज्ञे बु
धपुत्रः पुरूरवाः बुधपुत्राद
थोर्व्वश्यां षट्पुत्रास्त्वभवन् श्रुता
युः विश्वावसुः शतायुश्च आयु
र्धीमानमावसुः अमावसोर्भू
द्भीमो भीमपुत्रश्च काञ्चनः
काञ्चनस्य सुहोत्रोऽभूत् जह्नु
श्चाभूत् सुहोत्रतः जह्नोः सु
मन्तुरभवत् सुमन्तोरुपजाप
कः उपजापकस्याभूत् अपि अज
पकोऽपि पाठः बलाकाश्वो
ऽस्य पुत्रोऽभूत् बलाकाश्वात्
कुशः स्मृतः कुशाश्वः कुशना
भश्चामूर्त्तरयो वसुः कुशाम्
गाधिः कुशाश्वात् संजज्ञे वि
श्वामित्रस्तदात्मजः कन्या स
त्यवती दत्ता ऋचीकाय द्विजा
यस्मा ऋचीकाज्जमदग्निसुत
मस्मादभवत् सुतः विश्वामि
त्रात् देवरातमधुच्छन्दादयः
सुता आयुषो नहुषः पुत्रस्थाने
ना रजि रंभको तत्रवृद्धः तत्र
वृद्धात् सुहोत्रश्चाभवन्नृपः का
श्यकाशगृत्समदाः सुहोत्रात् अ
भवंस्त्रयः गृत्समदाच्छौनकोऽ
भूत् काश्यात् दीर्घतमाः सुता वै
द्यो धन्वन्तरिस्तस्मात् केतुमांश्च त
दात्मजः केतुस्थाने भीम इत्यपि
पाठः भीमरथः केतुमतो दिवो
दासस्तदात्मजः दिवोदासात्
प्रतर्द्दनोऽभूच्छत्रुजित्। ॥॥

लोके विश्रुतः ऋतध्वज स्त
स्य पुत्रोऽलर्कश्च ऋतध्वजा
त् अलर्कात् सन्नतिर्जज्ञे स
न्नतेः सुनीथः सुतः सुकेतुः स
नीथस्य सत्यकेतो विभुः सुतः
विभोस्तु सुविभुः पुत्रः सुवि
भोः सुकुमारकः सुकुमाराद्धृष्टके
तुर्वीतिहोत्रस्तदात्मजः सुकु
मारस्थाने सुकुमारकोऽपि पा
ठः वीतिहोत्रस्य भार्गोऽभूत् भा
र्गभूमिस्तदात्मजः भार्गभूमि
स्थाने भर्गभूमिरिति च पाठः
...ः समदात्मान इत्येते
काश्यपो नृपाः पञ्चपुत्रशता
न्यासन् रजेः ... संजाताः
...स्तत्र ... संजय
श्च तदात्मजः विजयः संज
यस्यापि विजयस्य कृतः सुतः
कृतात् हर्य्यश्चाभूत् सहदे
व स्तदात्मजः ... स्थाने रु
नदृश इति च पाठः सहदेवाददी
नोऽभूत् जयसेनो ष्वदीनतः
जयसेनात् संकृतिश्च तनय
र्मश्च संकृतेः पूर्तिर्ययातिसंज्ञा
तिर्ययातिर्विख्यातिः कृतिः नृ
कुषश्च सुताः ख्याता ययातेर्नृ
पतेस्तथा यदुं च तुर्वसुं चैव॥
देवयानी व्यजायत द्रुह्युं चानुं
च पूरुं च शर्मिष्ठा वार्षपर्व
णी सहस्रजित् क्रोष्टुनमा रघु
र्यदुपुत्राः सुताः सहस्रजितः
शतजित्तस्माद्धैहयहैहयौ
सुतौ वेणुहयपुत्रो धर्मो हैह
यस्तोऽभूत् कुन्तिर्धर्मनेत्रतः
कुन्तेर्बभूव साहंजि महिष्मान्
स्तु तदात्मजः साहंजिस्थाने सा
हंजिरिति च पाठः भद्रश्रेण्य
स्य दुर्मदः दुर्मदस्थाने दुर्दम
इति च पाठः धनको दुर्मदाद्धै
व कृतवीर्य्यश्च धानकिः कृता
ग्निः कृतकर्म्मा च कृतभोजश्च सम
हाबलः कृतभोजस्थाने कृतौ
जा इति च पाठः कृतवीर्य्याद
र्जुनोऽभूत् अर्ज्जुनात् शूरसेनकः
जयध्वजो मधुः शूरो वृषणः
पञ्च सुव्रताः जयध्वजात्तालज
ङ्घोऽभवत् तालजङ्घनः वृषण
स्य मधुः पुत्रो मधोर्वृष्ण्यादि
कः क्रोष्टोर्ध्वजिनीवान्
पुत्र आदिस्तस्य महात्मनः
आदिस्तस्य महात्मनः॥
आदिस्थाने स्वादिरिति च
पाठः आदेरुशङ्कः संज
ज्ञे तस्य चित्ररथः ॥॥॥

सुतः शशविन्दु श्चित्ररथात्प
त्नीलक्षे तस्यासन् दशलक्षंच॥
पुत्राणां पृथुकीर्त्यादयो वराः
पृथुकीर्त्तिः पृथुजयः पृथुदा
नः पृथुश्रवाः पृथुश्रवसोऽभू
त्तमउशना तमसोऽभवत् ततपु
त्रः शितपुर्नाम श्रीरुक्मकवचस्त
तः शितपुर्नामस्थाने शितउशगु
रिति च पाठः रुक्मेषुः पृथुरु
क्मज्यामघः पालितो हरिः
श्रीरुक्मकवचसोने विदर्भो
ज्यामघात्तथा भार्य्यायांचैव॥
शैव्यायां विदर्भात् क्रथकैशि
को रोमपादो रोमपादात्
वभ्रोर्धृतिस्तस्या कौशिकस्य चि
दिः पुत्रो तत श्चैद्यो नृपः किलः
कुन्तिः किलस्य पुत्रोऽभूत् कु
न्ते र्धृष्टिः सुतः स्मृतः धृष्टेर्ध्रुनि
वृत्तिः पुत्रो दशार्होनिवृत्तेस्त
स्य दशार्हस्यसुतो व्योमा जीमू
तस्तु तदात्मजः व्योमस्थाने व्या
सा इति च पाठः जीमूतादिकृति
जैस्ततो भीमरथोऽभवत् ततो
मधुरथो नवरथः शकुनिस्तस्माच्चा
भजः करम्भिः शकुनेः पु
त्रस्तस्य देवरातः सुतः देव
रातोदे ॥ ॥ ॥

वमतात् देवक्षत्रात्मधुः सुतः कुरु
वंशो मधोः पुत्रोस्तनुश्च अनुवं
शात् पुरुहोत्रो ह्यनोः पुत्रो
अंशुश्च पुरुहोत्रतः सत्व
सुतः सात्वतासन् सप्त वै माताः
नृपाः भजिनो भजमानश्च
सात्वतस्यकः सुतः महा
भोजो वृष्णिर्देव्या मघ्योदे।
वावृधोऽभवत् निम्लोचि
भजमानात् प्रभाजित्थेव
प्रभुश्रभाजित्याते प्रभुताजि
त इति च पाठः शतजित्सह
स्राजित् वभ्रुर्देवावृधस्यासी
द्दाभोजास्तुभोजोऽभूत् वृष्णे
र्युधाजित्सुमित्रकः युधाजित
स्तत्सुतस्तस्मादनमित्र शिनी
तथा अनमित्रस्य निम्नोऽभू
त् निम्नात् सत्राजितोऽभवत्
प्रसेनश्चापरः ख्यातो ह्यनमित्रा
च्छिनिस्तस्मात् शिनेस्तस्य सत्यकः
पुत्रः सत्यकात् सात्यकिस्तस्य
सात्यकेः सञ्जयः पुत्रः कुनि
श्चैव तदात्मजः [illegible]
रः पुत्रस्तु शैनेयाः प्रकीर्त्ति
ताः कुणिस्थाने कुणिरिति च
पाठः अनमित्रस्य पृश्निः
स्तस्मिन् दाशार्हाः चित्रकस्यान्ये

[illegible] इति च पाठः श्वफल्का
[illegible] नामसुते वैसकोऽ
भवत् उपमद्गु [illegible] अक्रूर
दत्वाद्यास्ततः स्मृता देववान्
[illegible] श्च अक्रूरस्य सुतौ स्मृतौ
प्रसुर्विशिष्टश्चित्ररथश्चान्धक
[illegible] सुतः कुकुरो भजमा
नस्तथा शुचिः कम्बलबर्हिषः धृष्ट
[illegible] सेनस्मात् कपोत
रोमकः तदात्मजो विलोमा
तु विलोमस्य तुम्बुरुः सुतः तस्मा
द्दुन्दुभिर्जज्ञे पुनर्वसुः तस्य सु
तः [illegible] आहुकश्चाहुकी च क
न्या चैवाहुकस्य च देवकश्चो
ग्रसेनश्च देवकात् देवकीत्य
भूत् वृकदेवोपदेवा च सहदे
वा सुरक्षिता श्रीदेवी शान्ति
देवी च वसुदेव उवाह ताः देव
श्चाङ्ग देवश्च सहदेवास्तैस्त
तो उग्रसेनस्य कंसोऽभूत् तस्य ना
मा नवकाद्यः विदूरथो भज
मानाच्छूरश्चाभूद्विदूरथात् शू
रस्याने शीव इति च पाठः शू
रस्यापि मारीषाजः प्रतिक्षत्र
स्तु पार्ष्णिः स्वयंभोजस्तदा
त्मजः [illegible] कृष्ण हृदिकभोजा
[illegible] स्तदात्मजः देवःश

तथनुश्चैव शूराद्वै देवमीढुषः
दशपुत्रा मारिषायां वसुदेवा
दयोऽभवन् पृथाच श्रुतदे
वीच श्रुतकीर्त्तिः श्रुतश्रवाः
राजाधिदेवी शूराच्च पृथाकु
न्तेः सुतामदात् सा दत्ता कुन्ति
ना पाण्डोस्तस्यां धर्म्मानिलेन्द्र
कैः युधिष्ठिरो भीम पार्थौ न
कुलः सहदेवकः माद्र्यां ना
सत्यदस्राभ्यां कुन्त्यां कर्णः पु
राऽभवत् श्रुतदेव्यां दन्तवक्त्रो
जज्ञे वेद्धर्म्मणः सुतः
नादयः पंचश्रुतकीर्त्त्यां च के
कयात् राजाधिदेव्यां विंद
श्चानुविंदश्च जज्ञिरे श्रुतश्र
वाः दमघोषात् प्रजज्ञे शिशु
पालकः पौरवी रोहिणी भा
र्य्या मदिरानकदुन्दुभेः देवकी
प्रमुखा भद्राः रोहिण्या बल
भद्रकः सारणाद्याः याच श्चै
व रेवत्यां बलभद्रतः निशठ
श्चोल्मुकोजातो देवक्यां वसुदेवा
च जज्ञिरे कीर्त्तिमांश्च सुषेण
श्च उदार्य्योभद्रसेनकः ऋजुदा
सो भद्रदेवः कंस एताववधीच्च
तान् संकर्षणः सप्तमोऽभूद
ष्टमः कृष्ण एवच षोडश स्त्री
सहस्राणि॥

भार्य्यायांञ्चाभवन् हरेः रुक्मि
णी सत्यभामा च लक्ष्मणा चारु
हासिनी श्रेष्ठा जांववती चाष्टौ
जज्ञिरे तान् वहून् सुतान् प्र
द्युम्नश्चारुदेष्णश्च प्रधानाः
शांवएवच प्रद्युम्नादनिरुद्धो
भून्मनस्विन्यां महावलः मन
स्विन्यां स्थाने ककुद्मिन्यामिति
पाठः अनिरुद्धात् सुभद्रायां
वज्रो नाम सुतोऽभवत् प्रति
वाहु वज्रसुत श्चारुस्तस्य सु
तोऽभवत् वह्निश्चारोः सुतो
जज्ञे वह्नेर्भार्गोऽभवत् सुतः
इत्यत्र वह्निस्तुर्वसोर्वंशः
इत्याद्यपादे पाठः भर्गाद्भानु
भूत् पुत्रो भानोः पुत्रः करं
धमः करन्धमस्य मरुतोऽ
सौ वंशं निवोध मे ॥
द्रुह्योस्तु तनयः सेतुरावद्धश्च
तदात्मजः आवद्धस्यैव गांधा
रोऽथ गांधारतोऽभवत् ॥
आवद्ध स्थाने आरद्ध इति आ
वर इति च पाठः घृतस्तद्धर्म
पुत्रोऽभूद्दुर्दमश्च घृतस्य तस्य
चेता दुर्दमस्यैव अनोर्वंशं
श्रृणुष्व मे अनोः सभा
नवः पुत्रस्तस्मात् कालंजयो

भवत् सभानरस्थाने सभाव
न इति सतारण्य इति च कालं
जयस्थाने कालानल इत्यपिपा
ठः कालंजयात् संजयोऽभूत्
संजयात् पुरंजयः जनमेजय
न्तस्माभूत् महामना महाशा
लस्तदात्मजः महामना महाशा
लाङ्गसीनर इति सुतः उशीन
राच्छिवि र्जज्ञे वृषदर्भः शिवेः
सुतः महाने तितिक्षाः पु
त्रोऽभूत्तज्जयद्रथः हेमो जय
द्रथाज्जज्ञे सुतपा हेमतोऽ
भवत् जयद्रथस्थाने रुषद्र
थ इति च पाठः वलिः सुतप
सो जज्ञे अंग वंग कलिंगकाः
सुत पौत्राश्च वालेया अनपा
नस्तथांगतः अनपानाद्दिवि
रथस्ततो धर्मरथाश्चित्ररथल
दात्मजः पृथुलाक्षः सुतस्त
स्य चंपोऽभूत् पृथुलाक्षतः
चंपपुत्रस्तु हर्यंगस्तस्य भद्ररथः
सुतः वृहत्कर्म्मा भद्ररथस्य वृहद्
भानुस्ततोऽभवत् वृहन्मना वृह
द्भानोस्तस्य पुत्रो जयद्रथः ज
यद्रथस्य विजयो विजयस्य
धृतिः सुतः धृते र्धृतव्र
तः पुत्रः सत्यकर्म्मा ॥ ॥

धृतव्रतात् तस्य पुत्रस्त्वधिरथः
कर्णस्तस्य सुतोऽभवत् वृषसे
नस्तु कर्णस्य पुरुवंशं श्रृणुष्व मे
इत्यादि [illegible] अध्यायः
हरिरुवाच जनमेजयस्य पूरो
श्च मनस्यु र्जनमेजयात् तस्य
पुत्रा [illegible]
दात्मजः [illegible] स्थाने सुद्युरिति
च पाठः सुद्योर्वहुगतः पुत्रः
संयातिस्तस्य चात्मजः
वत्सजातिश्च संयाते रौद्राश्व
स्तदात्मजः वत्सजातिस्थाने
वृर्गजातिरिति च पाठः ऋतेयुः
स्थण्डिलेयुश्च कक्षेयुश्च कृकेयुकः
जलेयुः संनतेयुश्च रौद्राश्वस्य स
तावराः रतिनावः ऋतेयोश्च
तस्य प्रतिरथः सुतः तस्य मेधा
तिथिः पुत्रस्तवंसो रैनिलः सु
तः ऐनिलस्य तु दुष्यंतो भवत् ।
तस्य चात्मजः शाकुंतलायां सं
जज्ञे वितथो भरताद्भूत्
वितथस्य मन्युः पुत्रो मन्योश्च
तन्नरः सुतः नरस्य संकृतिः
पुत्रः सुसन्धिः संकृतेः सुतः
सुसन्धि स्थाने गर्गश्च इति पा
ठः गर्गाद मन्युर्ज्ञे वै शिनिस्त

स्य व्यजायत अमन्युस्थाने भूम
न्युरिति च पाठः भुमन्योश्च महा
वीर्य्यादुरुक्षयः सुतोऽभवत् उरु
क्षयात् त्रय्यारुणिर्वृहत्क्षत्राच्च
स्तु जात् सुहोत्रस्तस्य हस्ती च अ
जमीढ द्विमीढकौ हस्तिनः पु
रुमीढश्च कृतोऽभूदजमीढतः
कंवान्मेधातिथि र्जज्ञे यतः का
वायना द्विजाः अजमीढाद्वृह
दिसस्तत् पुत्रश्च वृहद्धनुः
वृहत्कर्म्मा तस्य पुत्रस्तस्य पु
त्रो जयद्रथः जयद्रथाद्विश्व
जित् सेनजिच्च तदात्मजः रु
चिराश्वः सेनजितः पृथुसेनस्त
दात्मजः पारस्तु पृथुसेनस्य पा
रान्नीपोऽभवन्नृपः नीपस्य सम
रः पुत्रः सुकृतिस्ततोऽभवत्
विभ्राजादनुहोऽभवत् कृत्वीत
स्याङ्कृदत्तो विष्वक्सेन स्तदात्म
जः यवीनरो द्विमीढस्य धृतिमां
श्च यवीनरात् धृतिमतः सत्यधृ
तिर्दृढनेमिस्तदात्मजः दृढने
मेः सुपार्श्वोऽभूत् सुपार्श्वात्
सन्नतिस्तथा कृतस्तु संनतेः पु
त्रः कृताद्दुग्रायुधोऽभवत् उग्रा
युधाच्च तस्मोऽभूत् क्षेमस्तदा
त्मजः ॥




पुरंजय स्तं वरीषात् तस्य पुत्रो
विहूरथः अंवरीषस्याने स्वौ
र इति च पाठः अजमीढाच्च नलि
न्यां च नीलो नाम सुतोऽभवत्
नीलात् शांति रभूत् पुत्रः
सुशांतिस्तस्य चात्मजः सुशां
तेश्च पुरुजातोऽर्कस्तस्य सु
तोऽभवत् अर्कस्यैव हर्य
श्वो हर्यश्वान्मुद्गलोऽभवत्
यवीनरो बृहदिषुः कंपिल्यः
संजयस्तथा पंचालान्नृकुला
जज्ञे भार्म्याश्वस्तस्य चात्मजः त
स्य चात्मजस्थाने वैस्ववोमहान्
इति च पाठः दिवोदासो द्विती
यश्च अहल्यायां शरद्वतः शता
नन्दोऽभवत् पुत्रस्तस्य सत्यधृ
तिः सुतः कृपः कृपी सत्यधृ
तेरूर्वश्या वीर्य्यहानितः द्रोण
पत्नी कृपीजज्ञे अश्वत्थामान
सुतन्तमं दिवोदासान्मित्रयुश्च मित्र
योश्च्यवनाज्जज्ञे सौदासस्तस्य चात्म
जः सहदेवस्तस्य पुत्रः सहदेवा
त्तु सोमकः जंतुस्तु सोमकाज्ज
ज्ञे पृषतश्चापरो महान् पृषता
त् द्रुपदो जज्ञे धृष्टद्युम्नस्त
तोऽभवत् धृष्टद्युम्नात् धृ ॥

(margin) च्यवनोऽभवत् सुदास

ष्टकेतुः ऋक्षोऽभूदजमीढतः ऋ
क्षात् संवरणो जज्ञे कुरुः संव
रणादभूत् सुधन्वश्च परीक्षि
त्तु जह्नुश्चैव कुरोः सुताः सुध
न्वनः सुहोत्रोऽभूत् च्यवनोऽ
भूत् सुहोत्रतः च्यवनात्
कृतको जज्ञे यश्चोपरिच
रो वसुः बृहद्रथश्च प्रत्यग्रः स
त्याद्याश्च वसोः सुताः बृहद्र
थात् कुशाग्रश्च कुशाग्रात्
ऋषभोऽभवत् ऋषभात् पु
ष्पवान् तस्मात् जज्ञे सत्यहितो
नृपः सत्यहितात् सुधन्वा भूज्ज
ह्नुश्चैव सुधन्वतः जह्नुस्थाने ज
न्हुरिति च पाठः बृहद्रथाज्जरा
सन्धः सहदेवस्तदात्मजः स
हदेवाच्च सोमापिः सोमापेः श्रु
तवान् सुतः भीमसेनः प्रसेनो
ऽश्रुतसेनोऽपराजितः प्रसे
नस्थाने उग्रसेन इति च पाठः
जनमेजयश्चान्योऽभूज्जह्नो
स्तु सुरथोऽभवत् विदूरथ
स्तु सुरथात् सार्वभौमो विदू
रथात् जयत्सेनः सार्वभौमाद
राधीतस्तदात्मजः अयुताचुतस्य
पुत्रस्तस्य चाक्रोधनः सुतः अक्रोध
नस्यातिथिश्च ऋक्षोऽभूदति

थेः सुतः ऋक्षाच्च भीमसेनोऽ
भूद्दिलीपो भीमसेनतः प्र
तीपोऽभूद्दिलीपात्तु देवापि
स्तु प्रतीपतः शान्तनुश्चैव वा
ह्लीकस्त्रय स्ते भ्रातरो नृपाः
वाह्लीकात् सोमदत्तोऽभूत्
भूरि र्भूरिश्रवा ततः शल्यश्च
शान्तनो र्भीष्मो गंगायां धार्म्मि
को महान् चित्रांगद विचित्रौ
तु सत्यवत्यां शान्तनोः ॥ ॥
विचित्रवीर्य्यभार्य्ये द्वे अंविका
ऽम्बालिका तयोः धृतराष्ट्रं च पां
डुं च तद्दास्यां विदुरं तथा ॥
व्यास उत्पादयामास गांधार्य्यां
धृतराष्ट्रतः शतं पुत्रं दुर्योध
नाद्यं पाण्डोः पंच प्रजज्ञिरे ॥
प्रतिविन्ध्यः सुतः सोमः श्रु
तकीर्त्तिस्तु चार्जुनात् शता
नीकः श्रुतकर्म्मा द्वौ पद्यां पंच
वै क्रमात् यौधेयी च हिडिंवा ॥
च काशी चैव सुभद्रिका विज
या वै वेणुमती पंच भ्यस्तु सुताः
क्रमात् देवको घटत्कचश्च
अभिमन्युश्च सर्वगः सुहोत्रो ॥
निरमित्रश्च परिक्षिद भिमन्युजः
अत्र अहोत्रो निरपत्र ॥ ॥
श्रुतिन्त्रनीपचरणे पाठः ज

नमेजयश्च ततो भविष्यांश्च नृ
पाश्शृणु इति गारुडे १४५
अध्यायः ॥
सोमवल्कः पुं श्वेतखदिरः ॥
कट्फलः इत्यमरः मेदिनीकरौ
करंजः इति जटाधरः
रीठाकरंजः इति राजनिर्घण्टः
सोमवल्लरी स्त्री सोमलता तत्
पर्य्यायः ब्राह्मी २ मत्स्याक्षी ३
वयस्था ४ इत्यमरः चत्वारि
सोमलतायां ब्राह्मी शाक इति
केचित् अतिपवित्रत्वेन ब्रह्म
णः प्रियत्वात् ब्रह्मणो ब्राह्मण
स्य वा इयं ब्राह्मी स्यः नन्दा नित्
इ चाभिचरतीति मनवज्ञीनि
ति निषेधाभावे नोत्नीयो ताबि
ति तस्य लोपः णिन्ने त्रिरिति
वृद्धिः षिलादीप् अनित
श्चेन्मुक्ते णित्वाभाव विवक्षया
वृद्ध्यभावे ब्रह्मीच ब्राह्मी वय
स्यामत्स्याक्षी ब्रह्मी च सोमव
लरी इति शाब्दपातिः मत्
स्यादितुल्य पुष्पत्वात् मत्स्या
क्षी वयो यौवनं तिष्ठत्यनया
वयःस्था भिदादित्वात् ङः म
ध्य विसर्गो मनीषादित्वात् विस
र्गलोपे निर्विसर्गीच सोमेन ॥ ॥



योगार्थ मुपात्रेति सोमवल्लरी
अर्थपरत्वात् इन्दुवल्लरी चन्द्र
वल्लरी इत्याद्यपि वल्ल्या लता
र्थपरत्वात् सोमवल्ली सोमलता
सोमवल्लिका इत्याद्यपि पाठः ॥
इति भरतः ॥
सोमवल्लिका स्त्री सोमराजी ॥
इत्यमरः सोमलता इति ॥
भरतः ॥
सोमवल्ली स्त्री गुडूची इत्य ॥
मरः सोमलता इति तट्टीका
यां भरतः सोमराजी इति
शब्दरत्नावली पातालगरुडी
ब्राह्मी सुदर्शना इति
राजनिर्घंटः ॥
सोमवारः पुं सोमस्य भोग्य
दिनं चन्द्रवासरं यथा सोमवा
रेप्यमावास्या आदित्याहे च स
प्तमी चतुर्थी भौमवारे च
अष्टम्यादपि चाष्टया इति ति
थ्यादितत्त्वं तद्दिवसीयवार
वेला यथा रवौ वर्ज्यं चतुः पंच
सोमे सप्तद्वयं तथा इति ज्योतिः
सागरसारः
तद्रात्रौ कालवेला यथा रवौ ॥
षष्ठं विधौ वेदं कुजवारे द्वि
तीयकं बुधे सप्त गुरौ पंच ॥

भृगुवारे तृतीयकं शनावाद्यं
तथा चांते रात्रौ काले
विवर्जयेत् इति ज्योतिः ॥
सागरः ॥
सोमविक्रयी पुं सोमलतारस
विक्रयकर्त्ता यथा पापो हि
सोमविक्रयी इति मलमास
तत्त्वे आश्वलायनब्राह्मणं ॥
सोमवृक्षः पुं कट्फलवृक्षः इ
ति रत्नमाला श्वेतखदिरः इति
राजनिर्घंटः ॥
सोमशकला स्त्री शशांकुली ॥
इतिराजनिर्घंटः चन्द्रखंडवे
विशिष्टा च ॥
सोमसंज्ञं क्ली कर्पूरं इति ॥
रत्नमाला ॥
सोमसारः पुं श्वेतखदिरः ॥
इति राजनिर्घंटः
सोमसिद्धांतः पुं बुद्धभेदः
इति जटाधरः ज्योतिर्ग्रंथ
विशेषश्च ॥
सोमसिद्धांती पुं सोमसिद्धांत
वेत्ता सोमसिद्धांतशब्दा ॥
दिन् प्रत्ययेन निष्पन्नं ॥
सोमसिंधुः पुं विष्णु इति ॥
त्रिकांडशेषः ॥
सोमसुत् पुं यागे सोमलता ॥

रसक्षेपकर्त्ता सोमे सुञ् इ
त्यनेन सोमशब्दपूर्वक सुधा
तोः क्विप् प्रत्ययेन निष्पन्नः
इति सिद्धांतकौमुदी ॥
सोमसुता स्त्री नर्मदानदी इ
ति राजनिर्घंटः बुधे पुं ॥
सोमसूत्रं क्ली प्रणाले तत्र
शिवलिंगस्य गौरीपट्टजलनि
र्गमस्थानं यथा शिवप्रदक्षि
णे मंत्री अर्द्धचन्द्रक्रमेण तु
सव्यासव्यक्रमेणैव सोमसूत्रं
न लंघयेत् सोमसूत्रं जलनिः
सरणस्थानं इति तन्त्रसारे सा
मान्यपूजापद्धतिः ॥
सोमक्षयः पुं अमावास्या इति
महाभारते दानधर्मः ॥
सोमाख्यं क्ली रक्तकैरवं इति
रत्नमाला
सोमाभा स्त्री चन्द्रावली इति
भक्तिरसामृतसिंधुः ॥
सोमालः त्रि कोमलः इति
हेमचन्द्रः ॥
सोमाहः पुं सोमवारः इति
ज्योतिषं ॥
सोमेश्वरः पुं काश्यां सोमक
र्तृकप्रतिष्ठितशिवः यथा ॥
शिवरूपाधिष्ठितस्तु शिवरूपो

गिरिः स्मृतः सोमेन तत्र संस्था
प्य स्वनाम्ना लिंगमुत्तमं
वर्षाणां तु सहस्रं वै लक्षमाप
स निश्चलः ततः तुष्टा दिनि
मंत्रक्लेजसा च परिप्लुतः स्व
कं तेजोबलं प्राप्य तुष्टाव गि
रिजापतिं सोमेश्वरात्तु व
रदमाविर्भूतं त्रियम्बकं इति
वाराहे सोमेश्वरादिलिंगमहि
मावमुक्तिक्षेत्रत्रिवेण्यादिम
हिमनामाध्यायः ॥
सोमोद्भवा स्त्री नर्मदानदी
इत्यमरः सोमजाते त्रि ॥
सोलष्टः पुं सोलष्टनं इति
हलायुधः ॥
सोलष्टनं क्ली स्तुतिपूर्वकउ
वादः यथा उद्वादः सउपालंभ
लवचः स्तुतिपूर्वकः सोलष्ट
नं सनिन्दस्तु यस्तत्र परिभाषणं
इतिजटाधरः
सोलष्टोक्तिः स्त्री सव्यंगोक्तिः
यथा उपनायक मानेतुं ॥
प्रेषिता तदुपभोगलग्नचन्द्
नादीन् वापीस्नानव्याजेन गो
पयंती दूतीं प्रति सोलष्टो
क्ति रिय मिति निः शेषच्युत
चन्दन मिति श्लोक व्याख्या
ने॥ ॥॥ ॥

काविप्रकाशटीकायां महेश्व
र न्यायालंकारः
सौकरः त्रि सूकरसंबंधी इ
ति सूकरशब्दात् तस्यत्ययेन
निष्पन्नः॥
सौकरिकः पुं व्याधः सिका
री इति भाषा इति केचित्
सौकर्य्यं क्ली अनायासः सू
करस्यक्रिया इति विश्वः॥
सौखसुप्तिकः त्रि वैतालिकः
यथा वैतालिका बोधकरा
अर्थिकाः सौखसुप्तिकाः इति
हेमचंद्रः
सौखिकः त्रि सुखार्थी सौकी
न इति भाषा इति महाभारते
राजधर्मः॥
सौख्यं क्ली सुखं इति हेम
चन्द्रः अकिंचिदपि कुर्वाणः
सौख्यैर्दुःखान्यपोहति इत्य
मरटीकायां भरतः सुखत्वं
सुखस्यभावः इत्यर्थे ष्यप्रत्य
येन निष्पन्नं॥
सौगतः पुं बुद्धविशेषः तत्
पर्य्यायः शून्यवादी २ इति॥
हेमचंद्रः
सौगतिकः पुं बुद्धविशेषः
इति केचित्॥ ॥ ॥

सौगंधं क्ली कत्तृणं यथा
सौगंधिकंच सौगंधं रामकं
पूरके तृणे इति शब्दरत्ना
वली सोभनगंधयुक्ते त्रि॥
सौगंधिकं क्ली कत्तृणं क
ह्लारं इत्यमरः पद्मरागमणिः
इति मेदिनी नीलोत्पले॥
इतिराजनिर्घंटः॥
सौगंधिकः पुं गंधकः इत्य
मरः सुगंधव्यवहारी गंधी
तिहिन्दीभाषा इति मेदिनी॥
सौगंध्यं त्रि सुगंधद्रव्यं सु
गंधस्यभाव इत्यर्थे सुगंधश
ब्दात् ष्यप्रत्ययेन निष्पन्नं॥
सौगंधिका स्त्री यक्षभेदः
इति महाभारते वनपर्व॥॥
सौचिः पुं सौचिकः इति शब्द
रत्नावली॥
सौचिकः पुं सूचीकर्मोपजी
वी दरजी इतिभाषा तत् पर्य्या
यः तन्त्रवायः २ इत्यमरः
सूचिकः ३ सौचिः ४ सूत्रभि
त् ५ इतिशब्दरत्नावली॥
सौजन्यं क्ली सुजनता यथा
सौजन्यं वरवंशजनतास्य वि
भवोदीर्घायु रारोग्यता विज्ञत्व
विनयित्व मिन्द्रियवशः सत् पात्र

दाने रुचिः सन्मंत्री सुसुतः
प्रिया प्रियतमा भक्तिश्चनारा
यणे सत् पुण्येन विना त्रयो
दशगुणाः संसारिणां दुर्लभाः
इत्युद्भटः
सौंडी स्त्री पिप्पली इति शब्द
चन्द्रिका॥
सौत्रः पुं ब्राह्मणः इति हेम
चन्द्रः नियतप्रयोगाभावधा
तुविशेषः यथा धातूना
मिह सौत्राणां द्विचत्वारिंश
दीरिताः इति कविकल्पद्रुमः
सूत्रसंबंधिनि त्रि॥
सौत्रामणी स्त्री यागविशेषः
यथा अथ सौत्रामणी त्रिभिर
ध्यायैः प्रक्रियते सप्तं
महाकल्प मपश्यत् सौत्रामनी
मितिश्रुतेः तत्र सुरां संधीय
ते तत्र मंत्रः स्वाद्वीत्वा स्वदुना
तीव्रां तीव्रेणामृता ममृतेन
मधुमती मधुमता सृजामि सं
सुसोमेन सोमोस्यश्विभ्यां प
च्यस्व सरस्वत्यै पच्यस्वेन्द्राय
सूत्राम्णे पच्यस्व सौत्रामण्याः ऋ
षिः प्रजापतिः सुरा देवता अनु
ष्टुप्छन्दः इति यजुर्वेदस्य का

२१ अध्यायः विस्तारस्तु तत्रै॥
व २१। २२। २३ अध्यायेषु
द्रष्टव्यः यागक्रमस्तु कात्या
यनसूत्रभाष्ये द्रष्टव्यः॥
सौदामनी स्त्री विद्युत् इति
शब्दरत्नावली अप्सरोभेदः
विद्युद्भेदः इति मेदिनी सौ
दामिनी स्त्री विद्युत् इति म
रः तडिद्भेदः अप्सरोभेदः
इत्यहेमचन्द्रः देशविशेषः
इत्यजयः॥ सु
दामा ऐरावत स्तस्यस्त्री सौ
दामनी पत्न्या मीप् हलिश्चम
नीषादित्वात् श्वेतद्विपः सुदामा
चेति ऐरावत पर्य्याये त्रिकां
डशेषः विडंबंजगाम कोच
न सरसम सौदामनीलताथा
मासलं कुवलयमधिमिव सर
सः इति इति हरिप्रबोध यम
कात् सौदामिनीत्यपाठ इतिशु
द्धं इति भरतः सुदामास्ति
तत्र भवा सौदामनीमाला
कारा इत्यर्थः सुदामा पर्व
तः तेनैकदिगिति सूत्रेण
अणास्फटिकमयपर्वत प्रा
न्तभागभवा हि विद्युदतिस्फु
टाभवति इति॥ ॥ ॥

श्रीभागवते १ स्कंधीय ९ अध्याये कालः प्रादुरभूत् कालेन तडित् सौदामनी यथा इत्यस्य टीकायां श्रीधरस्वामी ॥

सौदाम्नी स्त्री सौदामनी इति शब्दरत्नावली ॥

सौदायिकं त्रि पितृमातृभर्तृकुलतः स्त्रीधनं यथा कात्यायनः ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा भर्त्तुः सकाशात् पित्रो वा लब्धं सौदायिकं स्मृतं सौदायिकं धनं प्राप्य स्त्रीणां स्वातंत्र्यमिष्यते यस्मात् तदानृशंस्यार्थं तैर्दत्तं तत् प्रजीवनं सौदायिके सदा स्त्रीणां स्वातंत्र्यं परिकीर्त्तितं विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि सदायेभ्यः पितृमातृभर्तृकुलसंबंधिभ्यो लब्धं सौदायिकं आनृशंस्यमनैष्ठुर्यं इति दायतत्त्वं ॥

सौदासः पुं इक्ष्वाकुवंशीय अयोध्याधिपतिः अस्य नामांतरं कल्माषपादः १ मित्रसहः २ इति पुराणं

सौधः पुं क्ली राजसदनं इत्यमरः सौध्यं इति राजनिर्घण्टः सुधासंबंधिनि त्रि ॥

सौधः पुं दुग्धपाषाणः इति राजनिर्घण्टः ॥

सौधारः पुं नाटकस्य चतुर्दशभागैकभागः इति केचित्

सौधालं क्ली शिवमन्दिरं इति केचित् ॥

सौनन्दं क्ली बलदेवमुषलं इति हेमचंद्रः ॥

सौनन्दी पुं बलदेवः इति त्रिकांडशेषः ॥

सौनिकः पुं पशुपतिमांसविक्रयकर्त्ता तत्पर्यायः वैतंसिकः २ मांसिकः ३ कौटिकः ४ इति हेमचन्द्रः तालव्यशकारादिरपि ॥

सौन्दर्यं क्ली सुन्दरत्वं सुन्दरस्य भावः तस्य लक्षणं यथा अंगप्रत्यंगकानां यः सन्निवेशो यथोचितं सुश्लिष्टः संधिबन्धः स्यात् तत् सौन्दर्यमुदाहृतं इत्युज्ज्वलनीलमणिः सौपर्णं क्ली मरकतं सुण्ठी इति राजनिर्घण्टः सुपर्णसंबंधिनि त्रि ॥

सौपर्णी स्त्री पातालगरुडीलता ॥ ॥ ॥ ॥ ॥

इति राजनिर्घण्टः

सौपर्णेयः पुं गरुडः इति हेमचंद्रः गायत्र्यादिछन्दांसि यथा विनतायास्तु पुत्रौ द्वौ अरुणो गरुडस्तथा म भावत्यः स्वसारश्च यवीयसस्तयोः स्मृताः गायत्र्यादीनि छन्दांसि सौपर्णेयानि पक्षिणः हव्यवाहानि सर्वाणि दिक्षु संनियतानि च इति वह्निपुराणे काश्यपीयवंशकथननामाध्यायः ॥

सौप्तिकं क्ली रात्रियुद्धं तत्पर्यायः निशारणं २ इति जटाधरः रात्रिमारणं ३ इति त्रिकांडशेषः महाभारतीयपर्वविशेषः यथा आदिः सभा वन विराट मथोद्यम भीष्मो गुरुः द्विजमद्रवसौप्तिकं च स्त्रीपर्व शांतिरनुशासन मश्वमेधवासाश्रमो मुषलपानदिकावरोहः इति महाभारतटीका सुप्तसंबंधिनि त्रि

सौभं क्ली हरिश्चन्द्रपुरं इति त्रिकांडशेषः तत्पर्यायः कामचारिपुरं २ इति जटाधरः ॥ ॥ ॥ ॥

सौभद्रः पुं सुभद्रापुत्रः स चाभिमन्युः यथा सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः इति भगवद्गीतायां १ अध्यायः सुभद्रासंबंधिनि त्रि ॥

सौभद्रेयः पुं विभीतकवृक्षः इति शब्दचंद्रिका अभिमन्युः सुभद्राया अपत्यात् ॥

सौभरिः पुं मुनिविशेषः यथा मीनान् खडुः खितान् दृष्ट्वा दीनान् मीनपतौ कृतो कृपया सौभरिः प्राह तत्रत्य होममाचरन् इति श्रीभागवते ९ स्कंधे ६ अध्यायः ॥

सौभागिनेयः पुं सुभगापुत्रः तत्पर्यायः सुभगासुतः २ इत्यमरः सुभागिनेय संबंधिनि त्रि ॥

सौभाग्यं क्ली सिंदूरं टंकणं इति राजनिर्घण्टः सुभगत्वं योगभेदः इति मेदिनी ॥ स च विष्कंभादिसप्तविंशतियोगांतर्गतचतुर्थयोगः तत्र जातफलं सौभाग्यजन्मा सुभगो मनुष्यः श्लाघ्यो जनानां धनवान् गुणाढ्यः उदारचित्तो बलवान् विवेकी महाभिमानी

प्रियभाषणाश्च इति काशीख
ण्डः व्रतविशेषः यथा अ
गस्त्य उवाच अतः परं महा
राज सौभाग्यकरणं व्रतं शृणु
येनाशु सौभाग्यं स्त्री पुंसोरु
पजायते फाल्गुनस्य तमास
स्य तृतीया शुक्लपक्षगा उपो
षितव्या नक्तेन शुचिना सत्य
वादिना सश्रीकं च हरिं पूज्य
रुद्रं वा चोमया सह याश्रीः सा
गिरिजा प्रोक्ता यो हरिः स त्रि
लोचनः एवं सर्वेषु शास्त्रेषु
पुराणेषु च पठ्यते एतस्मादन्य
था यस्तु कुरुते शास्त्रं पृथक्
तया रुद्रो जनानां मर्त्यानां
वाच्यं शास्त्रं न तद्भवेत् विष्णु
रुद्रकृतं कुर्यात्
श्रीगौरीति निगद्यते एतयोरं
तरं यश्च कुर्यात् सोऽधम
उच्यते तेनास्तिकं विजानी
यात् सर्वधर्मबहिष्कृतं
एवं ज्ञात्वा सलक्ष्मीकं हरिं सं
पूज्य भक्तितः मंत्रेणानेनरा
जेन्द्र ततस्तं परमेश्वरं गंभी
रायेति पादौ तु सुभगायेति
वै कटिं उदरं देवदेवाय त्रि
नेत्रायेति वै मुखं वाचस्पत
येच शिरो रुद्रायेति च सर्वतः
एवमभ्यर्च्य मेधावी विलुल
त्या समन्वितं हरं वा गौरीसं
युक्तं गंधपुष्पादिभिः क्रमात्
ततस्तस्याग्रतो होमं कारयेत्
मधुसर्पिषा तिलैः सह स
हाराज सौभाग्यपतयेति च त
तस्त्वतारविरसं निस्नेहं धर
णीतले गोमूत्रमात्रेण भुंजीतक्ष
ारवर्जितं एवं विधिः स्मृतः आषाढा
दि द्वितीये तु पारणं तत्र
भोजयेत् यवान्नेन ततः प
श्चात् कार्त्तिकादिषु पार्थिव
प्रणमाकं तत्र भुंजीत त्रीन् मा
सान् नियतः शुचिः ततो मा
घे सिते पक्षे तृतीयायां नरा
धिप सौवर्णां कारयेद्गौरीं
रुद्रं चैकत्र बुद्धिमान् सल
क्ष्मीकं हरिं चापि यथाशक्त्या
प्रसन्नधीः ततस्तां ब्राह्मणे
दद्यात् पात्रभूते विचक्षणे
अन्नेन हीने वेदानां पारगे
साधुवर्त्तिनि सदाचारे च वा
दद्यात् विप्रभक्ते विशेषतः
षड्भिः पात्रैरुपेतं तं ब्राह्मणा
य निवेदयेत् एकं मधुमयं पा
त्रं द्वितीयं घृतपूरितं तृतीयं ॥

तिलतैलस्य चतुर्थं गुडसंयु
तं पंचमं लवणैः पूर्णं षष्ठं
गोक्षीरसंयुतं एतानि दत्त्वा
पात्राणि सप्तजन्मांतरं भवेत्
सुभगो दर्शनीयश्च नारी वा
पुरुषोऽपि वा इति वाराहे ॥
सौभाग्यव्रतनामाध्यायः ॥
सौभाग्यचिंतामणिः पुं औष
धविशेषः यथा सौभाग्याम्ल
जीरपंचलवणव्योषाभयाता
नला निम्बन्नाभ्रक सुद्ध गंधक
रसाने कीकृतान् भावयेत्
निर्गुंडीयुग्मभृंगराजकहूषाप
मार्गपत्रोल्लसत् सत्योकं स्वर
सेन सिद्धवटिका त्वंति त्रिदो
षोदयं येषां शीतमतीव
देहमखिलं स्विद्यद्रवार्द्रीकृ
तं निद्रा घोरतरा समस्तकरण
व्यामोहरुद्धं मनः स्थूलश्वा
सबलाशकाससहितं मूर्च्छा
रुचिं तृट् ज्वरं तेषां वै परिहृत्य
जीवितमसौ यच्छति स्वस्था
मुखान् इति सारकौमुदी
सौभांजनः पुं शोभांजनवृक्षः
इत्यमरटीकायां भरतः
सौभिकः पुं इन्द्रजालिकः
इति हारावली ॥
सौमनसा स्त्री जाती पत्री इति
राजनिर्घंटः
सौमनस्यं क्ली श्राद्धे पिंडदानां
नंतरब्राह्मणहस्ते पुष्पदानमंत्रः
यथा शातातपः पिंडनिर्वा
परहितं यत्र श्राद्धं विधीयते
स्वधावाचनलोपोऽत्र विकिर
स्तु न लुप्यते अक्षय्यदक्षिणा
स्वस्ति सौमनस्यं यथाक्षिति ॥
छन्दोगपरिशिष्टं अथाग्रभू
मि मासिंचेत् सुसंप्रोक्षित म
स्त्विति शिवा आपः संत्विति च
युग्मानेवोदकेन च सौमनस्य
मस्त्विति च पुष्पदानमनंतरं
अक्षतं चारिष्टं च स्वस्ति च अ
प्यकृतानपि दापयेत् अथाप्र
कृतब्राह्मणाचमनानंतरं ब्रा
ह्मणाग्रभूमिं सुसंप्रोक्षितम
स्त्विति प्रोक्षयेत् शिवा आप
इत्यादिना उदकेन हस्ते सिं
चेत् सौमनस्यमस्त्विति अनेन
हस्ते पुष्पदानं कुर्यात् इति
श्राद्धतत्त्वे सुमनसो भावः सौ
मनस्यं तदत्र श्राद्धे दत्तं
पुष्पं सौमनस्यं मनसः प्रसाद
जनकं भवतु इति गुणविष्णुः
सौमनस्यायनी स्त्री मालतीपु

कलिका इति त्रिकांडशेषः
सौमिकी स्त्री दीक्षणीयेष्टिः
इति हेमचंद्रः
सौमित्रः पुं लक्ष्मणः इतिश
ब्दसौमित्रिः रत्नावली ॥
सौमेधिकः पुं सिद्धः इति
हारावली शोभनमेधासंब
न्धिनित्रि ॥
सौमेरुकं क्ली सुवर्णं इति
राजनिर्घंटः सुमेरुसंबंधिनि
त्रि ॥
सौम्यः पुं बुधग्रहः इत्यमरः
विप्रः इति शब्दमाला
भास्वरः इति धरणी उडुंबर
वृक्षः इति राजनिर्घंटः वृष
कर्कट कन्या वृश्चिक मकर
मीनराशयः यथा क्रूरोऽथ
सौम्यः पुरुषोऽङ्गनाच मेषोऽ
थयुग्मे विषमः समस्थ चरस्थि
रद्व्यात्मक नामधेया मेषाद
योऽमी क्रमशः प्रदिष्टाः
इतिज्योतिस्तत्वे भूखंडविशे
षः यथा गन्धर्वो वरुणःसौ
म्यः वहवः कंकपवच ऊ
सदस्थुकसेरुस्थ नागोभद्रारक
स्तथा चन्द्रेन्द्र मलया शांत्वप
वेगक गभस्तिमान् ताम्राङ्ग
सुकुमारी च तत्र द्वीपदशाष्टभिः
इति शब्दमाला सौम्यकृच्छ्र
व्रतं यथा प्राजापत्यः
सांतपनः शिशुकृच्छ्रं पराक
कः अतिकृच्छ्र पर्णकृच्छ्रः सौ
म्यः कृच्छ्रातिकृच्छ्रकः सौम्यः
सौम्यकृच्छ्रः इति प्रायश्चित्त
तत्वेसौम्यः त्रि अनुग्रः सोम
दैवतः मनोज्ञः इति
मेदिनी ॥
सौम्यकृच्छ्रः पुं व्रतविशेषः
यथा पिण्याकाचामतक्रान्न
शक्तूनां प्रतिवासरं एकैक
मुपवासस्थ कृच्छ्रः सौम्योऽय
मुच्यते इति गारुडे १०५
अध्यायः ॥
सौम्यगन्धी स्त्री शतपत्री
इति राजनिर्घंटः ॥
सौम्यग्रहः पुं शुभग्रहः सच
पूर्णचन्द्रः पापग्रहायुक्तबुधः
बृहस्पतिः शुक्रस्थ यथा अ
क्षीणेन्द्वर्कं सौरारााः पापाः
सौम्यास्तथापरे पापयुक्तो
बुधःपापो राहु केतू च पाप
दौ इति ज्योतिस्तत्वे ॥
सौम्यधातुः स्त्री कफः इति
राजनिर्घंटः ॥ ॥ ॥

सौम्या स्त्री दुर्गा यथा सौम्या
सौम्यतराऽशेषासौम्येभ्यस्त्व
तिसुन्दरी इति देवीमाहा
त्म्यं महेन्द्रवारुणी रुद्र
जटा मही महाज्योतिष्मतीम
ल्लियवल्ली रंजा शालपर्णी
ब्राह्मी शटी मल्लिका इति
राजनिर्घंटः ॥
सौम्याः स्त्री इल्वलाः तास्तु
मृगशिरोनक्षत्रशिरःस्थाः पंच
ताराः इति विश्वहेमचन्द्रो सौ
रः पुं शनैश्चरः इत्यमर
टीकायां भरतः तुंबुरुवृक्षः
इति राजनिर्घंटः सूर्यकरा ॥
शिभोगावच्छिन्नमासादिः य
थाविष्णुधर्मोत्तरे आदित्यरा
शिभोगेन सौरो मासः प्रकीर्त्ति
तः विवाहादिकमस्तु सौरमा
सस्योल्लेखः कर्तव्यः यथा
पितामहः आह्निके पितृक
त्येच मास श्चांद्रमसः स्मृतः
विवाहादौस्मृतः सौरो यज्ञा
दौ सावनो मतः विवाहा ॥
दावित्यत्रादिपदं यात्रा ग्रह
चारपरं यत् कर्म्म सूर्य्यभो
गराश्युल्लिखेन विहित यच्च
विशेष्योदगयनादिविहितं तत्
परंच अनस्य सौरमासचरि
तत्वेन वत्सराणत्वात् तच्च
चूडोपनयनादि विष्णुधर्मो
त्तरे अध्ययनेच ग्रहचारकर्म
सौरेण मानेन सदाव्यवस्येत्
सत्राणयपास्यान्यथ सावने
नलौकांच यत् स्याद्यवहा
रकर्म अध्ययनं अध्यगमनं
यात्रेतियावत् इति ज्योतिस्त
त्वे सूर्योपासकः यथा पौ
वानि गाणपत्यानि शाक्ता
नि वैष्णवानिच साधनानिच
सौराणि चान्यानि यानिकानि
च श्रुतानि तानि देवेशत्वद्व
क्त्रान्निःसृतानि चे वेदतिसेत्र
सारे ३ परिच्छेदः ॥
गुरुविशेषः यथा गौडाः
शाल्वोद्भवाः सौरामागधाः
केरलास्तथा कोषलाश्चदशा
र्णाश्च गुरवः सप्त मध्यमाः
इति तंत्रसारे १ परिच्छेदः
सौरजः पुं तुंबुरुवृक्षः इति
राजनिर्घंटः सौरज्ञातेत्रि
सौरदिवसः पुं सूर्यसंबंधिनं
तत्र रविभुक्तांशाधिकषष्टि
दंडै भवति यथा सावनंद्व्यः
षष्टिरङ्क सलग्नस्वगणे ॥

शाप्त्वा लद्दैनं भवेत् इति
मलमासतत्त्वे त्रिंशता सौ
रदिवसैः सावनः परिकी
र्त्तितः इति शब्दरत्नावली ॥
सौरनक्तं क्ली व्रतविशेष
यथा हस्तशुक्ले अर्कदिने सौ
रनक्तं समाचरेत् स्नात्वार्क
समभ्यर्च्य नीरोगी चिरजीवति
आत्मनो द्विगुणच्छायं यदा
संतिष्ठते रविः सौरनक्तं वि
जानीयात् नक्तं च निशिभो
जनं इति नारसिंहे ८४
अध्यायः ॥
सौरभं क्ली कुंकुमं इतित्रि
कांडशेषः बोलं इति
राजनिर्घंटः सुगंधः सुर
भेर्भाव इत्यर्थे ञ प्रत्ययेन
निष्पन्नं ॥
सौरभेयः पुं वृषः इत्यम
रः सुरभिसंबंधिनि त्रि ॥
सौरभेयी स्त्री गौः इत्यम
र सौरभेयी स्त्री गौः इत्यमर
सौरभ्यं क्ली मनोज्ञत्वं सौगं
धं गुणगौरवं इतिमेदिनी
सौरभ्यः पुं कुवेरः इति
शब्दरत्नावली ॥
सौरमासः पुं सूर्य्यैकराशि

भोगावच्छिन्नकालः यथा व्र
लसिद्धान्ते एकराशौ रवि
र्यावत् कालं मासः सभास्करः
इति मलमासतत्त्वे अपि च
अथ यद्भिः सौरमासे रवनं
परिकीर्त्तितं इति शब्दरत्ना
अस्यान्यद्विवरणं सौर
शब्दे द्रष्टव्यं
सौरसंवत्सरः पुं सूर्य्यस्य द्वा
दशराशिभोगावच्छिन्नकालः
यथा सौरसंवत् सरस्यांते
मानेन शाधिजेन व एकाद
शातिरिच्यंते दिनानि भृगुन
न्दन अपि च सौरेणाब्दस्त
मानेन यदा भवति भार्गव
सावनेन तथा मासि दिनषट्
कं प्रपूर्य्यते इति मलमासत
त्वे सौरसेयः पुं स्कंदः इति शब्दमाला सरसायां
वसौरसैन्धवं त्रि गंगासंबन्धी
यम च भीष्मादिः सुरसिन्धु
शब्दात् ञ प्रत्ययेन निष्प
न्नः सूर्य्यच्छोटके
पुं सौराष्ट्रः पुं देश
विशेषः सूरट्
इति भाषा इति
जटाधरः कुंडरुकः इ
तिराज ॥ ॥ ॥

निर्घंटः कांस्ये क्ली इति
केचित्
सौराष्ट्रकं क्ली पंचलोहं इति
हेमचन्द्रः ॥
सौराष्ट्रा स्त्री तवरी इति
राजनिर्घंटः
सौराष्ट्रिकं क्ली विषभेदः इति
शब्दरत्नावली भरतश्च सौ
राष्ट्रदेशसंबंधिनि त्रि
सौराष्ट्री स्त्री सौराष्ट्रदेशीय
सुगन्धिमृत्तिका तत् पर्य्यायः
पार्वती २ काशी ३ मृत्स्ना ४
कौंती ५ पर्पटी ६ इति रत्नमा
ला कालिका ७ सती ८
इति हेमचंद्रः अस्या गुणाः
कफ पित्त वीसर्प व्रणनाशि
त्वं इति राजवल्लभः राजनि
र्घंटोक्त गुण पर्य्यायौ तवरीश
ब्दे द्रष्टव्यौ ॥
सौरि पुं शनिः इत्यमरः ॥
असनवृक्षः आदित्यभक्ता ॥
इति राजनिर्घंटः
सौरिकः पुं स्वर्गः इति शब्द
रत्नावली सुराविक्रयकर्त्ता
इति केचित् स्वार्थे कप्रत्य
येशनैश्चरः ॥
सौरिरत्नं क्ली नीलमणिः इति

राजनिर्घंटः ॥
सौरी स्त्री सूर्य्यस्यापत्य स्त्री
इति मुग्धबोधव्याकरणं ॥
सौरीयं त्रि सूर्य्यीय द्विते इति
मुग्धबोधव्याकरणं सौर्य्यभ
वः यथा सूर्य्यस्येदं इत्यर्थे त्तं
सौर्य्यं तेजः पुनः सौर्य्यभव
इत्यर्थे ईय प्रत्यये अनेनय
लोपे सौरीयः इति मुग्धबो
धटीका दुर्गादासः
सौरेयः पुं मुक्तकिण्टीवृ
क्षः सौरेयकः यथा सौरेयकः
श्वेतपुष्पः सैरेयः कटसारि
का सहाचरः सहचरः सचवि
न्यपिकथाने कुरण्टको त्रपी
तेस्याद्रक्तः कुरबकः स्मृतः
नीलो वानो द्वयोक्तो दास
आर्त्तगलश्च सः सौरेयः कुष्ठ
वातास्त्र कफ कंडू विषापहः
तिक्तोष्णो मधुरो दंत्यः स्निग्
ग्यः केशरंजनः इति भाव
प्रकाशः
सौल्विकः पुं ताम्रकुट्टकः
इति मरटीका
सौवं त्रि स्वस्य इदं स्वसंबंधि
स्वर्गभवं इति मुग्धबोधव्या
करणं शासनं इति केचित् ॥

सौवग्रामिकं त्रि स्वग्रामभववस्तु इति मुग्धबोधव्याकरणं

सौवरं त्रि स्वरसंबंधि स्वर॥ शब्दात् ष्णप्रत्यये उआगमेन निष्पन्नः इति मुग्धबोधव्याकरणं॥

सौवर्च्चलं क्ली सुवर्च्चलदेशभवलवणं सचललवण इति भाषा तत्पर्य्यायः अक्षं २ रुचकं ३ इत्यमरः कृष्णलवणं ४ इति रत्नमाला तिलकं ५ कृयगन्धकं ६ रुच्यं ७ कौहृविकं ८ इति राजनिर्घण्टः॥ अस्य गुणाः रुचिकारित्वं उष्णवीर्य्यत्वं विमलत्वं कटुत्वं गुल्मशूलविबन्धनाशित्वं किंचित् पित्तकरत्वं लघुत्वं च इति राजवल्लभः॥ अपि च सौवर्च्चलं लघु क्षारं कटूष्णं गुल्मशूलनुत् ऊर्द्ध्ववातामशूलार्त्ति विबन्धारोचकान् जयेत् इति राजनिर्घण्टः॥ अन्यच्च सौवर्च्चलं स्याद्रुचकं मत्स्यं पाक्यं च तन्मतं रुचकं रोचनं भेदि दीपनं पाचनं परं सस्नेहं वातनुन्नातिपित्तलं विशदं लघु उद्गारशुद्धिदं सूक्ष्मं विबंधानाहशूलहृत्॥ इति भावप्रकाशः॥ सर्जिकाक्षारः इत्यमरः सुवर्च्चलासंबंधिनि त्रि॥

सौवर्णं त्रि सुवर्णसंबंधि कषमितहेमसंबन्धि यथा मत्स्यपुराणे सौवर्णी राजती वापि ताम्री रत्नमयी तथा इत्युपक्रम्य शुभदारुमयी वापि देवतार्च्चा प्रशस्यते इति देवप्रतिष्ठातत्त्वं

सौवर्णभेदिनी स्त्री प्रियंगुः॥ इति शब्दमाला॥

सौवस्तिकः पुं पुरोहितः॥ इति हेमचन्द्रः स्वस्तिसंबन्धिनि त्रि इति व्याकरणं॥

सौवास्तवः त्रि सुन्दरवास्तुभव धीसुशब्दपूर्वकवास्तुशब्दात् ष्णप्रत्ययेन निष्पन्नः॥

सौविदः पुं अन्तःपुररक्षकः इत्यमरः॥

सौविदल्लः पुं अन्तःपुररक्षकः तत्पर्य्यायः कंचुकी २ स्थापत्यः ३ सौविदः ४ इत्यमरः स्थपतिः ५ सुविदः ६ इति तट्टीका चत्वारि महल्लके वहिः संचरतीनां परस्त्रीणां

प्रेतकपुरुषान्तरवारणाय राज्ञा स्त्र्यगारे ये वेत्रधरा नियुक्ताः ते वहिर्महल्लका सौविदल्लादिशब्दवाच्याः शोभनं विदन्ति सुविदः पंडिताः क्षिपताव अनतिसत्वेन गच्छति सुविदत् भूपालः तं लाति सुविदलं अन्तःपुरं हननादिति डः लेलस्तो रीति लः तत्र नियुक्ता इति ष्ण्येकादिति चे सौविदल्लाः इति भरतः

सौविदल्लकः पुं सौविदल्लः॥ इति शब्दरत्नावली॥

सौवीरं क्ली वदरं कांजिकं स्रोतोंजनं इत्यमरः॥ एतेषां विशेषा यथा सौवीरं वदरं महत् इति रत्नमाला सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतं गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे सौवीरन्तु ग्रहण्यर्शः कफघ्नं भेदि दीपनं उदावर्त्ताङ्गमर्द्दास्थिशूलानाहेषु शस्यते इति भावप्रकाशः सौवीरांजनं यथा सौवीरकं पार्वतेयं सौवीरं नीलमंजनं इति रत्नमाला॥

सौवीरः पुं देशविशेषः इति मेदिनी॥

सौवीरकं क्ली कांजिकविशेषः तत्पर्य्यायः सुवीराम्लं २ गोधूमसंभवं ३ यवाम्लजं ४ यवोत्थं ५ तुषोत्थं ६ तुषोदकं ७ अस्य गुणाः अम्लरसत्वं केशात्व मस्तकदोषज्वरशोषिस्वनाशित्वं वलकारित्वं सन्तर्पणत्वं च इति राजनिर्घण्टः

सौवीरकः पुं वदरवृक्षः इति राजनिर्घण्टः॥

सौवीरसारं क्ली स्रोतोंजनं इति राजनिर्घण्टः॥

सौवीरांजनं क्ली अंजनभेदः तत्पर्य्यायः अंजनं २ यामुनं ३ कृष्णं ४ नादेयं ५ मेचकं ६ स्रोतोंजं ७ दृष्प्रदं ८ नीलं ९ सुवीरजं १० नीलांजनं ११ चक्षुष्यं १२ वारिसंभवं १३ कपोतकं १४ कापोतं १५ अस्य गुणाः शीतत्वं कटुत्वं तिक्तत्वं कषायत्वं चक्षुष्यत्वं कफवातविषनाशित्वं रसायनत्वं च इति राजनिर्घण्टः॥

सौष्ठवं क्ली अतिशाय्यं प्रशंसनत्वं इति सुष्ठुशब्दार्थदर्शी



नात् नाटकांगविशेषः इति
केचित् ॥
सौहार्दं क्ली सुहृदोभावः तत्
पर्य्यायः सख्यं २ सौहृदं ३
साप्तपदीनं ४ मैत्री ५ अजर्य्यं
६ संगतं ७ इति हेमचंद्रः सौ
हार्द्दः पुं सुहृत पुत्रः सुहृ
द्हृदयात् अपत्यार्थे सम(अण्)प्रत्य
येन निष्पन्नः इति केचित् सौ
हार्य्यं क्ली सौहार्द्दं सुहृद्
शाहात् ष्यञ्प्रत्ययेन निष्पन्नं
इति सिद्धांतकौमुदी
सौहित्यं क्ली तृप्तिः इत्यमरः
सौहृदं क्ली सख्यं सौहार्द्दं
इति हेमचंद्रः तस्य माहात्म्यं
यथा तद्भुज्यते यद्द्विजभुक्त
शेषं स बुद्धिमान् यो न करोति
पापं तत् सौहृदं यत् क्रि
यते परोक्षे दम्भैर्विना यः
क्रियते स धर्म्मः इति गारु
डे ११५ अध्यायः ॥
सौक्ष्म्यं क्ली सूक्ष्मता सूक्ष्मस्य
भावः इत्यर्थे ष्यञ्प्रत्ययेन नि
ष्पन्नं ॥
स्कद इ उ आप्लवे उद्धृतौ उ
त्प्लुत्यगत्या इति कविकल्पद्रु
मः आयस्वरी इ स्कंद्यते ॥ ॥

उ स्कन्दते विस्कन्दिषते पं
चमस्कीति धातुप्रदीप रामो
स्कन्दते स्कुन्दते चापि षड्डाप्ल
वनवाचिनः इति भट्टमल्लोपि
चुस्कन्दिषते इति दुर्गादासः
स्कंद तक समाहृतौ इति क
विकल्पद्रुमः दंत्यवर्गतृती
योपधोऽयं तत्रान्तस्थोपध इ
ति केचित् स्कन्दयति स्कन्दा
पयति अचस्कन्दत् इति दुर्गा
दासः
स्कन्द इर् ओ शोषणे गत्यां इ
ति कविकल्पद्रुमः इर् अस्क
दत् अस्कान्त्सीत् ओ स्कंता
चस्कन्द इति दुर्गादासः ॥
स्कन्दः पुं कार्त्तिकेयः इत्य
मरः तस्य उत्पत्तिर्यः इत्य
मरः तस्य उत्पत्ति षडानन
पंचनाम च तस्मै त्वमभिषेकग
णवाच किमर्थं मेषकः क्रौं
चो भिन्नः स्कन्देन सुव्रत यतस्ते
विस्तराद्ब्रह्मन् कथयस्वामितद्यु
ते पुलस्त्य उवाच शृणु ते कथ
यिष्यामि कथां पुण्यां पुरा
तनीं यशोवृद्धिं कुमारस्य का
र्त्तिकेयस्य नारद यत् पीतं वी
तिहोत्रेण वीर्य्यं त्यक्तं ॥ ॥॥

पिनाकिनः तेनाक्रांतोऽभ
वद्वह्निः मन्दतेजा हुताश
नः ततो जगाम देवानां सकाश
ममितद्युतिः दैवतैः प्रहित
स्तूर्णं ब्रह्मलोकं जगाम ह
स गच्छन् कुटिलां देवीं दद
र्शापथि पावकः तां दृष्ट्वा प्राहवा
धत् स्वतेजो यत्मम दुर्द्धरं महे
श्वरेण संत्यक्तं निर्दहेत् भुव
नान्यपि तद्धारणाच्च कुटिले पु
त्रो धन्यो भविष्यति इत्यग्निनासा
कुटिला श्रुत्वा सत मनुत्तमं प्र
चिन्तमात्रे जग्राह तेजपपाम
हापगा ततस्त्वधारयद्देवी
शार्वं तेजः स्वपूपुषत् कृता
शेनापि च भयात् यत्र तत्र परि
भ्रमन् पंचवर्षसहस्राणि ग्रथ्या
स्ते हव्यभुक् ततः मांसमस्थीनि
रक्तानि मेदो मज्जस्त्वचस्तथा
रोमाणि चाक्षि केशाद्याः सर्वे
जाता हिरण्मयाः हिरण्यरेता
लोकेऽस्मिन् विख्यातः पावक
स्तदा पंचवर्षसहस्राणि कुटि
लाप्यलनोपमं धारयंती तदाग
भं ब्रह्मणः स्थानमागता पि
तामहहस्तां तिष्ठांगीं संतप्य
तीं महापगां दृष्ट्वा पप्रच्छ केना

यं तव गर्भः समाहितः सा चाहशं
करं तेजः पावकेन समर्पितं अ
प्यशक्तेन तेनाद्य निहितं
मयि सत्तम पंचवर्षसहस्रा
णि धारयन्त्याः पितामह अन्न
पानादिकमपि नमेऽपच्यत क
र्हिचित् तच्छ्रुत्वा भगवानाह
गच्छ त्वमुदयं गिरिं तत्रास्ति योज
नशतं विस्तीर्णं शरसैवितं तम
नुमाप्य श्रोणि विस्तीर्णं वि
क्षानु नि दशवर्षसहस्रान्ते ततो
बालो भविष्यति ब्रह्मणो वचनं
श्रुत्वा कुटिला गिरिमागता आ
गत्य गर्भं तत्याज मुखेनैवाद्रि
नन्दिनी सा त्वसत्यज्य तं बालं ब्र
ह्मणः सहसागमत् आपोमयी
मेत्रवशात् संयता कुटिला सती
तेजसा चापि शार्वेण रौक्मः शर
वणोऽभवत् तन्निवासवतस्था ग्रे
पादपा मृगपक्षिणः ततो दश
स पूर्णेषु पारदपाशतेष्वथ
बालार्कदीप्तिः संजातो बालः
कमललोचनः उत्तानशायी
भगवान् दिव्ये शरवणे स्थि
तः मुखेंऽगुष्ठं समाक्षिप्य ह
रोदघनरावेव यतस्मिन्नंतरे
देव्यः कृत्तिकाः षट् सतेज
सः ददृशुः ॥ ॥ ॥

स्वेच्छया यातो बालं शरवणे
स्थितं कृपायुक्ताः समाजग्मुर्य
त्र स्कन्दः स्थितोऽभवत् अहमह
मेवं पूर्वं तस्मै स्तन्यं दित्सुक्रु
शुः विवदन्तीः सतां दृष्ट्वा षण्मु
खः समजायत अबीभरंस्तं ताः
सर्वाः शिशुं स्नेहात्स्वकृत्तिकाः
ध्रियमाणः सतीभिस्तु बालो
वृद्धिमगान्मुने कार्त्तिकेय इति
ख्यातो जातः सबलिनां वरः एत
स्मिन्नन्तरे ब्रह्मन् पावकं प्राह
पद्मभूः कियत्प्रमाणः पुत्रस्ते
वर्त्तते सांप्रतं गुहः स तद्वचन
माकर्ण्य अजानन् तं हरात्मजं
मोवाच पुत्रं देवेश न वेद्मि क
तमो गुहः तमाह भगवान्
शुक्रं तेजः पीतं पुरा त्वया त्र्यं
बकं त्रिलोकेशं जातः   श
रवणे शिशुः श्रुत्वा पितामह
वचः पावकस्त्वरितोऽभ्यगा
त् उद्याद्रिं च कुटिला तं ददर्श
हितैरता पप्रच्छ कुटिला देवीं क
णीत्वं व्रजसे क्व सोऽब्रवीत्
पुत्रहरस्यार्धं जातं शरवणे शि
शुं साब्रवीत्तनयो मत्येम
मेत्याह च पावकः विवदन्तौ
ददर्शाथ स्वेच्छाचारी जना
र्दनः ॥ ॥ ॥ ॥

तोऽपृच्छत् किमर्थं वा विवादमि
ह चक्रतुः तमूचतुः पुत्रहेतोरु
द्रशुक्राद्भवादिति तावुवाच
हरिर्देवो गच्छतं त्रिपुरान्तकं स
यद्वक्ष्यति देवेशः कुरुतं त
दसंशयं इत्युक्तौ वासुदेवे
न कुटिलाग्नी हरान्तिकं सम
भ्येत्याचतुस्तथ्यं कस्य पुत्रो
भवेद्गुहः रुद्रस्तद्वाक्यमाक
र्ण्य हर्षनिर्भरमानसः दिष्ट्या
दिष्ट्येति गिरिजां प्रोद्भूतपु
लकोऽब्रवीत् ततोऽम्बिकामा
ह हरं देव गच्छावं तं शिशुं
दृष्ट्वा समागमेच्छां स तस्याः
पुत्रो भविष्यति बाढमित्येव
भगवान् समुत्तस्थौ वृषध्वजः
सहोमया कुटिलया पावकेन
च धीमता संप्राप्तास्ते शरव
णं हरोमा कुटिलाग्नयः दद
र्शुः शिशुकं तं च कृत्तिकोत्सं
गशायिनं ततः स बालकस्ते
षां मत्वा चिन्तितमादरात् यो
गी चतुर्मूर्त्तिरभूत् षण्मुखः
स शिशुः पितुः कुमारः शंकरम
गात् विशाखो गिरिजामगात् कु
टिलामगमच्छाखो नैगमेयोऽग्नि
मभ्यगात् ततः प्रीतिप्लुतो रुद्रः ॥

उवाच कुटिला तथा पावक
श्चापि देवेशः परां मुदमवाप
च ततोऽब्रुवन् कृत्तिकास्ताः
षण्मुखः किं हरात्मजः ता
अब्रवीत् हरः प्रीत्या विवेश
यचनं ह्येते नाम्नात्तु कार्त्तिकेये
ति युष्माकं च भवत्वसौ कु
टिलायाः कुमारेति पुत्रोऽयं
भविताव्ययः स्कन्द इत्येव वि
ख्यातो गौरीपुत्रो भवत्वसौ ॥
गुह इत्येव नाम्ना च ममासौ
तनयः स्मृतः महासेन इति
ख्यातो हुताशस्यास्तु पुत्रकः
सारस्वत इति ख्यातः सुतः श
रवणस्य च एवमेव महायोगी
पृथिव्यां ख्यातिमेष्यति यदा
स्वत्वान्महाबाहुः षण्मुखो ना
म गीयते इत्येव मुक्त्वा भगवा
न् शूलपाणिः पितामहं सस्मा
र देवतैः सार्द्धं ते प्राजग्मुस्त्व
रान्विताः प्रणिपत्य च कामा
रिं उमां च गिरिनन्दिनीं दृष्ट्वा कृ
ताग्नेः प्रीत्या कुटिलां कृत्तिका
स्तथा ददृशुर्बालमत्युग्रं षण्मु
खं सूर्यसन्निभं मुष्णन्तमिव च
क्षूंषि देवानां स्वेन तेजसा ॥
कौतुकाभिहृताः सर्वे एव सुरः

सुरोत्तमाः देवकार्यं त्वया देव
कृतं देव्याग्निना तथा त
दुत्तिष्ठ व्रजामोऽद्य तीर्थं सौज
समव्ययं कुरुक्षेत्रे सरस्वत्या
मभिषिंचाम षण्मुखं सेनायाः
पतिरस्त्वेष देवगन्धर्वकिन्नराः
महिषं घातयत्वेष तारकं च म
हारणे बाढमित्यब्रवीच्छर्वः
समुत्तस्थुः सुरास्ततः कुमार
सहिता जग्मुः सुरास्ततः कुमा
रसहिता जग्मुः कुरुक्षेत्रं महा
फलं तत्रैव देवताः सेन्द्राः रुद्र
ब्रह्मजनार्दनाः यत्नमस्याभि
षेकार्थं चक्रुर्मुनिगणैः सह
ततोऽम्बुना सप्तसमुद्रवाहिनी
नदीजलेनापि महाफलेन वै
षधीभिस्सुसहस्रमूर्त्तिभिस्त
दाभ्यषिंचत्सुराच्युताद्याः अ
भिषिच्यति सेनान्यां कुमारे दि
व्यरूपिणि जगुर्गन्धर्वपतयो
ननृतुश्चाप्सरोगणाः अभिषि
क्तं कुमारं च गिरिपुत्री निरीक्ष्य
हि स्नेहामतसंगमस्कन्दमूर्द्धा
जिघ्रमुग्रमुखः जिघ्रती कार्त्ति
केयस्य अभिषेकाई मानने भा
त्यद्रिजा यथेन्द्रस देवमाता दितिः
पुरा तदाभिषिक्तं तनयं दृष्ट्वा श
र्वोमुदं ययौ पावकः कृत्ति ॥॥

काष्ठेव कुटिला चपलाशिनी
ततोभिषिक्तस्य हरः सेनाप
त्ये गुहस्य तु प्रमथांश्चतुरः
प्रादाच्छक्रतुल्यपराक्रमान्
घण्टाकर्णं लोहिताक्षं नन्दि
षेणं सुदारुणं चतुर्थं बलि
नां मुख्यं ख्यातं कुमुदमालि
नं हरदत्तान् गणान् दृष्ट्वा दे
वाः स्कन्दस्य नारद प्रददुः प्रम
थानन्यान् सर्वे ब्रह्मपुरोगमाः
स्थाणु ब्रह्मा गणं प्रादाद्विष्णुः
प्रादात् गणत्रयं संक्रमं वि
क्रमं चैव तृतीयं च पराक्रमं
उत्क्रोशं पंकजं शक्रो रविर्दंड
कपिंगलौ चन्द्रोमणिं वसुम
णिं अश्विनौ नन्दिनन्दिनौ ज्यो
ति हुताशनः प्रादात् ज्वाला
जिह्वं तथापरं कुन्द निकुन्द
कुमुदान् धाता चानुचरान्
ददौ चक्रानुचक्रौ त्वष्टा च वे
धातिस्थिरसुस्थिरौ पाणित्वजं
कालकं च प्रादात् पूषा महाब
लौ स्वर्णमालं घनार्कं च हिमवा
न् प्रमथौ तमौ प्रादाद्देवौ छितो
विन्ध्यस्त्वतिशृंगं च पार्षद सु
वर्चसं च वरुणः प्रददौ चाति
वर्चसं संयहं विग्रहं चैव
नागाभि॥ ॥ ॥ ॥

जयसंजयौ उन्मादं शंकुकर्णं
च पुष्पदंतं तथांबिका दुर्गं
चुनिवलैचैव प्रेष्टौवानुचरा
औपरियं चरकं भीमं दाहामि
दहनौ तथा प्रददावंशुमाल्यैव
प्रमाथान् यणैवायहि यमः
प्रमाथमुन्माथं कालसेनमजा
सुवं तालपत्रकं नाडिजंघं च ष
डेवानुचरान् ददौ सुप्रभं शुभ
कर्माणं विघ्नतो दानवेश्वरौ
सुप्रसत्वं सत्रमित्रं सुभजं च
निकुंभ कुमुदावजं पकात्कु
लटीचक्रः किचीटः कलशोद
रः किचीटस्याने किरीटः ह
तिच पाठः सूचीवक्रः कोक
नदः महासः सिद्धको व्ययः
गणाः पंचकालिन्याः कलकं
ह्यश्च नर्मदायारणौतकटः गोहा
वर्णाः सिद्धपात्र लामसायाल्ले
पंकजः सहस्रबाहुः सीताख्या
वंजुलायाः क्षिनोदरः सन्ता
किन्याः सवाहुश्च विपाशायाः
प्रियंकरः ऐरावत्या सुनदं
हुः षोडशाल्लोः परस्तथा
मार्जारं कौशिकी प्रादात्
कुथ क्रौंचौ च गोतमी॥

बाहुदा शतशीर्षं च बाहा गो
नन्दनन्दिनौ भीमं भीमरथी
प्रादात् दुर्गार्ति सरयूर्ददौ अ
श्ववाहं ददौ काशी सुवाहुम
पि गंडकी महानदी चित्रदेवं
चित्रा चित्ररथं ददौ कुहूं कुव
लयं प्रादात् मधुवर्णं मधूद
का जंबूकं धूतपापा च वेण्वा घटा
ननं ददौ स्नाता प्रथमपर्णी चीर
वासागरवेगिनं प्रभा वा पाशा
जं प्रादात् कांचना कनकप्रभं
धूतपत्रं च विमला चारुवक्रं
मनोहरा अपापा च महारामं
वेण्वा विद्रुम सुप्रभं सुप्रसादं
सुवेणा च जितं मोचवती द
दौ यज्ञबाहुं विशाला च सर
स्वत्या दुर्गेणान् कुटिलात
यस्मादात् दशशाक्रवलाद्दुग
णान् करालं मेघनादं चतुर्दंष्ट्रं
विद्युज्जिह्वं दशाननं सोमाप्या
यन मेवोग्रं देवयाजिनमेव
च हंसास्यं कुंडजठरं बहु
ग्रीवं हयाननं कूर्मग्रीवं च
पंचैतान् ददुः पुण्यकृत्तिकाः
स्थूलजंघं कुंडवक्रं लोहजंघं
महाननं पिंडारकं च पंचैतान्।

ददुः स्कंदाय चर्ययः नागाजि
ह्वं च द्रभासं पाणिकूर्मं शशि
करं वासवक्रं सजंबूकं ददौ ती
र्थः पृथूदकः चक्रतीर्थं सच
क्राख्यं मकराक्षं गयाशिरः गणं
पंचशिखं नामददौ कनखलः
स्वयं वधूदत्तं बालशिरो बालसा
रं च पुष्करं सर्वौजसं माहिषकं
मानसं पिंगलं तथा रुद्रसोमान
सः प्रादात् तेन्योन्यामातरोद
डः वसुदामा प्रोणातीर्थः प्र
भासो नन्दिनीमपि इन्द्रतीर्थं
विशोकां च उदपानं चनस्व
सुमसारस्ततः प्रादात् मातर
श्वरोद्भुताः जितप्रियां मा
धवीं च तीर्थनेमिं सितानना
पकल्मतां नागतीर्थः कु
रुक्षेत्रं पलाशादां ब्रह्मनिः
विडपिलां भद्रकालीं त्रिपिशपः
पैंडीभैंडी योषभेंडी प्राददुदर
पावनः सोपानौयो महामा
दां छालिकां मानसो ह्रदः
पात पूर्णपशाताननां तथोलू
खल मेखलां पद्मावतीं मा
धवीं च ददौ बदरिकाश्र
मः सावसा मेकचूलां च देवीं
धर्मधरां तथा उकाद्यनीं वेद

मित्रां केदारो मात्तरो ददौ । सुनतत्रौच करणं सुप्रभा वांसुमंगलां वेदमित्रां चित्र सेनां ददौ रुद्रो महावलः कोटराक्षीं संयताक्षा ममतां वक्रपुत्रिकां पलितां कम लाक्षीं च मयाक्षां मानसो ददौ सूपलीं मधुकुंभां च ख्याति दहदहां परां मादाहे काला केयाय सर्वपापविमोचनः सा न्तानिकां किलकां क्रमसकां ख रवासिनीं जलेश्वरीं कुक्कुटि कासदामां लोहमेखलां वपु ष्मत्सुमुकालीं च केकनाम्ना महाप्तानी रोहाभूर्भविकान्ते ज्ञ सोमतीर्थ्या ददौ स्विमाः पता तिभूतानि गणास्सुमातरो हृष्टा महात्मा विनतातनूजः ददौ मयूरं सुसमं महाजवं तथा रुणस्त्राहुतरत्नमुत्तमं शक्तिं क्षमा प्राह हिमुता च वस्त्रं दंडं गुरुः साकृतिना कमंडलुं मा लां हरिः शूलधरः पताकां क हेच हारं मवदानु रक्तः गणेहि तोमात् भिरं वितस्य मयूरसंस्थो वरप्रांकिमाणिः सैन्याधिपत्ये सहृतो भवेन रवाजसूर्य्यवम ॥

हावप्रष्मान् इति वामनपुराणे कार्तिकेयोत्पत्तौ ५५ अध्यायः देवाद्वारपालविशेषः तस्य वलिर्यथा महानवम्यां शारदि रात्रौ स्कन्द विशाखयोः षवचूर्णमयं कृत्वा पिंडमूर्त्त यमेवचा शिरश्छित्वा वलिंद द्यात् कृत्वा तस्य तु मंत्रतः अ नेनैनेवतु मंत्रेणा खड्गमामंत्र्य य त्नतः रक्तं किलकिलां चोरचो रा धारविहिंसकः ब्रह्मशिख्या शिकाशिखमस्तकं चारिसत्तम तान्नो विसर्गसहितः स च विंदु युतोऽपरः ब्रह्माग्नियोगमन्त्रे ण विन्दुनाच समन्वितः छित्वा वलिं दद्यात् कृत्वा तस्य तु मं त्रतः अनेनेव तु मंत्रेण विन्दुना च समन्वितः फडंते वलिषु प्रो क्तः खड्गेर्कंद विशाखयोः रक्त हृयेः सेचयित्वा कृत्रिमं तं रि पुं वलिं कृचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत रक्त माल्यधरं कृत्वा रक्तवस्त्रधरं त था कंठे वद्ध्वा रक्तसूत्रेनौभौमा स्यं च कृत्रिमं दद्यात्र शिरः स्कंध कृत्वा खड्गेन छेदयेत शिरस्त स्य ततो दद्यात स्कन्दाय ॥ ॥

तेन मंत्रतः चतर्दशास्वराभ्रि भ्यां संयुक्तः स परः समं प रतः परतः पूर्वं चन्द्रविन्दुस मन्वितः स्कन्दस्य मूलमंत्रोऽयं तेन तस्मै वलिं सृजेत चत र्दशास्वराग्निभ्यां पतृतीयं तु पू र्ववत् प्रोक्तो विशाखमंत्रोऽ यं तेन तस्मै वलिं सृजेत कृदिता तौ कुल पिंगवर्णौ रक्तौ सुधारिणो त्रिशूलेक रवालेच पाणिभ्यां दक्षिणे तथा विभ्रतौ नृकपालेच कर्त्त केवापि वामतः त्रिनेत्रौ नरमुं डानां माला सूरस्ति विभ्रतौ वि कटौ दशनैर्भीमै गणेशौ द्वार पालकौ ध्यानेन चिंतयेद्देव्याः पुरतः संस्थितौ सदा

इति कालिकापुराणे ६९ अध्यायः नृपतिः इति जटाधरः पारीरं इति त्रि कांडशेषः पारदः इति राजनिर्घंटः नदीतटं पंडितः इति केचित् वालकस्य ग्रह विशेषः तस्य चिकित्सा वालग्रहप्रकाहे द्रष्टव्या स्कं न्दनं क्लीं रेचनं इति त्रिकांड शेषः गमनं शोषणं ॥ ॥

इतिस्कन्दपानर्थदर्शनात् स्कन्दाशकः पुं पारदः इति राजनिर्घंटः ॥
स्कंधः क्लीं अंसः प्रकांड यथा स्कन्धः मांसं नपुंसक मिति केचित् इत्यमरटीकायां भरतः
स्कंधः पुं अवयवविशेषः काध इतिभाषा तत्पर्य्यायः भुजशिरः २ अंसः ३ इत्यमरः कंधः ४ इति शब्दरत्नावली दोःशिखरं ५ इति राजनिर्घंटः तरो मूलादिशाखा पर्य्यंतं गुंडी इति भाषा तत् पर्य्यायः प्रकांड २ इ त्यमरः कांडं ३ इति शब्द रत्नावली दंडं ४ इति जटा धरः नृपतिः संपरायः ॥॥ समूहः कायः भद्रादिः ॥ छन्दोभेदः इतिमेदिनी विज्ञानादिपंच व्यूहः इति हेमचन्द्रः पंथाः इति शब्द रत्नावली ग्रंथपरिच्छेदः यथा श्रीपार्वत्युवाच स्कंधे द्वादशभिः प्रोक्तं श्रीमद्भाग वतं प्रभो मुक्त श्लोकवयाम स महाराजं परीक्षिते इति

पद्मे पाताल खंडे ७१ अध्यायः
स्कंधचापः पुं वंशादिनिर्म्मित
शिक्याधानं तत्पर्य्यायः वि
हंगिका २ इति हारावली ॥
स्कंधजः पुं शल्लकादिः यथा
पर्वतोनय इत्याद्या स्कन्धजाः
सल्लकीमुख्याः इति हेमचंद्रः
मुद्राङ्कितहेमचन्द्रे कन्दज इति
पाठः ॥
स्कंधतरुः पुं नारिकेलवृक्षः
इति राजनिर्घंटः ॥
स्कंधदेशः पुं गजस्य स्कंधः य
त्र हस्तिपकउपविशति तत्प
र्य्यायः आसनं २ इत्यमरः
स्कंधमात्रं यथा त्रिपुरारिः स्क
न्धदेशे कष्टकामांगयानः
इति भृगुभरतसंवादे माहेश्व
रकवचं ॥
स्कंधफलः पुं नारिकेलवृक्षः
इति राजनिर्घंटः उडुंबर
वृक्षः इति शब्दचन्द्रिका ॥
स्कंधबंधना स्त्री मधुरिका
इति शब्दचन्द्रिका ॥
स्कन्धमल्लकः पुं कंकत्री इति
हेमचंद्रः ॥
स्कंधरुहः पुं वटवृक्षः इति
राजनिर्घंटः ॥

स्कंधवाहः पुं शकटादिवाहक
वृषः यथा स्कंधवाहस्तथोक
ष्टुम्मुंगी गौरत्यधूलिलाः इति
हारावली ॥
स्कन्धवाहकः पुं शकटादिवा
हकवृषः तत्पर्य्यायः स्कंधि
कः २ इति हेमचन्द्रः स्कंधेनव
हनकर्त्तरि त्रि स्कंधशाखा स्त्री वृक्ष
स्य मुख्यशाखा तत्पर्य्यायः ॥॥
शाला ३ इत्यमरः स्कंधश्रृंः पुं महिषः
स्कन्धा स्त्री शाखा लता इति
केचित् ॥
स्कंधाग्निः पुं वृहत्काष्ठाग्निः
इति त्रिकांडशेषः ॥
स्कन्धानलः पुं वृहत् काष्ठा
ग्निः तत्पर्य्यायः स्थूलकाष्ठ
कृ २ इति जटाधरः ॥
स्कन्धावारः पुं सैन्यस्थिति
राजधानी
इति हेमचंद्रः कटकः
इति भूरिप्रयोगः स्कंधिकः
पुं स्कंधवाह कवृषः
इति हेमचन्द्रः ॥
स्कंधी पुं वृक्षः इति
रत्नमाला
स्कन्धयुक्ते त्रि ॥ ॥ ॥

स्कन्नं त्रि च्युते इत्यमरः
शुष्कं गतं इति स्कन्दधात्वर्थ
दर्शनात् ॥
स्कभ इ उ॰ स्तंभे इति कवि
कल्पद्रुमः स्तंभ इह रुद्धीकर
णे इस्कम्भ्यते उ॰ स्कंभते कवा
टेन द्वारं लोकः चस्कंभे
इति दुर्गादासः
स्कु गन ञ उहृतौ आप्लावने
इति कविकल्पद्रुमः गञ स्कु
नृते चुस्काव उहृतिरुद्धरणं
आप्लवने इति प्राचः स्कुनाति
चस्कुनीते च स्कुनोत्याप्लवते
पि च स्कन्दते
स्कुंदते चापि षडाप्लवनवाचि
नः इति भट्टमल्लः आक्रमणे
इति पाणिनीयाः स्कुनाति प्रा
त्रं बाणेन भट
आच्छादयतीत्यर्थः इति
रमानाथः इति दुर्गादासः
स्कुद इञ आप्लवे उहृतौ
उत्प्लुत्य गमने इति कविक
ल्पद्रुमः पंचमस्वरीति धातुप्र
दीपरामौ स्कन्दते स्कुन्दते चा
पि यङ्काप्लवनवाचिनः इति भ
ट्टमल्लोपि चुस्कुन्दिषते इति

दुर्गादासः
स्कुंभ गन उ रोधने इति
कविकल्पद्रुमः दंत्यादिः पंच
मस्वरी ग स्कुभ्नाति नस्कुभ्ना
ति उस्कुंभित्वा स्कुब्ध्वा रोधन
मावरणं इति दुर्गादासः सौ
त्रधातुरयं ॥
स्कोटिका स्त्री पक्षिविशेषः य
थाश्वसर्पिणी हापुत्रिकाख
ञ्जनिकाल्लिका स्कोटिके स
मे इति त्रिकांडशेषः ॥
स्खद म ष ङ॰ विदारे इति क
विकल्पद्रुमः म स्खदयति
उपसर्ग्गात् परस्य तु वा प्रायम
फणं इत्यादिना वा ह्रस्वः प्र
स्खदति प्रस्खादयति अवप
रिवृज्जोडुपसर्गात् परस्य वा
दित्वनास्ति इति कातंत्राद्याः त
त्रैव अवस्थाने अपहतिक्षीके प्रस्खादयति अवस्खदयति
परिस्खदयति अपपरिभ्यां परस्य
घटादित्वं नास्तीति जौमराद्याः
अपस्खादयति परिस्खादयति
प्रस्खदयति स्खद स्खदने इति
प्राचः स्खदनं स्थैर्य्यमि
ति त्रिलोचनदासो पादन
मिति गोविन्दः क्लेशोत्
पादन ॥ ॥ ॥ ॥

मितिगोयीचन्द्रः हिंसेति
रमानाथः इतिदुर्गादासः ॥
स्खदनं क्लीं विदारणे इति
स्खदधात्वर्थदर्शनात् स्थैर्य्यं
पाटनं क्लेशेन पादनं
हिंसा इति कविकल्पद्रुमटी
कायां दुर्गादासः
स्खल मि चये चले इति
कविकल्पद्रुमः ॥
स्खल मि चये चले इति
कविकल्पद्रुमः मिस्खलय
तिवचनं ते सर्वथा स्खक्रवेद
मिति मालत्यां स्खालयति च
स्खाल चयः संचयः स्खलति
पुष्पं मालिकः संचिनोतीत्य
र्थः चलः स्खलनं स्खलति
मत्तं हृतस्य हृदः प्रेमाभग्नं
सदसि रिव संधिं न लभते
लभेतापि प्रायः स्खलति वि
लयत्नैरपि धृतः इतिदुर्गादा
सः स्खलनं क्लीं पतनं तत्प
र्य्यायः विगलनं २ इत्यमरः
विह्वलनं ३ इति हेमचन्द्रः ॥
स्खलितं क्लीं कूटयुद्धादि
ना युद्धमर्य्यादायाः स्खलनं
तत्पर्य्यायः छलं २ इत्यम
रः स्खलितं भ्रेषः इति मेदिनी ॥

स्तक म प्रतीघाते इति कवि
कल्पद्रुमः म तिष्ठकयिषति
तिस्तकयिषति इतिदुर्गादासः
स्तन मि शब्दे इति कविकल्प
द्रुमः मि स्तनयति स्तानयति
अतिस्तनत् इति दुर्गादासः
स्तन त् क अभ्रशब्दे इति क
विकल्पद्रुमः स्तनयति मेघः
इति दुर्गादासः ॥
स्तनः पुं अवयवविशेषः मा
इति चुची इतिच भाषा तत्
पर्य्यायः कुचः २ इत्यमरः ॥
कुचः २ उरोजः ४ वक्षोजः ५
पयोधरः ६ वक्षोरुहः ७ उर
सिजः ८ तस्याग्रं चूचुक ॥
इति शब्दरत्नावली तस्य शु
भलक्षणं यथा अरोमशौ
स्तनौ पीनौ घनावविषमौ
शुभौ कठिनावरोम मृद्वो
स्कंदग्रीवा च कंबुभा इति
गारुडे ६९ अध्यायः तस्य
मनोहरत्वकारकौषधं यथा
कुष्ठ नागवलाचूर्णं नवनीत
समन्वितं तल्लेपो युवतीनां
वकुर्य्यान्मनोहरं स्तनं इति
च गारुडे १९४ अध्यायः ॥
अथ स्तनरोगस्य संप्राप्तिमाह

सक्षीरौ वाप्यदुग्धौ वा दो
षः प्राप्य स्तनौ स्त्रियाः रक्तं
मांसं च संदूष्य स्तनरोगाय
कल्पते अदुग्धावपि स्तनौ प्र
सूताया गर्भिण्याश्च स्त्रियाः वा
दुष्टौ यत आह सुश्रुतः धम
न्यः संवृतद्वाराः कन्यानां स्तन
संश्रिताः दोषाविसरणात्स्तासां
न भवंति स्तनामयाः दोषाविस
रणाः संवृतद्वारत्वेन दोषाणा
मविसरणमसंचरो यासूताः ता
सामेव प्रसूतानां गर्भिणीनां च
ता जायंते संभवंत्यतः ॥
स्तनरोगाणां प्रतिदेशेन लक्ष
णान्याह पंचानामपि तेषां त
हित्वा शोणित विद्रधिं लक्षणा
नि समानानि वाह्यविद्रधिलक्षणैः
पंचानां वातपित्तकफसंनिपाता
गंतुजानां आगंतुजस्तनरोगाभि
घातेन शल्येन च शल्येन च ॥
वोद्धव्यः रक्तजस्यासंभवः ॥.
स्वभावात् अथ स्तनरोगस्य
चिकित् सा शोथं स्तनस्थित
मवेत्य भिषग्विध्यात् ...
दृष्टाव भिहितं वक्ष्या विधा
नं आमे विदाहिनि तथैव च ॥
तस्य पाके ॥ ॥ ॥

तस्मात्स्तनौ सततमेव च निर्द
हीतो पित्तघ्नानि लघीतानि
द्रव्याण्यत्र प्रयोजयेत् जलौ
काभिर्हरेद्रक्तं न स्तनानुपना
हयेत् उपनाहयेत् स्वेदयेत्
लेपो विशालामूलेन हन्ति ॥
पीडां स्तनोत्थितां निशाकन
कल्काभ्यां लेपः प्रोक्तः स्तन
नाशिता विशाला इन्द्रवा
रुणी कनकस्य धतूरस्य पत्रं
ग्राह्यं लेपान्निहंति मूलं स्त
नरोगं वन्ध्याकर्केटोः नि
र्वापितमलोहं सलिले तद्वा
पिबेत्तत्रा इति भावप्रकाशः
स्तननं क्लीं ध्वनिमात्रं मेघ
शब्दः कुंथितं इति मेदिनी
स्तनन्धयः पुं स्त्री अतिशिशुः
तत्पर्य्यायः उत्तानशयः २
उत्तानशया ३ डिम्भः ४ डिम्भाप
स्तनपः ६ स्तनपा ७ स्तनन्धयी ८
स्तनद्वया ९ इत्यमरभरतौ
स्तनद्वया स्त्री अतिवालिका
हेस्तनन्धयी त्यमरभरतौ ॥
स्तनपः पुं अतिशिशुः इति
भरतः स्तनपानकर्त्तरि त्रि
स्तनपा स्त्री अतिवालिका
इत्यमरः ॥



स्तनपायिका स्त्री अतिबालि
का दुग्धपोष्या स्तनशब्दस्य सर्व
कपाधातो र्णक प्रत्यये ग्राप्प्र
त्ययेन निष्पन्ना ॥
स्तनभरः पुं स्थूलस्तनविशि
ष्टः तत्पर्य्यायः स्तनाभोगः २
इति त्रिकाण्डशेषः ॥
स्तनभवः पुं रतिबन्धविशेषः
यथा स्वजङ्घाद्वयमध्यतः कृ
त्वा योषितः ददद्वयं स्तनोप
र्य्यारमेत् कामी बन्धः स्तन
भवः स्मृतः इति स्मरदीपिका
स्तनजाते त्रि ॥
स्तनमुखः पुं स्तनाग्रभागः य
था: स्तनचुचुकं स्तनवृन्तं शिखामुखः
स्तनयित्नुः पुं मेघः मुस्तकः
इत्यमरः मेघध्वनिः इति मेदि
नी विद्युत् इति शब्दरत्नाव
ली मृत्युः रोगः
इति हेमचन्द्रः ॥ स्तनवृ
न्तः पुं स्तनमुखः स्तनेर
बोंटा इति भाषा इति हेम
चन्द्रः ॥
स्तनशिखा स्त्री स्तनवृ
न्तः इति हेम
चन्द्रः ॥
स्तनाग्रं क्ली स्तन
वृन्तं इति ॥ ॥ ॥

राजनिर्घण्टः
स्तनान्तरं क्ली हृदयं इति हे
मचन्द्रः स्त्री वैधव्यलक्षणविशे
इति केचित् ॥
स्तनाभोगः पुं स्तनभरः इति
त्रिकाण्डशेषः स्तनस्य परि
पूर्णता च ॥
स्तनितं क्ली मेघनिर्घोषः इत्य
मरः करतालिशब्दः इति के
चित् शब्दिते त्रि ॥
स्तनितफलः पुं विकंटकवृक्षः
इति राजनिर्घण्टः ॥
स्तन्यं क्ली दुग्धं इति हेमच
न्द्रः स्तब्धः त्रि स्तंभितः जडीकृ
तः स्तभधातोः क्तप्रत्ययेन नि
ष्पन्नः ॥
स्तब्धरोमा पुं शूकरः इत्यम
रः स्तंभितलोमयुक्ते त्रि स्तभ
इ ङ स्तंभे इति कविकल्पद्रुमः
दंत्यादिः इ स्तंभ्यते ङ स्तं
भते तिष्टंभयिषति तिस्तं
भयिषति स्तंभो जडीभाव
स्तत् करणं च स्तंभो स्थूणा
जडीभावावित्यमरटीका: प्रीते
नावस्तब्धो जडीकृतः इत्यर्थ
इति क्रमदीश्वरो केशस्तंभ
इद्धक्रियानिरोधः इति भीमः

दोषवृद्धि रिति गोविन्दभट्टः
स्तंभो रुद्धीकरणं च स्तंभते
कवाटेन द्वारं लोकः इति
दुर्गादासः ॥
स्तभः पुं छागः इति शब्दरत्ना
वली ॥
स्तंबः पुं प्रकांडरहितवृक्षः
मल्लिकादिः तत्पर्य्यायः
गुल्मः २ इत्यमरः तृणादिः ॥
तत्पर्य्यायः गुच्छः २ इति
चामरः गुल्मः ३ इति जट्टी
का विटपः ४ इति जटा ॥
धरः ॥
स्तंबकरिः पुं धान्यं इत्यमरः
अपि च पुं स्त्रि स्तंबकरि र्धान्यं
व्रीहि नीधान्यमात्रके इति
शब्दरत्नावली ॥
स्तंबकारः त्रि गुच्छकारकः
स्तंबघात्रात् कृञ्धातोः घञ्
प्रत्ययेन निष्पन्नः ॥
स्तंबघ्नः त्रि तृणगुल्मलनका
खित्रादिः तत्पर्य्यायः स्त
बघ्नः २ इत्यमरः स्तंबहननी
३ इतिभरतः स्तंबहननं ४
इति सारसुन्दरी ॥
स्तंबघ्नः त्रि स्तंबघनः इत्यमरः
स्तंबपूः स्त्री पूरीभेदः तत्

पर्य्यायः तामलि पुं तामलिप्तं
तामलिप्ती तमालिनी स्तंबपू
विष्णुगृहं च स्यादिदर्भा तक्रं
डिन इति हेमचन्द्रः
स्तंबहननं क्ली स्तंबघ्नः इत्य
स्तंबहननी स्त्री टीकासार्स्व
दरी स्तंबेरमः पुं हस्ती इत्यमरः
स्तंभ गतड रोधने इति
कविकल्पद्रुमः गस्तभ्राति न
स्तभ्नोति ३ स्तंभित्वास्तब्धा।
रोधन मावरणं इति दुर्गादा
सः सौत्रधातुरयं ॥
स्तंभः पुं स्थूणाथाम इतिखुटी
इति च भाषा जडीभावः सत्व
निष्पत्तिभता इत्यमर ॥
भरतो ॥
स्तंभकरः पुं वेष्टनं इति के
चित् स्थूणाकारके जाड्य
कारके च त्रि ॥
स्तंभकी पुं वाद्यविशेषः इ
ति केचित् ॥
स्तंभनं क्ली जडीकरणं यथा
दुष्टस्तंभन मुग्रविघ्नशमनं
दारिद्र्यविद्रावणं इति बगला
मुखीस्तोत्रं षट्कर्मान्तर्गताभि
चारकर्मविशेषः यथा उलूक
काकयोः पक्षौ गृहीत्वा मंत्रा



वितमः आलिख्य वै शरावे
निशायां च साध्यानुरं समुदितं
मंत्रं स्थापितपवनं सहस्रज
प्तवनमध्ये निखनेत् स्तंभन
मेतदवश्यं भविता जगतां च
नात्र सन्देहः। स्थापितपवने कु
तप्राणप्रतिष्ठं कृत्वा प्रतिकृ
तिमथवा श्मशानाङ्गारकेण श
ववसनतो सम्यगधिष्ठितपवनो
द्धृतनाम्नी समं त्रललाटे वस
नाधिष्ठितपवनो सहस्रजप्तो न
इल्कया वसनं दग्धा कृत्वा नि
खनेत् श्मशानदेशे सपदि वा
कस्तंभः आलिख्य चेष्टकायू
गले मंत्रं सनामपुटितं निशाया
निशीथकाले सहस्रजप्तं प्रति
ष्ठितप्राणं बन्धनं मतिनीत्वन
रस्तंभनं मतिनीत्वा बुनिः तिमं
लिखितमंत्रं चितामय कीलकं
सहितकर्म सनाम समाहतं कृ
तजपं त्रिसहस्रकसंख्यया पि
धिखनेद्ध्यानं निवारणं विदि
तनिवतरो द्विगुनामत्नं मनुमि
मंनिशायां कृतनामकं नवसह
स्रजप्तादिसंसाधितं पथि खनेद
थसैन्यनिरोधनं। इति स्तंभनं
इति फेत्कारिणीतन्त्रे ५ पटः॥

लः अथाग्निस्तंभनं मा
लूरसारसं गृह्य जलौकां तत्र
पेषयेत् हस्तौ तु लेपयेत्
न अग्निस्तंभन मुत्तमं पा
ल्मलीरसमादाय खरमूत्रेण नि
धाय तं अश्माधारे लिपेत्तेन
अग्निस्तंभन मुत्तमं वायसी उद
रमरस मंडूकवसया सह गु
डिका कारयेत्तेन तलोऽग्नौ
प्रदिपेद्धर्षा एवमेतत् प्र
योगेण अग्निस्तंभन मुत्तमं र
क्तपाटलमूलेन अवष्टब्धमू
लकैः दिव्यं स्तंभयते लिप्तं प
यं पिंडं जलानकं मूत्तेन क
वचा कुष्ठं मरीचं नागरं
तथा चर्वित्वा च इमं सद्यो
जिह्वया ज्वलनं लिहेत् गो
रोचना भृङ्गराजं चूर्णीकृत्य
घृतं समं दिव्यस्तंभं पीत्वा
स्यात् मन्त्रेणानेनवैतथा ते
लं अग्निस्तंभनं कुरु ॐ नमो
भगवते जलं स्तंभय स्तंभय
संसमं सके कचर् जलस्तं
भनमंत्रोऽयं जलं स्तंभयते
ध्रुव इति गारुडे १५६ अध्या
यः प्रकारान्तरं षट्कर्मशब्दे
द्रष्टव्यं॥ ॥ ॥ ॥

स्तंभनः पुं कामदेवस्य पंच
बाणान्तर्गतबाणविशेषः य
थाऽन्मादनः शोषणस्तापन
नस्तंभनस्तथा सम्मोहनश्च पं
चैते विख्याताः कामशायकाः
इति जटाधरः॥
स्तंभितः त्रि जडीभूतः जडी
कृतः इति स्तंभशब्दात् इतः
संजाते इति इतप्रत्ययेन
स्तंभधातोः क्तप्रत्ययेन वा
निष्पन्नः स्तंभिमा पुं तत्त्व इत्यमरटी
कोषः स्तरी स्त्री धूमः इति हेमचन्द्रः
स्तवः पुं प्रशंसा तत्पर्य्यायः
स्तोत्रं २ नुतिः ३ स्तुतिः ४
इत्यमरः स्तवनं ५ इति शब्द
रत्नावली वर्णः ७ इति
जटाधरः॥
स्तवकः पुं गुच्छकः इत्यम
रः द्वे स्तवके ध्वलो इति ख्या
तेवकुमि पुष्पैः फलैर्वा संबाधः
पल्लवग्रंथिः गुच्छः स्तपनेध्व
न्यते भ्रमवैरत्र गुच्छः गुच्छम
जयनो नाम्नीति छन्दः पुष्पा
दि स्तवके गुच्छो मञ्जरी॥
हार कलापयोरिति चव
र्गान्ते सूरतिदे॥ ॥ ॥

वः स्यात् गुच्छः स्तवके स्तवे
हारभेद कलापयोः इति
चवर्गद्वितीयान्ते मेदिनी स्वा
र्थे के गुच्छकः गुत्सकः इ
ति च पठन्ति तदा गुध्यति वे
ष्टते इति शोधते क्रीडति भ्र
मरा अत्रेति वा गुत्सः गुध्य वे
ष्टे गुध म क्रीडे इत्यस्माद्धाना
म्नीति सः स्वार्थे कः गुत्सकः
स्तवके हारभेदच गुत्सः स्तं
बे च कीर्त्तितः इति दन्त्यान्तेष
रूद्रः गुत्सः स्यात् स्तवके
स्तंबे हारभिद्ग्रंथिपर्णयोरिति
दन्त्यसान्तेषु मेदिनी मुकुरः कु
ड्मलश्चापि स्तवको गुत्सका
विति इति हट्टः स्तूयते इति
स्तवकः पुं प्रत्यस्तो अल
स्तवः स्वार्थे अभिधानात् नि
त्यकः इति भरतः स्तुतिः
इति विष्णुः ग्रन्थपरिच्छेदः
समूहः इति केचित् स्तव
कारके त्रि स्तवरकः पुं आवर
कः इति केचित् स्तवेय्यः
पुं इन्द्रः इत्युणादिकोषः
स्ताकः पुं स्तवः स्तु धातोर्भावे



यत् प्रत्ययेन निष्पन्नः ॥
स्तावकः त्रि वक्ता स्तुधातो
र्णकप्रत्ययेन निष्पन्नः
स्तिमितं त्रि आर्द्रं इत्यमरः
चंचलं इति मेदिनी ॥
स्तिमिः पुं समुद्रः तथा इत्यु
णादिकोषः ॥
स्तीविः पुं नभः रुधिरं ॥
तृणजातिः अध्वर्युः पयः
शक्रः इति संक्षिप्तसारोण
दिवृत्तिः ॥
स्तुत त्रि स्तुतिविषयः तत्
पर्य्यायः ईलितः २ शस्तः ३ प
णायितः ४ पनायितः ५ प्रण
तः ६ पणितः ७ पनितः ८ आपि
गीर्णः ९ वर्णितः १० अभिष्टुतः
१२ इति शब्दरत्नावली नुतः १४
इति जटाधरः ॥
स्तुतिः स्त्री स्तवः इत्यमरः ॥
दुर्गा यथा स्तुतिः सिद्धिरिति
ख्याता श्रिया स्तुतिः सिद्धि
रिति ख्याता श्रियाः संश्रय
णाच्च सा लक्ष्मी वीलल ना वापि
क्रमात् सा कीर्तितश्च्युते इति देवीपु
पुराणे ४५ अध्यायः स्तुतिपाठकः

पुं राजादेर्वीजाद्देवीर्य्य स्तुतिक
र्ता तत्पर्य्यायः वंदी २ इत्य
मरः लग्नः ३ स्तुतिव्रतः ४ सू
तः ५ मागधः ६ मधुकः ७ इति
जटाधरः मातंगीयः ८ इति त्रि
कांडशेषः स्तुतिव्रतः पुं स्तुति
पाठकः इति जटाधरः ॥
स्तुत्यः त्रि स्तवनीयः स्तुधातोः
क्यप् प्रत्ययेन निष्पन्नः इति।
मुग्धबोधव्याकरणं ॥
स्तुनकः पुं छागः इति शब्द
चन्द्रिका स्तुभ ग न उ रोधने
सौत्रधातुरयं इति कविकल्प
द्रुमः दंत्यादिः पंचमस्वरी गे
स्तुभ्नाति न स्तुभ्नोति उस्तुभि
त्वा स्तब्ध्वा रोधनमावरणं ॥
इति दुर्गादासः स्तुभः पुं छा
गः इत्यमरटीकायां भरतः
स्तुयेष्ठं क्लीं श्रेष्ठः उत्तमः
वैदिकप्रयोगे यं स्तु धातोरी
णादिकसेप्रत्ययेन निष्प
न्नं इति सिद्धान्तकौमुदी।
गुणादिवृत्तिः ॥
स्तूप क उच्छ्राये इति
कविकल्पद्रुमः षष्ठस्वरी
उच्छ्रायो ॥ ॥ ॥

राशीकरणं कस्तूपति धान्यं
षकः तत्स्तूपयियति इति
दुर्गादासः
स्तूप ११ उच्छ्राये इति कवि
कल्पद्रुमः षष्ठस्वरी यस्तूप्य
ति ११ अस्तूपत् अस्तूपीत्
अस्मात् पूषादित्वान्निपं ङ
इत्यन्ये अतस्तूपत् इति दु॥
र्गादासः
स्तूपः पुं मृदादिकूटः राशी
कृतमृत्तिकादि इति पुंलिंग
संग्रहे अमरः संघातः
निष्प्रयोजनं वलं इति संक्षि
प्तसारोणादिवृत्तिः ॥
स्तृ न प स्तृतौ इति कविक
ल्पद्रुमः न प स्तृणोति स्तृणु
ते स्तृति राच्छादने इति दुर्गा
दासः
स्तृ न प्रीति रक्षा प्राणने इति
कविकल्पद्रुमः न स्तृणोति
इति दुर्गादासः
स्तृह दुश वधे इति कविक
ल्पद्रुमः दु अस्तृहीत् अस्तृत
त् शास्तृहति निस्तृर्हिषति इ
ति दुर्गादासः स्तृत गत्यां इति
कविकल्पद्रुमः सप्तमस्वरयुक्त

तमध्यः स्तृतति तरीस्तृतते इति
दुर्गादासः स्तृप णि छादने इति
कविकल्पद्रुमः प णि स्तृणाति
स्तृणीते स्तीर्णः स्तीर्णिः इति
दुर्गादासः
स्तृह ऊश वधे इति कल्पद्रु
मः ऊं अस्तृहीत् अस्तृतत्
शास्तृहती स्तृहंती तिस्तृहयि
षति इति दुर्गादासः ॥
स्तेन त् क चौर्य्ये इति कवि
कल्पद्रुमः अतिस्तेनत् धनं
चौरः इति दुर्गादासः
स्तेनं क्लीं स्तेयं इत्यमरटीका
यां भरतः
स्तेनः पुं चौरः इत्यमरः तस्य
दंडनिर्णयो यथा स्तेनस्यातः
प्रवक्ष्यामि विधिं दंडविनि
र्णये परमं यत्नमातिष्ठेत्
स्तेनानां निग्रहे नृपः स्तेना
नां निग्रहादस्य यशो राष्ट्रं च
वर्द्धते अन्वादे —णहामार्हि
पत्यो भार्य्यापचारिणी गुरौ
शिष्यश्च याज्यश्च स्तेनो रा
जनि किल्विषं यस्तुतान्तु
पक्वमानि द्रव्याणि स्तेन
येन्नरं तमद्यदंडयेद्राजा य
स्थानि चोरयेद्रुगृहात् ॥ ॥

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते तत्तदेव हरेदस्य प्रत्यादेशाय पार्थिवः इति मानवे ८ अध्यायः ॥

स्तेय क स्तेये इति कविकल्पद्रुमः एकादशस्वरी क स्तेययति तिस्तेययिषति इति दुर्गादासः ॥

स्तेमः पुं आर्द्रीभावः इत्य ॥ मरः

स्तेयं क्ली चौर्य्यं तत्तु चौरस्य भावः तस्य कर्म्म च इत्यमरभरतौ तस्य लक्षणं यथा प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितं इति प्रायश्चित्तविवेकः तत्करणे नरकं प्रतिप्रसवश्च यथा व्यास उवाच न हिंस्यात् सर्व्वभूतानि नानृतं च वदेत् क्वचित् नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन तृणं वा यदि वा शाकं मृदं वा जलमेव वा परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते न राज्ञां प्रतिगृह्णीयान्न शूद्रपतितादपि न चान्यस्मादशक्तश्च निन्दितान्वर्ज्जयेद्बुधः नित्यं याचनको न स्यात्तु पुनस्तत् प्रयाचयेत् न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते देवस्वं चापि यत्नेन सदा परिहरेत्ततः मूले फले तृणे अदत्तादानमस्तेयं मनुराह प्रजापतिः ग्रहीतव्यानि पुष्पाणि देवार्च्चनविधौ द्विजैः नैकस्मादेव नियतमननुज्ञाय केवले तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्बुधः धर्म्मार्थं केवलं ग्राह्यमन्यथा पतितो भवेत् तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः क्षुधार्त्तैर्नान्यथा विप्र विधिविद्भिरिति स्थितिः इति कौर्म्मे उपविभागे १५ अध्यायः स्तेयप्रायश्चित्तं यथा एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवं स्तेयदोषापहर्त्तॄणां व्रतानां श्रूयतां विधिः धान्यान्नधनचौर्य्याणि कृत्वा कामात् द्विजोत्तम स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतं द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनः चरेत् सान्तपनं कृच्छ्रं तत्पापपरिशुद्धये भक्ष्यभोज्यापहरणे यानशय्यासनस्य च पुष्पमूलफलानां च पञ्चगव्यं विशोधनं तृणकाष्ठद्रुमाणां तु शुष्कान्नस्य गुडस्य च चैलचर्म्मामिषाणां तु त्रिरात्रं स्यादभोजनं मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च अयस्कांस्योपलानां च द्वादशाहं कणान्नभुक् कार्पासकीटजोर्णानां द्विशफैकशफस्य च पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः एतैर्व्रतैरपोहेत पापं स्तेयकृतं बुधः इति मानवे ११ अध्यायः स्तेयस्य दण्डविधिर्दण्डशब्दे द्रष्टव्यः सुवर्णस्तेयप्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यं

स्तेयी पुं चौरः यथा सुमन्तुः सुवर्णस्तेयी मासं सावित्र्याः सहस्रं आज्याहुती जुहुयात् त्रिरात्रमुपवसेत् तप्तकृच्छ्रेण वा पूतो भवति इति प्रायश्चित्तविवेकः स्वर्णकारः इति केचित् ॥

स्तैनं क्ली चौर्य्यं इत्यमरटीकायां भरतः ॥

स्तैन्यं क्ली चौरस्य भावः कर्म्म च इत्यमरभरतौ ॥

स्तैन्यः पुं चौरः इति शब्दरत्नावली

स्तैमित्यं क्ली जडता इति राजनिर्घण्टः

स्तोकः पुं चातकः इति मेदिनी जलविन्दुः इति केचित्

स्तोकः त्रि अल्पं इत्यमरः

स्तोककः पुं चातकपक्षी इत्यमरः ॥

स्तोकः त्रि अवकर्णा पृथा तोस्तोणं प्रभयेनश्चत्रः

स्तोत्रं क्ली स्तवः इत्यमरः तस्य विधिं यथा अत्र वो वर्णयिष्यामि विधिं मन्त्रं तरस्य तु ऋचो यजूंषि सामानि यथावत् प्रतिदैवतं विधिस्तोत्रं तथा स्तोत्रं एवंवत् सम्प्रवर्त्तते द्रव्यस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च तथैवाभिजनस्तोत्रं स्तोत्रमेतच्च ॥ ॥

तष्टयः मन्वन्तरेषु सर्वेषु
यथाभेदाद्भवंति ये प्रवर्त्तयं
तितेषां वै ब्रह्मस्तोत्रं पुनः
पुनः इति मात्स्ये १२१
अध्यायः ॥
स्तोभः पुं सामविच्छेदः हे
लनं स्तंभनं इति हेमचन्द्रः
अपि च सांकेत्य पारिहास्य
वा स्तोभं हेलनमेव वा वैकुंठ
नामग्रहणमशेषाघहरं वि
दुः इति श्रीभागवते ६ स्कं
धे २ अध्यायः सांकेत्यं पुत्रा
दौ सांकेतितं पारिहास्यं परि
हासेन कृतं स्तोभं गीता
लापपूरणार्थं कृतं हे
लनं किं विष्णु नामोच्चार
णं इति तट्टीकायां श्रीधरस्वा
मी स्तोम त् क श्लाघने इति
कविकल्पद्रुमः अन्तस्तोमत्
इति दुर्गादासः ॥
स्तोमं क्ली मस्तकं धनं पा
स लोहाग्रदंडः वक्रे त्रि
इति केचित्
स्तोमः पुं समूहः इत्यमरः
यज्ञः इति हेमचन्द्रः स्तवः
इति केचित् ॥

स्तौपिकं क्ली बुद्धद्रव्यविशेषः
नेया इति हिन्दीभाषा इति
त्रिकांडशेषः ॥
स्त्यानं क्ली स्निग्धं प्रतिध्वानं
घनत्वं आलस्यं इति विश्व
मेदिन्यौ ॥
स्त्यानः त्रि संहतिकर्त्ता ध्वनि
कर्त्ता इति स्त्यैधातोः कर्त्त
रिक्तप्रत्ययेन निष्पन्नः इति
मुग्धबोधव्याकरणं ॥
स्त्येनः पुं चोरः अमृतं इत्यु
णादिकोषः ॥
स्त्यै संहतौ ध्वनौ इति ॥
कविकल्पद्रुमः दन्त्यादिरे
तस्प्रायुक्तनमध्यः स्त्यायति
तिस्त्यास्यति इति दुर्गादासः
स्त्री स्त्री स्तनयोन्यादिमती
तत्पर्य्यायः योषित् २ अब
ला ३ योषा ४ नारी ५ सीमं
तिनी ६ वधूः ७ प्रतीपदर्शि
नी ८ वामा ९ वनिता १० महि
ला ११ इत्यमरः प्रिया १२ रामा १३
जनिः १४ जनी १५ योषिता १६
जोषित् १७ जोषा १८ ॥
जोषिता १९ वनिका २० महे
लिका २१ महेला २२ इति
शब्दरत्नावली पार्वरी २३

सिंदूरतिलका २४ सक्तः २५
इति जटाधरः सुनयना २६
वामदृक् २७ अनंगा २८ ल
लना २९ कांता ३० पुरंध्री ३१
वरवर्णिनी ३२ सुतनुः ३३ त
न्वी ३४ तनुः ३५ कामिनी ३६ तन्वं
गी ३७ रमणी ३८ कुरंगनयना ३९
भीरुः ४० भाविनी ४१ विलासिनी
४२ नितंबिनी ४३ मत्तकाशिनी
४४ सुनेत्रा ४५ प्रमदा ४६ सुन्द
री ४७ अविनतक ४८ ललिता ४९
वासिता ५० भामिनी ५१ वरारो
हा ५२ नतांगी ५३ त्रिनता ५४
वरा ५५ श्यामा ५६ चारुवर्द्धना
५७ इति राजनिर्घंटः
सा चतुर्विधा पद्मिनी १ चित्रि
णी २ शंखि ३ हस्तिनी ४ तासां
लक्षणानि यथा भवति कमल
नेत्रा नासिका क्षुद्ररंध्रा अविर
लकुचयुग्मा दीर्घकेशी कृशांगी
मृदुवचन सुशीला नृत्यगीता
नुरक्ता सकलतनुसुवेशा पद्मि
नी पद्मगंधा १ भवति रतिरसज्ञा
नातिदीर्घा नखर्वा तिलकुसुमसम
नासा स्निग्धदेहोत्पलाक्षी क
ठिनघनकुचाढ्या सुन्दरी सा सु
शीला सकलगुणविचित्रा चित्रि
णी चित्रवक्त्रा २ दीर्घातिदीर्घन
यना वरसुंदरी या कामोपभो
गरसिका गुणशीलयुक्ता रेखा
त्रयेण च विभूषितकंठदेशा सं
भोगकेलिरसिका किल शंखिनी
सा ३ स्थूलाधरा स्थूलनितंबभा
गा स्थूलांगुली स्थूलकुचा सुशी
ला कामोत्सुका गाढरतिप्रि
या च नितंबखर्व्वा खलु हस्तिनी
स्यात् ४ पद्मिनी पद्मगंधा च मी
नगंधा च चित्रिणी शंखिनी क्षारगं
धा च मदगंधा च हस्तिनी शशा
के पद्मिनी तुष्टा मृगे तुष्टा च चि
त्रिणी वृषभे शंखिनी तुष्टा हये
तुष्टा च हस्तिनी पद्मिनी शश
यो योनि मेढ्रको चतुरंगुलो
चित्रिणी मृगयो योनि मेढ्रको
च तथाविधो हस्तिनी वाजि
नो रेवताविव द्वादशांगुलो त
स्या अवस्था यथा आषोडशा
भवेद्बाला तरुणी त्रिंशता मता
पंचपंचाशते यावत् प्रौढा वृ
द्धा ततः परं इति रतिमंजरी
बाला तु प्राणदा प्रोक्ता यु
वती प्राणधारिणी प्रौढा
करोति वृद्धत्वं वृद्धा मरणमा
दिशेत् निदाय शब्दो ॥ ॥



शीला मोघ वसंतयोः हेमं
ते शिशिरे योग्यान हृद्यास्का
पि शस्यते नार्य्यैवे षोडशाद्
र्षात् समत्याः परतो नच
आयुः कामो नरः स्त्रीभिः सं
योगं कर्त्तु महेति त्रिभि स्त्रि
भि रहोभिस्तु सेवेत प्रमदांन
रः सर्वेष्वृतुषु ग्रीष्मेषु पक्षात्मा
साद्व्रजेद्बुधः पंचपंचाशमा॥
नारी समसमानितः पुमान्
द्वावेतौ न प्रसूयेते प्रसूयेते
विपर्य्ययात् इति राज वल्लभे
सात्रिकत्वं स्त्रियाः सुभाशु
भलक्षणानि यथा श्रीहरि
रुवाच यस्यास्तु गर्विताः के
शा मुखंच परिमंडलं नाभिश्च
दक्षिणावर्त्ता सा कन्या कुलव
र्द्धिनी या च कांचनवर्णाभा
रक्तहस्तसरोरुहा सहस्राणां
नारीणां भवेत् सापि पतिव्रता व
क्रकेशा च या कन्या मंडलाक्षी च
या भवेत् भर्त्ता च म्रियते तस्या
नियते दुःखभागिनी पूर्णचन्द्र
मुखी कन्या बालसूर्य्यसमप्रभा
विशालनेत्रा विंवोष्ठी सा कन्या
लभते सुखं रेखाभिर्वहुभिः
केषां स्वल्पाभिर्धनहीनतां र
क्ताभिः सुखमाप्नो कृष्णाभिः
प्रेष्यतां व्रजेत् कार्य्येपि मन्त्री
पत्नी स्यात् साध्वी स्यात् कर
णेषुच स्नेहेषु भार्या माता
स्यात् वेश्या च शयने शुभा
अंकुशं कुंडलं चक्रं यस्याः पा
णितले भवेत् पुत्रकांनवे चक्र
स्याने छत्रमिति च पाठः पुत्रं
प्रसूयते नारी नरेन्द्रं लभते
पतिं यस्यास्तु रोमशौ पार्श्वौ
रोमशौ च पयोधरौ ऊर्द्ध्वौ
चाधरोष्ठौ च क्षिप्रं मारयते
पतिं यस्याः पाणितले
रेखा प्राकारं तोरणं भवे
त् अपि दासकुले जाता रा
ज्ञीत्व मुपगच्छति उक्तं ।
कपिला यस्य रोमराजीनि
रंतरं अपि राजकुले जाता
दासीत्वमुपजायते यस्या अ
नामिका ह्यष्टौ पृथिव्यां नैव
तिष्ठतः पतिं मारयते क्षिप्रं
स्वातंत्र्येण सूक्षिकेलिः प्रज्ञाया
मेवर्षं त्रेण भूमिकं पः प्रस्नाय
तेपतिं मारयते क्षिप्रं स्नेच्छाचा
रेण वर्त्तते चक्षुः स्नेहेन सौभा
ग्यं दंतस्नेहेन भोजनं त्वचः
स्नेहेन शय्या च पादस्ने॥॥

हेनवाहनं स्निग्धोन्नतोन्ना
म्रनखौ नार्य्याश्चरणौ शु
भौमत् स्यांकुशा— विह्नौच
चक्रलांगललक्षितौ अस्वेदिनौ
मृदुतलौ प्रशस्तौ चरणौ स्त्रियाः
शुभेजंघे विरोमेच ऊरू हस्तिक
रोपमौ अश्वत्थपत्र सदृश
विपुलं गुह्य मुत्तमं नाभिः
प्रशस्ता गंभीरा दक्षिणाव
र्त्तिका शुभा अरोमा त्रिवलीना
र्य्याः स्यात् स्तनौ रोमवर्जितौ इ
तिगारुडे नरस्त्रीलक्षणं ॥ अथ अ
ध्यायः तस्याश्चरित्रं यथाविध
कुंभाकाररूपा मसूतास्याच
सततं हृदयेलवरधाराभ्यांश
श्च मधुरभाषिणी स्वकार्य्यप
रिनिष्पन्नतत्परां सततं सदा
शांतमलिनरूपाच प्रसन्नव
दनेक्षणां श्रुतौ पुराणेयाऽसां
च च विच्छ मनि रूपिनं नास्को
विश्वसेत् मोक्षो अप्राप्तौ चतु
राश्रयो नासौ कोवा रिपुराण
यो नासौ कोवा रिपुर्मित्रं प्रार्थ्य
यंतीनवंनवं हृष्टाः हरेणपुरुष
मिच्छंती हृदये सदा वाघिस्वात्म
सती त्वं च माप यंती मयत्नतः श
यात कामाच वामां च कामाधायां
मनोहरां वाक्येस्वात्मं छादयंती
शांतमैथुनमानसा कांतमस्मि
ती रहस्ति वाचेतीव महलज्जितां
मानिनी मैथुनाभावे कोपनां
कलहाकुरां सुप्रीतां मूर्त्तिसंभो
गात् स्वल्पमैथुनदुःखितां
सुमिष्टान्नात् प्रीततोयादाकां
क्षंती च मानसैः सुन्दरं रसि
कं कांतयुवानं गुणिनं सदा
सतात् परमपिस्नेहं कुर्वतीं र
तिकर्मरि प्राणाधिकं प्रिय
तमं संभोगकुशलं प्रियं पश्य
न्ती रिपुतल्यं च वृद्धं वामैथु
नाक्षमं कलहं कुर्वती शश्व
त तेन सार्द्धं सुकोपनां च चर्वया
भक्षयंतीव्र कीनाश इव गो
जरं दुःसाहससुरूपां च सर्वदो
षाश्रयां सदा सुगृत कपट
रूपां च दुःसाध्या मपतीतकां
ब्रलविलपिवादीनां हस्याज्जा
मोहकारिणीं तपोमार्गार्गला
याश्चत् सक्तिमार्गकपाटिकां
हरेर्भक्तिव्यवहितां सर्वमाया
करंडिकां संसारकारागारे च
शश्वन्निगडरूपिणी इन्द्रजाल
स्वरूपांच मिथ्यातिस्वप्नरूपि
णी विभ्रती कामसौन्दर्य्य मधोंग



मतिकृतमितं लाला विंमूत्र
पूयानामाधारं मलसंयुतं दुर्ग
न्धि दोषसंयुक्तं रक्तास्थिक म
संस्कृतं मायारूपं मायिनां च
विधिना निर्मितं पुरा विषरूपं
मुमुक्षूणां मदरूपा मध्य वाञ्छि
तं इति ब्रह्मवैवर्त्ते प्रकृतिखं
डे २४ अध्यायः ॥ तस्मा नि
न्द्या यथा दुर्निवार्य्यश्च सर्वे
षां स्त्रीस्वभावश्च चापलः
दुःसाध्यं योगिभिः सिद्धैः रक्षा
भिश्च तपस्विभिः जितेन्द्रियै
र्जितक्रोधैः स्त्रीरूपं मोहका
रणं सर्वमायाकरण्डं च
कामवर्द्धनकारणं ब्रह्मास्त्र
न्तामदेवस्य दुर्भेद्यं जयका
रणं सुनिर्मितं च विधिना
सर्वाद्यं ब्रह्मदर्शं मोक्षद्वारक
वाटं च हरिभक्तिविरोधनं सं
सारबंधनस्तंभरज्जुरूपमकृं
तनं वैराग्यनाशबीजं च पाप्म
ग्रामविवर्द्धनं पत्तनं साहसानां
च दोषाणामालयं सदा अप
त्ययानां क्षेत्रं च स्वयं कपटमू
र्त्तिमत् अहंकाराश्रयं पाशस्थि
घंकं सुधामुखं सर्वैरसाध्यमा
नेच दुराराध्यं च सर्वदा स्व
कार्य्यसाध्यं च भार्य्यं कलहांकु
रकारणं इति ब्रह्मवैवर्त्ते गण
पतिखंडे ९ अध्यायः ॥
स्त्रीसंसर्गशुक्रपुंदर्शननिषेधो
यथा रहः स्थलनिकटस्थ नर
रूपः स्त्रीयुतः पुमान् स्त्रीसंसक्तं
च पुरुषं यः पश्यति नराधमः
करोति रसभंगं वा कालसूत्रं
व्रजेत् ध्रुवं तत्र तिष्ठति पापि
ष्ठान् यावच्चन्द्रदिवाकरौ वि
प्रो घातश्च पितरं गुरुं वा भूमि
पं द्विज रहः स्मरति संसक्तं को
पतो वापियः पश्येत् स रतो
न्मुखं स्त्रीविच्छेदो भवेत्तस्य
ध्रुवं सप्तसु जन्मसु श्रो
णी यतः स्थलं वक्त्रं यः प
श्यति परस्त्रियाः कामतो
वापि मूढश्च पंगुर्भवति
निश्चितं इति ब्रह्मवैवर्त्ते ग
णपतिखंडे ४२ अध्यायः
साव त्रिभी रहितव्या यथा स्त्री
मातिरक्ता पाश्च रक्षणीया
स्वबंधुभिः जनकस्वामिपुत्रै
श्च गर्हिता नैव च निश्चितं इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखं
डे ५ अध्यायः अपि च पिता
रक्षति कौमारे भर्त्ता रक्षति

यौवने पुत्रश्च स्थविरे रक्षेत्
न स्त्री स्वातंत्र्यमर्हति इति
दायतत्त्वे अन्यच्च कौमारे
रक्षिता तातो दत्वा पात्राय
सत् कुली सर्वदा रक्षिता कां
तस्तदभावे च तत्सुतः त्रिषुव
स्थासु नारीणां रक्षिता रक्षय
सदा याः स्वतंत्राश्च ताः नष्टाः स
र्वधर्मबहिष्कृताः असत्कुल
प्रसूता स्ताः कुलटा दुष्टमान
साः घातजन्मकृतं पुण्यं तासां
नश्यति पश्यत इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे ७ अध्या
यः अपरं च रक्षेत् कन्यां पिता
बाल्ये यौवने पतिरेव तां वा
र्द्धके रक्षते पुत्रो स्तनाथ्यां स्त
नय स्तथा पतिं विना न
तिष्ठेत दिवा वा यदि वा नि
शि इति गारुडे ९५ अध्यायः
स्नासूर्य्यैरपि अदृश्या कर्त्त
व्या यथा परस्पृष्टा च या
नारी या स्पृहा कुरुते परं
सापि दुष्टा परित्याज्या चे
त्याह कमलोद्भवः तस्मान्नारी
परैर्यत्नाद दृष्टा कलिभिः कृता
असूर्य्यं पश्या यादाराः सुद्दास्ता
पतिव्रताः स्वच्छन्दगामिनी या च
स्वतंत्रा सूकरी समा अंतर्दुष्टा
सदासैव निश्चितं परगामिनी
स्वामिमाध्या च या नारी कुलध
र्म्मभिया स्थिता कांतेन सार्द्धं
सा कांता वैकुण्ठं याति निश्चितं
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खंडे १८ अध्यायः तस्यामाना
वमानयो गुणदोषौ यथा पदे
पदे अशुभं तस्य यः स्त्रीमानं च
रक्षति अवमन्यं त्रियं मूढो
यो याति पुरुषाधमः पदे पदे
तदशुभं करोति पार्वती सती
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खंडे ३२ अध्यायः उपयावि
कास्त्रीत्यागे दोषा यथा मो
हितस्तु वाच इङ्गितेनैव नारीणां
सद्योमत्तो भवेत् पुमान्
करोत्याकृष्य संभोगं यः स
पवोत्तमो विभो ज्ञात्वा स्फुट
ममिप्रायं नार्य्याः संप्रेरितो
द्विषः पश्चात् करोति शृंगा
रं पुरुषं स च मध्यमः पुनः
पुनः प्रेरितश्च स्त्रिया कामार्त्ता
या च यः तया न लिप्तो रहसि
स क्लीबो न पुमान् हो गृही
तपस्वी कामी वा त्यजेत् स्त्रि
यमुपस्थितां व्रजेत् परत्र नरक

गएजपस्य भवेदिह अष्टस्त्री
भेएजूपस्य अएदर्पो भवेद्ध्रुवं
समयः झ्लो वर्तो याति ब्रह्मन्
पापेन योषितः इति ब्रह्मवै
वर्ते श्रीकृष्णजन्मखंडे ८४ अ
ध्यायः परस्त्रीसंगदोषोयथा
सदापकीर्त्तिर्वसति परस्त्रीषु
च वस्तुषु तस्मात्ते नैवगृह्णंति
सन्तः स्वलोकाकारणे ॥
स्मर मोतरे राधे मदीयं विषयं
कुरु अत स्तेन नमतो लोलंभ
विना परवस्तुषु योषिद्रूपा
च मेमाया सर्वेषां मोहकारि
णी लीलया कुरुते मोहं स्वा
त्मारामस्य संततं नृणांमूढा
स्थये देशे रागिणां संततंर
तिः स्वनाभिधेमासपिंडेऽ
थवेलानालयेऽप्सवो श्रोणी
देशे स्तने तासां कामदेवाल
यं सदा तस्मात्तानहि पश्यंति
संतो हि धर्मभीरवः कोधर्मः
किं यशस्तेषां का प्रतिष्ठा च
किंतपः किं बुद्धिर्विद्यास्नानं
च परस्त्रीषु च यन्मनः इहाप्य
पयशो दुःखं नरकेषु परत्र च
वासः सदा तस्तेषां च ताडनं कृ
मिभक्षणं दुःखबीजं समस्तं ॥

मत्वा मूढास्य देवदोषतः पर
स्त्रीसेवनं मोत्वा कुर्वन्ति स
ततं सदा उत्तमा मतं पदांभो
जं मतं कर्म मध्यमाः सदास्व
र्गतिप्रास्यदधमाः परस्त्रीसेवनं
सदा विपत्तिः संततं तस्य पर
वस्तुषु यन्मनः विशेषतः पर
स्त्रीषु सर्वाणि च भूमिषु देवा
न परस्त्रियं दृष्ट्वा विरमेद्यो हर्षं
स्मरन् स्पृष्ट्वा परस्य वर्णं च हस्त
मतालतालुचिः संततं नास्ति स
सक्ताः संतः स्त्रीषु च कामतः य
स्त्रा व्याधि ज्ञानहानि लोकनिंद्या
तयेनच इति ब्रह्मवैवर्ते श्रीकृ
ष्णजन्मखंडे ८५ अध्यायः ॥
सभर्तृका यास्तु व्रतोपवासा
दिः पृथग्द्विषिद्धो अत्र नायथा
नास्ति स्त्रीणां पृथग् यज्ञो न व्र
तं नाप्युपोषणं पतिं शुश्रूष
ते यत्तु तेन स्वर्गे महीयते वि
ष्णुनापि भर्तॄः समान व्रतचारि
त्वमिस्युक्तं समान व्रतचारित्वं
भर्तृव्रताचरणं तदानुकूल्यका
रित्वं यत्र तस्याविरुद्धे व्रतादौ वि
धो ष विधि स्तत्र भर्त्रनुज्ञाया ए
वापि यथाशक्त्या कामं भर्तृ
रनुज्ञाया व्रतोपवास नियमे

ज्योहीनामभ्यासः स्त्रीधर्मः इति
यत्तु पत्योजीवति यानारीउ
पोष्य व्रतमाचरेत् आयुः सं
हरते पत्युः सा नारी नरकं व्र
जेत् इति विरुद्धं तदनुज्ञा
त विषयं इत्यकादशीतत्त्वे
स्त्रीधर्मादि यथा यास्त्रीभ
र्तृसौभाग्यात्सौभाग्यावम
तः भयनेभोजनेतस्यानस
ख्जीवनं वृथा यस्यानास्ति
प्रियप्रेम तस्या जन्म निरर्थकं
तत् किं पुत्रे धने रूपे संपत्तौ
यौवनेऽथवा यद्भक्तिर्नास्ति
कांते च सर्वप्रयत्नमेपरे सा
स्पृचि धर्महीना च सर्वकर्म
विवर्जिता पतिर्वै दुर्गतिर्भर्ता
दैवतं गुरुरेव च स्वात्मगुरुः
स्वामी न गुरुः स्वामिनः परः
पिता माता सुतो भ्राता मित
प्रोदातमिदं धनं सर्वस्वदाता
स्वामी च स्त्रीणां योषितां स
दाः कादिदेव द्विजानातिम
कुलाध्वी च सुशीला कुलपा
लिका असदूं शस्मृतायाडुःशी
ला धर्मवर्जिता स्वर्विष्ठायोनि
दुष्टोपतिं निन्दति कोपनः यास्त्री

द्वेष्टि सर्वपरं पति विस्मरमेव
रु कुंभीपाके पतति सा यावं
दिन्द्रा श्चतुर्दश व्रतं चानश
नं दानं सत्यं पुण्यं तपाश्चिरं
पतिभक्तिविहीनाया भस्मीभू
तं निरर्थकं अतः किंनवदा
मि निष्ठुरं पतिमीश्वरं भृत्याप
राधे दैवेन प्राणांस्त्यत्वामि
नि श्रितं पतिदोषे महासाध्वी
पतिं न निष्ठुरं वदेत् यदि सा
कृमशोकाच प्राणांस्त्यजतिध
र्मतः पतिसेवा व्रतं स्त्रीणां
पतिसेवा परं तपः पतिसे
वा पतिसेवा परं सत्यं दानती
र्थानुतीर्थकं सर्वदेवमयः स्वा
मी सर्वदेवमयः स्मृतिः सर्वपु
एप स्वरूपस्य पतिरूपीजनार्द
नः यामतोभर्तुरुच्छिष्टं भुंक्ते
पादोदकं सदा तस्या दर्शनस्पृ
हानित्यं वांछंति देवताः इति
ब्रह्मवैवर्ते श्रीकृष्णजन्मखंडे ५०
अध्यायः अपि च गन्ती
हि दैवतं स्त्रीणां तन्त्री च
गतिरुच्यते जीवपत्न्याः
स्त्रियो भर्ता दैवतं प्रभुरेव च
याधर्मचारिणी नारी पतिव्र
तपरायणा ॥ ॥ ॥ ॥



नानुवर्त्तेत भर्त्तारं सा सिद्धिर्न
प्रणश्यते पतिव्रता भर्तृपरा
नारी भर्तृपरायणा इह कीर्त्तिं
परां प्राप्य स्वर्गे महीयते भर्त्त
श्चितानुगामिन्या देवाराधन
शीलया गार्हस्थ्यधर्मरतया
भर्त्ता सेव्य यदिह त्वया इति च
द्धिपुराणे गृहिणीधर्म्मा
यथा गृहिणीनां सदाचारं प्र
यत्नात् यत्न श्रुतौ श्रुतं गृहिणी
पतिभक्ता च देव ब्राह्मण पूजि
सा प्रत्युषा प्रातरुत्थाय नमस्कृत्य
पतिं स्वरं प्रांगणे मंडलं दद्यात्
गोमयेन जलेन च गृहं कृत्यं च
कृत्वा च स्नात्वा गत्वा गृहं सती
स्वरं विप्र पतिं नत्वा पूजये
त् गृहदेवतां गृहत्यं हि निवृ
त्य भोजयित्वा पतिं सती ॥
अतिथिं पूजयित्वा च स्वयं भुं
क्ते सैव सती स्त्रीणां त्रैविध्यं
यथा उत्तमा पतिभक्ता सा किं
चिद्धर्म्मसमन्विता प्राणांते
पि न कुरुते तं जारं स्वयं प्रस्क
रं पूजयेत् सा यथा कान्तं तथा
देव द्विजातिथिं व्रतानि चोपवा
सांश्च कुरुते सर्वपूजनं गुरु
णां रक्षिता यत्नात् जारं च न
भजेद्भयात् सा कृत्रिमा मध्यमा
च यथा किंचित् पतिं भजेत्
स्थानं नास्ति क्षणं नास्ति नास्ति
प्रार्थयिता नरः तेन हे नन्दता
सा च सती त्वमुपजायते अ
धमा परमा दुष्टात्यं भासदेषा
जातया अधर्मशीला दुःशीला
दुर्मुखा कलहप्रिया पतिं भर्त्सय
ते नित्यं जारं च सेवयेत् सदा
दुःखं ददाति कान्ताय विपत्त्यं
च पश्यति जारद्वारमुपायेन दे
ति कान्तं मनोहरं जारद्वारं स्था
ने अपद्वारमिति च पाठः द
दाति भर्त्रे नाहारं विषोक्तिं च
क्ति संततं धर्मिष्ठं वरिष्ठं च
गरिष्ठं च महीतले कामदेवस
मं चापि जारं पश्यति कामतः
सुभदृष्टा कटाक्षेण शास्त्रतप
पोयसीसुता सवेशं पुरुषं दृष्ट्वा
युवानं रतिशूरकं योनिः क्लि
द्यति नारीणां कामुकीनां निरं
तरं अधर्मं चिंतयेत् शश्वत् जा
रं च परं समुदा गुरुभिर्भर्त्सितास्या
वरक्षिता च शासनेन च तथापि जा
रं कुरुते नापि साध्वानुपेरपि ना
स्ति तस्याः प्रियं किंचित् सर्वकार्य
वशेन च

गावस्तृणमिवारण्ये प्रार्थ
यंति नवं नवं विद्युद्भासा जले
रेखा न तस्याः प्रीतिस्तथैव च अ
धर्मयुक्ता सततं कपटं वक्ति
निश्चितं अनेन पक्षिधर्म्मेण च न
मनो गृहकर्म्मणि न गुरौ न
च देवेषु जारे स्निग्धं च चंचलं
स्त्रीजाति त्रिविधानां च कथा च
कथिता मया इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे दश अध्या
यः स्त्रीसंसर्गे दोषो यथा स
नत् कुमार उवाच अयि भ्रातः
किं करोषि कुशले युवतीपते
स्त्रीपुंसोर्वर्द्धते प्रेम नित्यं तत्रि
त्य नूतनं अर्गलं ज्ञानमार्ग
स्य भक्तिद्वारकपाटकं ॥
मोक्षमार्गव्यवहितं चिरं बंध
न कारणं गर्भवासस्य बीजं
च परं नरककारणं पीयूषघ
ट्टागरलं भुंक्ते पापी नराधमः
इति चत्रैव १२९ अध्यायः
स्त्रीस्वभावं चरित्रं च आश्चर्यं
पापकारकं तत्राणं नास्ति रहो
नास्ति नास्ति कश्चिद्विभावना
तेन नारद नारीणां सतीत्वमु
पजायते एकवासा तथा गोरी
प्रगमावा वरवर्णिनी मध्यगं
उप्रगल्भा च वयोतीता तथा
स्त्रियः स्वरूपं पुरुषं दृष्ट्वा तं
ति मुनिसत्तम स्वभाव एव ना
रीणां शास्त्रस्य भूषणं कारणं
इति वाराहे सूर्यप्रतिष्ठान ना
माध्यायः अपि च विद्या यातो
लन अभ्यासः स्त्रीणां ज्ञातः कुचे
लता व्याधीनां भोजनं जीर्णं वा
क्रोचीतः प्रगल्भता तस्करस्य
वधो दंडः कुमित्रस्याल्पभाष
णं पृथक् शय्या तु नारीणां
ब्रह्मणस्यानिमंत्रिता दुर्जनाः प्रि
य्यिनो दासा दुष्टाश्च पटहाः स्त्रि-
यः ताडिता मार्दवं यान्ति न ते स
त्कारभाजनाः जानीयात् प्रे
षणे भृत्यान् बांधवान् व्यसना
गमे मित्रं चापदि काले च भार्यां
च विभवक्षये स्त्रीणां द्विगुण आ
हारः प्रज्ञा चैव चतुर्गुणा षड्गु
णो व्यवसायश्च कामाश्चाष्टगु
णाः स्मृता न स्वप्नेन जयेन्निद्रां
न कामेन स्त्रियं जयेत् न चेन्ध
नैर्जयेद्वह्निं न मद्येन तृषां ज
येत् समांसभोजनैः स्त्रियो मे
धे सीधुसुरासवैः वस्त्रैर्मनोह
रैर्माल्यैः कामः ॥ ॥ ॥

स्त्री षु विस्रंभते ब्रह्मचार्य्यैव
वक्तव्यः प्रायं मन्मथचेष्टितं
स्वयं हि पुरुषं दृष्ट्वा योनिः प्र
स्रवन्ते स्त्रियाः सर्वेषां पुरुषं
दृष्ट्वा भ्रातरं यदि वा सुतं गुरु
त्वा मित्रकं काम्यं इत्यष्टानिस
तते स्त्रियः नद्यश्च नार्य्यश्च स
मस्वभावाः स्वतंत्रता वेगव
लाधिकं च तोयेषु दोषेषु नि
पातयंति नद्यो हि कूलानि कुला
नि नार्य्यः नदीपातयते कूलं ना
री पातयते कुलं नारीणां च न
दीनां च स्वच्छन्दललिता गतिः
ताभिर्न तृप्यति काष्ठानां नाप
गानां महोदधिः नांतकः सर्वभू
तानां न पुंसां वामलोचना मनो
नुकूलाः प्रमदा रूपवत्यः स्वलं
कृताः वासः प्रासाद पृष्ठेषु स्व
र्गः स्यात् शुभकर्मणाः न दानेन न
मानेन नार्जवेन न सेवया न श
स्त्रेण न शास्त्रेण सर्वदा विषमा
स्त्रियः इति गारुडे १०९ अध्या
यः स्त्रीवधनिषेधो यथा अव
ध्यां च स्त्रियं प्राहुस्तिर्य्यग्यो
निगतेष्वपि सत्वं सु पृथिवीपा
लन धर्मं त्यक्तुमर्हति इति व
ह्निपुराणे सप्तोरुपाख्याननाम्ना
ध्यायः स्त्रीणामात्मदाने स्व
ातंत्र्यं यथा ततोऽ ब्रवी
च्छाप्यवजानाहं त्वां पार्थिवात्म
ज दातुं शक्ता तथात्मानं स्व
तंत्रा नहि योषितः इत्युपक्रम
विश्वकर्मसुता साध्वीनाम्नाचि
त्रांगदाभवत् सा कदाचिन्महार
ण्यं सखीभिः परिवारिता जगाम
नैमिषं नाम स्नातुं कमललोचना
सा स्नातुमवतीर्णा च अथाभ्या
गात्सुरेश्वरः सुदेवतनयो धीमा
न् सुरथो नाम नामतः तां
दृष्ट्वा च तन्वंगीं सुभार्गीं म
दनातुरः संवृतः सा सखीं
प्राह वचनं सत्वसंयुता असौ
नराधिपसुतो मदनेन कद
र्थ्यते मदर्थं च तमे सख
प्रदानं सुरूपिणः सख्यस्ताम
ब्रुवन् वाले न प्रगल्भासि संद
रि न स्वातंत्र्यं न वा तीह प्रदाने
स्वात्मनोऽ नघे पिता न वास्ति य
स्मिन्नः सर्वशिल्पविशारदः न
तेःस्वयं इति वामनपुराणे
८ अध्यायः स्त्रीणां मध्ये गु
रवो यथा माता महो मातुला
नी तथा मातृश्च सोदरा श्वश्रूः

पितामही ज्येष्ठा धात्री च गुर
वः स्त्रीषु इत्युक्ता गुरुवर्गोऽयं
मातृः पितृतो द्विजाः अनु
वर्तन मेतेषां मनो वाक्काय
कर्मभिः पूज्याः पंच विशेषतः
तेषा माद्याः पंच विशेषतः
तेषा माद्यास्त्रयः श्रेष्ठा स्तेषां
माता सुपूजिता यावत् पिता
च माता च द्वावेतौ निर्विकारि
णौ तावत् सर्वं परित्यज्य
पुत्रः स्यात् परायणः मा
तापिता च सुप्रीतौ स्यातां पुत्र
गुणे यदि स पुत्रः सकलं धर्मं
प्राप्नुयात्तेन कर्मणा नास्ति
मातृसमं दैवं नास्ति मातृस
मो गुरुः तयोः प्रत्युपकारोपि
न कथंचन विद्यते तयोर्नि
त्यं प्रियं कुर्य्यात् कर्मणा मन
सा गिरा न ताभ्या मननुज्ञातो
धर्ममन्यं समाश्रयेत् इति
कौर्मे उपविभागे ११ अध्या
यः व्यभिचारिण्याः स्त्रिया
निर्वासनत्वं यथा हृताधिका
रां मलिनां पिण्डमात्रोपसेविनीं
परिभूतामधः शय्यां वासयेद्व्य
भिचारिणीं स्त्रीणां मेध्य
त्वे त्याज्यत्वे च यथा सोमः ॥
शौचं ददौ तासां गन्धर्वाश्च शु
भां गिरं पावकः सर्वभक्षित्वं
मेध्या वै योषितो ह्यतः व्यभि
चाराद्दृतौ शुद्धिर्गर्भे त्यागो वि
धीयते गर्भभर्तृवधे तासां त
था महति पातके सुरापी
व्याधिता द्वेष्ट्री विहरत्नव्या
प्रियम्वदा भर्तव्या चान्यथा हे
न क्रूषयो हि भवेन्महत् तस्याः
प्रशासा यथा यत्राविरुः द्व
दंपत्यो स्त्रितगस्तत्र वर्द्धते म्
ते जीवति वा पत्यौ या नान्यमु
प गच्छति सेह कीर्तिमवाप्नो
ति मोदते चोमया सह अभा
त्यज्यस्तृतीयांशो दायो स्याभ
रणं स्त्रियाः स्त्रीभि र्भर्तृवचः
कार्य्य एष धर्मः परः स्त्रियाः ॥
स्त्रीगमनादिकालो यथा षोड
शर्त्तुनिशाः स्त्रीणां तासु युग्मा
सु संविशेत् ब्रह्मचार्य्येव पर्वाण्या
द्याश्चतस्रस्तु वर्जयेत् एवं गच्छ
न् स्त्रियं क्षामो मघां मूलं च व
र्जयेत् लतण्पं जनयेदेव पु
त्रं रोगविवर्जितं यदा कामी
भवेद्वापि स्त्रीणां वरमनुस्मर
न् स्वदारनिरतश्चैव स्त्रियो रक्षा
यतस्ततः भृग्वादि ॥

नाभर्त्रादिभिः स्त्रियः पूज्या यथा
भर्तृ भ्रातृ पितृज्ञाति श्वश्रूश्व
शुर देवरैः बंधुभिश्च स्त्रियः
पूज्या भूषणाच्छादनाशनैः
स्त्रीभिः श्वश्रूश्वशुरयोः पादवं
दनं सदाकार्य्यं यथा संयतो
पस्करा दक्षा हृष्टा व्ययपराङ्मु
खी श्वश्रू श्वशुरयोः कुर्य्यात् पा
दयोर्वन्दनं सदा प्रोषितभर्तृक
या क्रीडादिकं वर्जनीयं यथा
क्रीडां शरीरसंस्कारं समाजो
त्सवदर्शनं हास्यं परगृहे
यानं त्यजेत् प्रोषितभर्तृका
ज्येष्ठया स्त्रिया सह धर्मकर्मा
नुष्ठानं कर्त्तव्यं यथा ज्येष्ठां
धर्मविधौ कुर्य्यान्न कनिष्ठां
कदाचन वाहयित्वाग्निहोत्रे
ण स्त्रियं वृत्तवतीं पतिः श्रा
द्धे द्विविधदानाग्निं चैवावि
लंवितः हित्वा भर्तुर्दिवं ग
च्छेदिह कीर्तिमवाप्य च इति
गारुडे ९५ अध्यायः चं
चलस्त्रीणां कुलनाशकत्वं य
था लवणानलान्ना नद्यः स्त्री
भेदोत्तमैथुने मृत्युं जनवा
दीनं वित्तं दुःखत्रयान्तकराज्य
श्रीर्वलपापान्तं हालान्तं चल

र्च्चसं आचारं योषवासांतकु
लस्यान्तं स्त्रियश्चलाः सर्वेत्त
याता निचयाः पतनान्ताः सम
च्छ्रिताः स्त्रीनायके वासनिषे
धादि यथा अनायके न व
स्तव्यं वस्तव्यं वकुनायके स्त्री
नायकेन वस्तव्यं वस्तव्यं वा
लनायके त्यजेद्ध्यानमष्टमा
द्वे नवमेत्वष्टमश्यापकाद
यो स्त्रीसनार्थित्वान्मनुष्याणां
भिया परिजनस्य च अर्थावृषे
तमर्थ्यादाः स्त्रिय स्त्रियं त्रिभ
र्तृषु इति गारुडे ११५ अध्यायः
स्त्रियो धन्या यथा योषितः
साधु धन्यास्तास्ताभ्यो धन्य
तरोस्ति कः इत्युपक्रम्य क
लिः साधिति यत् प्रोक्तं शूद्रः
साधिति योषितः तस्माद्भग
वान् साधु धन्या स्त्रेति पुनः पु
नः तत् सर्वं श्रोतुमिच्छामो
न चेद्गुह्यं महामुने इत्युक्तो
मुनिभिर्व्यासः प्रहसोदमथा
ब्रवीत् योषित् शुश्रूषणं भ
र्तुः कर्मणामनसागिरा ॥
कुर्वती समवाप्नोति तत्स
लोकं ततो द्विजाः नाति
क्लेशेन महता ॥ ॥ ५

तानेव पुरुषो यथा तृतीयं
व्याहृतं तेनमया साधिति
योषितो इति विष्णुपुराणे ६
अंशे २ अध्यायः वेश्यास्त्री
णां धर्मो यथा श्रीकृष्णमहि
ष्युक्तवः वेश्यानामपि यो धर्म
स्तन्मे कथय तपोधन दाल्भ्यउवा
च यः स्थितः स्वल्पमादायगृह
मेष्वतिवः सदा निष्ठुयैनेवो
पचर्य्यः सततान्यत्रदाभिकान्
देवतानां पितॄणां च पुण्याहे
समुपस्थिते गोभूहिरण्यदाना
नि प्रदेयानि च शक्तितः ब्रा
ह्मणेभ्यो वरारोहाः कार्य्याणि
वचनानि च यच्चाप्यन्यत्कृतं
सम्यगुपदेशात्मितत्वतः अ
विचारेण सर्वाभिः रनुष्ठेयं तत्
तत् पुनः संसारोत्तारणायाल
मेतद्वेदविदो विदुः यदा सूर्य्य
दिने हस्तः पुष्यो वाथ पुनर्व
सुः भवेत् सर्वौषधिस्नानं सम्य
कु नारी समाचरेत् तदा पंच
शरस्याथ सन्निधानत्वमिष्यते
अर्चयेत् पुंडरीकाक्षमनंगस्या
नुकीर्तनैः कामाय पादौ संपू
ज्य जंघे वै मोहकारिणे मेढ्रं
कन्दर्पनिधये कटिं प्रीतिः ॥॥

मतेनमः नाभिं सौख्यसमुद्रा
य रामाय च तथोदरं हृदयं हृ
दयेशाय स्तनावाह्लादकारि
णेउत्कंठायेति वैकंठमास्य
मानन्दकारिणे वामांसं पुष्प
चापाय पुष्पवाणाय दक्षिणं
नमोऽनंगायवै मौलिं विलोला
येति च ध्वजं सर्वात्मने शिरस्त
द्देवदेवस्य पूजयेत् नमः
शिवाय शांताय पाशांकुशाय
रायच गदिने पीतवस्त्राय शं
खचक्रधराय च नमो नाराय
णायेति कामदेवात्मने नमः न
मः शांत्यै नमः प्रीत्यै नमो रत्यै श्रि
यै नमः नमः पुष्ट्यै नमस्तुष्ट्यै न
मः सर्वार्थसंपदे एवं संपूज्य
गोविंदमनंगात्मानमीश्वरं
गंधैर्माल्यैस्तथा धूपैर्नैवे
द्येन च भामिनी तत आहूय
धर्मज्ञं ब्राह्मणं वेदपारगं ॥
अव्यंगावयवं पूज्य गंधधूपा
र्चनादिभिः शालेयतण्डुलप्र
स्थं घृतपात्रेण संयुतं तस्मै
विप्राय सा दद्यान्माधव प्री
यतामिति यथेष्टाहारयु
क्तस्यैतमेव द्विजसत्तमं र
त्यर्थं कामदेवोऽयमिति चि
तेन धार्य्यता ॥ ॥ ॥



यद्यदिच्छति विप्रेन्द्र स्तत्तत्
कुर्य्यात् विलासिनी एवमादि
व्यवारेण सदा तद्व्रतमाचरेत्
तंडुलप्रस्थदानं च यावन्मासा
स्त्रयोदश ततस्त्रयोदशे मासि
संप्राप्ते तस्य भाविनी विप्रस्यो
पकरे युक्तां शय्यां दद्याद्वि
लक्षणां सोपधानक विश्रा
मां स्वास्तरावरणां शुभां दी
पिकोपानह च्छत्र पादुकास
नसंयुतां सपत्नीक मलंकृत्य
हेमसूत्रांगुलीयकैः सूक्ष्मव
स्त्रैः सकटकैः धूपमाल्यानुलेप
नैः कामदेवं सपत्नीकं गुडकुं
भोपरि स्थितं ताम्रपात्रासनगतं
हैमं नेत्रपटावृतं सकांस्यभा
जनोपेत मिक्षुदंडसमन्वितं
दद्यादनेन मंत्रेण तथैकां
गां पयस्विनीं यथांतरं न
पश्यामि कामकेशवयोः स
दा तथैव सर्वकामाप्तिरस्तु
विप्रेन्द्र सदा मम यथा न कामि
नीं देवं प्रयाति त्वं केशव
तथा ममापि देवेश शरीरे त्वं कु
रु प्रभो तथा च कांचनं देवं प्र
तिगृह्णातु द्विजोत्तमः कोदात्
कस्मा अदादिति वैदिकमंत्र

मीरयेत् ततः प्रदक्षिणीकृत्य
विसृज्य द्विजसत्तमं शय्यासना
दिकं सर्वं ब्राह्मणस्य गृहं नय
त् ततः प्रभृति योऽन्योपि रत्यर्थं
गेहमागतः सामान्यं सूर्य्यवा
रे च स संपूज्यो भवेत्तदा एवं
त्रयोदशं यावत् मासमेकं
द्विजोत्तमं तर्पयीत यथाकालं
प्रोषितेऽन्यं समाचरेत् तद
नुज्ञा नृपवंतं यावदस्यागमो
भवेत् आत्मनोपि तथा विप्र
गर्भसूतकराजसे दैवं वामा
नुयं वा स्यादुपरागेणं वा ततः
स्नाचारानि प्रशास्ते यथाशक्त्या
समाचरेत् एतद्वः कथितं स
र्वासमवतीनां विशेषतः सर्व
स्यैऽयं यतो भाव्यो वेश्यानामि
ह सर्वदा पुरुहूतेन यत् प्रोक्तं
दानवीषु पुरा मया तदिदं सां
प्रतं सर्वं भवतीष्वपि युज्यते
सर्वपापप्रशमन मनंतफल
दायकं कल्याणीनां कथि
तं कुरुध्वं च वरानना करोति
याशेष मखंडमेतत् कल्याणि
नीमाधवलोकसंस्था सा पूजि
ता देवगणैरशेषैरानन्दकृत्
स्थानमुपैति विप्राः तपोधनः

सोप्यभिधाय चैतदनंगदान
व्रतमंगनानां स्वस्थानमेष्यत्य
नुताः समस्ता मित्यं करिष्यंति
च वेदयोने इति मत्स्यपुराणे
ऽनंगदानव्रतं ९८ अध्यायः
स्त्रीरोगनाशकानि औषधं यथा
हरिरुवाच एकं पुनर्नवामू
लं अपामार्गस्य वा शिव सर
सं योनिविलिप्तं वरांगस्य व्य
थां हरेत् प्रसूतिवेदनां चै
व तरुणीनां व्यथां हरेत्
भूमिकुष्मांडमूलं वै शालि
तंडुलवारिणा समाहृ दुग्ध
पीतं स्यात् स्त्रीणां बहुपय
स्करं रुद्रेन्द्रवारुणीमूललेपा
त् स्त्रीस्तनवेदना नश्येत् चूत
विपकाचकाथी वल्मींत्र पालि
काभतिलासाम हेशान योनि
मूलं विनाशयेत् प्रलेपिताका
रवेल्लमूलेनैव विनिर्गता योनिः
प्रवेशमायाति नात्र कार्य्या वि
चारणा नीली पटोलमूलानि
साज्यानि तिलवारिणा पिष्टा
न्येषां प्रलेपो वेश्याला गर्भगतो
गमत् पाठामूलं कूटपीतं
पिष्टं तंडुलवारिणा पापरोग
हरं स्याद्व्रंकुश पानं तथैव च ॥

वाप्यादकं च समधु पीतं मं
गलस्यवै पापरोगस्य सेला
पनिवृत्ति कुरुतेशिव कद
लीलिकुचं पीतं पिष्टा तंडुल
वारिणा स्त्रीणां चैव महादेव
रक्तस्रावं हि वारयेत् चूतत्व
गा कुद्रलाक्षा पीता क्षीरेण
वै सह मदरं हरते रोगं नात्र का
र्य्या विचारणा द्विजयष्टी त्रिका
टुकं चूर्णं पीनं हरेच्छिव तिल
क्वाथेन संयुक्तं रक्तगुल्मं स्त्रि
याहर कुसुमस्य निवद्धं च तरु
णीनां महेश्वर रक्तोत् पल
स्यवै कंदं शर्करा स्त्रीणां धार
येत् गर्भपातनं रक्तस्रावस्य
नाशः स्यात् पीतोदक निसे
वनात् पीतत्व कांजिकं कूदक
थितं पार पुंखया द्विग्रमें धव स
युक्तं योगेन्द्रं स्त्रीणां प्रसूतिकृत्
त् मातुलुंगस्य वै मूलं कटि वं
प्रसूतिकृत् अपामार्गस्य वै मू
लं योनिस्थं च प्रसूतिकृत् अ
पामार्गस्य वै मूले गर्भवत्या
स्तनामतः उत् पाठ्यमाने स
कले पुत्रः स्यादन्यथा सुता
अपामार्गस्य वै मूले नारीणां
शिरसि ॥ ॥



स्थिते गर्भमूलं विनश्यतेतना
त्र कार्य्या विचारणा कर्हरम
दनफलं मधुकैः सहितः शिव
योनिः स्पृष्टः स्यात् द्रुह्यया युव
त्याः किं पुनर्द्दर मायस्य वि
दलान्येव वित्तमाणि महेश्वरे
द्रुतभावित सुक्ष्माणि पयसा
साधितानि वै समधाज्यपयोभि
श्च भक्षयित्वा कामयेत् स्त्री
णां घातं महादेव तत्क्षणात्ना
त्र संशयः रस स्तैरंडतैलेन गं
धकेनास्तुभोभवेत् त्रिफलोद
संसृष्टो वलकृद्धतणाद्भवेत्
दुग्धं वित्तयमाषेस्तु शिंवी ॥
वीजैस्तु साधितं अपामार्ग
स्य तैलेन पीतं स्त्रीघातका
मकृत् इति गारुडे १९९
अध्यायः
स्त्रीगवी स्त्री धेनुः गाः इ
तिभाषा तत् पर्य्यायः नवा २
निलिंपा च रोहिणी च इति
त्रिकाण्डशेषः ॥
स्त्रीघोषः पुं प्रत्यूषः इति
केचित्
स्त्रीचित्तहारी पुं शोभांजनः
इति त्रिकाण्डशेषः नारीम
नोहारिणि त्रि ॥ ॥

स्त्रीचिह्नं क्ली योनिः इति जटा
धरः नारीलक्षणंच ॥
स्त्रीचौरः पुं कामुकः तत् प
र्य्यायः रतहिंडकः २ इति त्रि
काण्डशेषः नारीहर्त्तरि त्रि स्त्रि
स्त्रीजितं पश्यमात्रेण सर्वं पु
एयं प्रणश्यति न भूमो पात
की पापात् पापिनो स्त्रीजि
तात् परः इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे ४२ अध्या
यः स्त्रीता स्त्री स्त्री त्वं स्त्रिया
भावः इत्यर्थे तप्रत्यय आप
प्रत्ययाभ्यां निष्पन्ना ॥
स्त्रीधनं क्ली स्त्री स्वत्वापन्न
भूतधनं तत् षड्विधं यथा अ
ध्यग्न्यध्यावाहनिकं भर्त्तृदा
यं तथैव च भ्रातृदत्तं पितृभ्यां
च षड्विधं स्त्रीधनं स्मृतं इति
दायभागधृतनारदवचनं ॥
अथ स्त्रीधनं तत्र कात्यायनः
प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या
चैव यदन्यतः भर्त्तुः स्वाम्यं
भवेत्तत्र शेषन्तु स्त्रीधनं स्मृ
तं अन्यत पितृ मातृ भर्त्तृ
कुलव्यतिरिक्ताल्लब्धं ॥
शिल्पेन यदर्ज्जितं तत्र भ
र्त्तुः स्वातन्त्र्यं ॥ ॥

तेन स्त्रिया अपि धनं न स्त्रीध
नं अस्वातन्त्र्यात् एतद्व्यतिरि
क्ते धने स्वत्वे स्त्रिया एव दानाय
धिकारात् अत्र विष्णुः पत्यौ जीव
ति यः कश्चिदलङ्कारो धृतो भ
वेत् न तं भजेरन् दायादा भजमा
नाः पतन्ति ते पत्युरदत्तो
पि नरकन्तया परिहितोऽलं
कारस्तावतैव भार्य्यायाः स्त्री
यो भवतीति मेधातिथिः
कात्यायनः ऊढया कन्यया
वापि पत्युः पितृगृहेऽथवा
भर्त्तुः सकाशात् पित्रोर्वा ल
ब्धं सौदायिकं स्मृतं सौदायि
कं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमि
ष्यते यस्मात्तदानृशंस्यार्थं तैर्द
त्तं तत् प्रजीवनं सौदायिके स
दा स्त्रीणां स्वातन्त्र्यं परिकीर्त्ति
तं विक्रये चैव दाने च यथेष्टं
स्थावरेष्वपि सदायेभ्यः पितृ
मातृभर्त्तृ कुलसंबंधिभ्यो ल
ब्धं सौदायिकं आनृशंस्यमने
ष्टुर्यं नारदः भर्त्रा प्रीतेन पि
तत् सा यथाकाममश्नीयात्
याद्वा स्थावराहते भर्त्तृदत्तविशे
षणात् भर्त्तृदत्तस्थावराहते

नयद्दत्तं स्त्रियै त
स्मिन् मृते॰

स्थावरं देयमेव अन्यथा यथे
ष्टं स्थावरेष्वपि इति कात्यायनो
क्तेर्विरुद्धा ते कल्पतरुरत्नाक
रयोः कात्यायनः अपकारक्रि
यायुक्ता निर्लज्जा चार्थनाशि
नी व्यभिचाररता या च स्त्रीधन
नचसार्हति याज्ञवल्क्यः दुर्भि
क्षे धर्मकार्य्ये वा व्याधौ संप्रति
रोधके गृहीतं स्त्रीधनं भर्त्ता
नाकामो दातुमर्हति संप्रति
रोधके भोजनाद्यवरोधकारि
एयुत्तमर्णादिके अन्यत्र तु का
त्यायनः न भर्त्ता नैव च सुतो
न पिता भ्रातरो न च आदाने वा
विसर्गे वा स्त्रीधने प्रभविष्णवः
अथ स्त्रीधनाधिकारिणः दे
वलः सामान्यं पुत्रकन्यानां
मृतायां स्त्री धनं विदुः अप्र
जायां हरेद्भर्त्ता माता भ्रा
ता पिता पिता अत्र हन्तु निर्दि
ष्टात् पुत्रकन्ययो स्तुल्याधि
कारः अन्यतराभावे अन्यत
रस्य तदुक्तं पतयो रभावे ऊढा
या दुहितुः पुत्रवत्याः संभावित
पुत्रायाश्च तुल्याधिकारः स्व
पुत्रद्वारेण पार्वणे सपिण्डीकर
णाहर्त्वं यत् पितृभ्यः प्रदीयते

सर्व्वं स्वाहरा माता इति धर्म्मपु
निश्चयः इति एतत्तामपौत्र
तद्भोग्यपतिपिण्डदानसंभवा
तथा च नारदः पुत्त्राभावे तु
दुहिता तुल्यसन्तानदर्शनात्
अतएव यताहृष्टा दुहितृभा
वे पौत्त्राधिकारः दौहित्रोऽपि
ह्यमुत्रैनं सन्तारयति पौत्त्रवत्
इति मनुवचने दौहित्रे पौत्त्र
धर्म्मातिदेशात् पुत्त्रेण परि
णीतदुहितृवीर्य्याद्दायकसूत्रेण
वाप्यदुहितृपुत्त्रवास्य न्याय्यत्वा
त् एवं तदभावेऽपि पौत्त्रः तद्भोग्य
पिण्डदातृत्वात् तदभावे वन्ध्या
विधवयोर्मातृधनाधिकारं त
योरपि तत् प्रजात्वात् तदभावे
तु भर्त्ता तच्च न पितृमातृदत्त
धनविषयं तत्र भ्रातुरधिकारा
त् तथा च वृद्धकात्यायनः पितृ
मात्रैव यद्दत्तं दुहितृः स्थावरं
धनं अप्रजायामतीतायां भ्रा
तृगामि तु सर्व्वदा मातुः परिण
यनकाललब्धं तु पुत्त्रसत्त्वेऽपि क्र
मेणानूढोढादुहित्रोरेवा
धिकारः मातुः पारिणा
य्यं स्त्रियो भजेरन्निति वशि
ष्ठोक्तेः स्त्री ध॥ ॥॥

नं दुहितृणामप्रत्तानामप्रतिष्ठि
तानां चेति गौतमवचनेन अथ
अप्रत्तानामवाग्दत्तानां तद
भावे त्वप्रतिष्ठितानां वाग्दत्ता
नां ऊढदर्थे नञ् तदभावे च
कारसमुच्चितानामूढानां स्त्री
धनं दुहितृणामिति सामान्य
तः प्राप्तत्वात् अप्रत्तानामि
त्यादेस्तु क्रमार्थत्वेनोपसंहा
रार्थत्वात् व्युत्क्रमाह मनुः मा
तुस्तु यौतकं यत् स्यात् कुमा
रीभाग एव सः इति यौतकप
दं तु मिश्रणे इत्यस्मात् सिद्धं
मिश्रता च स्त्रीपुंसयोर्विवाहा
द्भवति यदेतत् हृदयं तव तद
स्तु हृदयं मम यदिदं हृदयं मम
तदस्तु हृदयं तव इति मन्त्रलिं
गात् यौतकं तदिति वाचस्प
तिमिश्रैरप्युक्तत्वात् यौ
तकं यौतकमपि साधु परिण
यनकालः परिणयनपूर्व्वापरी
भूतकालः स च हस्त्यारम्भपत्न्यभि
वादनान्तो विवाहतत्त्वे विवृतः
यत्तु मनुवचनं स्त्रियास्तु यद्भवे
द्वित्तं पित्रा दत्तं कथंचन ब्राह्म
णी तद्धरेत् कन्या तदपत्यस्य वा भ
वेत् इति तत् पित्रा दत्तमिति विशे
षणात्

द्विवाहसमयादन्यादपि तद्द
त्ते कन्याया एवेत्येतदर्थं ब्राह्म
णीपदं तु कन्यामात्रपरं यद्वा
क्षत्रियादिस्त्रीणामनपत्यानां
पितृदत्ते धने सपत्नीदुहिता
ब्राह्मणी कन्या हरेत् न पुनर
प्रजस्त्रीधने भर्त्तेति वचना
वकाशः इति वचनार्थः तद
भावे पुत्त्राधिकारः दुहितृणा
मभावेन रिक्थं पुत्त्रेषु तद्भवे
त् इति मनुवचनात् एवं पुत्त्रा
धिकारात् प्राक् दुहित्राधिका
रविधायकवचनोभयाणेतद्वि
षयकाणि पुत्त्राद्यभावे तु ब्रा
ह्मादिपंचकविवाहकालीनं
स्त्रीधनं भर्त्तुः आसुरादित्रयवि
वाहकालीनं तु मातुः तदभावे पि
तुः यथा मनुः ब्राह्मदैवार्षगा
न्धर्व्वप्राजापत्येषु यद्धनं अती
तायामप्रजायां भर्त्तुरेव तदि
ष्यते यत्त्वस्याः स्यात् धनं दत्तं
विवाहेष्वासुरादिषु अतीता
यामप्रजायां मातापित्रोस्तदि
ष्यते कन्याधनाधिकारे क्रम
माह बौधायनः रिक्थं मृता
याः कन्याया गृह्णीयुः सोदराः
स्वयं तदभावे भवेन्मातुस्तदभा
वे भवेत् पितुः॥

अत्र क्रमदर्शनात् एवं वचने मा
ता पित्रो रित्यत्र पाठक्रमेणा
धिकारो न तु द्वन्द्वनिर्देशात् स
मुच्चितेन बृहस्पतिः मातृष्व
सा मातुलानी पितृव्यस्त्री पितृ
ष्वसा श्वश्रूः पूर्व्वजपत्नी च मातृ॥
तुल्याः प्रकीर्त्तिताः यदासामौर
सो न स्यात् सुतो दौहित्र एव
वा तत्सुतो वा धनं तासां स्व
स्रीयाद्याः समाप्नुयुः औरस
पदं कन्यापुत्त्रोभयपरं सुत
इति सपत्नीपुत्त्रपरं सर्व्वासा
मेकपत्नीनामेका चेत् पुत्त्रिणी तेन
त्त्रिणा प्राह पुत्त्रवतीर्मनुः इ
ति मनुस्मृतेः एकपत्नीनामिति
एकः पतिर्यासां ताः तत्सुत
पदमौरसविशेषणं वैयर्थ्यात्
सपत्नीपुत्त्रसद्भावे स्वस्रीयाद्य
धिकारापत्तेश्च तत्सुत इति पौ
त्त्रसपत्नीपौत्त्रपरं तत् दौहित्रप
त्त्रपरं तस्य स्वभोग्यभर्त्तृपिण्डदा
नाधिकारात् अत्र प्रागुक्तक्रमानु
सारात् दौहित्रपर्य्यन्तानन्तर
मेव सपत्नीपुत्त्र तत् पुत्त्रयोर
धिकारः तत्प्रागुक्तभर्त्रादि
पितृपर्य्यन्ताभावेऽपीति वाचस्प
भत्त्रादी॥ ॥



नां धनिभोग पार्वणपिण्डदाना
नधिकारात् तस्मादेतेषां स
पत्नी पौत्रान्तानां तत्सुतो
वेति वाक्यादूर्ध्वस्थितानां सा
मान्यं पुत्रकन्यानां सुताषां
स्त्रीधनं विदुः अप्रजायां हरेत्
भर्त्ता माता भ्राता पिता पिता इ
ति देवलोक्तानां भर्त्रादि पितृ
पर्य्यन्तानां चाभाव एव सतस्य
पितृश्वशुरभ्रातृश्वशुरादिषु स
त्स्वीयाया इत्यनेन भगिनीसुत
भर्त्तृभागिनेय भर्त्तृज्येष्ठकनिष्ठ
भयस्तुप भ्रातृसुत स्वभ्रातृपु
त्र जामातृ देवराणां मातृष्वसा
दिधने अधिकारः अनन्यगतेर्व
चनात् त्रयाणां उदकं कार्य्यं त्रि
षु पिण्डः प्रवर्त्तते चतुर्थः संप्रदा
तैषां पञ्चमो नोपपद्यते इति
दायभागप्रकरणीय मनुस्मृ
तेः पिण्डदोऽंशहरश्चेति याज्ञ
वल्कीयात् मातृतुल्याः प्रकी
र्त्तिता इत्यनेन स्वस्त्रीयादीनां
पुत्रत्वस्थापनेन एकप्रयोजन
कत्वात् मातुलो भागिनेयस्य
स्वस्त्रीयो मातुलस्य च श्वश्रु
श्वशुरायोश्चैव साश्च माता महस्य च
एतेषां चैव भार्य्याभ्यः स्वस्रमी॥

तुः पितुः स्वधा पिण्डदानं तक
र्त्तव्यमिति वेदविदां स्थितिः
इति शातातपवचनात् पिण्डदा
नविशेषेणैव षष्ठामेयामधि
कारक्रमः प्रतिपत्तव्यः पाठक्र
मादर्थक्रमस्य बलवत्त्वात् अन्य
था सर्व्वशेषे देवराधिकारे महा
जनविरोधः स्यात् तत्र प्रथमं दे
वरः तत् पिण्डतत्पितृ पिण्डतत्पितृ
देष पुरुषत्रय पिण्डदत्वात् सपिं
डत्वाच्च भ्रातृस्त्रीधने अधिका
री तदभावे भ्रातृश्वशुरः देवर
योः सुतो तत् पिण्ड तत्पितृपिण्ड
तत्पितृदेष पुरुषद्वय पिण्डदत्वा
त् सपिण्डत्वाच्च तयोरभावे त्व
सपिण्डोपि भगिनीपुत्रः तत्
पिण्डतत् पुत्रादेष तत् पित्रा
दित्रयपिण्डदत्वात् तदभावे भर्त्तृ
भागिनेयः पुत्रादत्र्ये उर्व्वलत्वे
न तत्स्थान पातित्वो एपि भगि
नी पुत्रभर्त्तृभागिनेययो स्तथैव
बलाबलस्य न्याय्यत्वेन तदूर्ध्व
देय पुरुषत्रय पिण्डदत्वात् तत्
पिण्डदत्वात् तत्पितृ पिण्डदत्वाच्च
मातुलानी धने अधिकारी तद
भावे भ्रातृपुत्रः तत् पिण्ड तत्पु
त्रादेषतत् पित्रादि पिण्डदत्वात्
पितृ॥

स्वसृधने अधिकारी तदभा
वे श्वश्रुरयोः पिण्डदानात् जा
माता श्वश्रूधने अधिकारीति
क्रमः स्वस्त्रीयाया इति अधि
कारिमात्रपरं न पाठिकक्रमपरं
एषां षष्ठां मातिस्त्रि कोक्तानाम
भावे सपिण्डानन्तर्य्येण श्वशुरा
दिवदधिकारी नचसपिण्डाभावे
मातृस्वसेति वचने वाच्यं अस्ति
त्वधिकारिगणने देवर तत्
सुत भ्रातृश्वशुर सुतानाम
धिकारस्थापनादास्त्रतरश्वशुर
भ्रातृश्वशुरादेः परित्यागा
दिति इति दायतत्त्वं॥

स्त्रीधर्म्मः पुं ऋतुः तत्पर्यायः छ्य २ आर्त्तवं ३ रजः ४ इति हेमचन्द्रः॥


स्त्रीधर्म्मिणी स्त्री ऋतुमती इत्यमरः अस्य विवरणं रजस्वला शब्दे द्रष्टव्यं॥

स्त्रीधवः पुं पुरुषः इति जटाधरः

स्त्रीपरः पुं विट्त्रः कामुकः इति केचित्

स्त्रीपण्योपजीवी पुं संभोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्धनोपजीवी इति महाभारते दानधर्म्मः

स्त्रीपुंधर्म्मः पुं स्त्रीपुंसयोर्व्यव
हारः स च अष्टादशविवादप
दान्तर्गत विवादविशेषः यथा
स्त्रीपुंधर्म्मो विभागश्च द्यूतमा
ह्वय एव च पदान्यष्टादशैतानि
व्यवहारस्थिताविह इति
मनौ ८ अध्यायः तद्विवरणं
यथा पुरुषस्य स्त्रियाश्चैव ध
र्म्मे वर्त्मनि तिष्ठतोः संयोगे
विप्रयोगे च धर्म्मान् वक्ष्यामि
शाश्वतान् अस्वतन्त्राः स्त्रियः
कार्य्याः पुरुषैः स्वैर्दिवानिशं
विषयेषु च सज्जन्त्यः संस्थाप्या
आत्मनो वशे पिता रक्षति कौ
मारे भर्त्ता रक्षति यौवने रक्ष
न्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्य
मर्हति कालेऽदाता पिता वा
च्यो वाच्यश्चानुपयन् पतिः
मृते भर्त्तरि पुत्रस्तु वाच्यो मा
तुरक्षिता सूक्ष्मेभ्योऽपि प्रसं
गेभ्यः स्त्रियो रक्ष्या विशेषतः
द्वयोर्हि कुलयोः शोकमा
वहेयुररक्षिताः इमं हि स
र्व्ववर्णानां पश्यन्तो धर्म्ममु
त्तमं यतन्ते रक्षितुं भार्य्यां
भर्त्तारो दुर्व्वला अपि स्वां प्र
सूतिं चरित्रं च कुलमा॥



वेतिमं वीजं परपरिग्रहे पृ
थोरपी — पृथिवीं भार्य्यां
पूर्वविदो विदुः स्थाणुछेद
स्य केदारमाहुः शल्यवतोमृ
गं: एतावानेव पुरुषो यज्जा
यात्माप्रजेति ह विप्राः प्राहुस्त
थाचैतद्यो भर्त्ता सा स्मृतांगना
न निष्क्रयविसर्गाभ्यां भर्त्तुर्भा
र्य्या विमुच्यते एवं धर्मं विजा
नीमः प्राक् प्रजापतिनिर्मि
तं सकृदंशो निपतति सकृत्
कन्या प्रदीयते सकृदाह ददा
नीति त्रीण्येतानि सतां सकृत्
यथा गोऽश्वोष्ट्रदासीषु महि
ष्यजाविकासु च नोत्पादकः
प्रजाभागी तथैवान्यांगनास्व
पि ये क्षेत्रिणो वीजवंतः पर
क्षेत्रप्रवापिणः तेवैशस्यस्य जात
न लभंते फलं क्वचित् यदन्य
गोषु वृषभो वत्सानां जनयेच्छ
तं गोमिनामेव ते वत्साः मो
घं स्कन्दितमार्षभं तथैवाक्षेत्रि
णो वीजं परक्षेत्रप्रवापिणः
कुर्वंति क्षेत्रिणामर्थं न वीजी
लभते फलं फलंत्वनभिसंधा
य क्षेत्रिणां वीजिनां तथा
प्रत्यक्षं क्षेत्रिणामर्थो वीजा

योनि र्गरीयसी क्रि — भ्युपग
मात्त्वेतद्वीजार्थं यत् प्रदीय
ते तस्येह भागिनौ दृष्टौ वी
जी क्षेत्रिक एव च ओघवा
ताहृतं वीजं यस्य क्षेत्रे प्ररो
हति क्षेत्रिकस्यैव तद्वीजं न
वप्ता लभते फलं एषधर्म्मो
गवाश्वस्य दास्युष्ट्राजाविक
स्य च विहंग महिषीणां च वि
ज्ञेयः प्रसवं प्रति एतद्वः सा
रफल्गुत्वं वीजयोन्योः प्रकी
र्त्तितं अतः परं प्रवक्ष्यामि यो
षितां धर्ममापदि भ्रातुर्ज्येष्ठ
स्य भार्य्या या गुरुपत्न्यनुजस्य
सा यवीयसस्तु या भार्य्या स्नु
षा ज्येष्ठस्य सा स्मृता ज्येष्ठो य
वीयसो भार्य्यां यवीयान् वा
ग्रजस्त्रियं पतितौ भवतो गत्वा
नियुक्तावप्यनापदि देवराद्वा
सपिंडाद्वा स्त्रिया सम्यङ्नियु
क्तया प्रजेप्सिताधिगंतव्या सं
तानस्य परिक्षये विधवायां
नियुक्तस्तु घृताक्तो वाग्यतो
निशि एकमुत्पादयेत् पु
त्रं न द्वितीयं कथंचन द्वितीय
मेके प्रजनं मन्यंते स्त्रीषु तद्विदः अ
निर्वृत्तं नियोगार्थं पश्यंतो धर्मतस्तयोः

विधवायां नियोगार्थे निर्वृत्ते
तु यथाविधि गुरुवच्च स्नुषा
वच्च वर्त्तेयातां परस्परं नियुक्तौ
यौ विधिं हित्वा वर्त्तेयातां तु का
मतः तावुभौ पतितौ स्यातां स्नु
षागगुरुतल्पगौ नान्यस्मिन् वि
धवा नारी नियोक्तव्या द्विजाति
भिः अन्यस्मिन् हि नियुंजाना ध
र्मं हन्युः सनातनं नोद्वाहिके
षु मंत्रेषु नियोगः कीर्त्त्यते क्व
चित् न विवाहविधावुक्तं विध
वावेदनं पुनः अयं द्विजैर्हि
विद्वद्भिः पशुधर्मो विगर्हितः
मनुष्याणामपि प्रोक्तो वेणोरा
ज्यं प्रशासति समहीमखि
लां भुंजन् राजर्षिः प्रवरः पु
रा वर्णानां संकरं चक्रे कामो
पहतचेतनः ततः प्रभृति यो
मोहात् प्रमीतपतिकां स्त्रियं
नियोजयत्यपत्यार्थं तं विग
र्हंति साधवः यस्या म्रियेत
कन्याया वाचा सत्ये कृते पतिः
तामनेन विधानेन निजो वि
न्देत देवरः यथाविध्यभिग
म्यैनां शुक्लवस्त्रां शुचिव्रतां
मिथो भजेदाप्रसवात् सकृत्स
कृदृतावृतौ न दत्त्वा कस्यचित् ॥

कन्यां पुनर्दद्यात् विचक्षणः
दत्वा पुनः प्रयच्छन् हि प्राप्नो
ति पुरुषानृतं विधिवत् प्रति
गृह्यापि त्यजेत् कन्यां विगर्हि
तां व्याधितां विप्रदुष्टां वाछ
द्मना चोपपादितां यस्तु दोषव
तीं कन्यामनाख्यायोपपादये
त् तस्य तद्वितथं कुर्यात् क
न्यादातुर्दुरात्मनः विधाय
वृत्तिं भार्यायाः प्रवसेत् का
र्य्यवान्नरः अवृत्तिकर्षिता हि
स्त्री प्रदुष्येत् स्थितिमत्यपि
विधाय प्रोषिते वृत्तिं जीवेन्नि
यममास्थिता प्रोषिते त्वविधा
यैव जीवेच्छिल्पैरगर्हितैः
प्रोषितो धर्मकार्य्यार्थं प्रती
क्ष्योष्टौ नरः समाः विद्यार्थं षट्
यशोर्थं वा कामार्थं त्रींस्तु व
त्सरान् संवत्सरं प्रतीक्षेत
द्विषंतीं योषितं पतिः ॥
ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृ
त्वा न संवसेत् अतिक्रामेत्
प्रमत्तं या मत्तं रोगार्त्तमेव वा
सा त्रीन् मासान् परित्याज्याः
विभूषणपरिच्छदा उन्मत्तं
पतितं क्लीवमवीजं पा
परोगिणं नत्यागोऽस्ति ॥

द्विषंत्याश्च नरदायापवर्त्तनं
मद्यपाऽसाधुवृत्ता च प्रतिकू-
ला च या भवेत् व्याधिता वाधि-
वेत्तव्या हिंस्रार्थघ्नी च सर्व्वदा व-
न्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृ-
तप्रजा एकादशे स्त्रीजननी स-
द्यस्त्वप्रियवादिनी या रोगिणी
स्यात्तु हिता संपन्ना चैव शील-
तः सानुज्ञाप्याधिवेत्तव्या ना-
वमान्या च कर्हिचित् अधि-
विन्ना तु या नारी निर्गच्छेद्रुषि-
ता गृहात् सा सद्यः सन्निरोद्ध-
व्या त्याज्या वा कुलसन्निधौ प्र-
तिषिद्धापि चेद्या तु मद्यमभ्यु-
दयेष्वपि प्रेक्षासमाजं गच्छे-
द्वा सा दंड्या कृष्णलानि षट्
यदि स्वाश्चापराश्चैव विन्देरन्
योषितो द्विजाः तासां वर्णक्र-
मेणैव ज्येष्ठ्यं पूजा च वेश्म च
भर्त्तुः शरीरशुश्रूषां धर्म्मका-
र्यं च नैत्यिकं स्वा चैव कुर्य्यात्
सर्व्वेषां नास्वजातिः कथंचन
यस्तु तत् कारयेन्मोहात् स-
जात्या स्थितयान्यया यथा ब्रा-
ह्मणचांडालः पूर्व्वदृष्टस्तथै-
व सः उत्कृष्टायाभिरूपाय व-
राय सदृशाय च अप्राप्तामपि तां त-
स्मै कन्यां दद्याद्यथाविधि काममा-
मरणात्तिष्ठेद्गृहे कन्यर्त्तुम-
त्यपि न चैवैनां प्रयच्छेत्तु गुण-
हीनाय कर्हिचित् त्रीणि व-
र्षाण्युदीक्षेत कुमार्य्यृतुमती
ऊर्द्ध्वं तु कालादेतस्माद्विन्देत
सदृशं पतिं अदीयमानाभ-
र्त्तारमधिगच्छेद्यदि स्वयं नै-
नः किंचिदवाप्नोति न च यं साधि-
गच्छति अलंकारं नाददीत
पित्र्यं कन्या स्वयंवरा मातृ-
कं भ्रातृदत्तं वा स्तेना स्यात् य-
दि तं हरेत् पित्रे न दद्याच्छुल्कं
तु कन्यामृतुमतीं हरन् स हि
स्वाम्यादतिक्रामेदृतूनां प्रति-
रोधनात् त्रिंशद्वर्षो वहेत् क-
न्यां हृद्यां द्वादशवार्षिकीं त्र्य-
ष्टवर्षोऽष्टवर्षां वा धर्म्मे सीद-
ति सत्वरः देवदत्तां पतिर्भार्य्यां
विन्दते नेच्छयात्मनः तां सा-
ध्वीं बिभृयान्नित्यं देवानां प्रिय-
माचरन् प्रजनार्थं स्त्रियः सृ-
ष्टाः संतानार्थं च मानवाः त-
स्मात् साधारणो धर्म्मः श्रुतौ
पत्न्या सहोदितः कन्यायां दत्त-
शुल्कायां म्रियेत यदि शुल्क-
दः देवराय प्रदातव्या यदिक-

न्यानुमन्यते आददीत न शू-
द्रोऽपि शुल्कं दुहितरं ददत्
शुल्कं हि गृह्णन् कुरुते छन्नं
दुहितृविक्रयं एतत्तु न परे च
कृत्वापरे जातु साधवः यदन्य-
स्य प्रतिज्ञाय पुनरन्यस्य दीय-
ते नानुशुश्रुम जात्वेतत्
पूर्व्वेष्वपि हि जन्मसु शुल्क-
संज्ञेन मूल्येन छन्नं दुहितृ-
विक्रयं अन्योन्यस्याव्यभिचा-
रो भवेदामरणांतिकः एष
धर्म्मः समासेन ज्ञेयः स्त्रीपुं-
सयोः परः तथा नित्यं यते-
यातां स्त्रीपुंसौ तु कृतक्रियौ
यथा नाभिचरेतां तौ वियुक्ता-
वितरेतरं एष स्त्रीपुंसयोरु-
क्तो धर्म्मो वो रतिसंहितः आ-
पद्यपत्यप्राप्तिश्च दायभागं
निबोधत इति मानवे ९
अध्यायः ॥
स्त्रीपुंसलक्षणा स्त्री स्त्रीपुंस-
योर्लक्षणं चिह्नं स्तनश्मश्र्वा-
दि रूपं यस्याः सा इति भरतः तत्-
पर्य्यायः पोटा २ इत्यमरः स्त्री-
पुंसौ पुं स्त्रीपुंसयोर्युग्मं तत्प-
र्य्यायः मिथुनं २ द्वन्द्वं ३ इत्यम-
रः द्विवचनांतोऽयं स्त्रीपूर्व्वः पुं
स्त्रीजितः इति महाभारते दान-
धर्म्मः स्त्रीप्रियः पुं आम्रवृक्षः
इति त्रिकांडशेषः नारीप्रियवृ-
क्षे त्रि
स्त्रीमुखपः पुं दोहलः इति
राजनिर्घंटः ॥
स्त्रीरंजनं क्ली तांबूलं इति
केचित्
स्त्रीरोगः पुं नारीणामामयः
तस्य चिकित्सा यथा धन्वंतरि-
रुवाच स्त्रीरोगादिचिकित्सां
तवत्येसुश्रुततां शृणु योनिव्या-
पत्सुभूयिष्ठं शस्यते कर्म
वातजित् वचोपकुंचिकाजा-
जीकृष्णा वृषकसैंधवं अज-
मोदा यवक्षारं चित्रकं शर्करा-
न्वितं पिष्टा लोडप्रसन्नया खा-
दयेद्घृतभर्जितं योनिपार्श्वा-
र्त्ति हृद्रोग गुल्मार्शोविनिवृ-
त्तये वदरीपत्रसंलेपात् यो-
निर्भिन्ना प्रशाम्यति लोध्र-
तुंबीफलालेपो योनिदार्ढ्यकर-
ति च पंचपल्लवपासकमाल-
ती कुसुमैः कृतं रविपक्वमस्तु-
ग्धारा योनिगन्धविनाशनं अ-
सृग्धारास्थाने ॥ ॥ ॥

अस्त्रग्बाधा इति चपाठः सकां
जिकं जवापुष्पं सुष्टं स्त्रोतीष्म
तीदलं दूर्वापिष्टं च संप्राश्य वनि
ता नार्त्तवं लभेत् धात्र्यंजनाभा
भया चूर्णं तोयपीतं यदा भवे
त् यदा भवेदित्यत्र रजो हरेदिति
त्र रजो हरेदिति च पाठः सह
ग्यालक्ष्मणा पीतो नस्या ह्याशु
त्रदा स्त्री दुग्धस्याह्याष्टकं वा
लमसुगन्धा च पुत्रदा वन्ध्या
पुत्रं लभेत् पीत्वा घृतेन व्योषके
शरं कृष्णकाशोरुवुकाणां मू
ले गोक्षुरकस्य च दुग्धं चैवपि
तायुक्तं गर्भिण्याः शूलनुत्
परे पाठालांगलिसिंहास्यमयू
र कृटजैः पृथक् नाभिवस्ति
भगालेपात् सुखं नारी प्रसू
यते सूतया हृच्छिरोवस्तिशू
ले वेमन्दसंज्ञितं यवक्षारं पिवे
त्तत्र मस्तुनोष्णोदकेन वा कृ
ष्णामूलीकृतं क्वाथः साम्यः सू
तिरुजापहः शालितंडुलचू
र्णेन मृदुरधं दुग्धकृष्ण्वेत्
विदारिकुसुमरसं मूलं कार्पा
सजं तथा धात्रीस्तन्यविमृद्ध
र्थं मूद्वयूषरसायनी कृष्णा व
चामया ब्राह्मी मधूसीतो॥ ॥

दूसर्पिषी वर्णासूः कांतिजन
नं लेहं वाले प्रदा पयेत् स्त
न्याभावे पयस्त्रागं गव्यं वा
तदुग्धं भवेत् सक्त सुठी
विषा वाला कृटजा चातिसा
रजत् व्योषं मधु मातलंगं हि
क्काछर्दिनिवारणं सुष्टेन्द्रय
वसिद्धार्थं निशा दूर्वा च सृष्ट
जित् सप्तच्छदामय निशा चंद
नैश्चानुलेपनं पोलाजवीजरु
द्रात् वचा लोहास्थिधारणं इति
गारुडे १७६ अध्यायः स्त्रीस
भं क्ली नारीणां सभा इति
केचित् ॥
स्त्रीस्वभावः पुं महल्लकः इति
शब्दमाला नारीणां शीलं च
स्त्रैणं क्ली स्त्रीस्वभावः यथा
कौणपे रादितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना
रामप्रवासे व्यमृषन्नदोषं जना
पवादं सनरेन्द्रमृत्युं इति भट्टिः॥
स्त्रैणः त्रि स्त्रीसंवन्धी इति मू
ग्धवोधव्याकरणं स्त्रिया अप
त्यं स्त्रैणः स्त्रिया इदं स्त्रीणां
समूहो वा स्त्रैणं इति तट्टीका
यां दुर्गादासः ॥

स्थः त्रि स्थले यथा स्थलीय
दैवकर्त्तकेः यत् स्थलं क्ली
वे स्थ इत्यपि इति शब्दरत्ना
वली स्थगमध् संवृतौ इति क
विकल्पद्रुमः दंत्यादिस्थमध्यः
मक्षिस्थगयिषति पञ्चस्थगीत्
इति दुर्गादासः ॥
स्थगः त्रिधूर्त्तः यथा धूर्त्तस्थ
गश्च निर्लज्जाः पटुः पाठविको
पिच इति शब्दरत्नावली त्रिकां
डशेषश्च॥
स्थगनं क्ली अपवारणं यथा
व्यवधानं तिरोधानमंतर्द्धिरप
पवारणं छदनं व्यवधानं द्धि
पिधानस्थगनानि च इति हेम
चन्द्रः ॥
स्थगितं त्रि तिरोहितं तत्
पर्यायः संवीतं २ रुद्धं ३
आवृतं ४ संवृतं ५ पिहितं ६
छन्नं ७ अपवारितं ८ अंतर्हि
तं ९ तिरोधानं १० इति हेम
चन्द्रः ॥
स्थगी स्त्री तांबूलपात्रं पानेर
वाष्टा इति भाषा तत्पर्या
यः तांबूलकरंकः २ इति हेम
चन्द्रः स्थंड क्ली गडुः कुब्ज
इति भाषा यथा हृदयेते निवि

ष्टास्ताभूय स्त्वाम्याः सहस्त्र
शः तदेव स्थग्यद्दीर्घं रथयो
णामिवायतं लड्डार्था च मती
नां च लेपयिष्यामि ते स्थंडं म
णिं च तिलकं चित्रं ज्ञातरूपम
यं शुभं इति रामायणे अयोध्या
कांडे ९ सर्गः ॥
स्थंडिलं क्ली चत्वरं इत्यमरः
हे वेदी इभितोऽन्यत्र वा यज्ञार्थं
परिष्कृता या मनिम्नोन्नता ॥
नाया विस्तृतायां भूमौ असं
वाधेन तिष्ठंत्यत्र स्थंडिलं नाम्नी
ति उंडिलः चत्यते निवासाय
याच्यते चत्वरं चतेजू याचेपृ
वैणावर इति भरतः यज्ञेपवि
कृतस्थाने स्नातां स्थंडिल च
त्वरे इति शब्दरत्नावली ॥ ॥
होमनिमित्तानि स्थापनार्थं स्थं
डिलविधिर्यथा वशिष्ठसंहिता
यां तस्मात् सम्यक् परीत्यैवं
कर्त्तव्यं शुभवेदिकं हस्तमात्रं
स्थंडिलं वा संतिष्ठे होमकर्म
णि क्रियासारेपि कुंडमेवस्थि
थं तस्मात् स्थंडिले वा समाश्र
येत् शारदातिलकेपि नित्ये नै
मित्तिकं काम्यं स्थंडिले वा समा
चरेत् हस्तमात्रे॥ ॥



तु तत् कुर्य्यात् चतुरस्रं समं ततः इति तिथ्यादितत्त्वं ॥ अपि च गोभिलः । अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणे देशे समं वा परिसमूह्य उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीं च संहतां पश्चात् मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षयेत् लक्षणावृदेषा सर्वत्रेति अनुगुप्ता आच्छादिताः पतितादिभिरदृष्टा इति यावत् प्राङ्नीचादि फलमाह गृह्यासंग्रहे गोभिलपुत्रः । प्राङ्नीचं ब्रह्मवर्च्चस्यमुदङ्नीचं यशोऽतमं पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भकं समं यशोऽतममि त्वत्रसोमाप्यनिर्दिष्टा इत्युक्तेरदं तोऽपि यथाह गयाशिरः इतिवत् परिसमूह्य सर्वतः कुशैः पांश्वादिकमपसार्य्य उत्तरस्यां दिशि शिसाईद्दं तो परिलिपेत् परिसमूह्य त्रीणि त्रिरुपे उत्तरतः उत्करं करोतीति हरिशर्म्मधृतवचनात् तत उपलेपनं तत्कारणमाह गृह्यासंग्रहः । इन्द्रेणवज्राभिहतः पूर्व्वं वृत्रेणवज्राभिहतः पुरा वृत्रो महासुरः मेदसा तस्य संक्लिन्ना तदर्थमुपलेपयेत् इति मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशेन तन्मध्यांशे उदगग्रतैकविंशत्यङ्गुलरेखानुरोधात् अन्यथा कुशैः संमार्ज्जयेद्भूमिं प्रोक्ष्य मादौ प्रविस्तृतः हस्तमात्रं चतुरस्रं गोमयेनोपलेपयेत् इति भारद्वाजीयहस्तप्रमाणे स्थण्डिले तदनुपपत्तेः प्राचीं प्रागग्रतां उदीचीं च संहतां पश्चादिति प्रागग्रतायाः पश्चिमभागे संलग्नामुदगग्रां मध्ये उदगग्रतायाः प्राचीः प्रागग्रास्तिस्रो रेखा अभ्युल्लिख्याभ्युक्षयेदिति रेखाभ्युद्धृतमृत्तिकोद्धरणपूर्व्वकमभ्युक्षयेत् उल्लिख्योद्धृत्याभ्युक्षयेदिति कात्यायनसूत्रात् उत्करमन्तेपदेशमाह गृह्यासंग्रहः । उत्करं रेखाभ्यो रत्निमात्रे निधापयेत् द्वारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतं इति परिसमूहनादि परिषेकान्तकर्म लक्षणसंज्ञकं तस्य लक्षणस्यावृत् प्रक्रिया सर्वत्र यत्र यत्राग्निप्रणयनं तत्र बोध्या रेखाप्रमाणमाह छन्दोगपरिशि॥

ष्टे कात्यायनः । दक्षिणे प्रागग्रतायास्तु प्रमाणं द्वादशाङ्गुलं तन्मूलग्ना योदीची तस्यास्त्वेवं नवोत्तरं उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः सप्तसप्ताङ्गुलास्त्वन्ता कुशेनैव समुल्लिखेत् नवोत्तरं नवाधिकं द्वादशाङ्गुलमेकविंशत्यङ्गुलमित्यर्थः शेषाः उक्तरेखयोरवशिष्टास्तिस्रः कुशेन इति सर्वत्राभिसंबध्यते एवकारेण शास्त्रान्तरोक्तस्रुवाद्यावृत्तिः ॥ रेखाणां देवता वर्णाद्याह स्मृतिः । प्रागग्रता पार्थिवी ज्ञेयाचाग्नेयी चाप्युदग्गता प्राजापत्या तथा चैन्द्री सौमी च प्राक्कृता स्मृता पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत् प्राजापत्या तवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता श्वेतवर्णेन सौमी स्यात् रेखाणां वर्णलक्षणं अग्निस्थापनपर्य्यन्तं सव्यहस्त प्रादेशस्य विधानमाह गृह्यासंग्रहः । सव्यं भूमौ प्रतिष्ठाप्य प्रोक्षिते दक्षिणेन तु तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ॥

मानकर्त्तारमाह छन्दोगपरिशिष्टे कात्यायनः । मानक्रियायामुक्ताया मनुक्ते मानकर्त्तरि मानकृद्यजमानः स्याद्विदुषामेष निश्चयः अङ्गुष्ठाङ्गुलिमान मानेन यत्र यत्रोपदिश्यते तत्र तत्र बृहत्पर्व्वग्रन्थिभिर्म्मिनुयात् सदा यजमानासन्निधौ होमे तु साधारणाङ्गुलिमानं यथा कपिलपञ्चरात्रे अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तमैः तैः मध्यमप्रमाणयवैः कन्यसं कनिष्ठं मानं तु पार्श्वेन षड्यवाः पार्श्वसंमिताः इति कात्यायनवचनात् इति संस्कारतत्त्वं ॥

स्थण्डिलशायी पुं यो व्रतवशात् स्थण्डिले शेते सः तत्पर्य्यायः स्थाण्डिलः २ इत्यमरः स्थण्डिलेशयः ३ इति शब्दरत्नावली

स्थण्डिलसितकं क्ली वेदिः इति हारावली ॥

स्थण्डिलेशयः पुं स्थण्डिलशायी इति शब्दरत्नावली

स्थपतिः पुं गीष्पतीष्टियज्वा ॥



वृद्धस्पतिसवननामकयागक
र्त्ता कारुभेदः राज इति भाषा
इत्यमरः कारुः शिल्पी तद्भेदे
च्यर इति ख्याते स्थपतिः कारु
भेदो सख्यानदेति स्वामी वृह
स्पतियागयाजिनि कंचुकिनि
च इति भरतः कारुभेदार्थक
स्थलणं यथावास्तुविद्याविधा
नज्ञो लघुहस्तो जितश्रमः दी
र्घदर्शी च शूरश्च स्थपतिः परि
कीर्त्तितः इति मात्स्ये २५४ अ
ध्यायः कंचुकी इति मेदिनीक
रः इत्यजयपालः अधीशः
इति हेमचन्द्रः
स्थपतिः त्रि सत्तमः इति मे॥॥
दिनी॥
स्थपुटः त्रि विषमसंचारजीवी
इति त्रिकाण्डशेषः विषमोन्नतं
इति हेमचन्द्रः
स्थल ज स्थाने इति कविकल्प
द्रुमः जस्थालः स्थलः ति॥
स्थालयिषति अयं नास्तीति
केचित् इति दुर्गादासः
स्थलं क्ली स्त्री जलशून्याकृ
त्रिमभूभागः तत्पर्य्यायः स्थ
ली २ इत्यमरः स्थल्यते स्थीय
तेऽत्र॥

स्थलं स्थल ज स्थाने अल् एवं
स्थली नारी सख्यी इत्यादिना अ
कृत्रिमत्वे ङीषि स्थली निपात्यते
कृत्रिमत्वे तु आवेव स्थला कृ
त्रिमाकृत्रिमसामान्ये तु स्थले
प्रयुज्यते इति वृद्धाः स्थलश
ब्दः स्त्रीनपुंसकलिंगः इति भ
रतः॥
स्थलं क्ली जलशून्यकृत्रिमा
कृत्रिमभूभागः इत्यमरटीकायां
भरतः॥
स्थलकन्दः पुं अग्राम्यकन्दः व
न ल इति भाषा इति रत्न॥
माला॥
स्थलकमलं क्ली स्थलपद्मं तत्
पर्य्यायः पद्मचारिणी २ अति
चरा ३ व्यथा ४ पद्मा ५ चार
टी ६ अस्य गुणाः [illegible]॥
कटुत्वं तिक्तत्वं कषायत्वं
कफवातमूत्रकृच्छ्राश्मशूल
श्वासकासविषापहत्वं च इति भा
वप्रकाशः
स्थलकुमुदः पुं करवीरः इति
राजनिर्घण्टः॥
स्थलपद्मं क्ली स्वनामख्यातपु
ष्पविशेषः तत्पर्य्यायः छत्र
पत्रं २ तमालकं ३ इति

त्रिकाण्डशेषः तच्चतुर्विधं यथा
चतुर्था स्थलपद्मानि सेवंती गु
लदावदी नैपाली च गुलाब
श्चबकुलश्च कदंबकः इति
रावणकृतार्कप्रकाशः
स्थलपद्मः पुं मानकः मानक
चु इति भाषा इति रत्नमाला
स्थलपद्मिनी स्त्री स्थलपद्मं
वेटनामर इति हिन्दीभाषा त
त्पर्य्यायः पद्माका २ चारटी
३ पद्मचारिणी ४ सुगन्धमूला
५ अंबूरुहा ६ लक्ष्मीः ७ श्रेष्ठा
८ सुपुष्करा ९ रम्या १० पद्मव
ती ११ अतिचरा १२ स्थलरुहा
१३ पुष्करिणी १४ पुष्करपर्णि
का १५ पुष्करनाडी १६ अस्या गु
णाः शैत्यत्वं तिक्तत्वं पीत
त्वं वांतिरक्तपित्तमेहभूताश्म
सारनाशित्वं च इति राजनिर्घण्टः
स्थलमंजरी स्त्री अपामार्गः
इति रत्नमाला
स्थलशृंगाटः पुं गोक्षुरवृक्षः
इति रत्नमाला॥
स्थलशृंगाटकः पुं गोक्षुरकः
इति राजनिर्घण्टः
स्थलसीमा पुं स्थंडिलः इति
भूरिप्रयोगः॥

स्थला स्त्री जलशून्यकृत्रिमभूमिः
इत्यमरटीकायां भरतः॥
स्थली स्त्री जलशून्याकृत्रिमा
भूमिः इत्यमरटीकायां भरतः
स्थलीदेवता स्त्री ग्रामदेवता
इति केचित्॥
स्थलेरुहा स्त्री घृतकुमारी
दग्धारुहा इति राजनिर्घण्टः स्थ
लजाते त्रि॥
स्थलेशयः पुं क्रोडरुरुकुरंगा
दयः इति राजनिर्घण्टः स्थल
शायिनि त्रि॥
स्थविः पुं तन्तुवायः स्वर्गः
जंगमः इति संक्षिप्तसारो
णादिवृत्तिः॥
स्थविरं क्ली शैलेयं इति
राजनिर्घण्टः॥
स्थविरः पुं ब्रह्मा इति हेम
चन्द्रः॥
स्थविरः त्रि वृद्धः इत्यमरः
अचलः इत्युणादिकोषः॥
स्थविरा स्त्री महाश्रावणी इ
ति राजनिर्घण्टः वृद्धा च स्थवि
ष्ठः त्रि अतिशयस्थूलः इत्य
मरः॥
स्थाणुः पुं शिवः इत्यमरः
तन्नामकारणं यथा समुन्निष्ट

जलान्तस्मात् मज्जा स्नाः स्पृष्ट्वा
नद्यं ततो देवताः मज्जा दृष्ट्वा
रहिता एव तेजसा ॥
क्रोधेन महता युक्तो लिंग
मुत् पाट्य चाक्षिपं उत्तिष्ठं
सरसो मध्ये ऊर्द्धमेव यदा
स्थितं तदा प्रभृति लोकेषु
स्थाणुरित्येव विश्रुतं इति
वामने ४८ अध्यायः कीलः
इति मेदिनी जीवकगंधद्र
व्यं यथा जीवकमंधद्रव्य य
थ्या जीवके जीवनो जीवो नि
धिः स्थाणुः प्रकीर्त्तितः इ
ति शब्दचंद्रिका ॥
स्थाणुः पुं स्त्री निःशाखवृ
क्षः मुडागच्छ इति भाषा तत्
पर्यायः ध्रुवः २ शंकुः ३ इ
मरः अशाखवृक्षः ४ इति ज
टाधरः अस्त्रभेदः इति नील
कंठः ॥
स्थाणुः त्रि स्थिरः इत्यमर
णी स्थाणुतीर्थं स्त्री तीर्थवि
शेषः यथा सप्रोवाच महादे
वो ब्रह्माणं प्रणतं स्थितं पुण्य
प्रदं नृणां चैव तीर्थमाहात्म्यमु
त्तमं एतत् सन्निहितं प्रोक्तं सरः
पुण्यप्रदं महत् स्थाणुलिंग
स्यमाहात्म्यं ब्रह्मणे मेः वदतः
शृणु अचेतनः सचेतना वा अज्ञो
वा प्राज्ञ एव वा लिंगस्य दर्शना
देव मुच्यते सर्वपातकैः पुष्करा
नि तीर्थ समेष्यन्ति मध्यं प्राप्ते
दिवाकरे तत्र स्नास्यति यो ब्रह्म
न् मां च स्तोष्यति भक्तितः त
स्याहं सुलभो नित्यं भविष्यामि
न संशयः इत्येव मुक्त्वा वचनं
देवदेवो गतः प्रभुः देवाश्च
ऋषयः सर्वे स्नाति स्थानानि भेजि
रे ततः प्रभृति लोके स्मिन् स्था
णुतीर्थं वदंति हि इति वामने
४५ अध्यायः ॥
स्थंडिलः पुं स्थंडिलशायी
इति मरः ॥
स्थाण्वीश्वरः पुं शिवलिंगवि
शेषः यथा स्थाणुनाम्नाहि लो
केषु पूजनीयो दिवौकसां स्था
णुरीश्वरः स्थितो यस्मात् स्था
ण्वीश्वर ततः स्मृतः स्मरं
ये स्मरंति सदा स्थाणुं ते सु
क्ताः सर्वकिल्बिषैः ॥
भविष्यति शुद्धदेहा दर्शना
त्मोक्षगामिनः इत्येवमुक्ता
देवेन ऋषयो ब्रह्मणा स
हतस्माहृदारु[illegible]लिंगमेवं

मुपचक्रमुः इति वामने ४२
अध्यायः ॥
स्थातव्य त्रि स्थेयं स्थानीयं
यथा वाणिज्ये नगतः समे
गृहेपति वाणिज्ये न गतः समे
गृहेपति वार्त्तापि नश्रूयते मा
त स्तज्जननी प्रसूत तनया नामा
तृगेहं गता बाला हं नवयौव
ना निशि कथं स्थातव्यमस्म
द्गृहे सायं संप्रति वर्तते प
थिक हे स्थानान्तरे गम्यतां
इति कालिदासकृत शृंगार
तिलकं ॥
स्थानं क्ली नीतिवेदिनां त्रिव
र्गांतर्गतवर्गविशेषः इत्यम
र नीतिवेदिनां नीतिशास्त्र
ज्ञानां तयादिभिस्त्रिवर्गः अ
स्यैषां तु धर्मकामार्थैः सूर्वम्
क्तः अष्टवर्गस्यापचयः क्षयः
तस्यैवोपचयो वृद्धिः तस्यानो
पचयोनाप्यपचयः स्थानं अ
ष्टवर्गो यथा कृषिर्वणिक्प
थो दुर्गं सेतुः कुंजरबंधनं क
न्यानां च निवेशनं अष्टवर्गः स्म
तो राज्ञामिति इति भरतः ॥
सादृश्यं अवकाशः स्थितिः
इति मेदिनी सन्निवेशः ॥॥
इति हेमचन्द्रः वसतिः इति
चतुर्थकांडे हेमचन्द्रः ग्रंथसं
धिः इति त्रिकांडशेषः भाज
नं इति हलायुधः निकटं य
था त्वमत्र कृत्तिकास्थाने कथ
या मास रीश्वर सर्वधर्माद
यो देवा धर्माधर्मस्य साक्षिणः
इति ब्रह्मवैवर्ते गणपतिखंडे १५
अध्यायः अपि च एतेषु पत्या
स्तस्पर्शभावयेति चराचरं पुरा
मेकनकः सिद्धस्तत् स्थाने इति
मेश्रुतं इति वामने ३७ अध्या
यः स्वधर्मानुष्ठायिनां अस
स्पर्शवर्त्तिनां च स्थानविशेषमा
ह यथा वर्णानामाश्रमाणां
च स्वधर्मानुपालिनां अस
स्पर्शवर्त्तिनां लोकानु ब्रह्मचक्रेय
था च यत् प्राजापत्यं ब्राह्मणा
नां स्मृतं स्थानं क्रियावतां क्ष
त्रियाणां तथा चैन्द्रं संग्रामेष्वनु
वर्त्तिनां वैश्यानां मारुतं स्था
नं स्वधर्ममनुवर्त्तिनां गांध
र्वं शूद्रजातीनां परिचर्यानु
कारिणां अष्टाशीतिसहस्रा
णां यतीनां ऊर्द्ध्वरेतसां ॥
स्मृतं तेषां तु यत् स्थानं त
देव गुरुवासिनां सप्तर्षीणां
च यत् स्थानं स्मृतं तद्वत्

वनौकसां प्राजापत्यं गृहस्था-
नां गृहधर्मानुवर्त्तिनां
न्यासिनां तु परं ब्रह्म योगिना-
ममृतं स्मृतं एकान्तवासिनां ब्र-
ह्मध्यायिनां परमं पदं
तामिस्रमन्धतामिस्रं महारौर-
वरौरवं असिपत्रवनं घोरं काल-
सूत्रमवीचिमत् वेदनिन्द-
कानां तु यज्ञव्याघातकारिणां
स्थानमेतत् समाख्यातं स्वधर्म-
विनिवर्त्तिनां इति वह्निपुराणे
सर्गकथननामाध्यायः ॥
स्थानकं क्ली आलवाले इति
हेमचन्द्रः नगरं फेणं
इति केचित्
स्थानचंचला स्त्री वर्वरीवृक्षः
इति शब्दचन्द्रिका॥
स्थानच्युतः त्रि स्थानभ्रष्टः य-
था स्थानस्थितस्य पद्मस्य मि-
त्रौ वरुणभास्करौ स्थानच्युत-
स्य तस्यैव क्लेदशोषणकारकौ
इति गारुडे ११५ अध्यायः ॥
स्थानपालः पु स्थानरक्षकः
स्थानं पालयति यः इत्यर्थे
अन् प्रत्ययेन निष्पन्नः॥
स्थानभ्रष्टः त्रि पदच्युतः यथा
स्थानस्थितानि पूज्यन्ते पूज्यन्ते
च्युतदन्ताः स्थानभ्रष्टा न पू-
ज्यन्ते केशा दन्ता नरा ॥
इति गारुडे ११५ अध्यायः
स्थानाध्यक्षः पु स्थानरक्षकः
तत्पर्यायः स्थानिकः २
इति हेमचन्द्रः स्थानिकः पु स्था-
नाध्यक्षः इति हेमचन्द्रः ॥
स्थानी त्रि स्थानविशिष्टः स्था-
नं विद्यतेऽस्य इत्यर्थे इन् प्रत्य-
येन निष्पन्नः यथा स्थानिव-
दादेशः इति मुग्धबोधव्याक-
रणं ॥
स्थानीयं क्ली नगरं इत्यमरः
स्थानसंबंधिनि त्रि ॥
स्थाने व्य योग्यं कारणार्थः
सादृश्यं सत्यं इति शब्दर-
त्नावली ॥
स्थापकः त्रि स्थापनकर्त्ता
स्थात स्थाप्यतो णक प्रत्ययेन
निष्पन्नः पु अन्तः पुररक्षकः
इत्यमरः स्थापतेर्भावे क्ली ॥
स्थापनं क्ली रोपणं पुंसव-
नं इति मेदिनी समाधिः
इति विश्वः ॥
स्थापना स्त्री स्थापनं नि-
वेशनं स्त्री स्थापि[illegible]

अंत स्था धातोः णिकृते अन
प्रत्ययेन आ वाच निष्पन्ना ॥
स्थापनी स्त्री पाठा इति मेदि-
नी अमरश्च ॥
स्थापितं त्रि निश्चितं न्यस्तं इति
मेदिनी ॥
स्थाम क्ली सामर्थ्यं इत्यमरः
स्थायिभावः पु रसस्य त्रिधाभा-
वान्तर्गतभावविशेषः यथा सं-
चारिणः प्रधानानि देवादिवि-
षया रतिः उद्बुद्धमात्रः स्थायी
च भाव इत्यभिधीयते नभा-
वहीनोऽस्ति रसो नभावो रसव-
र्जितः परस्परकृता सिद्धिरन-
यो रसभावयोः ॥
इत्युक्तदिशा परमालोचनया
परमविश्रान्तिस्थानेन रसेन स-
हैव वर्त्तमाना अपि राजानुग-
तविवाहप्रवृत्तभृत्यवत् आपा-
ततो यत्र प्राधान्येनाभिव्यक्ता
व्यभिचारिणः देवमुनिगुरुनृ-
पादिविषयाश्च रतिः उद्बुद्ध-
मात्रा विभावादिभिरपरिपुष्ट-
तया रसतामनापद्यमाना-
श्च स्थायिनो भावा भाव शब्द-
वाच्याः उद्बुद्धमात्रः स्थायीभावो
यथा हरस्तु किंचित् परि ॥ ॥
हरस्तु धैर्यं चन्द्रोदयारंभ इवां-
बुराशिः उमामुखे बिंबफ-
लाधरोष्ठे व्यापारयामास वि- लोचनानि अत्र पार्वतीवि-
षया भगवतो रतिः इति सा-
हित्यदर्पणे रसभावादिनिरू-
पणो नाम ३ परिच्छेदः ॥
स्थायी पु भावभेदः यथा ॥
स्थायि सात्विक संचारिप्रभेदैः
स्याद्रतिः पुनः इति हेमचन्द्रः
स्थितिविशिष्टे त्रि ॥
स्थायुकः पु एकग्रामाधिकृतः
एकस्मिन् ग्रामे नियोजितः
इत्यमरः ॥
स्थालं क्ली हेमादिकृतभोज-
नपात्रं थाल इति भाषा इत्य-
मरः स्थलति तिष्ठति अन्नादि-
कमत्र स्थालं स्थलजस्थाने घञ्
इति भरतः ॥
स्थाली स्त्री पाकपात्रविशेषः
हाँडी इति थाली इति च भा-
षा तत्पर्यायः पिठरः २ उ-
खा ३ कुण्डं ४ इत्यमरः पिठरी
५ स्थालं ६ उखा ७ कुण्डी ८ इति
नदीका कुण्डा ९ कुण्डका॥
१० इति शब्दरत्नावली पाकः
११ पातिली १२ इति जटाध-
रः॥ ॥



पाटलावृन्तः इति मेदिनी
मांसाष्टकाश्राद्धे स्थाली॥
पाकस्य मांसप्रतिनिधित्वं य
था पश्वभावे स्थालीपाकेन
यथाह गोभिलः अपि वा स्थाली
पाकं कुर्वीत इति तद्विधानं
तु स्थालीपाकं पशुस्थाने कु
र्य्याद्यद्यनुकल्पिकं श्रपये
ते सवत्सायास्तरुण्या गोः
पयस्यन्नं इति छन्दोगपरिशि
ष्टोक्तं ग्राह्यं अविति ओदनं च
रोः पश्चात् इति तिथ्यापक्वा
न्नादिस्थालीशब्द पूर्वक पच
धातोः क्तप्रत्ययेकृते पश्चात्
क्तप्रत्ययस्य तकारस्थाने वका
रादेशेन निष्पन्नः॥
स्थालीपाकः पुं भाजनपक्वा
न्नादि यथा चातुर्मास्यव्रतेमा
तु से लभते संततिं दीर्घां स्था
लीपाकमभक्षयन् इति
तिथ्यादितत्त्वे॥
स्थालीपुलाकः पुं न्यायवि
शेषः यथा स्थाली स्थास्त
ण्डुला पक्वे सर्वे विक्लित्तिभा
गिनः समकालाग्निसंयो
गभागित्वात् प्रतिपन्नवत्
इति स्थालीपुलाकन्याय॥ ॥

येन वैदिकलिङ्गत्वावच्छेदेना
पूर्वशक्तिकल्पनात् प्रतिपन्ने
द्दलमर्दनास्फुटितत्वेनज्ञातं
इति मलमासतत्त्वं॥
स्थालीविलं क्ली पाकपात्रस्या
भ्यन्तरं स्थाल्याः शून्यभागः इति
सिद्धान्तकौमुदी॥
स्थालीविलीयः त्रि पाकयोग्यत
स्थालीविल्यः [illegible]ण्डुलादिः यथा
स्थालीविलात् स्थालीविलमर्हे
ति स्थालीविलीया तण्डुलाः स्था
लीविल्या पाकयोग्या इत्यर्थः
इति सिद्धान्तकौमुदी॥
स्थालीवृक्षः पुं तरुप्रभेदः॥
वेलियापीपर इति हिन्दीभा
षा तत्पर्यायः नन्दीवृक्षः १ अ
श्वत्थभेदः २ प्ररोही ३ गज
पादपः ४ स्थालकः ५ क्षीरी ६
वनस्पतिः ७ अस्य गुणाः ल
घुत्वं स्वादुत्वं तिक्तत्वं तुवर
त्वं उष्णत्वं कटुपाकरसत्वं॥
ग्राहित्वं विषपित्तकफास्रना
शित्वं च इति भावप्रकाशः॥
स्थावरं क्ली धनुर्गुणः इति
त्रिकाण्डशेषः॥
स्थावरः पुं पर्वतः इति शब्द
रत्नावली त्रिकाण्डशेषश्च॥

स्थावरः त्रि जङ्गमेतरः अच
लवस्तु इत्यमरः जङ्गमागो
मृहिण्यादय तथो स्थावहृता॥
दिः स्थावरः इति भरतः॥ ॥
स च ब्रह्मणः सप्तमः सर्गः
षड्विधश्च यथा सप्तमो॥
मुख्यसर्गस्तु षड्विधस्तस्थु
षां चयः वनस्पत्योषधिलता
त्वक्सारो वीरुधो द्रुमाः तेषा
लक्षणं यथा उत्स्रोतसम॥
स्तमःप्राया अन्तःस्पर्शाविशेषि
णः इति श्रीभागवते॥ ॥
ये पुष्पं विना फलन्ति ते वन
स्पतयः ओषधयः फलपाका
न्ताः लता आरोहणापेक्षाः त्व
क्सारो वेणवादयः लता एव
काठिन्येन आरोहणानपेक्षा
वीरुधः ये पुष्पैः फलन्ति ते
द्रुमाः ऊर्द्ध्वं स्रोतः आहारसं
चारो येषां ते तमःप्रायाः अव्य
क्तचैतन्याः अन्तःस्पर्शाः स्पर्श
मेव जानन्ति नान्यत् तदापि अ
न्तरेव न बहिः विशेषिण अ
वान्तरपरिणामाद्यनेक
भेदवन्तः इति तट्टीकायां श्री
धरस्वामी स्थावरधनं साक्षि
ध्येन तैर्भ्रात्रा न विक्रेतव्यं॥ ॥

यथा स्थावरं धनमन्यस्मै स्थिते
सान्निध्यवर्तिनि योग्योऽपि किन
मि विक्रेतुं न शक्तः स्थावराधि
पः सान्निध्यवर्तिनां ज्ञातिः सव
र्णो वा विशिष्यते तयोरभावे
सुहृदो विक्रेतुरिच्छा गरीयसी
निर्णीतमूल्येऽपणेन स्थावरस्य
क्रयोद्यमे अन्यमूल्यं चेत् समी
पस्थो याति क्रेता न चापरः॥
मूल्यं दत्त्वा मशक्तश्चेत् संग
तो विक्रयेऽपि वा सन्निधिस्थ
स्तदान्यस्मै गृहीता क्रोति वि
क्रये क्रीतं चेत् स्थावरं देवि
परोक्षे प्रतिवासिनः अवणा
देव तन्मूल्यं दत्त्वासौ प्राप्नुमर्ह
ति क्रेता तत्र गृहारामान् वि
निर्माति भूतक्रिया मूल्यद
त्वापि नाप्नोति स्थावरं सन्नि
धिस्थितः इति महानिर्वा
णतन्त्रे द्वादशोल्लासः॥ ॥
स्थावरे विशेषो यथा याज्ञव
ल्क्यः मणिमुक्ताप्रवालानां स
र्वस्यैव पिता प्रभुः स्थावरस्य
तु सर्वस्य न पिता न पितामहः
अपि च स्थावरं द्विपदं चैव
यद्यपि स्वयमर्जितं असम्भू
य सुतान् सर्वान् न दानं न च
विक्रयः किंच पितुः प्रसादा
नभुज्य॥

न्ते वस्त्राण्याभरणानि च स्थाव
रं तु नभुंजीत मसादे सति भ्रे
त्रके इति मिताक्षराधृत वचन
मपि पितामहधनपरं पित्रा च
स्वोपार्जितं स्थावरं दत्तं भूज्य
ते एव इति स्थावरे विक्रयो
नास्ति कुर्य्यादाधिमनुज्ञया
इति स्थावरस्य केवलविक्रयप्र
तिषेधात् विक्रयेपि कर्त्तव्ये साहि
रण्यमुदकं दत्त्वा दानरूपेण स्था
वरविक्रय इति विज्ञानेश्वरः कस्त
नस्य स्थावरविक्रयनिषेधो भव
भुक्तस्थावरविषयः पूर्वपुरुषा
र्जितनष्टोद्धारे विषयपति मि
ताक्षरायां स्थावरं द्विपदं चैव
यद्यपि स्वयमर्जितं असंभूय
सुतान् सर्वान् नदानं न च विक्र
यः अस्याप्यपवादमाह यकोपि
स्थावरे कुर्य्यात् दानाधमन
विक्रयं आपत् काले कुटुंबा
र्थे धर्मार्थे च विशेषतः अन
पभोगे तु सर्वस्य क्रीतादेर्दा
निर्यथा वृहस्पतिः संविभा
ग क्रयप्राप्तं पित्र्यं लब्धं च
राजतः स्थावरं सिद्धिमाप्नो
ति भुक्त्या हानि रुपेक्षया
सोदायिक सदा स्त्रीणां स्वा
तंत्र्य परि ॥ ॥ ॥ ॥

कल्पितं विक्रये चैव दाने च
यथेष्टं स्थावरेष्वपि नारदः
भर्त्रा प्रीतेन यद्दत्तं स्त्रियै त
स्मिन् मृतेपि तत् सायथा
काममश्नीयात् दद्याद्वा स्था
वरादृते यमः अविभक्तं स्था
वरं यत् सर्वेषामेव तद्भवेत्
विभक्तं स्थावरं प्राप्तं नान्योद
र्य्यैः कदाचन सर्वेषां सोदरा
सोदराणां स्थावरातिरि
क्तं तु विभक्ताविभक्तसोदरा
णामेवेत्यर्थः सिद्धं तेषा
नत् पिंडदातृत्वेन तन्मात्रभो
गपार्वणपिंडदातृत्वेन चा
धिकारात् इति दातृत्वेन चा
धिकारात् इति दायतत्त्वं ॥
स्थाविरं क्लीं स्थाविरत्वं वृद्धत्वं
इत्यमरः तत्तु सप्ततिवर्षात्
परं यथा आषोडशाद्भवेद्बाल
स्तरुणस्तत उच्यते वृद्धः स्या
त् सप्तते रूर्द्ध्वं वर्षीयान्नन
वतेः परमिति स्मृतिः इति
भरतः ॥
स्थासकः पुं चार्च्चिक्यं इत्य॥
मरः जलादेर्वुद्बुद इति
मेदिनी ॥
१ वत्सनाभविषे इति राजनिर्घंटः
१०

स्थास्नु क्ली शारीरवलं स्थाधा
तोः स्नुप्रत्ययेन निष्पन्नं इति ॥
केचित् ॥
स्थास्नुः त्रि स्थिरतरः इत्यमरः
शाश्वतः इति भरतः वृत्तः
इति श्रीभागवतटीकायां श्री
धरस्वामी ॥
स्थिकः पुं कटिप्रोथः यथा
कटिप्रोथः कटिप्रोथः पुलः
स्थिकः स्त्रियां स्फिचा इति शब्द
रत्नावली ॥
स्थितः त्रि प्रतिज्ञातवान् ऊ
र्द्ध्वः निश्चलः इति मेदिनी ॥
स्थितप्रेमा पुं स्थिरतरवन्धुः
इति केचित् ॥
स्थितिः स्त्री न्याय्यपथस्थितिः
तत् पर्य्यायः संस्था २ मर्य्या
दा ३ धारणा ४ इति तत्रियव
र्गे अमरः संस्थितिः ५ इति
शब्दरत्नावली अवस्थानं तत्
पर्य्यायः आस्था २ आसना ३
इति संकीर्णवर्गे अमरः सी
मा इति मेदिनी द्रव्यविशेषे
स्थिति निषेधो यथा नास्थि
भस्म कपालानि न केशान्नृवा
कथंचन तुषांगारक विष्ठाना
मधितिष्ठेत् कदाचन ॥ ॥

इति कौर्म्मे उपरिभागे १५
अध्यायः ॥
स्थिरः पुं देवः पर्वतः ॥
कार्त्तिकेयः वृक्षः इति शब्द
रत्नावली शानिः मोक्षः इति
मेदिनी अनड्वान् इति
राजनिर्घंटः धववृक्षः इति
भावप्रकाशः वृषसिंहवृश्चि
ककुंभराशयः यथा क्रूरो
थसौम्यः पुरुषोगनाच ओ
जोथयुग्मं विषमः समश्च
चरस्थिरद्व्यात्मकनामधेया
मेषादयोमीक्रमशः प्रदि
ष्टाः इति ज्योतिस्तत्त्वं तत्र
जातफलं यथा अस्थिरवि
भूति मित्रं चलमटनं स्वलि
तं नियममपि चरभे स्थिरभे
तद्विपरीतं तेषां वित्तदीर्घ
सूत्रं पद्विशरीरे त्यागयुक्तं कृ
तज्ञसुतसाहिनं विविधचेष्टं
कृतज्ञसुतसाहिनं विविधचे
ष्टं इति दीपिका स्थिरवस्तूनि
यथा युद्धे प्रधानभटः १ साध्वी २
धर्म्मः ३ अधर्म्मः ४ सज्जनः ५
अस्थिरवस्तूनि यथा अवला १
दोला २ अपांगः ३ यौवन ४
दुर्जन ५ स्वामिप्रसादः ६ हस्ति
कर्णः ७ स्वर्णं ८ मनस्सः ९ कपिः

१० श्रीः ११ इति कविकल्पल
तापिच अभ्रच्छाया खलैः
प्रीतिः परनारीषु संगतिः
पंचैते ह्यस्थिरा भावा यौवना
नि धनानि च अस्थिरं जीवि
तं लोके अस्थिरं यौवनं यौ
वनं अस्थिरं पुत्रदाराद्यं ध
र्मं कीर्तिर्यशः स्थिरं इति
गारुडे ११५ अध्यायः ॥
स्थिरः त्रि कठिनः निश्चलः
इति धरणी ॥
स्थिरगन्धः पुं चंपकवृक्षः
इति राजनिर्घंटः ।चिरस्थायि
सैव मधुकोक्तिकेन
स्थिरगंधा स्त्री पाटला केत
की इति राजनिर्घंटः ॥
स्थिरचक्रः पुं जिनविशेषः
तत्पर्यायः मंजुश्रीः २ज्ञा
नदर्पणः ३ मंजुभद्रः ४ मं
जुघोषः ५ कुमारः ६ अष्टा
रचक्रवान् ७ वज्रधरः ८ प्र
ज्ञाकायः ९ वादिराट् १० नीलो
त्पली ११ महाराजः १२ नीलः
१३ शार्दूलवाहनः १४ धि
यांपतिः १५ पूर्वजिनः १६ खड्गी
१७ दंडी १८ विभूषणः १९
बालव्रतः २० पंचचीरः २१
सिंहकेलिः २२ सि॥ ॥ ॥

खाधरः २३ वागीश्वरः २४ इति
त्रिकाण्डशेषः ॥
स्थिरच्छदः पुं भूर्जपत्रः इति
रत्नमाला स्थिरच्छायः पुं वृक्षमात्रं इति
शब्दमाला छायातरुः इति त्रिकाण्डशेषः
स्थिरजिह्वः पुं मत्स्यः इति
हेमचन्द्रः ॥
स्थिरजीविता स्त्री शाल्मलि
वृक्षः इति शब्दमाला ॥
स्थिरतरः त्रि अतिशयस्थिरः
तत्पर्यायः स्थास्नुः २ स्थेया
न् ३ इत्यमरः दृढतरः ४
इति शब्दरत्नावली स्थेयः ५
अतिस्थिरः ६ स्थेष्ठः ७ इति
हेमचंद्रः
स्थिरदंष्ट्रः पुं भुजंगः वरा
हाकृतिविष्णुः इति मेदिनी
ध्वनिः इत्यजयः ॥
स्थिरपत्रः पुं हिंतालः इति
राजनिर्घंटः
स्थिरपुष्पः पुं चंपकवृक्षः ब
कुलः इति राजनिर्घंटः ॥
स्थिरपुष्पी पुं तिलकवृक्षः
इति
राजनिर्घंटः ॥
स्थिरफला स्त्री कूष्मांडी
इति ॥ ॥

केचित्
स्थिरमतिः स्त्री निश्चलाबुद्धिः
यथा स्थिरमतिं सुमतिं कमनी
यतां कुशलतां हि नृणामुपभो
गितां वृषगतो हिमशुभ्रपा
मादिशेत् सुकृतिनः कृतिन
श्चसखोन्यपि इति कोष्ठीप्रदी
पः तद्युक्ते त्रि स्थिरा मति
र्यस्येति बहुव्रीहिसमासः ॥
स्थिरयोनिः पुं छायातरुः
इति भूरिप्रयोगः ॥
स्थिरयौवनः पुं विद्याधरः इति
त्रिकाण्डशेषः चिरस्थायितरु
णावस्थे त्रि ॥
स्थिररंगा स्त्री नीली इति रा
जनिर्घंटः ॥
स्थिररागा स्त्री दारुहरिद्रा इति
राजनिर्घंटः
स्थिरश्रीः त्रि स्थिरा लक्ष्मीर्य
स्य यथा स्थि रोपायो हि पुरु
षः स्थिरश्रीरेव जायते रतिं तु
नैव प्राप्नोति चपलश्चपलां
श्रियं इति तिथ्यादितत्त्वे मत्
स्यपुराणं ॥
स्थिरसाधनकः पुं सिन्दुवारवृ
क्षः इति राजनिर्घंटः ॥
स्थिरसारः पुं शाकवृक्षः इति

राजनिर्घंटः ॥
स्थिरा स्त्री पृथिवी शालपर्णी
इत्यमरः काकोली इति जटा
धरः शाल्मलिवृक्षः इति शब्द
चंद्रिका हेमसुल्का स्त्री च स्थि
राङ्घ्रिपः पुं हिंतालवृक्षः ॥
इति राजनिर्घंटः
स्थिरायुः पुं शाल्मलिवृक्षः इ
त्यमरः चिरजीविनि त्रि
स्थुडि स्त्री कुत्या इति कविकल्प
द्रुमः देन्यादिः भिस्थुडति अ
स्थुडीत् तस्याः कुत्यां वरणे
इति दुर्गादासः
स्थुरी पुं स्थौरी इत्यमरटीकायां
रायमुकुटः
स्थूणा स्त्री गृहस्तंभः खुटी इ
ति भाषा शर्मी लोहप्रतिमा
इत्यमरः ॥
स्थूमः पुं दीप्तिः चन्द्रः इति
केचित् ॥
स्थूरः पुं वृष इति संक्षिप्त ॥
सारोणादिवृत्तिः मनुष्यः श्रा
थातो रोणादिकऊरन् प्रत्यये
न निष्पन्नः इति सिद्धांत कौ
मुदी ॥
स्थूरी पुं खरवृषभरत् पृष्ठेन
भारवाहको अश्वः पृष्ठेन वहे

ति पृष्टस्यमपि वाऽमुपचारा
त् एवं तद्वहति वा एषः षष्ठ्ये
कादिति यः स्थूलते संक्षिप्यते ए
ष मनया स्थूरा स्थूलत् कऽ ऽन्हे
ह्रणो ऽस्येमकारात् सर्वोरिति अंनि
पातनात् लस्यरत्वे स्थूरापर्याय
ण तस्य इदमिति ज्ञे स्थौरं ए
हारोऽपि न भारादिकं तदस्य॥
ति इति स्थौरी स्थूरी च स्थौरी
ति स्वामी इत्यमरटीकायां
भरतः॥

स्थूल त क ड वृंहणे इति कवि
कल्पद्रुमः दीर्घी ड अत्र स्थूल
त् वृंहणं वृद्धिः इति दुर्गादासः
स्थूलं त्रि उपचितावयवं मोटा
इतिभाषा तत्पर्यायः
पीनं २ पीवं ३ पीवरं ४ जडः
इतिमेदिनी॥
स्थूलं क्ली कूटं समूहः इति
मेदिनी॥
स्थूलः पुं पनसः इतिराज
निर्घण्टः॥
स्थूलकः पुं तृणविशेषः
उलु इति भाषा यथा सूक्ष्म
ग्रः स्थूलकोदर्भौ तृणाख्यस्र
वरच्छदः
इतिरत्नमाला॥

स्थूलकः त्रि स्थूलः स्थूलपाद्
त् स्वार्थे कप्रत्ययेन निष्पन्नः
स्थूलकंगुः पुं वरकधान्यं इति
राजनिर्घण्टः॥
स्थूलकणा स्त्री स्थूलजीरकः
इति राजनिर्घण्टः॥
स्थूलकंठकः पुं जालवर्बुरः
इति राजनिर्घण्टः॥
स्थूलकंटकिका स्त्री शाल्म
लिवृक्षः इति शब्दचन्द्रिका॥
स्थूलकंदा स्त्री हस्तीकन्द इति राजनिर्घण्टः
सूरणः हस्तिकन्दः माणन्दः
इति राजनिर्घण्टः
स्थूलकाष्ठाग्निः पुं वृहत्काष्ठा
नलः तत्पर्यायः स्कन्धाग्निः
२ इतिहारावली॥
स्थूलकाष्ठाग्निः पुं वृहत्का
ष्ठानलः तत्पर्यायः स्कन्ध
२ इतिहारावली॥
स्थूलचंचुः पुं महाचंचुशाकः
इतिराजनिर्घण्टः॥
स्थूलचापः पुं तूलपरिष्का
रार्थधनुः इति शब्दरत्नाव
ली तूलचाप इति साधुपाठः
स्थूलजीरकः पुं॥ ॥ ॥
जीरकभेदः॥ ॥ ॥ ॥

कालजिरा इति वंगभाषाम
गरेला इति कलौंजी इति च
हिन्दीभाषा तत्पर्यायः॥
दिव्या २ उपकुंचिका ३ काला
४ पृथ्वी ५ स्थूलकणा ६ पृथुः
७ मनोज्ञा ८ जारणी ९ जीर्णा
१० तरुणः ११ सुषवी १२ कार
वी १३ पृथ्वीका १४ अस्य गुणाः
कटुत्वं तिक्तत्वं उष्णत्वं वातगु
ल्मामदोष श्लेष्माध्मान जेषना
शित्वं जीर्णत्वं दीपनत्वंच॥
इतिराजनिर्घण्टः त्रिविधि
जीरक नाम गुणाः जीरको
जरणो जाजी कणा स्याद्दीर्घ
जीरकः कृष्णजीरः सुगंध
श्च तथैवोद्गारशोधनः कणा
जाजीत्सुषवी कालिकाचो
पकालिका पृथ्वीका कारवी
पृथ्वी पृथुः कृष्णोपकुंचिका
उपकुंचीच कुंचीच वृहज्जीरक
इत्यपि जीरक त्रितयं रूक्षं कटु
कं दीपनं लघु संग्राहि पित्तलं
मेध्यं गर्भाशय विशुद्धि कृत्
ज्वरघ्नं पाचनं वृष्यं वल्यं रुच्यं
कफापहं चक्षुष्यं पवनाध्मा
न गुल्म च्छर्दितिसारहृत् इ
ति भावप्रकाशः॥

स्थूलतालः पुं हिंतालः इति
राजनिर्घण्टः॥
स्थूलत्वचा स्त्री काश्मरी इति
राजनिर्घण्टः
स्थूलदंडः पुं देवनलः इति॥
राजनिर्घण्टः
स्थूलदर्भः पुं मुंजः इति—
राजनिर्घण्टः
स्थूलदला स्त्री घृतकन्या इति
राजनिर्घण्टः
स्थूलनाल पुं देवनलः इति
राजनिर्घण्टः
स्थूलनासः पुं शूकरः इति
हेमचन्द्रः॥
स्थूलनासिकः पुं शूकरः इति
त्रिकांडशेषः पीननासायुक्ते
त्रि
स्थूलपदः त्रि पीवरपदयुक्तः
यथा हस्तरहाः स्थूलपदाय
वे गोधूमशालिनः मलषेपि न
सीदंति यदि कन्यान विद्यते
इति पुराणं॥
स्थूलपट्टः पुं कार्पासः इति
शब्दरत्नावली॥
स्थूलपट्टाकः पुं स्थूलवस्त्रं
इति शब्दरत्नावली॥
स्थूलपादः पुं हस्ती इति शब्द

माला स्त्रीपदीव ॥
स्थूलपुष्पः पुं वकवृक्षः इति
रत्नमाला कुंदुरुपः इति राज
निर्घंटः ॥
स्थूलपुष्पा स्त्री पर्वतजातापरा
जिता इति रत्नमाला ॥
स्थूलपुष्पी स्त्री यवतिक्ता इ
तिराजनिर्घंटः ॥
स्थूलफलः पुं शाल्मलिवृक्षः
इतिराजनिर्घंटः
स्थूलफला स्त्री शणपुष्पी
इति राजनिर्घंटः
स्थूलभूतं क्ली पंचीकृताका
शादिभूतं इति वेदांतसारः
स्थूलमरिचं क्ली कक्कोलं इति
राजनिर्घंटः ॥
स्थूलमूलं क्ली चाणक्यमू
लं इति राजनिर्घंटः
स्थूललक्षः त्रि वहुप्रदः इत्य
मरटीकायां रायमुकुटः
स्थूललक्ष्यः त्रि वहुप्रदः
इत्यमरः
स्थूलवर्त्मकृत् पुं शाल
णायष्टिका इति
शब्दचन्द्रिका स्थूलवल्क
लः पुं रक्तलोध्रः इति

जटाधरः ॥
स्थूलवृत्तः पुं स्निग्धपिंडीतकः
इतिराजनिर्घंटः
स्थूलवैदेही स्त्री गजपिप्पली
इतिराजनिर्घंटः ॥
स्थूलशरः पुं शरविशेषः मो
टाशर इतिभाषा तत्पर्य्यायः
महाशरः २ स्थूलशायकः ३
इत्वरकः ४ दारपत्रः ५ वकमू
लः ६ दीर्घमूलकः ७ अस्य गु
णाः मधुरत्वं स्तिक्तत्वं कोस
त्वं कफभ्रांतिमदापहत्वं वल
वीर्य्यकारित्वं नित्यं सेवितस्ये
त किंचिद्दाहकरत्वंच इति
राजनिर्घंटः
स्थूलशाटकः त्रिपीनवस्त्रं मो
टाकापड इति भाषा तत्प
र्य्यायः वराशिः २ इत्यमरः
वराशिः ३ इतिजटा
धरः
स्थूलशाटका स्त्रीस्थूलवस्त्रं
स्थूलशाटिका त्यमरः ॥
स्थूलशाटिः पुं वराशिः इति
हेमचन्द्रः ॥
स्थूलशालिः पुं शालिधान्यभे
दः तत्पर्य्यायः महाशालिः २
स्थूलांगः ३ स्थूलतंडुलः ४ अस्य

गुणा स्वादुत्वं मधुरत्वं शि ॥
शिरत्वं पित्तशामनत्वं जीर्ण
ज्वरदाह जठररुजा शीघ्रशम
नत्वं पिशुनो युनोजरत्नं च
हितकरत्वं सदा सेवनेनानल
वलवीर्य्यकारित्वंच इति राज
निर्घंटः ॥
स्थूलशिरः क्ली वृहन्मस्तकं त
द युक्ते त्रि इति केचित्
स्थूलशीर्षिका स्त्री क्षुद्रपिपी
लिका इति हेमचन्द्रः वृहन्मस्तके
त्रि शरीरापेक्षया स्थूलशीर्षम
स्याः स्थूलशीर्षा स्वार्थे के स्थू
लशीर्षिका ॥
स्थूलषट्पदः पुं वरेलः वोल
ता इति भाषा इति भूरि ॥
प्रयोगः ॥
स्थूलस्कंधः पुं लकुचः इतिरा
जनिर्घंटः ॥
स्थूलहस्तं क्ली हस्तिशुंडं इति
त्रिकांडशेषः पीनभुजेत्रि ॥
स्थूलहेडः पुं वाणः इति त्रि
कांडशेषः ॥
स्थूला स्त्री गजपिप्पली इति
शब्दचन्द्रिका पर्वारुः इति
राजनिर्घंटः वृहदेला इति
रत्नमाला ॥

स्थूलांशा स्त्री गन्धपत्रा इति
राजनिर्घंटः ॥
स्थूलाम्रः पुं महाराजचूतः इ
तिराजनिर्घंटः ॥
स्थूलास्यः पुं सर्पः इति शब्द
चन्द्रिका वृहन्मुखे त्रि ॥
स्थूली पुं उष्ट्रः इति केचित्
स्थूलैरंडः पुं वृहदेरंडवृक्षः
तत्पर्य्यायः महैरंडः २ महा
पंचांगुलः ३ अस्य गुणाः स्थू
लैरंडो गुणाढ्यः स्यादुत्सवीर्य्य
विपक्षिषु इतिराजनिर्घंटः
स्थूलैला स्त्री एलाविशेषः व
ड एलाचि इतिभाषा तत्पर्य्या
यः वृहदेला २ त्रिपुटा ३ त्रि
दिवोद्भवा ४ सूक्ष्मीत्वक् ५
महैला ६ पृथ्वी ७ कन्याकुमा
रिका ८ कायस्था १० गोपुटा
११ भद्रैला १२ कांता १३ वृताची
गर्भजा १४ इन्द्राणी १५ दिव्यग
न्धा १६ ऐन्द्री १७ एलाद्वय गुणाः
शीतलत्वं तिक्तत्वं ॥
उष्णत्वं सुगन्धित्वं पित्तातिक
फापहत्वं हृद्रोगमलाग्निक
स्तिकारित्वं मूत्रनाशित्वं अ
त्रे स्यविशया गुणा द्यात्वंच
स्थूलैला गुणाः सो ॥ ॥

चनत्वं तीक्ष्णत्वं लघुत्वं उष्णत्वं
कफ पित्त हल्लास विषवस्या
स्य शिरोरुग्वमिकास नाशि
त्वंच इति राजनिर्घंटः
स्थूलोच्चयः पुं गंडोपलः
गजानां मध्यमगतिः अस्था
कल्यं वरंडः इति मेदिनी
हस्तिदंतरन्ध्रं इति शब्दमाला
स्थियः पुं विवादपत्त्रस्य नि
र्णेता पुरोहितः इति मेदिनी
स्थिरतरे त्रि इति हेमचन्द्रः
स्थियान् त्रि स्थिरतरः इत्यम
रः शाश्वतः इति भरतः ॥
स्थेष्ठः त्रि अति स्थिरः इति
हेमचन्द्रः ॥
स्थैर्यं क्ली स्थिरत्वं गंभस्थ
सांगानां स्थैर्यं चतुर्थमासि
भवति इति सुखबोधः ॥
स्थोरी पुं भारवाहकाश्वः इति
भरतद्विरूपकोषः
स्थौणेयं क्ली ग्रंथिपर्णीनाम
कगंधद्रव्यं गाठियाला इति भा
षा इत्यमरः अथ ग्रंथिपर्णी
स्यैवभेदः कुकुल्सगन्धिस्थौ
णेयं थुनेर इति लोके स्थौ
णेयकं बर्हिवर्द्दं शुकवर्हंच
कुरं शीर्णं रोम शुकंचापि ॥

शुकपुष्पं शुकच्छदः स्थौणे
यकं कटूष्णाडुतिक्तं स्निग्धं त्रि
दोषनुत् मेधा शुक्रकरं तच्च
रक्षोऽश्रीज्वरजंतुजित् इति
कुष्ठास्रतृट्दाह दौर्गन्ध्यतिल
कालकान् अथ ग्रंथिपर्णीस्थौ
बभेदा मंडिउर इति निपालदे
शे भवति निशाचरो धनहरः
कितवो गणहासकः ॥
रोचको मधुरस्तिक्तः कटुः पा
के कटुर्लघुः तीक्ष्णोष्णो हृद्
यो हंति कुष्ठकंडूकफानिला
न् रक्षोऽश्री स्वेद मदोऽस्त्रत्व
मगंधविषव्रणान् इति भाव
प्रकाशः ॥
स्थौणेयकं क्ली सुगंधद्रव्यभे
दः थुनिरा इति हिन्दीभाषा तत्
पर्यायः बर्हिष्ठं २ शुकच्छ
दे ३ मयूरचूडं ४ शुकपुच्छकं
५ विकीर्णरोम ६ कीरवर्णकं
७ विकीर्णसंज्ञं ८ हरितं ९
अस्यगुणाः कफवातनाशि
त्वं सुगंधित्वं कटुत्वं तिक्तत्वं
पित्तप्रकोपशमनत्वं बलपु
ष्टिः विवर्द्धनत्वंच इति राजनि
र्घंटः भावप्रकाशोक्त गुण
पर्यायौ एतौ कुष्ठशब्देदृष्टव्यौ ॥

स्थेरी पुं खरवृषभवत् पृष्टे
न भारवाहकोऽश्वः तत् पर्या
यः पृष्ठ्यः २ इत्यमरः ॥
हे खर वृषभवत् पृष्टेन भार
वाहकेऽश्वे पृष्टेन वहति पृ
ष्टस्य मपि वाह्य मुपचारात् त
द्वहति वा पृष्ट्यः येकारितियः
स्थूल्यते संत्रियते पृष्ठमनया
स्थूरा स्थूल त् कड्-वृद्धिर्णेस
मक्तात् सरो रिति अः निपात
नात् लस्य रत्वं स्थूरापर्य्ययणं
तस्या इद मिति त्रे स्थैरं पृष्टा
रोपितभारादिकं तद्वस्य स्येति
इनि स्थेरी स्थुरीच स्थैरीति
स्वामी इति भरतः ॥
स्थैलपर्षिः त्रि वृहन्मस्तकयुक्तः
इति केचित्
स्थौल्यं त्रि स्थूलता स्थूलस्य ॥
भाव इत्यर्थे ष्य प्रत्ययेन नि ॥
ष्पन्नः ॥
स्नपनं क्ली स्नाने यथा पूज
नात् स्नपनं श्रेष्ठं स्नपनात्तर्पणं
स्मृतं तर्पणान्मांसदानं तु मदि
षाज निपातनं इति दुर्गोत्
सवप्रकरणे लिख्यादितत्वं ॥
स्नपितः त्रि कृतस्नानः स्नाप्य
तेः ञो कृतपनि आकारस्य ॥

हस्वे क्तप्रत्ययेन निष्पन्नः स्न
वः पुं स्रवणं क्षरणं इत्य ॥
मरः ॥
स्नसा स्त्री स्नायुः इति हेमचन्द्रः
स्नातः त्रि कृतस्नानः यथा ॥
स्नातोऽधिकारी भवति दैवेपै
त्रे च कर्म्मणि अस्नातस्य क्रियाः
सर्वा भवंति हि यतोऽफलाः
प्रातः समाचरेत् स्नान मतो नि
त्य मतन्द्रितः इति प्रायश्चित्त
तत्वं ॥
स्नातकः पुं आप्लुतव्रती इत्य
मरः हे समाप्तवेदाध्ययने स्ना
नशीले स्नात स्नाने शीलमस्य
स्नातकः विकारसंघेति कः
आप्लुते स्नाप्लुत्यो भावेक्तः आ
प्लवव्रतीति क्वचित् पाठः ब्रह्म
चर्य्यं त्यक्त्वा यो गृहाश्रमं गतः
स स्नातकः समाप्तवेदाध्यय
नो यः स्नानशीलः आश्रमांत
रे नगतः सोपि स्नातकः स्ना
तकस्त्रिविधः ब्रह्मच
र्य्याचरणस्य यः शास्त्रबोधि
तोऽवधिस्तावद्वेदमुपास्य
समाप्तवेद त्वाश्रमांतरं गतो
यः सव्रतस्नातकः वेदमधीत्यगुरु

सन्निधौ वेदाभ्यासं यः करोति
स विद्यास्नातकः पालित स
व्रतः सामवेदो यो द्वितीया
श्रमं गतः स उभयस्नातकः
इति टीकान्तरे इति॥
भरतः॥
स्नानं क्ली मज्जनं अवगाहनं
तत्पर्य्यायः आप्लावः २ आ
प्लवः ३ इत्यमरः अभिषेकः
इति शब्दरत्नावली उपस्पर्श
नं ५ सवनं ६ मज्जनं ७ इति ज
टाधरः तदत्र कल्प सप्तविधः
मान्त्रं १ भौमं २ आग्नेयं ३ वाय
व्यं ४ दिव्यं ५ वारुणं ६ मानसं
७ एतेषां विवरणं पश्चात् स्फुटी
भविष्यति अस्य गुणाः स्नानं प
वित्रमायुष्यं श्रमस्वेदमलाप
हं शरीरबलसंधानं केश्यमो
जस्करं परं उष्णाम्बुनाधः का
यस्य परिषेको बलावहः ते
नैव तूत्तमाङ्गस्य बलहृत् के
शचक्षुषोः विनिहन्ति शिरःस्ना
ने तस्मात्तात्वास्य शोषणं भ्र
मलोष्म पीडका कंडूं शिरोरो
गांश्च पैत्तिकान् मधुकाम
लकैः स्नानं पित्तघ्नं ति॥ ॥५

शिरापहं स्नानं वचा यन्ने
रिष्टं श्लेष्मघ्नं तिमिरापहं स्ना
नं कुसतैले श्वापि चर्वाद्य
मनिलापहं अस्नातस्य शरीर
स्य उष्मा सर्वाङ्गगोचरः स्ना
नेनैकत्र मायाति तेन दीप्यति
पावकस्तत् स्नानमर्द्दितनेत्रा
स्य कर्णरोगातिसारिषु आ
ध्मानपीनसाजीर्णभुक्तवत्
सु च गर्हितं दौर्गन्ध्यं गौरवं कंडू
कच्छूं मलमरोचकं स्वेदं वी
भत्सं मलं हन्ति शरीरपरिमार्ज
ने इति राजवल्लभः अथ स्ना
नविधिः दक्षः चतुर्थे च तथा
भागे स्नानार्थं मृदमाहरेत्॥
तिलपुष्पकुशादीनि स्नानं चा
कृत्रिमे जले कुर्य्यादिति शेषः
तथा च अस्नात्वा चाप्यहुत्वा च
भुंक्ते दत्वा च यो नरः देवादीना
मृणी भूत्वा नरकं प्रतिपद्यते
अथ स्नानं दक्षः अस्नात्वा ना
चरेत् कर्म जपहोमादि किंचन
लाला स्वेदसमाकीर्णः शयना
दुत्थितः पुमान् अत्यन्तमलि
नः कायो नवच्छिद्रसमन्वितः
स्रवत्येव दिवा रात्रौ प्रातःस्नानं
विशोधनं प्रातः॥ ॥ ॥

स्नानं प्रशंसन्ति दृष्टादृष्टफलं
हि तत् सर्वमर्हति पूतात्मा
प्रातःस्नायी जपादिकं अस्नाना
त् यदि वा मोहात् रात्रौ दुश्चरि
ते कृतं प्रातःस्नानेन तत् सर्वं
शोधयन्ति द्विजातयः
दृष्टं मलापकर्षादि अदृष्टं प्रत्य
वायपरीहारादि प्रातः सूर्य्यो
दयात् प्राक्कालः प्रातस्नाय्य
रुणकिरणग्रस्तां प्राचीमवलो
क्य स्नायात् इति विष्णूक्तेः॥
प्रातःस्नाने मध्याह्नस्नानधर्म्मा
तिदेशमाह कात्यायनः यथाह
नि तथा प्रातर्नित्यं स्नायादना
तुरः दंतान् मद्यादौ गेहे चेत्
दमंत्रवत् यथा तथेति कर्त्त
व्यतया सा च आचरेदुपस्थितस्ना
नं तर्पयेत् देवमानुषान् इति
जावालोक्तौ वैदिके कर्म्मणि
वामहस्ते वकृतत्र कुशान् द
क्षिणेन पवित्रं धारयेत् मार्क
ण्डेयः सर्वकाले तिलैः स्नानं
पुण्यं व्यासोऽब्रवीन्मुनिः श्री
कामः सर्वदा स्नानं कुर्वीताम
लकैर्नरः सप्तमीं नवमीं चैव
पर्वकालं च वर्जयेत् विष्णुध
र्म्मोत्तरे त्वराक्रोधौ न याव॥ ॥॥

ज्यो देवकर्म्मणि पण्डितैः इत्व
रापः पयश्चैव ताम्बूलं फल
मौषधं भक्षयित्वा न कर्त्तव्याः
स्नानदानादिकाः क्रियाः भवि
ष्योत्तरे स्नातस्तु वरुणस्तेजो
जुह्वतोऽग्निः श्रियं हरेत् भुञ्जा
नस्य यमस्त्वायुस्तस्मान्न व्याह
रेत्त्रिषु स्नातः स्नानं कुर्वन् न
व्याहरेत् न कथयेत् अ
प्स्वेवावगाहनानन्तरं स्नानमा
ह योगियाज्ञवल्क्यः तूष्णीमे
वावगाहेत यदा स्यादशुचिर्न
रः आचम्य तु ततः पश्चात् स्ना
ने विधिवदाचरेत् वामनपुराणे
नाभिमात्रजले गत्वा कृत्वा के
शान् द्विधा द्विजः निरुध्या क
र्णनासाचं त्रिः कृत्वो मज्जनं
ततः तत्रैव वृद्धयाज्ञवल्क्यः
स्रोतसां संमुखो मज्जेत् यत्रा
पः प्रवहन्ति वै स्थावरेषु गृहे चै
व सूर्य्यसंमुख आप्लवेत् हारी
तः नानरो न भुक्त्वा न जीर्णवासा
न वक्रवासा न नग्नो नाश्वन्
नातुरः पाकयिको नालंकृतो ना
सुस्नेनाज्ञातेन जले नाकुलेनाशु
चौ न प्रभूतजले न नामेरस्नज
लेन च त्वरे नोपद्रावेनो सन्ध्या।

यां न निशायां स्नायादिति
चत्वरे काकादि बलिस्थानः इति
श्रीदत्तः उपहारे द्वारसमीपे
अत्रैकेनमलिनानग्नवकृवा
सप्तो निषेध विधानात् स्नाने
द्विवास स एवाधिकारः प्रतो
यते एकवस्त्रस्नाने दोषमा
ह समुद्रकरकृतभाष्ये गौतमः
एकवस्त्रोपनस्नानं भुक्ताविहीन
चैवहि स्नानस्नानं भवेत् शुद्धं
क्रिया च परिहीयते अतएव
स्नानं तर्पणपर्य्यन्तं कुर्यादेके
नवाससा इति षदिसमूले न
दाभ्येनतर्पणं चरमिति अत्रैक
वस्त्रा ज्ञानय इत्यादिना एकव
स्त्रत्वविधानात् एकेन एकज्ञा
नीयेन वाससा स्नानं कृतं जल
स्थस्थेनैव तर्पणं इति कृत्यत
त्वार्णवः नच स्नानशास्त्राद्वदा
तव्या मृदस्ति से विशुद्धये जल
मध्ये तु यः कश्चित् द्विजातिस्ना
नइवेलः निष्पीडयति तद्वस्त्रं
स्नानं तस्य वृथा भवेत् स्नान
शास्त्रमिति तद्वस्त्रमिति ए
कवचन निर्देशेन च स्नाने
प्येकवस्त्रत्वमिति वाच्यं अत्र
विशुद्धये इत्य॥ ॥ ॥ ॥

भिधानेनाधोधृत वस्त्रस्यैव मृ
त्रयेण प्रक्षालनं न तूत्तरीयस्य
एतदर्थमेकवचनं अतएवमृ
त्रयेणाधरीयवस्त्रं प्रक्षाल्य इत्या
ह्निकचिन्तामणिः वशिष्ठवच
नस्यैकवाक्यतया स्नानशास्त्रा
नुपालिना इति विष्णुपुराणी
येनाधरीयवस्त्रेणैव गात्रमा
र्जनं निषिध्यते एतेन निष्पी
ड्य स्नानवस्त्रमिति कात्यायन
वचने एकत्वमविवक्षित
मिति निरस्तं अतएव सर्वत्रैक
त्वनिर्देशः शिष्टानामाचारो
पितथेति नाजस्त्रमिति
पुनः पुनः स्नाननिषेधः राग
प्राप्तस्नानविषयो दृष्टार्थकत्वा
त् एवञ्चैकस्मिन् दिने नानाती
र्थादिनिमित्तप्राप्तस्नानावृत्ति
र्भवत्येव वैधत्वात् अत्रापि त
त्रयसंगयोः सत्वे सकृदेवेति
आतुरे प्रतिज्ञावालः आशिर
स्कं भवेत् स्नानं स्नानाशक्तौ
तु कर्म्मिणाम् आर्द्रेण वाससा
वापि देहिकं मार्जनं स्मृतं क
र्म्मिणां शिरस्नातस्तु कुर्वीत
तद्देवं पैत्रमथापि वा इति मा
र्कण्डेयपुराणोक्त कर्म्म चिकीर्षूणां

मार्ज्जनमिदमोच्यते योगिया
ज्ञवल्क्यः असामर्थ्याच्छरी
रस्य कालशक्त्याद्यपेक्षया मं
त्रस्नानादितः सप्त केचिदिच्छ
ति सूरयः मान्त्रं भौमं तथाग्ने
यं वायव्यं दिव्यमेव च वारुणं
मानसञ्चैव सप्तस्नानं प्रकीर्त्ति
तं आपोहिष्ठेति वै मान्त्रं मृदा
लंभस्तु पार्थिवं आग्नेयं
भस्मना स्नानं वायव्यं गोरजं
स्मृतं यत्तु सातपवर्षेण स्नानं
तद्दिव्यमुच्यते वारुणञ्चावगा
हश्च मानसं विष्णुचिन्तनं सप्त
स्तु स्नानमुक्तिष्टं मन्त्रस्नानक्र
मेण तु कालदोषादसामर्थ्यात्
सर्वं तत्फलं स्मृतं आपोहिष्ठे
ति आपोहिष्ठादि ऋक्त्रय
मत्र विवक्षितं एवञ्च कालदो
षादसामर्थ्यात् नशक्नोति य
दा तस्मि तदा ज्ञात्वा तु ऋषिभिर्मं
त्रैर्वेदैर्मार्ज्जनं एतत्र आपस्त्व
द्रुपदा आपोहिष्ठामयेण एभि
स्तु तभिर्ऋग्भिस्त्रैर्मन्त्रस्नानमुदा
हृतं इति योगियाज्ञवल्कीयेय
मन्त्रस्नानोत्तरं तत् प्राधान्यात्वा
एनाय अत एव पितृदयितायां
संख्यातः सर्वं न लिखितं॥ ॥ ॥

मृदालंभस्तु गंगादिमृत्तिकाति
लकरूपः भस्मना संस्कृतभस्म
ना इति छन्दोगाह्निकं अवगा
हं मंत्राद्येन भूत्वावगाहनमा
त्रे विवक्षितं अतो स्नात्वावगा
हनरूपस्नानान्तकल्पत्वमयुक्तः
कालदोषो अतिवृष्ट्यादिः असा
मर्थ्यं शरीरापाटवहेतुः जलस्य
स्वल्पत्वेन संपूर्णवारुणस्नान
विधिकालायोग्यत्वं वेति एत
न्मूलकं गेहे चेत्तदमंत्रवदि
ति छन्दोगपरिशिष्टीये पूर्वो
क्ते अन्यथा मूलभूत श्रुत्यंतरस्य
नापत्तेः सामर्थ्यात् तु हृतजलेना
पि समंत्रकस्नानमाह पराशर
भाष्ये व्यासः शीतास्त्वपो निषे
वोक्तमंत्रसंभारसंस्कृताः गेहे
पिशस्यते स्नानं तद्धीनमफलं
स्मृतं पद्मपुराणे नैमित्यभाव
श्यद्विम्र विशुद्ध्यर्थं स्नानमा
हो विधीयते अनुद्धृतै रुद्धृतै
र्वा जलैः स्नानं सदाचरेत्॥
तीर्थं प्रकल्पयेद्विद्वान् मूलम
न्त्रेण मंत्रवित् नमो नारा
यणायेति मूलमंत्र उदाहृतः
दर्भपाणिस्तु विधिना आचा
न्तः प्रयतः॥॥

…ना स्नानं नु जायते
…त स्नान्मनो वि…



ऋषिः चतर्द्दहस्तसमायुक्तं चतु
रस्रं समन्ततः प्रकल्प्यावाह
येद्गङ्गां अभिमन्त्रे विचक्षणः
विष्णोः पादप्रसूतासि वैष्णवी
विष्णुपूजिता पाहि नस्त्वेनस
स्तस्मादाजन्म ॥
तस्मादाजन्म मरणान्तिकात्
तिस्रः कोट्योऽर्द्धकोटी च ती
र्थानां वायुरब्रवीत् दिवि भुव्य
न्तरीक्षे च तानि ते सन्ति जाह्नवि
नन्दिनीत्येव ते नाम देवेषु न
लिनीति च दक्षा पृथ्वी च सु
भगा विश्वकाया शिवा सिता
विद्याधरी सुप्रसन्ना तथा लो
कप्रसादिनी क्षेमा च जाह्न
वी चैव शान्ता शान्तिप्रदायिनी
एतानि पुण्यनामानि स्नानका
ले प्रकीर्त्तयेत् भवेत् सन्निहि
ता तत्र गङ्गा त्रिपथगामिनी सप्त
वाराभिजप्तेन करसम्पुटयोजि
ते मूर्द्ध्नि दद्यात् जलं भूयस्त्रिश्च
तुः पञ्च सप्त वा स्नानं कुर्य्यान्मृ
दा तद्वत् आमन्त्र्य च विचक्षणः अ
श्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुं
धरे मृत्तिके हर मे पापं यन्मया दुष्कृ
तं कृतं उद्धृतासि वराहेण कृष्णेन
शतबाहुना आरुह्य मम गात्राणि

पापं प्रमोचय नमस्ते सर्वभूता
नां प्रभवारिणि सुव्रते
नमो नारायणाय इत्यष्टाक्षर
रूपमूलमन्त्रेण चतुरस्रं चतु
ष्कोणरूपं समन्ततः सर्वदिक्षु
चतुर्हस्तं जलं प्रतिदिक्षु हस्त
मात्रेण व्यवच्छिद्य तीर्थं प्रक
ल्पयेत् वितते नद्यादिजले स्ना
नस्थानं परिच्छिंद्यात् तत्र
विष्णोः पाद इत्यादिना शान्ति
प्रदायिनीत्यन्तेन मन्त्रेण गंगा
मावाहयेत् सप्तवाराभिजप्ते
नेति सप्तवाराभिजप्तेन नमो
नारायणायेति मन्त्रेणाभि
मन्त्र्येति शेषः एकवचननिर्दे
शात् तस्य मूलमन्त्रत्वोक्त्या चत्र
त्रापि विनियोगोऽवगम्यते तत
श्च सप्तवारपठितनारायणम
न्त्रेण जलमभिमन्त्र्य करयुगेन
त्रिवारादि मूर्द्ध्नि क्षिपेत् तत
श्चाश्वक्रान्ते इति मन्त्राभ्यां तद्
दितिजमाभ्यां मृत्तिकाः सप्त न
ग्राह्या वल्मीके मूषिकोत्करे अन्त
र्जले श्मशाने च वृक्षमूले सुरालये
परस्नानावशिष्टे च श्रेयस्कामैः सदा
नैवः इति दक्षप्रतिषिद्धेतरां मृद
मामन्त्र्य तया मृदा शिरः प्रभृत्यालम्भा
नं

हृते रुद्धे ते वीजलैः शिरः प्र
भृत्यंगक्षालनमवगाहनरूप
प्रधानं वारुणस्नानं समाचरेदि
ति हर्वीकनोवयः स्वद्ग्रहणमं
त्रे प्रभवारिणि इति प्रभव सन्तप
तिस्रत्रं प्रापयितं पोलमस्यास्तव्
संवोधनमिदं अवगाहनेनव
त्वं कर्णनासिकामंगुलीभिः राजा
यः कुर्य्यात् अंगुलीभिः पिधा
यैवं श्रोत्रदृङ्नासिकामुखं नि
मज्जेत प्रतिस्रोतस्त्रिः पठेद
घमर्षणं इति समुद्रकरधृतात्
अत्रानुहृते वारत्रयमेवाव
गाहने प्रोक्तं वामनपुराणात्
एष विधिः पौराणिकत्वात् स
र्वेषामविसाधारणः वेदमन्त्रर
हितत्वादनधीतवेदानामपि स
र्वेषामादरणीयः मत्स्यपुराणे
न यौ प्रत्येकशः स्नाने भवेद्गो
दानजं फलं गोप्रदाने सुदश
भिः स्नातः पुण्यं संगमे तथा
घः येनेन विधिना स्नाति यत्र
तत्राभिषि द्विज सतीर्थफलमा
प्नोति तीर्थे तु द्विगुणं फलं अ
नेन तीर्थावाहनादिना अन्तोगं
गायामप्यावाहनं कुर्वन्ति शिष्टाः
अत्रच मायस्नमस्यादि॥ ॥॥

निमित्तक तीर्थविशेषनिमित्त
कमन्त्रपाठेन मृदालम्भनानन्त
रं कार्य्यं आगन्तुकानामन्तेऽ
भिनिवेश इति न्यायात् एवं गं
गायां विशेषमन्त्रानेभर एव
देवादराद्विमन्त्राः पाठ्याः तत्र
गंगायां विशेषमन्त्रौ विद्याकर
धृतौ विष्णुपादार्घ्यसंभूते गंगे
त्रिपथगामिनि धर्मद्रवीति वि
ख्याते पापं मे हर जाह्नवि श्र
द्धया भक्तिसंपन्ने श्रीमातर्देवि
जाह्नवि अमृतेनाम्बुना देवि भा
गीरथि पुनीहि मां गोविन्द
द्वादश्यां स्नाने गंगायां पद्म
पुराणीयो मन्त्रः महापातक
संज्ञानि पापानि सन्ति मे गो
विन्दद्वादशी पापघ्नानि मे
हर जाह्नवि गंगासागरस
गमे मन्त्रः त्वं देव सरितां
नाथ त्वं देवि सरितां वरे उभ
योः संगमे स्नात्वा मुंचामि दु
रितानि वै लौहित्यस्नाने त
मन्त्रः ब्रह्मपुत्र महाभाग शा
न्तनोः कुलनन्दन अमोघाग
र्भसंभूत पापं लौहित्य मे हर
करतोयास्नानमन्त्रः करव
तोये सदानीरे सवित् श्रेष्ठे स



विमुञ्चते यौङ्गन् श्रावयसेनि
त्वं पापं हर करौह्वे विभुः
स्नातः शिरो नावधुनेत् नांगे
भ्यः स्तोयमुद्धरेत् नैते लेवा
संस्पृशेत् नाप्नोति हितं पूर्वधृतं
वासो विभृयात् स्नात एव
सोऽलीयो धौते वाससी विभृ
यात् न म्लेच्छान्त्यज पतितैः
सह संभाषणं कुर्य्यात् इति
नौ गोभ्यः स्तोयमुद्धरेदिति स्ना
तपाशी पाणिभ्यो एवणीयं स्ना
तो नांगानि निर्मृज्यात् स्नान
शाट्या न पाणिना इति विष्णु
वचनात् अत्र वासोन्तरधार
णात् प्राक्कृत तैलस्पर्शनि
षेधः प्रतीयते शिरःस्नातस्तै
लेन नांगं किंचिदुपस्पृशेत्
इति मनुवचनमेतत्परं ॥
याज्ञवल्क्यः ब्रह्मक्षत्रविशा
मेव मंत्रवत् स्नानमितप
रं याज्ञवल्क्यः ब्रह्मक्षत्रवि
शामेव मंत्रवत् स्नानमिष्यते
तूष्णीमेव हि शूद्रस्य सनमस्कारकं
मतं अगम्यागमनात् स्तेयात् पा
पिभ्यश्च प्रतिग्रहात् रहस्याचरि
तात् पापात् मुच्यते स्नानमा
चरन् प्रकृतमनुसरामः स्नातज
ह्वोति यजति क्रियाः स्नान
ध्यानजपैर्हीने वात्मनं शोधयेत् दु
य ब्रह्मपुराणे नद्यां प्रत्येकशः
स्नाने भवेत् गोदानजं फलं गोप्र
दानैस्तु दशभिस्तस्मां पुण्यतसं
गमे मनुः न स्नानमाचरेत् भु
क्त्वा नातुरो न महानिशि न वासो
भिः महास्त्रं नाविज्ञाते जलाश
येन स्नानमाचरेद्भुक्त्वेति राग
प्राप्तस्नाननिषेधः नित्यस्याभा
सत्वात् नैमित्तिकस्य च निषि
दुमशक्यत्वात् आतुरः स्नान
संवर्द्धकरोगान् महानिशाना
विशेषया मध्यम प्रहरद्वये न
स्याः स्नानं न कर्त्तव्यं काम्यने
मित्तिकादृते न वासोभिः स
ह इत्यनेन वक्रवासोनिषेधात्
स्नाने द्विवासस्त्वं प्रतीयते अ
जस्त्रं पुनः पुनः तेन वारुणापा
दिसंज्ञकाम्यादि निमित्तभेदप्रा
प्तमेकदा नाना स्नाने निषिध्य
ते किन्तु तंत्रेण प्रसंगेन चैकं
स्नानं तथा च निगादिकमेव ह
काम्य नैमित्तिके हित्वा पके
छेकत्रवासरे विषुवद्दिवसे
प्राप्ते पंचतीर्थी विधान
तः स्नात्वा संकर्षणं कृष्णं
दृष्ट्वा भद्रांच ॥

भो द्विजाः नरः समस्तयज्ञा
नां फलं प्राप्नोति दुर्लभं इति
ब्रह्मपुराणोक्तमार्कंडेयह्रदे
प्रद्युम्नसरोवरे समुद्रकूपादि
तीर्थादौ तत्र प्रसंगयोरभावा
त् पुनः पुनरेकदिने पि नाना
स्नानमिति परकीयनिपानेषु
स्नायान्नैव कदाचन निपान
कर्त्तुः स्नात्वा हि दुष्कृतांशे
न लिप्यते निपानं जलाधार
मात्रं तथा च याज्ञवल्क्यः प
च पिंडानमुद्धृत्य न स्नायात् प
रवारिणि योगियाज्ञवल्क्यः
अनुद्धृत्य तथः स्नायात् स्नानं
कर्त्तुः पापेन लिप्यते स्नानंदा
नं तपोध्यानं पितृदेवार्च्चनं तथापा
नध्यानं पितृदेवार्च्चनं तथा पा
वनानि मनुष्याणां दुष्कृतस्ये
हकर्मणः छन्दोगपरिशिष्टं
यथाहयं प्रावणादि सर्वा
नद्यो रजस्वलाः तासु स्ना
नं न कुर्वीत वर्जयित्वा समुद्र
गाः उपाकर्मणि चोत्सर्गे
प्रेतस्नाने तथैव च चन्द्रसूर्य्य
ग्रहे चैव रजोदोषो न विद्यते
निगमः नद्यो नीरवासिनो
व्याघ्रपादः अभावे कूपवापी
नामन्योनापि समुद्धृते रजोदु
ष्टेऽपि पयसि ग्रामभोगो न
दुष्यति अन्येन कुंभादिना अ
न्येरपि कृते कूपे सेतौ वाप्या
दिके तथा तत्र स्नात्वा च पीत्वा
च प्रायश्चित्तं समाचरेत् ॥
तथा प्रभूते विद्यमाने तु उद
के सुमनोहरे नाल्पोदके द्वि
जः स्नायात् नदीं चोत्सृज्य कृ
त्रिमे इति वह्निपुराणोक्तं ब्रह्मपुरा
णे नित्यं नैमित्तिकं काम्यं त्रिवि
धं स्नानमिष्यते तर्पणं तु भवे
त्तस्य अंगत्वेन व्यवस्थितं धर्म
क्षुरकर्म्माश्रुपातं च मैथुने
छर्दने तथा अस्पृश्यस्पर्शने कृ
त्वा स्नायाद्दूर्ज्जा जलक्रिया ॥
यत्र तु रोगादिना स्नानं न कृतं त
त्रापि गात्रमार्ज्जनादिना शौच
युत पाद्यपितृयज्ञसिद्धये तर्पयेत्
णांतु सुधिः कुर्य्यात् मत्यदंस्ना
तको द्विजः देवेभ्यश्च ऋषिभ्य
श्च पितृभ्य यथाक्रमं पुष्ये वा
जन्मनक्षत्रे व्यतीपाते च वैधृ
तौ अमावास्यां नदीस्नानं द
हत्याजन्म दुष्कृतं वराहपुरा
णं दक्षिणावर्त्तशंखे च पात्रे
ऽपो ॥ ॥



डुंवरे स्थितं उदकं यः मतीच्छे
त शिरसा प्रियमाणमसः तस्य
जन्मकृतं पापं तत् तत्क्षणादेव
नश्यति आह्निकतत्त्वे पद्मपत्रेण
सर्वरत्नोदकेनच स्नानमावै
नरः स्नात्वा सर्वपापैः प्रमुच्य
ते विष्णुधर्मोत्तरे तथादर्भोदकैः
स्नानं सर्वपापप्रणाशनं गोमू
त्रेणच यत् स्नानं सर्वाघविनि
सूदनं तथा पुष्पोदकस्नानं भवे
दारोग्यकारकं केवलैर्वा तिलैः
स्नानं अथवा गौरसर्षपैः ॥
स्नानं प्रियंगुणा प्रोक्तं तथा
सौभाग्यवर्द्धनं आयुष्यंच यश
स्यंच धर्म्मं मेधाविवर्द्धनं स्ना
नं पवित्रं माङ्गल्यं तथाकाञ्चवा
रिणा प्रोक्तं स्नानस्य वक्षितो
येन तथाच परवारिणा का
यशुद्धिं विजानीयात् तत्
स्नानफलं लभेत् स्नानफलं
वैधं आयुर्वेदीयं तन्मवत्येव
यमः नित्यं नैमित्तिकंचैव क्रि
यांगमलकर्षणं तीर्थाभा
वेच कर्त्तव्यं उष्णोदकपरोदकैः
विष्णुपुराणे स्नानाद्रीधरणीं
चैव दूरतः परिवर्ज्जयेत् इत्या
ह्निकतत्त्वे ता॥ ॥ ॥॥

त्रिकस्नानविधिर्यथा तत्रनद्या
दौ वैदिकस्नानं कृत्वा तान्त्रि
कस्नानमाचरेत् तथाच गौत
मीये अथस्नानं तथा कुर्यात्
यथाशास्त्रविधानवित् मलप्र
क्षालनं स्नानं स्वशाखोक्तं समा
चरन् मंत्रस्नानं ततः कुर्यात्
कर्मणां सिद्धिहेतवे तद्यथा अ
द्येत्यादि अमुकदेवता प्रीतये
मंत्रस्नानमहं करिष्ये इति
संकल्पं कुर्यात् तथाच कुल
चूडाले सजलं ततः गृहीत्वास्व
कदेवस्य प्रीतये स्नानमाचरेत्
ततः षडंगन्यास प्राणायामौ
कृत्वा गंगेच इत्यनेनांकुशमुद्र
या सूर्य्यमंडलात्तीर्थमावाह्य
मिति येन मुद्रयामृतीकृत्य कव
चेनावगुण्ठ्यास्त्रेण संरक्ष्य मूले
न प्रकादकधाभिमंत्र्य सूर्याभि
मुखं द्वादशधारा विनिःक्षिप्य त
स्मिन्निष्टदेवता चरणारविंदनिः
सृतजले निमज्य देवतां ध्यायन्
मूल मंत्रं यथाशक्ति जपन्
उन्मज्य उदकेन त्रिवारज्जप्तेन
कलशमुद्रया त्रिवारमात्म
न मभिषिच्य वैदिकसंध्या
दिकं कृत्वा स्नू॥ ॥ ॥

र्य्यार्घ्यं दत्वा तान्त्रिकायमर्थ
णादिकाविधायांते कर्मकुर्य्यात्
इति तंत्रसारः अन्यत्र जन्मान्त
र सहस्रेण यत् पापं कृतं
नरः मुच्यते सर्वपापेभ्यः स्ना
त्वा तत्राणवे सकृत् याम्यहि
यानताङः रविनित्यस्त्रायीनप
श्यति स्नानं मध्यदिने कुर्य्या
त् जीर्णेन्ने तनिशामयः तथा
मस्ते मिते स्नानं नकुर्वीतस
दातुधः तथा स्नात्वा नदीवा
न्यानप्रशंसेत पंडितः अप्रश
स्तं निशिस्नानं राहोरन्यत्र दा।
र्शनात् स्नानं दानं तपः श्रा
द्धमनन्तं राहुदर्शने आसुरी
रात्रिरन्यत्र तस्मात्तां परिवर्ज्ज
येत् नदी देवनिखातेषुतडा
गेषु सरःसुच स्नानं समाचरे
न्नित्यं गर्त्तप्रस्रवणेषुच निपा
नाद्धृतं पुण्यं ततः प्रस्रवणा
दिकं ततोपिसारसं पुण्यं ततो
नादेयमुच्यते तीर्थतोयं ततः
पुण्यं गंगातोयं ततोऽधिकं
इति वह्निपुराणे आह्निकत
त्त्वेनाम्नायाः किंच नित्यं नै
मित्तिकं काम्यं क्रियांगं मलकर्ष

णं क्रियास्नानं तथाषष्ठं षोढा स्ना
नं प्रकीर्त्तितं अस्नातस्तु पुमान्ना
र्हो जप्याद्विहवनादिषु प्रातःस्ना
नं तदर्थंतु नित्यस्नानं प्रकीर्त्तितं चा
डालशव विष्टादेः स्पृष्टास्नानं रज
स्वलां स्नानार्हस्तुयदास्नातिस्ना
नं नैमित्तिकं हितत् पुष्यस्ना
नादिकं स्नानं दैवज्ञविधिचो
दितं तद्धिकाम्यंसमुद्दिष्टंनाका
मस्तत् प्रयोजयेत् जप्तुका
मपवित्राणि अर्चिष्यन् देव
तातिथीन् स्नानं समाचरेद्य
स्तु क्रियांगं तत् प्रकीर्त्तितं मला
पकर्षणं नाम्ना स्नानमभ्यंगपू
र्वकं मलापकर्षणार्थाय प्रवृत्तिस्त
स्य नान्यथा सर्वेषु देवखातेषु ती
र्थेषुच नदीषुच स्नानमेव क्रि
या यस्मात् क्रियास्नान मतः
स्मृतं इति गारुडे १०५ अथा
यं कशाहस्तस्यैव विशे
षस्य स्नानादिनिषेधोमानस
स्नानप्रशंसाच यथा सर्वकर्म
फलत्यागीहरेः संकल्पवर्ज्जितः
तो द्विजः कशाहस्तः स्नातः स्नान
हुताजपादिषु कदाचिदर्भहस्तो
नस्यात् कामक्रोधैस्सवः स्नानादि
षुच कृत्येषु गोविन्दस्मरणेना ॥

दिषु महास्नानः जपकरो वैस
वो नभवेद्विज हरेः कुर्यात्
प्रयत्नेन सेवमेवा जपादिषु ॥
अस्नातो नजपेन्मंत्रं गोविंदस्य
महात्मनः कदाचिदप्युविर्भू
त्वाप्यस्नातोपि चमानवः मा
नसस्नातकोलोको मुकुंदस्या
र्चनादिषु पूतात्मा यदिमंत्रस्य
स्युद्धोभवतिजापकः भवेत्त
मानसस्नायी यो वाह्याभ्यंतरः शु
चिः जपाधिकारीसभवेत् कृ
ष्णमंत्रस्यमानवः ऐन्द्रस्नाना
द्वरं काम्यं काम्यादाग्नेय मेवच
आग्नेयाद्राम्युचं श्रेष्ठं वारुणं
चाप्युवादिपि अवगाहं वारुणा
त्रैवैदिकं चावगाहनात् वैदि
कादपिनैमित्तं तस्माद्वै मार्ज
नं वरं मार्जनात्मान्त्रिकं श्रेष्ठं
भौमं स्यान्मांत्रिकाधिकं भौ
मं स्नानाद्वरं ब्राह्मं ब्राह्मनः
पौएय मेवच पौण्यतोनैर्म
लं स्नानं वायव्यं च ततोधिकं
वायव्यान्मानसं चेह सर्वस्नाना
त् परं वरं मर्त्यस्त्रुत मानस
स्नानः सर्वत्रविजयी भवेत् गो
विंद सर्वसेवासु चाहेतामेति
धारणा सजापको वैस ॥॥॥

वः स्यात् हरेर्भक्त तत्ववित्
मानसस्नानवान् योवाभक्त
स्त्रात्रसदासक्ती इति पाद्मोत्तर
खंडे ९८ अध्यायः अन्यत्र
मानसं वैदिकं चैव मांत्रिकं मा
र्जनं तथा अवगाहनं च नैमि
त्तमाप्युचं पुण्य मेवच नैर्म
लं वारुणं ब्राह्ममैत्रं काम्यंच
नारद वायव्यं भौम माग्नेयं
षोडश स्नानमीरितं गोविंद
मंत्रग्रहणं दीक्षया तु स्मुरे
न्द्रणं यदाभिषिक्तं वितेस्या
त्तेत् स्नानं मानसं स्मुभं मत्स्य
स्य नामग्रहणं यदा कात्रोध
वेगुवोः स्नानदेहेन्द्रिय मनः
तत् स्नानं मानसं भवेत् नाम
संकीर्तनं विष्णोर्नरः कुर्यादके
नवान् सदैव चेन्महास्नानं षा
रीरस्याव कारणं कया कस्ता
स्वस्तिनस्त्रुत यदि वेदेषु वैदि
कं दर्भश्यान्युदकैः स्नानं यत्ता
त्ते अभिषेचनं सहस्रशीर्षा
तद्विष्णो रितिमंत्रादिभिर्द्विज
चेत् पयोभ्युक्षणं स्नानं मा
न्त्रिक समुदाहृतं ॐ पान्त्वा
पोहिष्ठेति ऋतंचेत्यादिभिर्य
दि पाठे कुर्यात् कुशस्नाने

मार्जनं द्विज कथितं जलेषुम ॥
ज्ञातो नृणां मज्जनेत. यदाशिरः
तदा सर्ववपुस्सु स्यादवगाहन
मुच्यते गोविंद द्वादशीमाघी
वारुणपर्वोदयादिषु स्नानं य
त्तत्रनैमित्तं ग्रहणे चन्द्रसूर्य
योः मैथुनेवमने रेतस्खलने
मृतकेतथा विण्मूत्रादिशव
स्पर्शे पावात्नुगमनेपिच निद्रा
तेजातके न्द्रणां मस्पृश्यस्पर्शे
नादिषु रजस्वलावततथाद्देयत्
स्नानं स्यात्तदाप्युचं गंगादिसर्व
तीर्थेषु विष्णुपादोदकेस्तथा य
त् स्नानमभिषेकंच पुण्यं तत्प
विकीर्तितं हेलया श्रद्धयान्नृणां
भक्त्या यत्नेननारद गंगाम्भोष
ष्टिवत् स्नानं महापापादिनाश
नं गंगास्नानं मनुष्याणां सर्व
कल्मषनाशनं स्नंववस्त्रापि
का ह्यस्य भवेन्म फलवत्तयदि
स्नानं स्यात् सर्वतीर्थेषु नानाय
त्नफलप्रदं शालग्रामशिलावा
रि योभिषेकं समाचरेत् अ
कालमृत्युहरणं सर्वव्याधिविना
शनं विष्णोः पादोदकं पीत्वा शिर
सा धारयेद्यदि यदि सर्वमनुष्या
णां वाह्यान्तर्मलशोधनं ॥ ॥

त्तदेवनैर्मलस्नानं शारीराणांभ
वेत् ध्रुवं स्वेदाश्रुमज्जावि
एमूत्र चिक्कुराः हूतजावसा
दूषिका कर्णविट् श्लेष्मा नृ
णां वाह्यमलाः स्मृताः मलै
स्तुमलिनो देहो नवाञ्छितं स्वुद्धि
द्वितः सवत्यविरतं दूर्णादि
वाराणमलानतः अद्भिस्तु गो
मयैस्तापि मलानामपमार्जनं
सर्वत्र क्षालनं कृत्वा सर्वात्मम
यत्नोमुनिः अष्टांगयोगाभ्या
सैस्तु देहस्तालनं ततः न
रोः स्तुमज्जनं कुर्वन् स्नानमव
तिनैर्मलं इतिपाद्मे उत्तरखं
डे ११२ अध्यायः किंच
तुलामकर मेषेषु प्रातः स्ना
नं विधीयते हविष्यं ब्रह्मच
र्यं च महापातकनाशनं अ
मास्नानं गयाश्राद्धं दक्षिणा
मुखभोजनं नजीवत् पितृकः कु
र्यात् कृतेच पितृहाभवेत् करेण
मार्जयेद्गात्रं स्नानवस्त्रेणवायदि
श्वानामूत्रं भवेद्गात्रं पुनः स्नानेन
शुद्धाति अप्रक्षाल्य तु पादौ यः
स्नात्वा गच्छति मंदिरं संवत् स
रकृतं पुण्यं तत् क्षणादेव नश्यति

ॐ



स्नानं रजकतीर्थेषु भोजनं गणि
कालये शयनं पूर्वपादे च ब्रह्मह
त्यादिने दिने इति कर्मलोचनं अ
न्यत् मत् स्वसूक्तं तत्र ३९ पट
ले द्रष्टव्यं ॥
स्नानतृणं क्ली कुशः इति श
ब्दमाला ॥
स्नानीयं त्रि स्नानयोग्यं स्ना
नसंपादकद्रव्यं यथा गंगा
दीनां च तीर्थानां वारि कुंभप्र
पूरितं स्नानीयं तेम्प्रयच्छामि
स्नानं कुरु त्रिलोचने इति दु
र्गोत्सवपद्धतिः ॥
स्नायीन् त्रि स्नानकर्त्ता यथा
प्रातः स्नायी भवेन्नित्यं द्वौ मा
सौ माघफाल्गुनौ इति ति
थ्यादितत्त्वं ॥
स्नायुः स्त्री वायुवाहिनी ना
डी नंहरु इति ख्याता इति भर
तः तत्पर्यायः वस्नसा २ इ
त्यमरः स्नसा ३ नसा ४ इति राज
निर्घंटः सा तु गर्भस्य सप्तमभि
मासे भवति इति सुखबोधः ॥
स्नायर्म क्ली नेत्ररोगप्रभेदः त
स्य लक्षणं यथा स्थिरं प्रस्ता
रि मांसाढ्यं शुष्कं स्नायर्म पंचमं
इति माधवकरः अन्यत् ने
त्ररोगशब्दे द्रष्टव्यं ॥
स्नावः पुं स्नायुः इति केचित्
स्निग्धं क्ली सिक्थकं इति
राजनिर्घंटः चिक्कणं इति श
ब्दरत्नावली ॥
स्निग्धः पुं वयस्यः इत्यमरः
रक्तैरंडः सरलवृक्षः इति रा
जनिर्घंटः ॥
स्निग्धः त्रि स्नेहयुक्तः अमूर्त्तः
तत्पर्यायः चिक्कणं १ मसृ
णं २ इत्यमरः आम्रेडं ३ चिक्कं
४ चक्कणं ५ इति वैष्णवर्गे शब्द
रत्नावली स्निग्धस्तु वत्सलो
वत् सः स्नेहयुक्तजने भवेत्
इति च विशेष्यनिघ्नवर्गे शब्दर
त्नावली ॥
स्निग्धतंडुलः पुं षष्टिशालिः
इति राजनिर्घंटः ॥
स्निग्धता स्त्री प्रियता यथा
हार्द्दं प्रियत्वं प्रियता स्निग्ध
ता या निगद्यते इति शब्दरत्नाव
ली स्नेहः इति राजनिर्घंटः
स्निग्धदारुः पुं सरलवृक्षः
इतिजटाधरः
देवदारु इति
राजनिर्घंटः ॥ ॥ ॥ ॥

स्निग्धपत्रकः पुं गजरतृणं
वृत्तकरंजः गुच्छकरंजः इति
राजनिर्घंटः ॥
स्निग्धपत्रा स्त्री पुं वदरी इति
जटाधरः पालक्या काश्मरी
इति राजनिर्घंटः ॥
स्निग्धपिंडीतकः पुं मदनवृ
क्षविशेषः यथा वाराहोऽन्यः
कृष्णवर्णो महापिंडीतको महा
न् स्निग्धपिंडीतक स्यात्स्थू
लवृत्तफलस्तथा अन्यौ च मद
नौ श्रेष्ठौ कटु तिक्तरसौ वि
तौ छर्दनौ कफहृद्रोग पक्का
माशयशोधनौ इति राज
निर्घंटः
स्निग्धफला स्त्री नाकुली इति
राजनिर्घंटः ॥
स्निग्धा स्त्री मेदा इति राज
निर्घंटः ॥
स्निट क स्नेहे इति कविक
ल्पद्रुमः कस्नेटयति इति दु
र्गादासः ॥
स्नुः पुं सानुः पर्वतस्य समभू
भागः इत्यमरः ॥
स्नुः स्त्री स्नायुः यथा त्रिष्टुप
मांसात् स्नुतोऽनुष्टप् जगत्य
स्थः प्रजापतेः तस्यासि ॥ ॥
ग्मासीलोमभ्यो गायत्री च त्वचो वि
भोः इति श्रीभागवते ३
स्कंधे १२ अध्यायः ॥
स्नुक् स्त्री स्नुहीवृक्षः इत्यमरः
स्नुकछदः पुं क्ली रक्तकंचुकीवृक्षः
इतिरत्नमाला ॥
स्नुतः त्रि क्षरितजलादिः इत्य
मरः ॥
स्नुषा स्त्री पुत्रवधूः इत्यमरः
स्नुहीवृक्षः इति शब्दचन्द्रिका
श्वश्र्वा सह तस्या विरोधकारणं
श्वश्रूशब्दे द्रष्टव्यं ॥
स्नुहा स्त्री स्नुहीवृक्षः इत्यमरः
टीकायां भरतः ॥
स्नुहिः स्त्री स्नुही इत्यमरटी
का स्नुही स्त्री वृक्षविशेषः मन
सासिज इति भाषा तत्पर्यायः
सौंड्रः २ वज्रद्रुः ३ स्नुक् ४
गुडा ५ समंतदुग्धा ६ इत्यम
रः सिहुंडः ७ गुडीहुंडः ८ वज्रः
९ स्नुहा १० स्नुहिः ११ गुडी १२
गुडः १३ इति तट्टीकायां १४ इति शब्दरत्नावली
सुधा १४ वज्रकंटकः १५ क्षीर
सारः १७ इति जटाधरः अ
स्या दुग्धगुणाः वक्रदोषे ॥
प्रयोक्तव्यं मग्निबलं ॥॥
सुधापयः ॥ ॥ ॥

इति राजवल्लभः राजनिर्घण्टोक्तपर्य्यायगुणौ स्नेहशब्दे द्रष्टव्यौ तत्र मनसा पूज्या॥ यथा स्वप्ने जनार्द्दने कुम्भे पंचम्यां भवनांगने पूजयेन्मनसा देवीं स्नुहीविटपसंस्थितां पद्मनाभे गते शय्यां देवैः सर्व्वैरनंतरं पंचम्यामसिते पक्षे समुत्तिष्ठति पन्नगी इति तिथ्यादितत्त्वे देवीपुराणं॥

स्नेहः पुं प्रेम इत्यमरः तैलादिरसभेदः इति मेदिनी न्यायमते गुणविशेषः जलीयपरमाणावयं नित्यः॥ अन्यत्र त्वनित्यः तैलादावस्य प्रकर्षो वर्त्तते अत एवाग्नेर्दाहो भवति यथा स्नेहो जले स नित्योऽयमनित्योऽवयविन्यसौ तैलांतरे तत् प्रकर्षात् दहनस्यानुकूलता इति भाषापरिच्छेदः॥ ॥

स्नेहस्य दुःखमूलत्वं यथा यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनं स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखं इति गारुडे ११४ अध्यायः॥॥

स्नेहनं क्ली तैलमर्द्दनं तत्पर्य्यायः स्नेहः २ स्निग्धता ३ म्रक्षणं ४ म्रक्षः ५ अभ्यंगः ६ अभ्यंजनं ७ इति राजनिर्घण्टः

स्नेहप्रियः पुं प्रदीपः इति हेमचन्द्रः तैलादिप्रिये त्रि॥

स्नेहभूः पुं श्लेष्मा इति हेमचन्द्रः स्निग्धभूमौ त्रि॥

स्नेहरंगः पुं तिलः इति शब्दरत्नावली॥

स्नेहवती स्त्री मेदा इति राजनिर्घण्टः स्नेहविशिष्टे त्रि॥

स्नेहवस्तिः स्त्री अनुवासनवस्तिः तैलपिचकारी इति भाषा॥ यथा वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः यः स्नेहैर्दीयते स स्यादनुवासननामकः इति भावप्रकाशः॥ एतद्विवरणं वस्तिशब्दे द्रष्टव्यं

स्नेहविद्धं क्ली देवदारु इति जटाधरः॥

स्नेहबीजः पुं पियालवृक्षः इति राजनिर्घण्टः स्नेहकारणे त्रि

स्नेहा पुं रोगविशेषः इत्युणादिकोषः वन्धुः चन्द्रः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्नेहाशः पुं प्रदीपः इति त्रिकाण्डशेषः॥

स्नेहितः पुं वन्धुः स्नेहयुक्ते त्रि स्नेहशब्दादितप्रत्ययेन॥ निष्पन्नः॥

स्नेही पुं वयस्यः इति त्रिकाण्डशेषः चित्रकरः इति केचित् स्नेहयुक्ते त्रि॥

स्नेहुः पुं रोगभेदः इत्युणादिकोषः चन्द्रः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्पद इ ङ ओषत् कंपे इति कविकल्पद्रुमः इ स्पन्द्यते ङ स्पन्दते चलः पस्पन्दे काशे स्पन्द ऊर्णे संदत्वं शत्रुमस्तके इत्यादौ गणकृतानित्यत्वमिति रमानाथः वस्तुतस्तु स्पन्दते स्पन्दः पचादित्वादच् ततः। स्पन्दः पचादित्वादच् ततः स्पन्द इवाचरति इति क्वौ सिद्धिः इति दुर्गादासः स्पन्दः पुं प्रस्फुरणं ओषत् कस्पन्दनं क्ली एनं यथा चलः स्पन्दभुजेऽपन्दे तथा दुःस्वप्नदर्शने शत्रूणां च समुत्थाने संस्पर्शेऽपि मया मुने मे अश्वत्थरूपी भगवान् प्रीयतां मे जनार्दनः इति मलमासतत्त्वं

अंगविस्फुरणे शुभाशुभफलं यथा मनुरुवाच कानि मे त्वं निमित्तानि अशुभानि शुभानि च सर्वधर्मभृतां श्रेष्ठ त्वं हि धर्मविदुच्यसे मत्स्य उवाच अंगदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् अप्रशस्तं तथा वामे। पृष्ठस्य हृदयस्य च मनुरुवाच अंगानां स्पन्दनं चैव शुभाशुभविचेष्टितं तन्मे विस्तरतो ब्रूहि येन सुखलिप्दो भुवि॥ मत्स्य उवाच पृथ्वीलाभो भवेत् मूर्द्धि ललाटे रविनन्दनस्थाने विहाद्दि मायानि— नसोः प्रियसंगमः भ्रूललाकिस्थावि देशे हग्पांते धनागमः उत्कंठोपगमो मध्ये दृष्टे राजन् विचक्षणैः दृग्बंधने संगरे च जयं शीघ्रमवाप्नुयात् योषिल्लाभोऽपांगदेशे श्रवणांते प्रियाश्रुतिः नासिकायां प्रीतिः सौख्यं मिथाग्निरधरोष्ठयोः कंठे तु भोगलाभः स्यात् भोगवृद्धिरथांसयोः सुहृत्स्नेहश्च वाहुभ्यां हस्ते चैव धनागमः पृष्ठे पराजयो योधे जयो वक्षस्थले भवेत् ऊरु



भ्यां प्रीति रुद्दिष्टा स्त्रियाः प्र
जननं स्तने स्पानभ्रंशोनाभि
देशे अंत्रेचैव धनागमः जा
नुसन्धौ परैः संधिर्व्वलवद्भिर्भ
वेन्नृप दिशैकदेशनाशोथ
जङ्घाभ्यांरविनन्दन उत्तमं
स्थान माप्नोति पद्भ्यांप्रस्फु
रणान्नृप सलाभं चाध्वगमनं
भवेत् पादतले नृप लं—नेपि
टके चैव ज्ञेयं प्रस्फुरणं तथा
विपर्य्यये दक्षिणेपि प्रशस्तेऽ
ङ्गे प्रशस्तं स्याद्विशेषतः ॥
अप्रशस्तेतथा वामे त्वप्रश
स्तं विशेषतः अतोऽन्यथा
सिद्धिरल्पानामफलस्य श
स्तस्य च निन्दितस्य अनिष्ट
विद्रोणगमे द्विजानां कार्य्यस्त्व
र्णेनच तर्पणं स्यात् इतिमा
त्स्ये यात्रानिमित्तदेहस्पन्द
ने नाम २१५ अध्यायः ॥
स्पर्द्दिता त्रि ङ्कं(त्व)कारणं
तच्च शत्रु दुर्जन रोगादि
इति केचित् ॥
स्पर्द्दिष्णुः पुं स्पर्शः इति
केचित् ॥
स्पर्द्द ङ संहर्षे इति
कविकल्पद्रुमः ॥ ॥

संहर्षः परिभवेच्छा इति
वोपदेवः ङ स्पर्द्धते वलि
ने वली पस्पर्द्धे इति
दुर्गादासः ॥
स्पर्द्धा स्त्री संहर्षः क्रमस्तु
त्विति साम्यं इति मेदिनी ॥
स्पर्श क ङ ग्रहणे श्लेषे
इति कविकल्पद्रुमः क ङ
स्पर्शयते इति दुर्गादासः ॥
स्पर्शः पुं रुजा दाने स्पर्शने
स्पर्शकः संपरायः प्रणि
धिः इति मेदिनी उपतप्ता
इत्यमरः वर्गान्तरं इति हे
मचन्द्रः वायुः इति केचित्
कामिनां बन्धभेदः इति
शब्दरत्नावली कादिवर्ग
पञ्चकं यथा स्पर्शास्तस्याभ
वञ्जीवः स्वरो देह उदाहृतः
इति श्रीभागवते ३ स्कन्धे
१२ अध्यायः स्पर्शाः कादिव
र्गपञ्चकं इति तट्टीकायां श्री
धर स्वामी न्यायमते त्वगुपका
रकः स च त्रिविधः उष्णः शी
तः अनुष्णाशीतः पृथि
व्याः स्पर्शः काठिन्यादिः
पाकजः जलपरमाणु ॥
स्पर्शः नित्यः ॥ ॥ ॥

अन्यत्रानित्यः वैशेषिकमते
पार्थिवपरमाणुमात्रस्य पाक
जस्पर्शः नैयायिकमते द्व्य
णुकादिस्पर्शोपि पाकजः ॥
यथा स्पर्शस्त्वगिन्द्रियग्राह्यस्त्व
चः स्यादुपकारकः अनुष्णाशी
तशीतोष्णभेदात् स त्रिविधो
मतः काठिन्यादि क्षितावेव
नित्यतादि च पूर्ववत् एतेषां पा
कजत्वं तु क्षितौ नान्यत्र कुत्र
चित् तत्रापि परमाणौ स्यात्
पाको वैशेषिके नये नै
यायिकानां तु नये द्व्यणुका
दावपीष्यते इति भाषापरिच्छे
दः स्पर्शेन्ति रूपयति स्पर्श
इति उपकारक इति स्पर्शनम
स्य हेतुस्पर्शः कारणमित्यर्थः
अनुष्णाशीतेति पृथिव्यावाय्वोः
स्पर्शोऽनुष्णाशीतः जलस्य शी
तः तेजसउष्णः काठिन्येति क
ठिनसुकुमारस्पर्शः पृथिव्या
एव इत्यर्थः कठिनत्वादिकं तु
न संयोगनिष्ठो जातिविशेषश्च
तेषां पाकजत्वं पूर्ववत् जलते
जो वायु परमाणु स्पर्शानित्याः
इत्यर्थः तद्भिन्नाः स्पर्शास्त्वनित्या
इत्यर्थः एतेषां रूपरसगन्ध ॥॥

स्पर्शानां नान्यत्रेति पृथिव्या
दिरूपरसगन्धस्पर्शाः पराग्नि
पाकरससंयोगादुपलभ्यन्ते
नहि शालूचा यथा पिच्छ्यमाने जला
दौ रूपादिकं परावर्त्तते नीरसौ
करसौरभ च नय व्यतिरेकाभ्या
मुपाधेरेवेति निर्णीयते पवन
पृथिव्योः शीतस्पर्शादिवत्
पृथिवीष्वपि मध्ये परमाणावे
व रूपादीनां पाकः इति वैशेषि
कावदंति नैयायिकानामिति नै
यायिकानां मते द्व्यणुकादौ
अवयविन्यपि पाको भवति इ
ति सिद्धान्तमुक्तावली पुराण
मते एकादशविधस्पर्शो य
था उष्णः १ शीतः २ सुखं ३
दुःखं ४ स्निग्धः ५ विशदः ६
खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १०
गुरुः ११ इति महाभारते मोक्षधर्म
र्मिकपर्व आचमनोत्तरस्पर्शनं
आचमनशब्दे द्रष्टव्यं उच्छिष्टस्य
स्पर्शनिषेधो यथा नस्पृशेत्
पाणिनोच्छिष्टो विप्र गो
ब्राह्मणानलान् न चानले
पदावापि न देवप्रतिमां
स्पृशेत् इति कौर्म्मे उपरि
भागे १५ अ ॥ ॥ ॥



ध्यायः अथ उच्छिष्टस्य चांडा
लादिस्पर्शप्रायश्चित्तं आपस्तं
वः भुक्तोच्छिष्ट स्त्वनाचांत
श्चंडालैः श्वपचेन वा स्पृशादात्
स्पर्शने गच्छेत् तत्र ऊर्ध्वोच्छि
ष्टोधनं गायत्र्यष्टसहस्रं वद्रु
पदां ब्राह्मणं जपेत् त्रिरात्रोपो
षितोभूत्वा पंचगव्येन शुध्यति
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्रा
जापत्यं समाचरेत् अर्द्धोच्छि
ष्टे स्पृष्टः पादः पाद आमाश
ने तथा प्राजापत्यं तत्राने अर्द्धो
च्छिष्टो येन आद्यग्रासः ग्रासे
निः ग्निष्टं नवनिर्गीर्णः दत्तः
पाने मैथुनसंसर्गे तथा मूत्र
पुरीषयोः स्पर्शने यदिग
च्छेत्त्वपचोदक्यांत्यजैः सह
दिनमेकं चरेन्मूत्रे पुरीषेत
दिन द्वयं दिनत्रयं मैथुने स्ना
त पाने स्याद्य चतुष्टयं काश्य
पः श्वसूकरांत्यचांडाल मद्य
भांडरजस्वलाः यद्युच्छिष्टः स्पृ
शेत् तत्र कृच्छ्रं सांतपनं चरेत्
एतत् स्नानाभ्यासे सांतपनेथ
तद्वयं ब्रह्मपुराणे उच्छिष्टेन
त शूद्रेण विप्रः स्पृष्टस्तता ह
प्तः उपवासेन शुद्धिः ॥ ॥ ॥

स्यात् शुना संस्पृष्ट एव वा उ
च्छिष्टेन त विप्रेण विप्रः स्पृष्ट
स्तु तादृशः उभौ स्नानं प्रकु
रुतः सद्य एव समाहितौ अ
नुच्छिष्ट ब्राह्मणस्य नक्तमिति
प्रायश्चित्तविवेकः अथ रज
स्वलास्पर्शप्रायश्चित्तं काश्य
पः रजस्वला तु संस्पृष्टा ब्राह्म
णा ब्राह्मणी यदि एकरात्रं
निराहारा पंचगव्येन शुध्यति
रजस्वला तु संस्पृष्टा राजन्या
ब्राह्मणी तथा त्रिरात्रेण वि
शुद्धिः स्यात् व्याघ्रस्य वचनं
यथा रजस्वला तु संस्पृष्टा वैश्य
या ब्राह्मणी च या पंचरात्रं नि
राहारा पंचगव्येन शुध्यति र
जस्वला तु संस्पृष्टा शूद्रया ब्रा
ह्मणी यदि षड्रात्रेण विशुध्ये
त्तु ब्राह्मणी कामचारतः अका
मतश्चरेदर्द्धं ब्राह्मणी सवेज्जा
तिषु एतेन रजस्वलाया ब्राह्म
ण्याः सवर्णारजस्वलास्पर्शे ए
करात्रोपवासः पंचगव्यपानं
कामतः अकामतस्त्वर्द्धं नक्त
व्रतं असवर्णारजस्वलास्पर्शे त्रिरा
त्र पंचरात्र षड्रात्रोपवासः अका
मतस्त्वर्द्धं एतच्चतुर्थाहानंतरेक
त्रैव

चांडालेन श्वपाकेन संस्पृष्टा
चेद्रजस्वला अति क्रम्य तान्य
हानि प्रायश्चित्तं समाचरेत्
त्रिरात्र मुपवासः स्यात् पंचग
व्येन शुध्यति तानिपर्यंतव्य
तिक्रम्य स्नाताशुक्तं तु कारयेत्
इति वचनांतरदर्शनात् एतत्
कामतः अत्र दिनभेदोपि नास्ति
अत्राने बृहस्पतिः पतितांत्य
श्वपाकैस्तु संस्पृष्टा स्त्रीरजस्वला
तान्यहानि अतिक्रम्य प्रायश्चि
त्तं समाचरेत् ॥
प्रथमेह्नि त्रिरात्रं तु द्वितीये ह्यह
माचरेत् अहोरात्रं तृतीयेह्नि
चतुर्थे नक्तमाचरेत् चतुर्थेह्नी
ति शुद्धिस्नानात् सर्वत्र त्र्यः
रजस्वला यदा स्पृष्टा श्वजंबुक
खरैः क्वचित् निराहाराभवे
त्तावत् यावत् स्नानेन शुध्य
ति अत्रापि बृहस्पत्युक्त दिनभे
दव्यवस्था वृद्धशातातपः ॥
रजस्वलेत ये नार्यावन्योन्यं
स्पृशतो यदि सवर्णा पंचगव्यं
तु ब्रह्मकूर्चमतः परं पंचगव्य
पानं व्रतरूपं तेनोपवासः ॥
ब्रह्मकूर्चमाह जावालः अहो
रात्रोषितो भूत्वा पौर्णमास्यां

विशेषतः पंच गव्यं पिबेत्
प्रातः ब्रह्मकूर्च विधिः स्मृतः
तद्दशांशो एवाणैकं दातव्यं ॥
उच्छिष्टशूद्रा दिस्पर्शे बृहस्पतिः
शुना चोच्छिष्टया शूद्रासंस्पृ
ष्टा द्व्यहमाचरेत् अहोरात्रं
तृतीयेह्नि परतो नक्त
माचरेत् परत श्चतुर्थदिने
स्नानात् पूर्व मिति ज्ञेयं
इति प्रायश्चित्ततत्वं मतस्य
सूक्तोक्तास्पृश्यस्पर्शनप्राय
श्चित्तं स्नानशास्त्रे द्रष्टव्यं ॥
स्पर्शकः त्रि स्पर्शनकर्तास्पृ
श धातोः कर्तरि ण्वक प्र
त्ययेन निष्पन्नः ॥
स्पर्शनं क्ली दानं स्पर्शः इति
मेदिनी ॥
स्पर्शनः पुं वायुः इत्यमरः
स्पर्शमणिः पुं स्पर्शमात्रेण
स्वर्णजनक प्रस्तरविशेषः
पारश पाथर इति भाषा इति
वत्स माणशाद्दर्शनात् ॥
स्पर्शमणिप्रभवं लौ स्वर्णं
इति शब्दरत्नावली ॥
स्पर्शलज्जा स्त्री लज्जालुलतः
इति शब्दचंद्रिका ॥
स्पर्शस्पृहा स्त्री पातमूली



इति शब्दचंद्रिका ॥
स्पर्शास्पन्दः पु भेकः इति
केचित् ॥
स्पर्शा स्त्री कुलटा इति धर
णिः स्पर्शानन्दाः स्त्री अप्सरसः
इति त्रिकांडशेषः
स्पष्टा त्रि उपतापकमात्रं
रोगः इत्येके इत्यमर ॥
टीकायां भरतः ॥
स्पश ज ग्रंथनबाधनयोः इति
इति कविकल्पद्रुमः ज स
शति स्पशते [illegible]
[illegible] केचित् इतिदुर्गादासः
स्पशः पु चरः अभिसरः
इत्यमरः चरो गूढपुरुषः अ
भिसरो युद्धं प्राणनिरपेक्षो
यो द्रव्यार्थं कांडं हस्तिनं वा
योधयति सोऽभिसरः इत्ये
के इमौ द्वौ स्पशौ ॥ ॥
इति भरतः ॥
स्पष्टं त्रि व्यक्तं तत् पर्या
यः स्फुटं २ प्रव्यक्तं ३ उ
ल्बणं ४ इत्यमरः उद्रिक्तं
५ प्रकटं ६ इति जटाधरः
स्पष्टीकृतं त्रि व्यक्ती ॥॥
कृतं कृधातोः परेस्पष्ट
शब्दादभूततत ॥ ॥ ॥॥

द्रावे च्वि प्रत्ययेन निष्पन्नं स्पन
ष्टीति रता माल ने इति
कविकल्पद्रुमः न स्पशोति
इति दुर्गादासः ॥
स्पृक्का स्त्री एका स्पृशते
सौगंध्यात् स्पृशा संस्पर्शेवाकृ
स्यात् कः पृषोदरादित्वात् श
एकः स्पृक्का दंत्यादि रिति के
चित् इत्यमरटीकायां भरतः
स्पृश शाके स्पृशि इति कवि
कल्पद्रुमः शा स्पृशति ऊ अ
स्पार्क्षीत् अस्पृक्षत हस्तेनप
स्पर्शा तदंग मिन्दुः इति ऊमा
रः इति दुर्गादासः ॥
स्पृशा स्त्री भुजंगघातिनीवृ
तः कंकालिका इति ख्याता
इति शब्दचन्द्रिका ॥
स्पृशी स्त्री कंटकारी इत्य
मरः
स्पृष्टः त्रि कृतस्पर्शः यथा
ब्रह्म पुराणे उच्छिष्टेन तथा
द्रेणविप्रः स्पृष्टस्तनादृषाः उ
पवासेन शुद्धिः स्यात् शुना
संस्पृष्ट एवमा इति प्रायश्चि
त्ततत्वं ॥
स्पृष्टास्पृष्टं क्ली परस्परस्पर्श
नेयथा अयजातिगुणानवसे

स्पृष्टास्पृष्टं महेश्वरी अथमैः
शिष्टसंस्पर्शे प्रायश्चित्तं यथा
विधि ब्राह्मणस्य शवांगंवत
त्रियाद्यैः कदाचन स्पृष्टाचम
दृशिं कृत्वा उपवासेन तत्रियः
व्रतस्यशूद्रस्पर्शेपि दृशिसंस्प
रणे शुचिः सेवयोपस्पृष्टस्या
स्त प्रायश्चित्तं नविद्यते ब्राह्म
णायस्त शूद्रस्य सेवयोपस्पृ
ष्टोत कचित् स्नात्वाचमदृशि
स्मृत्वा प्राणायामेन शुध्यति
शूद्रस्त्वत्रिविधो ज्ञेयो व्रतस्य
श्चोत्तमः स्मृतः कायस्थः पा
वको मध्योभिन्नाचारोऽधमो
मतः उत्तमे ब्राह्मणः स्पृष्ट उ
पस्पृश्य द्विजः शुचिः अध
मेः सूर्यगामग्निं स्पृष्टः सु
ध्यति ब्राह्मणः इति मतस्यसू
क्ते ३४ पटलः ॥
स्पृष्टास्पृष्टि व्य परस्परस्पर्श
नेछोयाछुयी इति भाषा यथा
रत्नाकरे बृहस्पतिः तीर्थे वि
वाहे यात्रायां संग्रामे देशविप्ल
वे नगरग्राम दाहे च स्पृष्टेनदु
ष्यति अप्ययिव कष्टास्पृ
ष्टयेपीडिते तथा मातापित्रो
गुरो ॥ ।

स्त्रैव निदेशे वर्त्तनात्तथा स्पृ
ष्टास्पृष्टि इत्यव्यय क्रियाव्य
तीहारे तथेति नदुष्यतीत्यर्थः
इति प्रायश्चित्ततत्वं ॥
मत स्यसूक्ते ३४ पटलेप्य
न्यत् द्रष्टव्यं ॥
स्पृष्टिः स्त्री स्पर्शः तत् पर्या
यः एक्तिः २ इत्यमरः स्पर्श
ने ३ इति शब्दरत्नावली स्पृह [illegible]
इति कविकल्पद्रुमः [illegible] दुमः
स्पृहयति इति दुर्गादासः ॥
स्पृहणीयं त्रि वांछनीयं यथा
प्रचग स्पृहः स्पृहणीयचन्द्र
माः सदावगाहः ततवारिसंच
यः दिनांतरम्योऽभ्युपशांतम
न्मथो निदाघकालः समुपाग
तः प्रिये इति ऋतुसंहारः
स्पृहयालुः त्रि स्पृहाशीलः लो
भी इति मुग्धबोधव्याकरणं
स्पृहा स्त्री इच्छा इत्यमरः
तस्याः निन्दाप्रशंसे यथा
तपो धनं ब्राह्मणानां तपः
कल्पतरुस्तथा तपस्याकाम
धेनुश्चसंततं तपसि स्पृहा
स्पृहे तत्क्रियाणांच वा
णिज्येव तथाविधां शूद्रा
णां विप्रसे ॥



वायां स्पृहा वेदेषु निन्दिता तद्वि
याणां च तपसि स्पृहातीव प्र
शंसिता ब्राह्मणानां विवा
देषु स्पृहातीव विनिन्दिता त
त्रियाणां रणे धर्म्मो रणोऽस्
न्यैर्न गर्हितः रणे स्पृहा ब्राह्म
णानां लोके वेदे विडम्बना
तपोधनानां विप्राणां वाऽमला
नां युगे युगे शान्तिस्वस्त्ययनं
कर्म्म विप्रधर्म्मो न संगरः इति
ब्रह्मवैवर्त्ते गणपतिखण्डे ३५
अध्यायः ॥
स्फुटः पुं मातुलुङ्गकः इति
शब्दचन्द्रिका कोङ्कनीये बिस्म
छा त्रि उपलापक्रमात्रं इत्य
मरः रोगः इत्यके ॥
इति भरतः
स्फुट ३७ भेदे इति कविक
ल्पद्रुमः तुदादिपरस्वरि
णकोऽस्य वर्गद्वितीयपञ्चमौ
पंचमस्वरिणाविति भ्रमो देषं
तथात्वे सज्जातीयतया स्फुटक्
भिदीत्यादीनां सन्निधावेवापठि
ष्यत् एवं तत्त्वापि नहं गच्छे
स्फुटि विकसने इत्यनेनैवेष्ट।
सिद्धेः पौषधातोरप्येवं पर्य्यायस्या
त् अतएव रमानाथोऽपि ॥॥

स्फुटिर्विशरणे इत्यत्र उकार
मूलः स्फुट इति केचित्
पठन्ति पचादित्वादनि स्फुटा
फणा इति सुभूति विदंतमा
ह इ स्फुटसते स्फुटति गात्रेणा
णः परस्फुट परस्फोट स्फुटितं
इति दुर्गादासः
स्फुटः पुं फणा इत्यमरः ॥
स्फुटा स्त्री
स्फटिकः पुं सूर्य्यकान्तमणिः
इति हलायुधः स्वनामख्यातम
णिः फटिकं २ स्फाटकं ३
इति शब्दरत्नावली ॥
भास्वरः ४ स्फटिकोपलः ५
शालिपिष्टं ६ धौतशिलं ७
इति त्रिकाण्डशेषः सितोप
लः ८ विमलमणिः ९ निर्म्म
लोपलः १० स्वच्छः ११ स्वच्छ
मणिः १२ अमररत्नं १३ नि
-स्तरत्नं १४ शिवप्रियः १५ अस्य
गुणादि यथा स्फटिकः समवी
र्य्यस्तु पित्तदाहार्त्तिदोषनुत् त
स्याक्षमाला जपतां दत्ते कोटि
गुणं फलं तत्परीक्षा यथा प
द्मरागेन्दुबिन्दुच्छविविमलत
मेनिस्तयं नेत्रहृद्ये त्रियं मुक्ता

स्तरालं मधुरं मतिहिमं
पित्तदाहास्त्रहारि पाषाणेय
त्रिकूटं स्फटित मपि निजास्व
च्छतां नैव जह्यात् नजात्यं
ज्यत्नलभ्यं शुभ मपवित्रते
शैवरत्नं च रत्नं विंदुस्थाने
विमुरिति च पाठः इति राज
निर्घण्टः अपिच मुक्ता विद्रु
म वज्रेन्द्र वैदूर्य्य स्फटिकादि
कं मणिरत्नं संशोधितं कषायं
स्वादु लेखन चक्षुष्यधारणा
तञ्च पापालक्ष्मीविनाशनं इ
ति राजवल्लभः तस्य
उत्पत्तिपरीक्षे यथा कावेर
विन्ध्ययवनचीननेपालभूमि
षु लाङ्गली व्याकिरन्मेदो दान
वस्य प्रयत्नतः आकाशशु
द्धं तैलाक्ष्मसत् पत्रं स्फटिकं
ततः मृणालशङ्खधवलं किं
चिद्वर्णान्तरान्वित न तत्तुल्यं हि
रत्नानामथ पापप्रनाशनं सं
स्कृतं शिल्पिना सद्यो मूल्यं किं
चिल्लभेत ततः इति गारुडे ७९
अध्यायः तथा हिमाल
ये सिंहले च विन्ध्याटवितटे
तथा स्फटिकं जायते चैव ना
नारूपसमप्रभं हिमाद्रौ ॥

चन्द्रसंकाशं स्फटिकं तत्
द्विधा भवेत् सूर्य्यकान्तं चत
त्रैकं चन्द्रकान्तं तथापरं ॥
सूर्य्यांशुस्पर्शमात्रेण वह्निं व
मति यत् क्षणात् सूर्य्यकान्तं
तदाख्यातं स्फटिकं रत्नवेदि
भिः पूर्णेन्दुकरसंस्पर्शादमृ
तं स्रवति तत्क्षणात् चन्द्रकान्तं
तदाख्यातं दुर्लभं तत् कलौ
युगे अशोकपल्लवच्छायं
दाडिमीबीजसन्निभं विंध्या
टवितटे देशे जायते कुसुमा
करे गंधनीलके पद्मरागाभवे
स्थाने विविधं स्फटिकं भवेत्
अत्यन्तनिर्मले स्वच्छे स्रवती
व जलं भुवि ज्योतिर्ज्वलन
मालिष्टं शुक्राज्योतीरसंहि
ज तदेवलोहिताकारं राजा
वर्त्तमुदाहृतं आनीलत
नुपाषाणं प्रोक्तं राजम
यं शुभं ब्रह्मसूत्र
मयं यत्त प्रोक्तं ब्रह्ममयं
हि तत् इति स्फटिकपरी
क्षा इति भोजराजकृतयुक्ति
कल्पतरुः स्फुटिका स्त्री
स्फटिकारिः इति ॥ ॥
भावप्रकाशः ॥ ॥ ॥



स्फटिकाचलः पुं कैलासप
र्व्वतः इति हेमचन्द्रः ॥
स्फटिकात्मा पुं स्फटिकः इ
ति शब्दरत्नावली ॥
स्फटिकाद्रिभिद् पुं कर्पूरं
इति केचित् ॥
स्फटिकाभ्रः पुं कर्पूरः इति
राजनिर्घण्टः ॥
स्फटिकारिः स्त्री श्वेतवर्णि
ण् द्रव्यविशेषः फटकिरी
इति भाषा यथा नरसारयवक्षा
रस्फटिकारित एव काचवक
र्य्यैः वक्तुशः पात्रं सत्वं तद्धि
महाद्रावकं नाम इतिरत्नाव
ली तद्गुणान्तराणि स्फटिकारी
स्फटिकारिका फटकरी इति
महाद्रावकप्रकरणे भैषज्य
रत्नावली ॥
स्फटी स्त्री स्फटिकारिः तत्
पर्य्यायः स्फटिकी २ श्वेता ३
शुभ्रा ४ रङ्गदा ५ रङ्गदृढा ६
दृढरङ्गा ७ रङ्गाङ्गा ८ अस्या
गुणाः कटुत्वं स्निग्धत्वं क
षायत्वं प्रदर मेह कृच्छ्रवमि
शोषदोषनाशित्वं दृढरङ्गदा
तृत्वं च इति राजनिर्घण्टः अ
पि च स्फटिकातकषायो ॥॥

स्रा वातपित्त कफव्रणान् नि
हन्ति श्वित्रवीसर्पान् योनिसं
कोचकारिणी इति भावप्र
काशः ॥
स्फड १ क नर्म्मणि यथा स्फ
टिक नर्म्मणि इत्यत्र नर्म्म इ
हपरीहासः प्रायमप्रीति ॥
कातन्त्राया इति दुर्गादासः
स्फर पा स्फूर्त्तौ चले इति
कविकल्पद्रुमः प्रास्फरती
स्फुरण मित्यमरः इति दु
र्गादासः स्फरणं क्ली स्फु
रणं इत्यमरः स्फल पा चाले
स्फूर्त्तौ इति कविकल्पद्रुमः
प्रास्फलती स्फालनकर्कशा
गुलाविति रघुः चालश्चलने इ
ति दुर्गादासः स्फटकं क्ली स्फ
टिकं इति क्वचित् पाठः रत्नाव
ली जलविन्दौ पुं इति केचित्
स्फाटिकं क्ली स्फटिकं
इति शब्दरत्नावली ॥
स्फाटिकोपलः पुं स्फ
टिकं इति
त्रिकाण्डशेषः ॥
स्फाटीकं क्ली स्फटिकं
इति शब्दरत्नावली ॥

स्फातः त्रि वृद्धियुक्तः स्फाय
धातोः क्तप्रत्ययेन निष्पन्नः ॥
इति व्याकरणं
स्फातिः स्त्री वृद्धिः इत्यमरः
स्फाय ऊ ङ वृद्धौ इति कवि
कल्पद्रुमः ऊ स्फीतः स्फातः
ङ स्फायते पस्फाये स्फाय
त्रिमीक संधीति गणकृतानि
त्यत्वात् इति रमानाथः वक्त
तस्तस्फायते स्फायः पचादि
त्वादन् ततः सः इवाचरतीति
क्वोश्चेत्तं इति दुर्गादासः ॥
स्फारं क्ली प्रचुरं इति मेति
प्रसारोणादिवृत्तिः ॥
स्फारः पुं विकटः कनकादे
र्बुद्बुदः इति मेदिनी विपु
ले त्रि इति हेमचन्द्रः ॥
स्फारणं क्ली स्फुरणं इत्य
मर टीकायां रमानाथः ॥
स्फालः पुं स्फूर्त्तिः स्फलधा
तोर्घञ् प्रत्ययेन निष्पन्नः ॥
स्फिक् स्त्री कटिप्रोथः इत्य
मरः ॥
स्फिकचातनकः पुं कटक
लः इति शब्दचन्द्रिका
स्फिट क वृत्यां हिंसे ॥
अनादरे इति कविकल्पद्रुमः

कस्फेटयति वृत्तिरन्यैनाम
न्यते इति दुर्गादासः
स्फिरं त्रि प्रचुरं इत्यमरः स्फी
तः त्रि वर्द्धितः यथा स्फी
तान् जनपदांस्तत्र पुरग्राम
व्रजाकरान् खेटखर्वटवाटी
श्चवनान्युपवनानि च इति ॥
श्रीभागवते १ स्कन्धे ९ अध्या
यः स्फीतान् समृद्धान् देशा
न् तत्र तस्यां दिशि पुरग्राम
व्रजाकरान् तत्र पुराणि
जधान्यः ग्रामाः भृत्यास्तु यत्रैवै
ववसंति ते सत्न ग्राम इति
प्रोक्ताः शूद्राणां वास एव चेति
व्रजा गोकुलानि आकरर
त्नाद्युत्पत्तिस्थानानि तान्
खेटाः कर्षकग्रामाः खर्वटाः
गिरितटग्रामाः भूगुः प्राक्का
वा एकतो यत्र तु ग्रामो न
गरं चैकतः स्थितं मिश्रं त
खर्वटं नाम नदी गिरि समा
श्रयमिति वाटाः पुष्पगुच्छ
वाटिकाः वनानि स्वतः सिद्ध
वृक्षाणां समूहाः उपव
नानि रोपित वृक्षाणां समू
हाः तानि च इति तट्टीका
यां श्रीधरस्वामी ॥ ॥ ॥॥




स्फुट क भिदि इतिकविकल्प
द्रुमः कस्फोटयति कंटकः
पदं इति दुर्गादासः ॥
स्फुट इर विशरणे इति कवि
कल्पद्रुमः इर अस्फुटत् अ
स्फोटीत् विशरणं भेदनं
स्फोटयति गात्रं बाणः विसर
ण इति दंत्यमध्यपाठे विकस
न इत्यर्थः स्फोटति मल्लिका
कलिका ॥
स्फुट शि विकासे इति कवि
कल्पद्रुमः विकास इति कस
ज्ञगताविति दंत्यांतस्य यत्रि
रूपं विपूर्वणार्थांतरवाचित
या विकसन मित्यर्थः शिस्फु
टति केतकीकोरकः अस्फुटी
त् पुष्फोट इतिदुर्गादास स्फु
ट उ॰ विसरणे इति कवि
कल्पद्रुमः उ॰ स्फोटंते नव
कुटनलानि कुटजप्रायेषुवृ
देष्विति हलायुधः इति दु
र्गादासः ॥
स्फुट इ क नर्म्मणि इति क
विकल्पद्रुमः नर्मेह परीहासः
इकस्फुटयति सखायं लोकं
अथ मन्येन मन्यते इति
दुर्गादासः ॥ ॥

स्फुट क हिंसे आंड पूर्वः ये
इति कविकल्पद्रुमः आंड
उपसर्गः क आस्फोटयति
इतिदुर्गादासः ॥
स्फुट त क विसरणे इति क
विकल्पद्रुमः विसरणं विक
सनं स्फुटयति चम्पककलिका
अपुस्फुटत् इतिदुर्गादासः
स्फुटः त्रि व्यक्तः प्रफुल्लः
इतिमेदिनी स्फुलकः इत्यज
यः भिन्नः इति स्फुटधात्वर्थ
दर्शनात् स्फुटग्रहा यथा ॥
स्यात् संस्कृतो मध्यफलेन
मध्यो मंदस्फुटः स्यात् चल
केन्द्र युक्तं विधाय योज्येण
चलेन चैवं खेटस्फुटः स्या
दसकृत फलाभ्यां कुजस्य वि
शेष माह दलीकृताभ्यां प्र
थमे फलाभ्यां ततोऽखिला ॥
भ्यां मसकृत कुजस्त स्फुटोर
वीन्द्रस्तुरेव वेद्यौ शीघ्रात्व
तुंगास्य तयो रभावात् इति
सिद्धांतशिरोमणिः ॥
स्फुटनं स्त्री विदरणं इत्यम
रः विकसनं इतिस्फुटधात्वर्थ
दर्शनात् ॥
स्फुटबंधनी स्त्री पारावतपदी

नफटकी इति भाषा इतिरत्न
माला स्फुटवल्कलीति केचित्
स्फुटा स्त्री फटा यथा इत्य
मरटीकायां रामाश्रमः ॥
स्फुटिः स्त्री पादस्फोटरोगः
निर्भिन्नकर्कटीफलं इति मे
दिनी ॥
स्फुटितः त्रि विकसितः इति
हेमचन्द्रः भिन्नः परिहसितः
इति स्फुटधात्वर्थदर्शनात्
व्यक्तीकृतः इति स्फुटशब्दा
र्थदर्शनात् ॥
स्फुटी स्त्री पादस्फोटरोगः
कर्कटीफलं फुटी इतिभाषा
इतिशब्दरत्नावली ॥
स्फुट्ट क अनादरे इतिकवि
कल्पद्रुमः कस्फुट्टयति इति
दुर्गादासः
स्फुड शि हृत्यां इति कवि
कल्पद्रुमः शिस्फुडति अ ॥
स्फुडीत् पुस्फोड हृत्यांवरणे
इति दुर्गादासः
स्फुड इ उ॰ फुल्ले इति कविक
ल्पद्रुमः फुल्लं विकसनं इस्फुड्य
ते उ॰ स्फुडते अल्पकोरकः पुस्फु
डे इति दुर्गादासः ॥ ॥ ॥

स्फुड इक नर्म्मणि इतिकवि
कल्पद्रुमः नर्म्म इह परीहासः
इकस्फुंडयति सखायं लोकः
प्रस्फुंडयिषति आत्मस्वरोभि
कातंत्राद्याः पंचमस्वरश्वेता
नर्म्मे इति गोविंदभट्टः
इतिदुर्गादासः
स्फुत्करः पुं अग्निः इतिशा
ब्दचंद्रिका ॥
स्फुत्कारः पुं फुत्कारः स्फु
दिति क्रियते इति स्फुतशब्द
पूर्व कृधातोर्भावे घञ्प्रत्यये
न निष्पन्नं ॥
स्फुर शि स्फूर्त्तो चले इति
कविकल्पद्रुमः स्फूर्त्तिः प्रका
शः चलमुल्लनं शिस्फुरति
चामरं अस्फुरीत् पुस्फार
इतिदुर्गादासः ॥
स्फुरः पुं फलकं इति हेमच
न्द्रः स्फुरणं इत्यमरटीका स्फुर
णं स्त्री किंचिच्चलनं इतिभर
तः तत् पर्यायः स्फुरणा २
इत्यमरः स्फुलनं ३ स्फारणं ४
स्फुरः ५ स्फुरणा ६ स्फारणं ७
इतितट्टीका स्फूर्त्तिः इतिशा
ब्दरत्नावली अंगस्फुरणस्य शुभा



शुभफलं यथा क्रमोऽथ नांग
स्फुरितस्य सम्यक् प्रत्येकमस्य
क्फलप्रभावं सर्वत्र यत्राव
गते स्वदेहाद्भुत पश्यते कर्मवि
पाकसंवित् मूर्द्धि स्फुरत्वात्पृ
थिव्याप्तिः स्यात्प्रवृद्धिस्त्र
ललाटदेशे घ्राणमध्ये प्रिय
संगमः स्यात् नासातिमध्ये च
महार्थलाभः हृदंतमध्यस्फुर
णेऽर्थलाभोत् कंठौ क्रमाद्धि
स्फुरिते हृगाद्दो जयो हृष्टार्थः
स्फुरणोरणं स्यात् प्रियश्रुतिः
स्यात् स्फुरिते च कर्णौ योषित्
समृद्धिः स्फुरिते च गंडे घ्राणे
त सौमुख्य भ्रुवोर्भवेतां भोज्ये
ष्टसंगावधरोर्द्धयोस्तु स्कंधे
गलेभोग विवृद्धिलाभौ स्व
न्तो भुजस्येष्टसमागमाय
स्पन्दः करस्य द्रविणाप्त
हेतुः स्पन्दः करस्य द्रविणा
प्तहेतुः स्पन्दो जयायोरसि
मानवानां पार्श्वप्रकम्पे विषयस्य
लाभः कटिप्रकम्पे त्व बलप्रमोदो
नाभिप्रकम्पे निजदेशनाशः धन
हिंवधुश्च कविप्रकम्पे दुःखं ध
नीतं हृदयस्य वस्तेस्फिक् ॥॥

पायुकम्पेऽपि च वाहनाप्तिः ॥
वरांगकम्पे वरयोषिदाप्तिर्मु
ष्के सकम्पे तनयस्य जन्मव
स्तौ सकम्पे युवतिप्रवृत्तिः
दोषश्च कम्पे पुन रूरुपृष्ठे ॥
उरः पुनः स्यात् सुसहायला
भः स्याज्जानकम्पे त्वचिरेण सि
द्धिः जंघाप्रकंपे निजदेश
नाशः स्यानाप्ति रुष्टस्थर
णस्य कंपे पुंसां सदा दक्षिण
देहभागे स्त्रीणां च वामाव
यवे प्रजातः स्पन्दः फलानि
प्रदिशत्यवश्यं इति वसंतरा
जशाकुने नरेंगिते ३७ स्फु
रणप्रकरणं चतुर्थं
स्फुरणा स्त्री स्फुरणं इत्यमर
टीका ॥
स्फुरन् त्रि कम्पनयुक्तः स्फू
र्त्तिविशिष्टः यथा गंगोत्तुंगत
रंग संगतजटाजूटाग्रजाग्रत्
फणि स्फूर्जत् स्फुरत् कृत्तिभी
तिसंभृत चमत्कार स्फुरत् सं
भ्रमा आनन्दामृतवापिकां वि
दधती चित्ते गिरीश प्रभोस्ते
पायात्भवसंगमे भगवती लज्जा
वती पार्वती इति काव्यम् ॥५

चंद्रिका ॥
स्फुरितं क्लो स्फुरणं स्फुरण
विशिष्टे त्रि यथा क्रमोऽथ नांग
स्फुरिते च सम्यक् इति प्रिया
श्रुतिः स्यात् स्फुरिते च णे इति
च वसंतराजशाकुने ·
स्फुलं आ विस्तृतौ इति कवि
कल्पद्रुमः क्विपि राज्वो लोपि
स्फुः स्फुर्णो तेन स्फुलति क
र्षा मद्यपः इति दुर्गादासः ॥
स्फुर्ज टु ओ श्रा वज्रनिर्घोषे
टुस्फुर्जथुः ओ स्फूर्णः आ स्फू
र्जतं स्फूर्णि तेन वज्रनिर्घो
षो वज्रकर्तृकशब्दः ॥
स्फुर्जति वज्रे इति दुर्गादासः
स्फुर्जकः पुं स्फुर्जकवृक्षः इ
त्यमरटीकायां रायमुकुटः
स्फूर्जथुः पुं वज्रपतनजनित
शब्दः इत्यमरटीकायां भरतः
स्फुल शि स्फुर्तौ चले चये
इति कविकल्पद्रुमः शिस्फु
लति अस्फुलीत् पस्फोल
स्फूर्त्तिः प्रकाशः चलः स्फु
लनं चयः संचयः इति दुर्गादासः
स्फुलं क्लो वस्त्रवेश्म तांबु इति
भाषा इति शब्दरत्नावली ॥५


स्फुलनं क्लो स्फुरणं इत्यमर
टीकायां नीलकंठः ॥
स्फुलिंगः त्रि अग्निकणः फि
न्की इति फिनकटी इति च भा
षा इत्यमरः देअग्निचूर्णे स्फुरत्
कारेण लिंगति गच्छति स्फुलिं
गः इति तट्टीकायां भरतः
स्फुलिंगिनी स्त्री अग्निसप्तजिह्वा
न्तर्गतजिह्वाविशेषः इति
जटाधरः ॥
स्फूर्जकः पुं तिन्दुकवृक्षः इत्य
मरः स्फूर्जति वज्रो तिमः
स्फूर्जकः द्वौ स्फूर्जा वज्रनिर्घो
षेणाकः स्फूर्जेर्वा दीर्घः सर्वत्र
इति परवाक्यात् स्फूर्जकः स्फु
र्जकश्च स्फूर्जो वज्रं स इव दृढ
सारत्वात् स्फूर्जक इत्यन्ये ॥
इति भरतः ॥
स्फूर्जथुः पुं वज्रपातजनित
शब्दः तत्पर्य्यायः वज्रनिर्घो
षः २ इत्यमरः स्फूर्जथुः ३ वि
स्फूर्जथुः ४ विस्फूर्जथुः ५ वज्र
निर्घोषः ६ इति तट्टीका स्फू
र्त्तिः स्त्री स्फुरणं इत्यमर
टीकायां रमानाथः ॥
स्फूर्त्तिमान् त्रि पाशुपतः प
र्य्यायः कार्थिकः पाशुपतस्त्रिद्रुप्सः

स्फूर्त्तिमान् मतः इति त्रिकांड
शेषः स्फूर्त्तिविशिष्टे त्रि ॥
स्फेयान् त्रि अतिशयः स्फार
शब्दादीयस्प्रत्यये कृते स्फा
देशेन निष्पन्नः इति व्याक
रणं ॥
स्फेष्ठः त्रि अतिशयः इत्यमरः
स्फोटः पुं स्फोटकः इति
राजनिर्घंटः ॥
स्फोटकः पुं रोगविशेषः
फोडा इति भाषा तत् पर्य्यायः
पिडकः २ गंडः ३ इति हेम
चंद्रः स्फोटः ४ विस्फोटः ५
इति राजनिर्घंटः अस्य वि
वरणं विस्फोटशब्दे द्रष्टव्यं
भेदक परीहासकयोः त्रि ॥
स्फोटनं क्ली विदारणं इस्य
मरटीकायां भरतः प्रकाश
नं इति स्फुटधात्वर्थदर्शनात्
स्फोटनी स्त्री मणिशंखवेधो
पकरणं भोडरी इति ख्याता
यथा आस्फोटनी स्फोटनी
च तन्नला स्फोटनी मता इति
भरतद्विरूपकोषः किंच ला
स्फोटन्या वेधनी च स्फोट
नी दृषदशिका इति भर
त धृतवाचस्पतिः ॥ ॥ ॥

स्फोटबीजकः पुं भल्लातकः
इति राजनिर्घंटः ॥
स्फोटा स्त्री सर्पफणा इति
केचित् ॥
स्फोटायनः पुं मुनिविशेषः
तत् पर्य्यायः कक्षीवान् २
इति हेमचन्द्रः ॥
स्फोटिका स्त्री शाकुन्तिकाइ
ति त्रिकांडशेष ग्रंथान्तरे को
टिका इति पाठः ॥
स्फ्यं क्ली ख — कारकाष्ठं य
थास्फ्याग्निष्टज्याधिकरणंच
स्फ्यस्य खड्गाकारकाष्ठस्य भक्ता
शेष निमित्तके ज्यायामिष्टत्वे
न प्रकृतिवद्विकृति रित्यति
देशेन दर्शात्मक प्रकृतिध
र्म्माणां प्राप्तौ पूर्वदिनप्रातः
कालीनं हवनीयदेवतावा
हन मपि प्राप्तं तच्च तदानी
न विधीयते नैमित्तिके निमि
त्त निश्चयवतोऽधिकारितया
प्रकृते प्रो भाविभक्ताशेषद्र
व्यनिमित्त संशयेन प्रधाना न
धिकारिणोऽङ्गानधिकारा
त् तदुत्तरदिने च निमित्तनिश्च
येतदधिकार सिद्धावपि नोत्क
र्षनात् ह्वाने आवाहनस्य पूर्वदिन

प्रातः कालनैयत्यादितीत्यायया
आवाहनं विनैवानुष्ठानमिति ॥
इति तिथ्यादितत्त्वं ॥
स्म अ श्लोकपादपूरणं इत्य
मरः तद्योगे अतीतकालेकी
की विभक्तिर्भवति यथा हन्ति
स्म रावणं रामः इति मुग्धबो
धव्याकरणं ॥
स्मयः पुं अद्भुतः गर्वः इति
मेदिनी ॥
स्मरः पुं कामदेवः इत्यमरः
स्मरणं च ॥
स्मरकूपकः पुं भगं इतित्रि
कांडशेषः ॥
स्मरकूपिका स्त्री योनिः स्मरकू
पकशब्दादाप्प्रत्ययेन निष्पन्ना
स्मरगुरुः पुं विष्णुः इति के ॥
चित् ॥
स्मरगृहं क्ली योनिः इति जटा
धरः ॥
स्मरचक्रः पुं रतिबंधविशेषः
यथा धृत्वा वामकरेणोरुं स्व
पादस्योपरिस्थिते हृत्वे च रम
ते कामी स्मरचक्रः प्रकीर्त्तितः
इति स्मरदीपिका
स्मरच्छत्रं क्ली योनिः इति ॥
केचित् ॥ ॥

स्मरणं क्ली स्मृतिः तत् पर्य्यायः
आध्यानं २ स्मृतिः ३ इति
हेमचन्द्रः चिंता ४ चर्चा ५
इति जटाधरः ॥
स्मरणापत्यतर्पकः पुं कच्छपः
इति केचित् ॥
स्मरदशा स्त्री कामावस्था तद्भे
दा यथा नयनप्रीतिः प्रथमं
चिंतासंगस्ततोऽथ संकल्पः ॥
निद्राच्छेदस्तनुता विषयनिवृत्ति
स्त्रपानाशः उन्मादो मूर्च्छा मृ
ति रित्येताः स्मरदशा दशैव
स्युरिस्याच लते इत्युज्ज्वलनी
लमणिः ॥
स्मरध्वजं क्ली योनिः इति श
ब्दरत्नावली ॥
स्मरध्वजः पुं वाद्यं इति हेम
चन्द्रः लिंगं इति केचित्
स्मरध्वजा स्त्री ज्योत्स्नारात्रिः
इति केचित् ॥
स्मरप्रिया स्त्री रतिः इति ज
टाधरः ॥
स्मरमन्दिरं क्ली योनिः इति
हेमचंद्रः ॥
स्मरलेखनी स्त्री शारिकापक्षी
इति शब्दरत्नावली ॥
स्मरवल्लभः पुं अनिरुद्धः इति



केचित्
स्मरवीथिका स्त्री वेश्या इति
राजनिर्घंटः
स्मरवृद्धिसंज्ञः पुं कामवृद्धि
क्षुपः इति राजनिर्घंटः
स्मरसखः पुं चन्द्रः इति के
चित् स्मरस्तंभः पुं उपस्थः इ
ति शब्दरत्नावली ॥
स्मरस्पर्द्धी पुं गर्दभः इति
त्रिकांडशेषः ॥
स्मरहरः पुं शिवः इत्यमरः
स्मरागारं क्ली भगं इति शब्द
रत्नावली ॥
स्मरांकुशः पुं नखे इति शब्द
रत्नावली ॥
स्मराम्रः पुं राजाम्रः इति रा
जनिर्घंटः ॥
स्मरासवः पुं लाला यथा
स्मरासवो मरवस्तवं पानिस्यात्
पानभाजने इति त्रिकांड
शेषः मद्यभेदः इति के ॥
चित् ॥
स्मार्त्तः त्रि स्मृतिसंबंधीयः स्मृ
तिशास्त्रव्यवसायी स्मृतिश
ब्दात् ष्णप्रत्ययेन निष्पन्नः ॥
स्मार्त्तं क्ली स्मृतिशास्त्रोक्तक
र्म यथा श्रौतं कर्म स्वयं कुर्या

दन्योपि स्मार्त्तमाचरेत् अशक्तौ
श्रौतमप्यन्यः कुर्यादाचार
मंततः इति तिथ्यादि
तत्वं अपि च श्रुतिस्मृति ॥
विरोधेतु श्रुतिरेव गरीयसी
अविरोधे सदा कार्य्यं स्मार्त्तं वै
दिकवत् सता इति श्राद्ध
तत्वं ॥
स्मि क ङ अनादरे इति कवि
कल्पद्रुमः दंत्यादिः क ङ
स्माययते इति दुर्गादासः
स्मिट क अनादरे स्नेहे इति
कविकल्पद्रुमः ओष्ठ्यवर्ग
शेषयुक्तः कस्मेटयति इति
दुर्गादासः ॥
स्मितं क्ली ऋषद्धास्यं इत्यमरः
विकसिते त्रि इति त्रिकांड
शेषः
स्मील निमेषणे इति कविक
ल्पद्रुमः ओष्ठ्यवर्गशेषयुक्तः
स्मीलति चक्षुः पत्तमि गत्ते
त्यादित्यर्थः इति दुर्गादासः
स्मृ स्मृतौ इति कविकल्पद्रु
मः स्मरति स्मृतिर्ज्ञानविशेषः
तथा च संविद्भगवती द्वेधास्मृ
त्यनुभवभेदिका इतिनार्कि
काः तेन ज्ञौ अज्ञात कें तेण

कर्म्मत्वं गुरुः शिष्यं शास्त्रं स्मा
रयति इति दुर्गादासः
स्मृ म श्रौत् को इति कविकल्प
द्रुमः मस्मरयति उत्कः उत्
कंठा आध्याने इति मांचः
आसमंतात् ध्यानमाध्यानं इति
कश्चित् उत्कंठिका इति
काशिकावृत्ति बोपदेवौ उत्
कंठापूर्वकं स्मरणमिति
वृद्धाः मकरध्वजस्मरयेत मशुत्त
पं त्रिपुरदाहमिति किराते
इति दुर्गादासः ॥
स्मृतः त्रि स्मृतिविषयः कृत
स्मरणः यथा आह्निके पित
कृत्ये च मास स्यान्दमसः स्मृ
तः विवाहादौ स्मृतः सौरो यज्ञा
दौ सावनो मतः इति मल
मासतत्वं ॥
स्मृतिः स्त्री अनुभूतविषयज्ञा
नं इति चंडीटीकायां नागोजी
भट्टः स्वाम्याश्रितक्रियाजन्य
संस्कारजन्यज्ञानं इति रसमंज
री अनुभवान्यसंस्कारजन्यज्ञा
नं यथा संविद्भगवती द्वेधा।
स्मृत्यनुभवभेदिका इति कवि
कल्पद्रुमटीकायां दुर्गादासः ॥

किंच विभुर्बुद्ध्यादिगुणवान्
बुद्धिस्तु द्विविधा मता अ
नुभूति स्मृतविधा इति भा
षापरिच्छेदः ५ अन्यच्च अ
नुभूत प्रियादीनामर्थानां
चिंतनं स्मृतिः तत्र कंपांग
वैवर्ण्यश्वास निःश्वसितादि
यः इत्युज्ज्वलनीलमणिः
तत् पर्य्यायः चिंता २
आध्यानं ३ इत्यमरः
चिंतिया ४ इति भरतधृत
रभसः चिंतः ५ इति क्षीर
स्वामी आध्या ६ इति रामा
श्रमः चितितिः ७ ध्यानं द
इति शब्दरत्नावली स्मरणं ९
चर्चा १० इति जटाधरः स्मात
गर्भस्यस्य अष्टमि मासे भव
ति इति सुखबोधः स्मृतिका
रकौषधं यथा शोवपुष्पी
वचासोमा ब्राह्मीब्रह्मसुवर्च्च
ला अभया च गुडूचीच अट
रूषक वाकुची पतेरक्षसमे
भागैर्घृतं प्रस्थं हृदत्या च समं
वितं पतद्ब्राह्मीघृतं नाम स्मृ
तिमेधाकरं परं इति गारुडे १९८
अध्यायः मंवादिमणिप्रणीतपा

त्रविशेषः स्मरन्ति वेदमनया
स्मृतिं महर्षिभिर्वेदार्थस्मर
णस्मृतिः तद्योगात् ग्रन्थो
ऽपि स्मृतिरिति मुकुन्दः स्मृति
कल्पतरुणो नामानि धर्मशास्त्र
शब्दे द्रष्टव्यानि तत्र मनोः स्मृ
तेः प्राधान्यं यथा वेदार्थोप
निबन्धृत्वात् प्राधान्यं हि मनोः
स्मृतं मन्वर्थविपरीता तु या स्मृ
तिः सा न प्रशस्यते इति कः ॥
लकभट्टधृत बृहस्पतिवचनं
तत्पर्य्यायः धर्मसंहिता २
इत्यमरः धर्मशास्त्रं ३ इति
जटाधरः संहिता ४ श्रुति।
जीविका ५ इति शब्दरत्नाव
ली सा च सात्त्विक राजस ताम
सभेदेन त्रिविधः यथा तथैव
वस्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणा
न्विताः सात्त्विका राजसाश्चैव ताम
साश्च भद्रशीले वाशिष्ठं चैव हारी
तं व्यासं पाराशरं तथा भारद्वाजं
काश्यपं च सात्त्विका मुक्तिदाः शु
भाः ब्राह्मं याज्ञवल्क्यं च आ
त्रेयं दाक्षमेव च कात्यायनं वैष्ण
वं च राजसाः स्वर्गदा मताः
गौतमं वार्हस्पत्यं च सांवर्त्तं च

यमं स्मृतं सांख्यं चौशनसं
देवि तामसा निरयप्रदाः कि
मत्र बहुनोक्तेन पुराणेषु स्मृ
तिष्वपि तामसा नरकायैव
वर्जयेत्तान् विचक्षणः अतो हि
राजसं कर्म तामसं च वरानने
प्राणान्तेनैव कुर्य्याद्धि विवे।
की तत्त्वविन्नरः विना तत्सा
त्त्विकं कर्म यत्नात् साधारणं द्व
यैः कदाचिद्राजसं कार्य्यं मान
सैस्तामसं न तत् श्रुतिस्मृति
पुराणोपपुराणेष्वागमेषु च
संहितातन्त्रशास्त्रेषु गिरिजे
यामलादिषु पंचरात्रादिषु पी
ठमारोषः सात्त्विको मतः
इति पाद्मोत्तरखण्डे ५३
अध्यायः ॥
स्मृतिमान् त्रि स्मृतिविशिष्टः
चिन्तावान् स्मृतिशब्दान्मतुप्
प्रत्ययेन निष्पन्नं स्मृतिविरुद्धः
त्रि धर्मशास्त्रविपरीतः यथा
कूर्मपुराणे हिमालयं प्रति देवी
वाक्यं यानि शास्त्राणि दृश्यन्ते
लोकेऽस्मिन् विविधानि च श्रुति
स्मृतिविरुद्धानि निष्ठा तेषां हि
तामसी करालभैरवं चैव ॥ ॥

यामलं नाम यत्कृतं एवमा
दीनि चान्यानि मोहनार्थानि ता
नि वै मया सृष्टानि चान्यानि
मोहयेषामवार्णवे इति
मलमासतत्त्वं ॥
स्मृतिशास्त्रं क्ली धर्मसंहिता
यथा स्मृतिशास्त्रे विकल्पस्तु
आका— एरणो मति इत्येकाद
शीतत्त्वधृतभविष्यपुराणवचन
स्मृतिहेतुः पुं स्मरणकारणं
तत्पर्य्यायः वासना २ संस्का
रः ३ भावना ४ इति जटा
धरः ॥
स्मृत्यपेतः त्रि स्मृतिविरुद्धः
इति केचित् ॥
स्मेरः त्रि विकशितः इति हेम
चन्द्रः ऋषद्धसनशीलः इति
संक्षिप्तसारोणादिवृत्तिः
स्मेरविष्किरः पुं मयूरः इति
केचित् ॥
स्यदः पुं वेगः इत्यमरः स्य
न्द ऋ ङ व ए स्रुतौ इति
कविकल्पद्रुमः अंतस्थाद्यशु
क्तः ऋ अस्यन्दिष्ट अस्यन्त ङ स्य
न्दते व स्यन्त स्यति स्यन्दिष्य
ति ए अस्यदत् स्रुतिः क्षरणं
प्रस्यन्दन् मदगंधलुब्ध - म

धूपेत्यत्र गणकृतानित्यत्वमि
ति रमानाथः वस्तुतस्तु प्रस्यन्
ते प्रस्यन्दः पचादित्वादच् ततः
प्रस्यन्द इवाचरतीति क्विप् शत्रं
तं इति दुर्गादासः
स्यन्दः पुं स्यन्दनं स्यन्दधातो
र्घञ् प्रत्ययेन निष्पन्नं स्यन्
नं क्ली तरणं जलं इति मे
दिनी गमनं च ॥
स्यन्दनः पुं चक्रयुक्तयुद्धप्रयो
जनयानं रथ इति ख्यातः ति
निशवृक्षः इत्यमरः वृक्ष
विशेषः इति हेमचन्द्रः वा
युः इति केचित् स्यन्दनद्रुमः
न्तद्रुमः पुं तिनिशवृक्षः
इति शब्दरत्नावली
स्यन्दनारोहः पुं रथस्थितयो
द्धा रथी इत्यमरः ॥
स्यन्दनिः पुं तिनिशवृक्षः इ
ति रत्नमाला ॥
स्यन्दनी स्त्री लाला इति राज
निर्घण्टः मूत्रनाडीति केचित्
स्यन्दिनी स्त्री लाला इत्यमरः
स्यन्दी त्रि स्रवति यः स्रावकः
स्यन्दधातोर्णिन् प्रत्ययेन नि
ष्पन्नः इत्यमरटीकायां रामा
श्रमः ॥



स्यन्नः त्रि स्रुतजलादिः इति
मरः ॥
स्यन्नवीणः त्रि स्रुतः इति हे
मचन्द्रः ॥
स्यम उणश धनने इति कवि
कल्पद्रुमः अंतस्थादियुक्तः
उ स्यमित्वा स्यांत्वा ण स्येमन्तः
सस्यमतुः शस्यमतो स्यमं
तौ इति दुर्गादासः ॥
स्यम ञक वितर्के इति कवि
कल्पद्रुमः अंतस्थादियुक्तः ॥
अस्य स्वार्थे ञो हृस्वो न स्यात्
मेरणो — तस्मादेवेति प्राचः
स्यमत्वेमनोघादित्वात् सिद्धिं
ञ्चकस्यामयति स्यामयते ॥
लोकः पुरुषस्याणत्वेन इ
ति दुर्गादासः ॥
स्यम न कध्वाने इति कविक
ल्पद्रुमः अंतस्थादियुक्तः
स्यम यति इति दुर्गादासः
स्यमंतकः पु श्रीकृष्णस्य हृ
त्नमणिः स्यमंतको हृत्नेभू
जमध्ये तु कौस्तुभः इति
हेमचन्द्रः अथ स्यमंतको
पाख्याने श्रीशुक उवाच आ
सीत् सत्राजितः सूर्यभक्त
स्य परमः सखा प्रीत स्तस्मै ॥

मणिप्रादात् सच तुष्टः स्यमंतकं
सतं विभ्रन्मणिं कंठेभ्राजमा
नो यथा रविः प्रविष्टो द्वार
कां राजंस्तेजसा नोपलक्षितः
तंविलोक्य जना दूरात्तेजसा मु
ष्टदृष्टयः दीव्यतेऽक्षैर्भगवते
शशंसुः सूर्यशंकिताः एष
आयाति सविता त्वां दिदृक्षु
र्जगत्पते मुष्णन् गभस्तिचक्रे
ण नृणां चक्षूंषि तिग्मगुः निश
म्य बालवचनं प्रहस्याम्बुजलोच
नः प्राह नासौ रविर्देवः सत्रा
जिन्मणिना ज्वलन् दिने दिने स्व
र्णभारानष्टौ स सृजति प्रभो
दुर्भिक्ष मार्यो रिष्टानि सर्पाधि
व्याधयोऽशुभाः न संति मायि
नस्तत्र यत्रास्तेऽभ्यर्चितो मणिः
स याचितो मणिं क्वापि यदुरा
जाय शौरिणा नैवार्थ का
मुकः प्रादात् याच्ञाभंग
मतर्कयन् तमेकदा मणिं क
ण्ठे प्रतिमुच्य महाप्रभं प्रसेनो
हयमारुह्य मृगयां व्यचरद्व
ने प्रसेनं सहयं हत्वा मणि
माच्छिद्य केसरी गिरिं विश
न् जांववता निहतो मणिमि
च्छता सोपि चक्रे कुमारस्य
मणिं क्रीडनकं ॥ ॥ ॥

गलेऽपश्यन् भ्रातरं भ्राता ॥
सत्राजित् पर्यतप्यत प्रायः
कृष्णेन निहतो मणिग्रीवो वनं
गतः भ्राता ममेति तत् श्रुत्वा।
कर्णे कर्णेऽजपन् जनाः भग
वांस्तदुपश्रुत्य दुर्यशो लिप्तमा
त्मनि मार्ष्टुं प्रसेनपदवीमन्व
पद्यत नागरैः हतं प्रसेनम
श्वं च वीक्ष्य केशरिणा वने तं
मद्रिपृष्ठे निहतं मृतेण ददृशुर्ज्ज
नाः ऋक्षराजबिलं भीममंधेन त
मसावृतं एको विवेश भगवान
वस्थाप्य वहिः प्रजाः ॥
तत्र दृष्ट्वा मणिश्रेष्ठं बालक्री
डनकं कृतं हर्त्तुं कृतमतिस्त
स्मिन्नवतस्थेऽर्भकांतिके तम
पूर्वं नरं दृष्ट्वा धात्री चुक्रोश भी
तवत् तत् श्रुत्वाभ्यद्रवत् क्रुद्धो
जांववान् बलिनां वरः स वै भ
गवता तेन युयुधे स्वामिनात्म
नः आसीत्तद्दष्टविंशाह मित
रेतर मुष्टिभिः क्षीणसत्वः स्वि
न्नगात्रः स माहातीवविस्मि
तः जाने त्वां सर्वभूतानां प्राण
ओजः सहो बलं विष्णुं पुराण
पुरुषं प्रभविष्णुमधीश्वरं इ
ति विज्ञात विज्ञान मृक्षराजा

च्युतः व्याजहार महाराज भ
गवान् देवकीसुतः मणिहे
तोरिह प्राप्ता वय मृक्षपते
विलं मिथ्याभिशापं प्रमृज
न्नात्मनो मणिनामुना इत्युक्तः
स्वां दुहितरं कन्यां जांववतीं मुदा
अर्हणार्थं समणिना कृष्णायो
पजहार सः सत्राजितं समाहूय
सभायां राजसन्निधौ प्राप्तिं चा
ख्याय भगवान् मणिं तस्मै न्य
वेदयत् सोऽनुध्यायंस्तदेवाघं
वलवद्विग्रहाकुलः कथं मृज्या
म्यात्मरजः प्रसीदेद्वाच्युतः क
थं एवं व्यवसितो बुद्ध्या स
त्राजित् स्वसुतां शुभां मणिं
च स्वयमुद्यम्य कृष्णायोपजहा
र सः भगवानाह न मणिं प्रती
च्छामो वयं नृप तवास्तु देव
भक्तस्य वयं च फलभागिनः इ
ति श्रीभागवते १० स्कंधे ५६ अ
ध्यायः सौरभाद्रीय चतुर्थी च
न्द्रदर्शने तदुपाख्यानश्रवणावि
धिर्यथा ब्रह्मपुराणे सिंहाको
धिकारे नारायणोभिप्रायमस्त
निशाकरमरीचिषु स्थितमु
तर्ष्यामसापि मनुष्यायापते
त्रसं अत श्रुतर्ष्यां चन्द्रप्र
मादा ॥ ॥ ॥ ॥ ॥ ॥

डीस्स मानवं पठेद्धाये षिका
वाक्यं मा स्रू को वास्यदस्रू
त्वं अभिशापः परीवादविष
यो भूतः सोऽभिशापः पात्रे
षिकावाक्यं विस्मुपुराणे सिं
हः प्रसेन मवधीत् सिंहो जांब
वता हतः सुकुमारकः मारोदी
स्तव ह्येष स्यमंतकः अनेन
मंत्रेणाभिमंत्रितं जलं पेयं
आचामत् स्यमंत को
पाख्यानंच श्रोतव्यं इति
तिथ्यादितत्वं ॥
स्यमीकः पुं वल्मीकं हत
विशेषः इति मेदिनी कालं
मेघं इति केचित् ॥
स्यमीका स्त्री नीलिका इति
मेदिनी ॥
स्यालः पुं श्यालकः इत्यमर
टीकायां स्वामी ॥
स्यूतं क्ली आच्छादं इति
केचित् ॥
स्यूतं त्रि सूत्रितं तंतुसंत
ते टोका इतिभाषा तत्पर्या
यः ऊतं २ उतं ३ इत्यमरः
स्यूतः पुं सूत्रवितभांडं ॥
थोकड़ा इति ख्याते तत्
पर्यायः प्रसेवः २ इत्यमरः
स्यूतः ३ स्योनः ४ थोतकटः ५
स्योतः ६ इति भरतः स्यूतिः
स्त्री सूच्यादिना वस्त्रादिसी
वनं सोयनी इति सेला इति
च भाषा तत् पर्यायः ॥
सेवनं २ सीवनं ३ इत्यमरः
ऊतिः ४ व्युतिः ५ इतिशब्द
रत्नावली ॥
स्यूनः पुं किरणः सूर्य्यः इति
मेदिनी स्यूतः थुकडी इति
भाषा इत्यमरटीकायां भरतः
शब्दरत्नावली च ॥
स्यूमं क्ली जलं रश्मिः इति
संक्षिप्तसारोणादिवृत्तिः ॥
स्यूमः पुं किरणः इत्युणादि
कोषः ॥
स्योतः पुं स्यूतः इत्यमर ॥
टीकायां भरतः ॥
स्योनः पुं थोतकटः थुकडी
इति भाषा इत्यमरटीकायां भ
रतः सूर्य्यः किरणः इतिमे
दिनी आनन्दे क्ली इति के
चित् ॥
स्रंसनं क्ली ऊर्द्धगतदोष
स्याधोनयनं इति सुश्रुतटीका
स्रंसिनीफलः पुं शिरीषवृक्षः
इति शब्दमाला ॥ ॥

स्रंसी पुं पीलुवृक्षः इत्यमरः
अधः पतनशीले त्रि
स्रक् इ उ गत्यां इति कविक
ल्पद्रुमः इ स्रक्ते उ स्रंकते
इति दुर्गादासः
स्रक् स्त्री माल्ये मूर्द्धिन्यस्याप्
ष्यस्रग् दाम इत्यमरः अस्याः
पर्यायादि मालाशब्दे द्रष्टव्यं
स्रग्वान् त्रि माल्यविशिष्टः इ
ति स्रज्शब्दात् वत् प्रत्ययेन
निष्पन्नं इति व्याकरणं ॥
स्रग्वी त्रि माल्यविशिष्टः इति
स्रज् शब्दात् विन् प्रत्ययेन नि
ष्पन्नं इति व्याकरणं ॥ ॥
स्रजिष्ठः त्रि माल्यविशिष्टः
इति स्रज्शब्दादिष्ठ प्रत्ययेन
निष्पन्नं स्रजीयान् त्रि माल्यवि
शिष्टः इति स्रज्शब्दादीयस
प्रत्ययेन निष्पन्नं ॥
स्रज्वा स्त्री प्रजापतिः रज्जुः तं
तुपटसंघातः इति संक्षिप्त
सारोणादिवृत्तिः ॥
स्रद्धं स्त्री वातकर्म्म इति
केचित् शृध धातो क्तप्रत्ययेन
निष्पन्नं तालव्यशकारादिः
साधुपाठः ॥
स्रंभ उ ङ प्रमादे इति कवि
कल्पद्रुमः प्रमादोऽनवधान
ता उ स्रंभित्वा स्रब्धा ङ स्रंभ
ते धर्मे नीचः इति दुर्गादासः
स्रंभ ए उ ङ विश्वासे इति क
विकल्पद्रुमः विश्वासः पौना
रुक्तीभावः ए अस्रंभत् उ
स्रंभित्वा स्रब्धा ङ स्रंभते पु
ञ्जोमातरि तालव्यादिरयमि
त्येके इति दुर्गादासः ॥
स्रंस ए उ ङ भ्रंशे इति कवि
कल्पद्रुमः रेफयुक्तः दंत्यादिः
ए अस्रसत् उ स्रंसित्वा स्रस्त्वा
ङ स्रंसते धर्मे सो अधः
पततनं इति दुर्गादासः
स्रंस ङ उ प्रमादे इति क
विकल्पद्रुमः ङ स्रंसते उ
स्रंसित्वा स्रस्त्वा प्रमादः प्रस
नीभावः इति दुर्गादासः
स्रवः पुं स्रवणं तत्पर्या
यः स्रावः पुं स्रवणं तत्पर्या
यः स्रावः २ इत्यमरः श्रवः ३
इति तट्टीका प्रस्रावः ४ स्रु
वः ५ इति शब्दरत्नावली नि
र्दः तत्पर्यायः सरः २ सरिः
३ अतसः ४ प्रस्रवणं ५ इति
हेमचन्द्रः ॥
स्रवणं क्ली मूत्रं इति राज
निर्घण्टः घर्म्मः इति शब्द॥



रत्नावली तरणं इति स्रु
धात्वर्थदर्शनात् ॥
स्रवद्गर्भा स्त्री दैववशात्प
तितगर्भा गौः तत्पर्य्यायः
स्रवतोका २ इत्यमरः पतित
गर्भा मात्रं च ॥
स्रवद्रङ्गः पुं पण्यस्थिरः वा
जार इति पारस्यभाषा इति
हारावली ॥
स्रवन्ती स्त्री नदी इत्यमरः
गुल्मस्यान्ते औषधिभेदः इति
मेदिनी तरणविशिष्टे त्रि
यथा स्रवत् स्रवन्ती स्रवत्
स्रवा स्त्री मूर्वा इत्यमरटीका
यां रायमुकुटः ॥
स्रष्टा पुं ब्रह्मा इत्यमरः शि
वः इति हलायुधः सृष्टि
कर्त्ता इति सृजधात्वर्थदर्श
नात् स्रस्तं त्रि च्युतं इत्यम
रः स्रस्तरः पुं आसनं यथा
अयस्रस्तरे स्रंदमनन्तेनचा
सीरन् इति अयस्रस्तरे उपवेश
नादौ पीठादिनिषेधात् अयनि
र्मिते न कटादिविधानात् अ
यस्रस्तरः कटादिः इति सु
द्धितत्वे स्राक् अ द्रुतं इत्य
मरः स्रावः पुं स्रवः इत्यम
रटीका ॥ ॥ ॥ ॥ ॥

यां भरतः
स्रावकं क्ली मरीचं इति श
ब्दचन्द्रिका स्रावके त्रि ॥
स्रावन्ती स्त्री ऋद्धिहृत्नं इति
केचित् ॥
स्रिंभ उ हिंसे इति कविक
ल्पद्रुमः रेफयुक्तादिः तृतीय
स्वरी उ स्रिंभित्वा स्रिब्धा इति
दुर्गादासः ॥
स्रिभ उ हिंसे इति कविकल्प
द्रुमः रेफयुक्तादिः तृतीय
स्वरी उ स्रेभित्वा स्रिब्धा ॥
इति दुर्गादासः ॥
स्रिव य उ शोषे गतौ इति
कविकल्पद्रुमः रेफयुक्तास
काराद्दिः तृतीयस्वरी यस्त्री
व्यति उ स्रेवित्वा स्युत्वा स्ति
स्रेव इति दुर्गादासः स्रव्य
तौ इति कवि कल्पद्रु
मः स्रवति इति दुर्गा
दासः ॥
स्रुक् स्त्री यज्ञपात्रविशे
षः यथा स्रुग् स्रुवोपभृज्
जुह्वी स्रुवोभेदाः स्रुचः स्त्रियं
इत्यमरः ध्रुवा वटपत्राकृतिः उ
पभृत्चक्राकारा जुहूः अर्द्धचन्द्रा
कृतिः वैकङ्कती ध्रुवा प्रोक्ता

आश्वत्थी चोपभृन्मता जुहूः प
लाशकाष्ठस्य खदिरस्य स्रुवो म
तः इति भरतः स्रुवादिकं तय
ना द्वे पात्रमित्यभिधीयते स्रु
वः पुमानेकहस्तो बाहुमात्रा
स्रुगीरिता तद्विशेषः पारा
वाशाः स्त्री जुहूरुपभृत् ध्रुवा
इति शब्दरत्नावली ॥
स्रुगदारु क्ली व्याघ्रपादतरुः
इति जटाधरः ॥
स्रुघ्नी स्त्री सर्ज्जिकाक्षारः य
थास्रुघ्नास्तु सर्ज्जिकाक्षार कापो
त स्रावदर्शिकाः सर्ज्जिस्स सर्ज्जि
कास्रुघ्नी योगवाही सुवर्च्चि
का इति हेमचन्द्रः ॥
स्रुतं त्रि क्षरितजलादि तत्
पर्य्यायः सन्नं २ शीर्णं ३ च्यु
तं ४ इत्यमरः स्रुतं इति ॥
जटाधरः स्रुता हिंगुपत्री इति
स्रुवः पुं स्त्री यज्ञपात्रविशे
षः इति मेदिनी तद्विवरणं स्रु
क् शब्दे द्रष्टव्यं ॥
स्रुवा स्त्री शल्लकी ॥
मूर्वा इति
मेदिनी ॥
स्रुवावृक्षः पुं विकङ्कतवृक्षः

इत्यमरः
स्रुः स्त्री यज्ञपात्रविशेषः स्र
वति घृतादिकमस्मात् इत्यमर
टीकायां भरतः नि — रः यथा
स्रुः स्रुवे निवेशे च इति
हेमचन्द्रः ॥
स्रै पत्ते इति कविकल्पद्रुमः ॥
रेफयुक्तः स्रायति पठि पाके
इति दुर्गादासः ॥
स्रोतं क्ली स्रोतः इत्यमर
टीकायां भरतः ॥
स्रोतः क्ली स्रोतोऽम्बुसरणं
इत्यमरः वेगेन जलवहनं
स्रोतः स्रुतं स्रयम्बुनः
सरणं गमनं स्रोतः इत्यन्वयः
स्वतः इत्यादौ देवतकं नपदेवतकं
तस्रके रिति तृतीयायाम्लस्
स्रवति स्रोतः स्रद्रुवत् अस्र
सिति अस् निपातनात् तन् स्रोतः
सोतं स्रोतः स्रयः सकल स
लिले सिंहकं स्वक्रमूलं इति
हंस्यादावुष्मभेदः स्रोतमर्दनं
च स्रोतः स्रोत महानदः
स्रवः पैंजष मल्लियां इति
हेमचन्द्रः इत्यमरटीकायां भ
रतः शरीरस्थनवच्छिद्राणि
यथा स्रोतांसि खानिच्छिद्रा



णि कालखंडं यकृन्मतं इति
राजनिर्घंटः ॥
स्रोतकृशः पुं समुद्रः इति
हेमचंद्रः ॥
स्रोतस्यः पुं शिवः चौरः
स्रोतः शब्दात् यत् प्रत्ययेन
निष्पन्नः इति केचित् ॥
स्रोतस्वती स्त्री नदी इत्यमरः स्रो
तस्विनी स्त्री नदीत्यमरटीकायां भर
तः स्रोतोंजनं क्ली यमुनास्रोतो
भवांजनं तत् पर्यायः सौवी
रं २ कापोतांजनं ३ यामुनं
४ इत्यमरः अंज्यते नयनम
नेन चक्षुष्यत्वादंजनं अनद्
यमुनायाः स्रोतो भवत्वात्
स्रोतसोऽञ्जनं स्रोतोंजनं
सुवीरदेशे भवं सौवीरं स्रो
तोंजनाद्विलक्षणं सौ
वीरमिति ख्याते अहूसभ
वत्वाद्देशेपि एकत्वे पति
वंधनक्षितिस्तभूमिः कपो
तस्यायं कापोतो वर्णः त
द्युक्तमंजनं कापोतांजनं का
पोतवर्णमंजनं कापोतां
जनमिति स्वामी यमुनायां
भवं यामुनंयः इति नद्यी
कार्या भरतः ॥ ॥

अपरंच स्रोतों
जनं नदीजंच कुसुमं स्रोतंच
सौद्रितं इति रत्नमाला तत्
पर्यायांतरं ९ यथा वारि ॥
भवं ५ स्रोतोभवं ६ स्रोतन
दीभवं ७ सौवीरसारं ८ कपो
तसारं ९ वल्मीकशीर्षं १०
अस्य गुणाः शीतत्वं कटुत्वं
कषायत्वं कृमिनाशित्वं रसा
यनत्वं दृसे योग्यत्वं स्तनद्
ढिकरत्वंच तस्य लक्षणं य
था वल्मीकशिखराकारं भिन्नं
नीलांजनप्रभं घृष्टेच गैरिका
वर्णं श्रेष्ठं स्रोतोंजनंच तत्
इति राजनिर्घंटः अपिच
स्रोतोंजनं मतं श्रेष्ठं विशुद्धं
सिंधुसंभवं हिक्काः कंडू मलद
रं दाह क्लेद रुजापहं अतो
रूपावहंचैव सदते मारुता
तयो नेत्ररोगान जायंते तत।
स्मादंजनमाचरेत् स्रोतोऽ
ञ्जनं कुसुमसमा इति घो
षं विनापि सिंधुनामपदं
न तत्रभवं इति ग्रथस्त्रमासौ
वीरमंजनं यामुनंचापि कापो
तोंजनमित्यपि अत्र स्रोतोंज
ने कुसुमं सौवीरं श्वेत

मीरितं स्रोतोंजनसम ज्ञेयं
सौवीरं तत्पांडुरं स्रोतो
जनं स्मृतं स्वादु चक्षुष्यकफ
पित्तनुत् कषायं लेखनं स्नि
ग्धं ग्राहि छर्दि विषापहं हि
ध्मक्षतास्रहृच्छीतं सेवनीयं
सदा बुधैः स्रोतोंजनगुणाः
सर्वे सौवीरेऽपि मता बुधैः किं
तु हृद्यो रंजनयोः ॥
श्रेष्ठं स्रोतोंजनं स्मृतं ॥ ॥
इति च भावप्रकाशः
स्रोतोवहा स्त्री नदी इति ॥
जटाधरः ॥
स्वं पुं क्ली धनं इत्यमरः ॥
स्वं त्रि आत्मीयं इत्यमरः
स्वः पुं ज्ञातिः आत्मा इत्य
मरः ॥
स्वकं त्रि स्वीयं आत्मीयं
यथा नाष्टिक श्चैव कुरुते
तद्धनं ज्ञातृभिः स्वकं अदत्त
त्यक्त विक्रीतं कृत्वा स्वं लभते
धनी इति प्रायश्चित्ततत्वं ॥
स्वकंपनः पुं वायुः इति श
ब्दरत्नावली ॥
स्वकर्म क्ली आत्मकृतकार्य्यं
यथा कृत्स्नवाच स्वकर्मफलमि
दिष्टां यां यां योनिं व्रजाम्यहं ॥

तस्यां तस्यां हृषीकेश त्वयि
भक्तिः दृढास्तु मे इति पांडव
गीता
स्वकर्मकृत् त्रि निजकार्य्यका
री इति स्वकर्मण्डू पूर्वक कृञ्
धातोः कर्तरि क्विप् प्रत्ययेन
निष्पन्नः स्वकीयं त्रि स्वीयं
तत् पर्यायं निजं २ आत्मीयं ३
स्वं ४ इति हेमचन्द्रः ॥
स्वकुलक्षयः पुं मत्स्यः इति
हेमचंद्रः निजवंशनाशश्च
तत्कर्तरि तद्विशिष्टे च त्रि
स्वग ह सर्पणे इति कविक
ल्पद्रुमः वकारमध्यः इत्स्वंगप
ते इति दुर्गादासः ॥
स्वगतं क्ली मनोगतं यथा
अहं स्वगतं हंभ आत्मोऽयं
देशः भवत्वस्मिन्नासने उपवि
शामि इति प्रबोधचन्द्रो ॥
दयनाटके २ अंकः आत्म
गामि तस्माद्गते च त्रि ॥
स्वगृहः पुं कलिकारपक्षी
इति जटाधरः निजालये पुं
क्ली स्वगुप्ता स्त्री शूकशिंवी
इति शब्दरत्नावली लज्जालुः
राजनिर्घंटः ॥
स्वंगः त्रि सुन्दरांगविशिष्टः तत्



पर्य्यायः सिंहसंहननः २ इति हेमचन्द्रः शोभनावयवे क्ली

स्वच्छं क्ली विमलोपरसः मुक्ता इति राजनिर्घण्टः ॥

स्वच्छः त्रि रोगविमुक्तः इति शब्दरत्नावली मुक्तः निर्मलः इति केचित् ॥

स्वच्छः पु स्फटिकः इति राजनिर्घण्टः ॥

स्वच्छन्दः त्रि स्वाधीनः स्वतन्त्रः इत्यमरः

स्वच्छपत्रं क्ली अभ्रकं इति हेमचन्द्रः ॥

स्वच्छमणिः पु स्फटिकः इति राजनिर्घण्टः ॥

स्वच्छवालुकं क्ली विमलोपरसः इति राजनिर्घण्टः ॥

स्वच्छा स्त्री श्वेतदूर्वा इति राजनिर्घण्टः

स्वजं क्ली रक्तं इति मेदिनी

स्वजः पु पुत्रः स्वेदः इति मेदिनी आत्मजाते त्रि

स्वजनः पुं ज्ञातिः इत्यमरः आत्मीयलोकश्च ॥

स्वजा स्त्री कन्या इति शब्दरत्नावली ॥

स्वठ क गत्यसंस्कृत संस्कृते इति कविकल्पद्रुमः कस्वाठयति इति दुर्गादासः ॥

स्वतः अ आत्मनः आपन इत्यते इति भाषा यथा स्वतोनुसरणं स्वतः इत्यमरः तद्धितश्चासर्वविभक्तिः यस्मात् सर्वाविभक्तिः [illegible]नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् परिगणने कर्त्तव्यं तसिलादयः प्राक्पाशपः इति सिद्धान्तकौमुदी

स्वतन्त्रः त्रि स्वाधीनः तत्पर्य्यायः अपावृतः २ स्वैरी ३ स्वच्छन्दः ४ निरवग्रहः ५ इत्यमरः निर्यन्त्रणः ६ यथाकामी ७ निरर्गलः ८ निरंकुशः ९ इति जटाधरः स्वरुचिः १० इति हेमचन्द्रः स्वतंत्रास्वतन्त्रव्यक्तयो यथा नारदः स्वातन्त्र्यं तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतं अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः अस्वतन्त्रः स्मृतः शिष्य आचार्य्ये स्वतन्त्रता अस्वतन्त्राः स्त्रियः सर्वाः पुत्रा दासाः परिग्रहाः परिग्रहा अनुज्ञी विश्रम्भतयः स्वतन्त्रस्तत्र तु गृही यस्य तत् स्यात् ॥

क्रमागतं गर्भस्थैः सदृशो ज्ञेयो अष्टमाद्वत्सरात् शिशुः वाल आषोडशाद्वर्षात् पौगण्डेपि निगद्यते परतोव्यवहारज्ञः स्वतन्त्रः पितरावृते जीवतो नस्वतन्त्रः स्यात् जरयापि समन्वितः तयोरपि पिता श्रेयान् वीजप्राधान्यदर्शनात् अभावे वीजिनो माता तदभावे च पूर्वजः ॥ स्वतन्त्रोपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेततः इति व्यवहारतत्त्वं ॥

स्वत्रः पु अन्धः इति केचित्

स्वत्वं क्ली यथा स्वसंमतयथेष्टविनियोगार्हत्वं सप्तपदार्थातिरिक्तपदार्थः निरूपकतासंवन्धेन स्वामित्वं यथा स्वत्वं च यथेष्टविनियोगार्हत्वेन शास्त्रबोधितत्वमिति प्राञ्चः अतिरिक्तपदार्थ इति शिरोमणिः स्वामित्वं च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतं च द्रव्यस्य दानादिश्रुतेः नीलस्वावृषः मृतस्तुजेदित्यादौ लौहित्य॥॥ दिगुणविशिष्ट पारिभाषिकनीलवृषोत्सर्गश्रुतेश्च वस्तुतस्त्वात्मसमवेतं स्वामित्वमेवातिरिक्तपदार्थः विक्रयदानादीनां तन्नाशकत्वे क्रयप्रतिग्रहादीनां च तद्धेतुत्वे संवन्धत्वाच्चैव संभवात् तदेव निरूपकतया स्वव्यवहारहेतुः अतएव निवन्धादो भाविन्यपि स्वत्वमिति अन्यथा प्रतिमासं प्रतिवर्षं वा देयत्वेन प्रतिश्रुतधान्यादिरूपतस्य तस्य भावित्वे तत्र तदुत्पत्त्यनुपपत्ते रिति चूडामणिसम्मतो लीलावतीरहस्य पंथाः समीचीनः अत्र स्वत्वधारा वारणाय सजातीयस्वत्वंप्रति स्वत्वविरोधिसजातीयमिति करणात् पराजित नृपतिराज्यांतर्वर्त्तितत् पुरुषीय क्रमागतस्यावरादौ जयादिना जेतृनृपतेः करग्रहणोपयोगि स्वत्वोत्पादे तथा क्रीते अप्रतिगृहीतताम्रानवर्त्तिनि तादृशस्यावरादौ चक्रेश्वरादेः क्रयाद्यधीनस्वत्वोत्पादेपि न व्यभिचार इति संक्षेपः इति दायभागटीकायां श्रीकृष्णतर्कालंकारः ॥



क्रमागतं गर्भस्थैः सहैवोत्पद्यते
यो ह्यस्मादुत्पन्नात् शिशुः
वात् आषोडशाद्वर्षात् पौगं
डोऽपि निगद्यते परतो व्यवहा
रज्ञः स्वतन्त्रः पितराहृते जी
वतोर्न स्वतन्त्रः स्यात् ॥
जरयापि समं वितः तयोरपिपि
ता श्रेयान् वीजप्राधान्य
दर्शनात् अभावे वीजिनोमा
ता तदभावे च पूर्वजः ॥
स्वतन्त्रोऽपि हि यत् कार्यं तदस
कृतिं गमः तदप्यकृतमेव
स्यादस्वातन्त्र्यस्य हेततः इति
व्यवहारतत्त्वं ॥
स्वत्वं पुं अंधं इति केचित्
स्वत्वं ह्यौ शास्त्रसंमतयथे
ष्टविनियोगार्हत्वं समपरा
र्थातिरिक्तपदार्थः निरूपकता
संबंधेन स्वामित्वं यथा स्व
त्वेच यथेष्टविनियोगार्हत्वेन
शास्त्रबोधितत्वमिति प्राचः
अतिरिक्तपदार्थ इति शिरोम
णिरूपकतया तदेव वा तच्च
द्रव्यगतं गुणगतं च द्रव्यस्य
दानादिक्रमेतः नीलं वा वृष
मुत्सृजेदित्यादौ लोहित्या
दि गुणविशिष्ट पारिभाषिकनी
लवृषोत्सर्गश्रुतेश्च वस्तुतस्तु
आत्मासमवेतं स्वामित्वमेवाति
रिक्तपदार्थः विक्रयदानादी
नां तन्नाशकत्वे क्रयप्रतिग्रहा
दीनां च तद्धेतुत्वे संबंधत्वायव
संभवात् तदेव निरूपकतया
स्वत्वव्यवहारहेतुः अतएव
निवन्धादौ भाविन्यपि स्वत्व
मिति अन्यथा प्रतिमासं प्रति
वर्षं वा देयत्वेन प्रतिश्रुत धान्या
दिरूपस्य तस्य भावित्वे तत्र मउ
त्पत्त्यनुपपत्ते रिति चूडामणि
संमतो लीलावती रहस्यपंथ्याः
समेचीनः अत्र स्वत्वधमावार
णाय सजातीयस्वत्वं प्रति स्वत्व
विरोधि सजातीयमिति करणा
त् पराजित नृपति राज्यांतर्वर्त्ति
तत्तत् पुरुषीय क्रमागतस्या
वरादौ जयाह्निना जेतृनृपतेः क
रग्रहणोपयोगि स्वत्वोत्पादे
ऽप्याक्रीतेऽप्रतिगृहीत राज्या
न्तर्वर्त्तिनि तादृशस्यावरादौ च
क्रेत्रादेः क्रयाद्यधीनस्वत्वोत्
पादेऽपि न व्यभिचारः इति संक्षे
पः इति दायभागटीकायां श्री
कृष्णतर्कालंकारः ॥



स्वधनं क्ली भक्तणं इति हेम
चन्द्रः लेट्टः इति राज ॥
निर्घंटः ॥
स्वदारः पुं स्वस्त्री यथा वि
ष्णुपुराणे मृतो नरक मभ्येति
हीयतेत्रापि चायुषः परदार
रतिः पुंसा मुपत्रापि भीति
दा इति मत्वा स्वदारेषु ऋतु
मत् स्वस्थो व्रजेत् यथोक्त
दोष हीनेषु सकामेष्वनृता
वपि इत्याह्निकतत्वं ॥
स्वधर्मं क्ली पुं स्वजात्युक्ता
चारः यथा श्रेयान् स्वध
र्मो विगुणः परधर्मात् स्व
नुष्ठितात् स्वधर्मे निधनं
श्रेयः परधर्मो भयावहः
इति श्रीभगवद्गीतायां ३
अध्यायः अपिच योय
स्य विहितो धर्मः स तज्जा
तिः प्रकीर्त्तितः तस्मात्
स्वधर्मं कुर्वीत द्विजो नि
त्य मनापदि चत्वारो वर्णा
राजेन्द्र चत्वारश्चापि चाश्रमाः
स्वे स्वे स्वधर्मं विपुलं तेनेयांति
परांगति स्वधर्मणा यथा नृणां
नरसिंहः प्रतुष्यति नतुष्यति
तथान्येन वेदवाक्येन कर्म
णा इति श्रीनारसिंहपुराणं स्वध
र्मत्यागी कृतघ्नः यथा सनातन
उवाच स्वधर्मं हंति यो विप्रः स
न्ध्यात्रय विवर्जितः अतर्पणंच
यतस्नानं विष्णुनैवेद्यवर्जितः
विष्णुमंत्र विष्णुपूजा विष्णुभक्ति
विहीनश्च श्रीकृष्णजन्मवास
रे शिवरात्रौ च योभुंक्ते श्रीरा
मनवमीदिने पितृकृत्यं देव
कृत्यं सकृतघ्न इति स्मृतः
इति ब्रह्मवैवर्त्ते प्रकृतिखंडे
५८ अध्यायः ॥
स्वधा अ देवहविर्दानमंत्रः
यथा स्वाहा देवहविर्दाने श्रौष
ट् वौषट् वषट् स्वधा इत्यम
रः स्वाहा श्रौषट् वौषट् वषट्
स्वधापते पंचवणहा देवहवि
र्दाने वाह्निमुखकृतो वर्जिते दे
वायहविर्यदानं देवहविर्दानं
तत्र देवा इन्द्रादयः अत्र पित
रो देवताः इति स्मृते हेतुः पि
देवाः हविर्दान इत्यनेनप्र
तेमंत्रा इति सूचितं अमंत्र
त्वे स्वाहयेव हविर्भुंजन्तीति
रघुनाथाचार्य मतभेदः क्षि
यां स्वाहाग्निर्योषितीति को
षांतरं स्वाहादंत्यादिः श्रौषट्

तालव्यादि मूर्धन्यमध्यं वौष
ट् वषट् द्वय मूर्द्धन्यमध्यं स्व
धादंत्यादि इन्द्राय स्वाहा इत्या
दि प्रयोगः इति भरतः ॥
पितृसंप्रदानमंत्रः यथा दै
त्येभ्योऽलं हविः इन्द्रे वषट्
सद्भ्यो हितं स्वाहा स्वाहाग्नये स्व
धा पित्रे स्वस्ति धात्रे नमः स
ते इति मुग्धबोधव्याकरणं
हरिर्दैत्येभ्योऽलंसमर्थः इन्द्रे
वषट् सद्भ्यो हितं सद्भ्यः स्वाहा
अग्नये स्वाहा पित्रे स्वधा धात्रे
स्वस्ति पतानि स्पष्टानि नमः
सते इति सते नित्याय विष्ण
वे नमः इत्यर्थः सर्वत्र भव
ते गम्यमानत्वात् कर्मकारक
कसमाप्तिः वषट् स्वाहा स्व
धानमो न्यायार्थतया संप्रद
नत्वेनैवेष्टसिद्धौ पृथगग्र
हणं मंत्रान्तर्गतानामपि प्राप्त्य
र्थं तेन शिवाय वषट् परमे
स्वाहा पितृभ्यः स्वधोच्यतां
शिवदयायनमः इत्यादि सिद्ध
इति तट्टीकायां दुर्गादासः
पितॄणामन्नं यथा भुंक्तेत्वं
यथा वै स्वधाख्यो न हुत स्वा
हा हव्य भोक्ता स्वयं देवि इति
ऋग्वेदे देवीसूक्तं स्वधा वै पि
तॄणामन्नं इति स्मृतिश्च ॥
स्वधा स्त्री दक्षकन्या सा तु पि
तॄणां पत्नी तस्या देकन्यय
मुनाधारिणी च पतयोस्तप
स्विन्योः संततिश्चास्ति इति श्री
भागवतमतं सा च ब्रह्मणो मा
नसी कन्या यथा श्रीनारायण
उवाच शृणु नारद वक्ष्यामि स्व
धोपाख्यानमुत्तमं पितॄणां च
तृप्तिकरं श्राद्धान्नफलवर्द्धनं
सृष्टेरादौ पितृगणान् सस
र्ज जगतां विधिः चतुरश्च
मूर्तिमतः स्त्रीश्च तेजः स्वरूपि
णः दृष्ट्वा सप्तपितृगणान् सि
द्धरूपान् मनोहरान् आहारं स
सृजे तेषां श्राद्धतर्पणपूर्वकं
स्नानं तर्पणपर्यन्तं श्राद्धान्तं दे
वपूजनं आह्निकं च त्रिसन्ध्या
न्तं विप्राणां च श्रुतौ श्रुतं नित्यं
न कुर्याद्यो विप्रः त्रिसंध्यं
श्राद्धतर्पणं बलिं वेदध्वनिं
सोऽपि विषहीनो यथोरगः ह
रिसेवा विहीनश्च श्रीहरेरनै
वेद्यभुक् भस्मान्तं सूतकं त
स्य न कर्मार्हः स नारद ब्रह्मा
श्राद्धादिकं सृष्ट्वा जगाम पितृ

हेतवे न प्राप्नुवंति पितरो
ददति ब्राह्मणादयः सर्वे
प्रजग्मुः क्षुधिता विषण्णा
ब्रह्मणः सभां सर्वं निवेदनं
च चक्रुस्तमेव जगतां विधि
ब्रह्मा च मानसीं कन्यां सस्र
जे तां मनोहरां रूपयौवनसं
पन्नां शतचन्द्रसमप्रभां विद्या
वतीं गुणवतीं मतिरूपवतीं
सतीं श्वेतचंपकवर्णाभां र
त्नभूषणभूषितां विशुद्धां प्र
कृतेरंशां सस्मितां वरदां शुभां
स्वधाभिधानां सुदतीं लक्ष्मील
क्षणसंयुतां शतपद्मदलन्य
स्तपादपद्मं च बिभ्रतीं पत्नीं पि
तृगणपद्मास्यां पद्मजां पद्मलो
चनां पितृभ्यश्च ददौ ब्रह्मा त
ष्टेभ्यस्तुष्टिरूपिणीं ब्राह्मणे
भ्य उपदेशं च चकार गोपनीयकं
स्वधांते मंत्रमुच्चार्य पितृ
भ्यो देहि चेति च क्रमेणानेन
विप्राश्च पितृदानं ददुः पुरा स्वा
हा शस्ता देवदाने पितृदाने स्व
धा परा सर्वत्र दक्षिणा शस्ता
हतयज्ञमदक्षिणं पितरो दे
वता विप्रा मुनयो मनवस्तथा
पूजां चक्रुः स्वधां शान्तां महाव

परमादरं देवादयश्च संतुष्टाः
परिपूर्णमनोरथाः विप्रादय
श्च पितरः स्वधादेवीवरेण च
इत्येवं कथितं सर्वं स्वधोपाख्या
नमुत्तमं सर्वेषां च तुष्टिकरं
किं भूयः श्रोतुमिच्छसि ॥
नारद उवाच स्वधापूजाविधा
नं च ध्यानं स्तोत्रं तथा मुने श्रो
तुमिच्छामि यत्नेन वद वेदवि
दांवर श्रीनारायण उवाच
ध्यानं स्तवनं ब्रह्मन् वेदोक्तं
सर्वसंमतं सर्वं जानासि च क
थं ज्ञातुमिच्छसि वृद्धये शर
त् कृष्णत्रयोदश्यां मघायां श्रा
द्धवासरे स्वधां संपूज्य यत्नेन
ततः श्राद्धं समाचरेत् स्वधां
नाभ्यर्च्य यो विप्रः श्राद्धं कु
र्यादहंकृतिः न भवेत् फल
भाक् सत्यं श्राद्धस्य तर्पणस्य
च ब्रह्मणो मानसीं कन्यां प्र
शस्तां स्थिरयौवनां पूज्यां पि
तॄणां देवानां श्राद्धानां फल
दां भजे इति ध्यात्वा शालग्रा
मेऽप्यथवा मंगलघटे दद्यात्
पाद्यादिकं तस्यै मूलेनेति
श्रुतौ श्रुतं ॐ ह्रीं श्रीं क्लीं
स्वधादेव्यै स्वाहेति च महामंत्र

समुच्चार्य च संपूज्य स्तुत्वा तां
प्रणमेद्द्विजः स्तोत्रं शृणु मु
निश्रेष्ठ ब्रह्मपुत्र विशारद स
र्ववांछाप्रदं नृणां ब्रह्मणा य
त् कृतं पुरा ब्रह्मोवाच स्वधो
च्चारणमात्रेण तीर्थस्नायी
भवेन्नरः मुच्यते सर्वपापेभ्यो
वाजपेयफलं लभेत् स्वधा स्व
धा स्वधेत्येवं यदि वारत्रयं
स्मरेत् श्राद्धस्य च श्राद्धकाले
स्वधास्तोत्रं यः शृणोति समा
हितः लभेत् श्राद्धशतानां च
पुण्यमेव न संशयः स्वधा स्व
धा स्वधेत्येवं त्रिसन्ध्यं यः प
ठेन्नरः प्रियां विनीतां स लभे
त् साध्वीं पुत्रं गुणान्वितं पि
तॄणां प्राणतुल्या त्वं द्विजजी
वनरूपिणी श्राद्धाधिष्ठातृदे
वी च श्राद्धादीनां फलप्रदा
वहिर्गच्छ मन्मनसः पितॄणां
तुष्टिहेतवे संप्रीतये द्विजा
तीनां गृहिणां वृद्धिहेतवे नि
त्या त्वं नित्यरूपासि गुणरूपा
सि सुव्रते आविर्भावस्तिरोभा
वो सृष्टौ च प्रलये तव ॐ स्व
स्ति च नमः स्वाहा स्वधा त्वं द
क्षिणा तथा निरूपिताश्च व।

वेदे षट्प्रशस्तास्तु कर्मणाम्
पुरासीस्त्वं स्वधा गोपी गोलो
के राधिकासखी धृतोरसि स्व
मात्मानं कृष्णस्तेन स्वधा स्मृता
ध्वस्ता त्वं राधिकाशापात् गो
लोकाद्विश्वमागता कृष्णश्लि
ष्टा तया दृष्टा पुरा वृन्दावने व
ने कृष्णालिंगनपुण्येन भूता
मे मानसी सुता अतृप्ता सुरतो
तेन चतुर्णां स्वामिनां प्रिया
स्वाहा च सुन्दरी गोपी पुरासी
द्राधिकासखी रतौ स्वकृष्णमाह
रतये तेन स्वाहा प्रकीर्तिता कृ
ष्णेन सार्द्धं सुचिरं रमते रासम
ण्डले प्रमत्ता सुरतो श्लिष्टा दृष्टा
सा राधया पुरा तस्याः शाप
ने प्रध्वस्ता गोलोकाद्विश्वमाग
ता कृष्णालिंगनपुण्येन बभू
व वह्निकामिनी पवित्ररूपा
परमा देवानां वंदिता नृणां य
न्नामोच्चारणेनैव नरो मुच्यते
पातकात् सा सुशीलाभिधा
गोपी पुरासीद्राधिकासखी
उवास दक्षिणे क्रोडे कृष्ण
स्य राधिकाग्रतः मध्वस्ता सा
च प्रमत्तशापात् गोलोकाद्वि
श्वमागता कृष्णालिंगनपुण्ये
न सा बभूव च॥



दक्षिणा प्रेयसीमस्तोदत्ताप्र
श्रान्ता सर्वकर्मसु उवासदक्षि
णाभर्त्रा दक्षिणा तेन कीर्त्तिता
बभूव स्तिस्रो गोप्यश्च स्वधा च
दक्षिणा तथा कर्मिणां कर्म
पूर्णार्थं पुरा चैवेश्वरेच्छया
इत्येवमुक्त्वा सब्रह्मा ब्रह्मलोके
स्वसंदि तस्थौ च सहसामात्यः
स्वधा सा विवभूवह तदा पितृ
भ्यः प्रददौ तामेव कमलाल
यां तां संप्राप्य यतस्ते च पित
रश्च महर्षिताः स्वधास्तोत्र
मिदं पुण्यं यः शृणोति समा
हितः सस्नातः सर्वतीर्थेषु
वेदपाठफलं लभेत् इति ब्र
ह्मवैवर्त्ते प्रकृतिखंडे ४१
अध्यायः
स्वधाप्रियः पुं कृष्णतिलः
इति शब्दरत्नावली अग्निश्च
स्वधाभुक् पुं पितृगणः
इति हेमचन्द्रः ॥
स्वधितिः पुं स्त्री कुठारः
इत्यमरः तालव्यशादिश्च ॥
स्वधितिहेतिकः पुं परशु
धारियोद्धा इति केचित्
स्वन ण शब्दे
इति कविकल्प
द्रुमः वकारयुक्तः स्वेनतुः
सस्वनतुः अत्र स्वनण स्वनच
इत्युभय पाठो लेखक प्रमा
दकृतः इति दुर्गादासः
स्वन सि तंसने इति कविक
ल्पद्रुमः वकारयुक्तः शब्दे
इत्यनुवर्त्तते तंसने भूषणे
कर्त्तरि शके ३ थे ३ यमित्यर्थः
स्वेनतुः सस्वनतुर्नूपुरौ नितम्ब
नयति स्वानयति कंकणौ
घू अन्यत्र स्वानयति घंटांज
नः इति दुर्गादासः ॥
स्वन नू कथने इति कविक
ल्पद्रुमः वकारयुक्तः स्वनय
ति इति दुर्गादासः ॥
स्वनः पुं शब्दः इत्यमरः स्व
नचक्रः पुं रतिबंधविशेषः
तस्य लक्षणं यथा धृत्वा वा
हू तथा कंठं पादतोपि स्थि
रः स्थितः गुल्फं च कामयेत्
कामी स्वनचक्रः प्रकीर्त्तितः
इति रतिमंजरी ॥
स्वनिः पुं शब्दः इति हेमचन्द्रः
स्वनितं क्ली गर्जितं मेघश
ब्दः इति हेमचंद्रः ध्वनिते त्रि
इत्यमरः ॥ ॥ ॥ ॥

स्वनिताह्वयं पुं तंडुलीयः इति
राजनिर्घंटः ॥
स्वनोत्साहः पुं गंडकः इति
शब्दरत्नावली पुस्तकांतरेश्व
नोत्साह इति च पाठः
स्वपनं क्ली निद्रा इति शब्द
रत्नावली
स्वपिंडा स्त्री पिंडखर्जूरी इति
राजनिर्घंटः ॥
स्वप्नः पुं निद्रा इत्यमरः प्र
सुप्तस्य विज्ञानं दर्शनं इति
मेदिनी तत्स्वप्ना यथा नार
उवाच केन स्वप्नेन किं पुण्यं
केन पुंसां भवेत् सुखं कोपि
कोपि च दुःस्वप्नस्तत् सर्वं क
थय प्रभो श्रीभगवानुवाच वे
देषु सामवेदश्च प्रशस्तः स
र्वकर्मसु तत्रैव काण्वशाखा
यां पुण्यकांडे मनोहरे स्वप्ना
ध्यायश्च सुस्वप्नः शाश्वत पुण्य
फलप्रदः तत् सर्वं लिखितं
तात कथयामि निशामय स्व
प्नाध्यायं प्रवक्ष्यामि वक्रपुण्य
फलप्रदं स्वप्नाध्याये नरः श्रुत्वा
गंगास्नानफलं लभेत् स्वप्नस्तु प्र
थमे यामे संवत्सरफलप्रदः द्वि
तीये चाष्टभिर्मासैस्त्रिभिर्मासै
स्तृतीयके चतुर्थे चार्द्धमासेन
स्वप्नः स्यात् फलप्रदः दशाहेफ
लदः स्वप्नोऽप्यरुणोदयदर्शने
प्रातः स्वप्नश्च फलदः स्तत्क्षणं य
दि बोधितः दिने मनसि यद्दृ
ष्टं तत्सर्वं च लभेद्ध्रुवं चिंता
व्याधिसमायुक्तो नरः स्वप्नं च
पश्यति तत्सर्वं निष्फलं ज्ञा
तमप्यात्येव न संशयः जडो मू
त्रपुरीषेण पीडितश्च भया
कुलः दिगंबरो मुक्तकेशो न
लभेत् स्वप्नजफलं दृष्ट्वा स्व
प्नं च निद्रालुर्यदि निद्रां प्रया
ति च विमूढो बक्ति चेद्रात्रौ
न लभेत् स्वप्नजं फलं उक्त्वा
कापथगोत्रे च विपत्तिं लभ
ते ध्रुवं दुर्गाते दुर्गतिं याति
नीचे व्याधिं प्रयाति च शत्रौ
भयं च लभते मूर्खे च कल
हो भवेत् कामिन्यां धनहानिः
स्याज्ज्ञे चौरभयं भवेत् नि
द्रायां लभते शोकं पंचितेवां
छितफलं न प्रकाश्यश्च सुप्रः
पंडितोः काश्यपेञ्ज गवा च
कुंजराणां च हयानां च ब्रजेश्वर

प्रासादानां च शैलानां वृक्षाणां
च तथैव च आरोहणं च धन
दं भोजनं रोदनं तथा प्रतिगृ
ह्य तथा वीणां प्रासादाग्रं भू
मिं मा लभेत् प्रासादेन य
दा विद्धो व्रीहीन् कुक्षिणा त
था विष्ठया रुधिरेणैव संयु
क्तो ध्यर्थमालभेत् स्वप्नेऽग
म्यागमनं भार्यालाभकरं
ति च मूत्रसिक्तं पिबेत् शुक्रं
नरकं च विष्ठामपि नगरं प्र
विशेद्रक्तं समुद्रं वा सुधां पि
बेत् शुभवार्तामवाप्नोति वि
पुलं चार्थमालभेत् रक्तं।
स्थाने नक्तं समुद्रं स्थाने सु
रैः सुधां स्थाने सुरां इति च पा
ठः राजं नृपं सुवर्णं च वृषभं
धेनुमेव च दीपमन्नं फलं पु
ष्पं कन्यां छत्रं रथं ध्वजं ऊर्ध्वं
वै लभते दृष्ट्वा कीर्तिं च विपुलां
श्रियं पूर्णकुम्भं द्विजं वह्निं पुष्प
तां वृक्षमन्दिरं शुक्लधान्यं नटं वे
श्यां दृष्ट्वा श्रियमवाप्नुयात् गो
क्षीरं च घृतं दृष्ट्वा चार्थं पुण्यं
धनं लभेत् पायसं पद्मपत्रे च दधि
दुग्धं घृतं मधु मिष्टान्नं स्वस्तिकं
भुक्त्वा ध्रुवं राजा भविष्यति यदि

णां मानुषाणां चर्म वै मांसं
नरो यदि वक्षर्थं शुभवार्तां
च लभते वांछितं फलं छत्र
म्लापाण्डुकाम्लापिलब्धा धान्यं च
गच्छति अग्निं च निर्मलं तीह
तत्क्षेव भविष्यति भेलया स
वेष्यो हि स प्रधानं भविष्यति
दृष्ट्वा च फलितं वृक्षं धनमाप्नो
ति निश्चितं यस्मात् खेन सर्पेण
दश्यते दक्षिणे भुजे सोऽपि विरा
लभते भार्यां विनीतां प्रिय
वादिनीं सर्पिणा भक्षितो यो हि
अर्थलाभश्च तद्भवेत् स्वप्नेषु
र्यं विधुं दृष्ट्वा मुच्यते व्याधिब
न्धनात् वडवां कुक्कुटीं क्रौंचीं
दृष्ट्वा भार्यां लभेद् ध्रुवं स्वप्ने यो
निगडैर्बद्धः प्रतिष्ठां सुतमा
लभेत् उत्तमां स्थाने पुत्रमिति
वा पाठः दध्यन्नं पायसं भुंक्ते
तडागे वा नदीतटे विशीर्णप
द्मपत्रे च सोऽपि राजा भविष्यति
तडागे वा स्थाने पद्मपत्रे इति
वा पाठः जलौकसं वृश्चिकं च स
र्पं च यदि पश्यति धनं पुत्रं च वि
जयं प्रतिष्ठां च लभेदिति श्रीगि
मिदेष्टि मिः कौलै दानवैः पी॥

स्वप्ने ददाति मंत्रं वा प्रतिमां वा
शिलामयीं यस्मै ददाति विप्र
स्य मंत्रसिद्धिश्च तद्भवेत् विप्रा
विप्रसमुद्रं च दृष्ट्वा नत्वाशियं
लभेत् राजेन्द्रः सम्भवेद्वापि
किं वा च कविपंडितः शुक्ल
धान्ययुतां भूमिं यस्मै विप्रः
समुत्सृजेत् स्वप्ने च परिव
ष्टश्च स भवेत् पृथिवीपतिः
स्वप्ने विप्रो रथे कृत्वा नानास्वर्गं
प्रदर्शयेत् चिरंजीवी भवेदायु
र्धनवृद्धिर्भवेत् ध्रुवं विप्रो विप्र
स्य संतुष्टो यस्मै कन्यां ददाति च
स्वप्ने च स भवेन्नित्यं धनाढ्यो
भूपतिः स्वयं स्वप्ने सरोवरं दृ
ष्ट्वा समुद्रं वा नदीनदं शुक्लाद्रिं
शुक्लशैलं च दृष्ट्वा प्रियमवा
प्नुयात् प्रियं स्थाने श्रियमि
ति च पाठः यः पश्यति मृतं
स्वप्ने स भवेच्चिरजीवनः अरो
गो रोगिणं दृष्ट्वा सुखिनं च
सुखी भवेत् दिव्यस्त्रीयं प्रवद
ति मम स्वामी भवान् भव स्वप्ने दृ
ष्ट्वा च जागर्ति स च राजा भवेद् ध्रुवं
स्वप्ने च बालिकां दृष्ट्वा लब्धा स्फा
टिकमालिकां इन्द्रचापं शुक्ल

चैनं स प्रतिष्ठां लभेद् ध्रुवं स्वप्ने
विप्रो वदति यं मम दासो भवे
ति च इति दासमप्यतद्भक्तिं ल
ब्ध्वा स वैष्णवो भवेत् स्वप्ने विप्रो
हरिः शम्भुर्ब्राह्मणी कमला शि
वा शुक्ला स्त्री वेदमाता वाजाक
वी वा सरस्वती गोपालिका वे
श्यधरा बालिका राधिका मम
बालश्च बालगोपालः स्वप्ने वि
प्रैः प्रकाशितः पश्यतेकथि
तो नन्दस्वप्नः शुभप्रदेतकः
श्रोतुमिच्छसि किं वा त्वं किं भू
यः कथयामि ते इति ब्रह्मवै
वर्ते श्रीकृष्णजन्मखंडे स्वप्न
प्रदर्शने ७७ अध्यायः अ
क्रूरदृष्टस्वप्ना यथा अथा
क्रूरः स्वभवनं गत्वा कंसेन प्रे
रितः चकार शयनं तल्पे भुक्त्वा
मिष्टान्नमुत्तमं सुकर्पूरं च ताम्बू
लं च वाद्यवासितसुवासं भोग
मात्रतः ततो ददर्श स स्वप्नं पु
राण श्रुतिसम्मतं निशावशे
ष समये वाद्यादि परिवर्जितं
अरोगी वृद्धकेशश्च वस्त्रयु
ग्मसमन्वितः सतत्त्वपायीस
स्निग्धपिचन्ता शोक विव
र्जितः किशोरवयसं श्यामं।



द्विभुजं मुरलीधरं पीतवस्त्र
परीधानं वनमालाविभूषि
तं चन्दनोक्षितसर्वांगं माल
तीमाल्यशोभितं भूषितं भूषि
ताद्यैश्च सद्रत्नमणिभूषणैः म
यूरपुच्छचूडं च सस्मितं पद्म
लोचनं एवंभूतं द्विजशिशुं
दृष्ट्वा स्वप्नेमुने ततो ददर्श
रुचिरां पतिपुत्रवतीं सतीं पी
तवस्त्रपरीधानां रत्नभूषणभू
षितां ज्वलत्प्रदीपहस्तां च
शुक्लमाल्यकरां वरां शरच्च
न्द्रनिभास्यां च सस्मितां वरदां
शुभां ततो ददर्श विप्रं च कु
र्वंतं च शुभाशिषं श्वेतपद्म
गतं हंसं तुरंगं च सरोवरं दद
र्श विचित्रचारु फलितं पुष्पितं
शुभं आम्रं निंबनारिकेलयु
वाकं कदलीतरुं दर्शनं श्वेत
सर्पं च स्वात्मानं पर्वतस्थितं वृ
क्षस्थं गजस्थं च तरिस्थं तुर
गस्थितं वीणावादितवंतं च
भुक्तवंतं च पायसं दधिक्षीर
युतान्नं च पद्मपत्रस्थमीप्सि
तं मोदितं तथा शुक्लधान्य
पुष्पकरं तृणं चन्दनं चार्चि
णि सिध्यन्ति दिवा रात्रिगता ।
न्यापि सर्वेषु शुभकार्येषु चन्द्र
चारः प्रशस्यते अथ पिंगला
कठिन क्रूर विद्यानां पठने पा
ठने तथा स्त्रीसंग वेश्यागमने
महानौकाधिरोहणे नष्टकार्ये
सुरापाने वीरमंत्राद्युपासने व
हलध्वंसदेशादि विषदानादि
वैरिणि शास्त्राभ्यासे च गमने
मृगया पशुविक्रये इष्टकाका
ष्ठपाषाण रत्न घर्षण दारणे ग
त्यभ्यासे यंत्र तंत्रे दुर्गपर्वतारो
हणे द्यूते चौर्ये गजाश्वादि
रथसाधन वाहने व्यायामे मा
रणोच्चाटे षट्कर्मादि साध
ने नदीजलौघतरणे भेषजे लि
पिलेखने मारणमोहनस्तंभे
विद्वेषोच्चाटनं वशे प्रेरणाक
र्षणे क्षोभे दाने च क्रयविक्रये
खड्गहस्ते वैरियुद्धे भोगे वा रा
जदर्शने ॥

भोज्ये स्नाने व्यवहारे क्रूरे दी
प्ते रविः शुभः भुक्तमात्रेण
मन्दाग्नौ स्त्रीणां वश्यादिकर्म
णि शयनं सूर्यवाहेन कर्तव्यं
न् सदा बुधैः क्रूराणियानि क
र्माणि च राणि विविधानि च ता
नि सिध्यंति सूर्येण नात्र कार्या
विचारणा अथ सुषुम्ना क्षणं
वामे क्षणं दक्षे यदा वहति मारु
तः सुषुम्ना सा च विज्ञेया सर्व
कार्यहरा स्मृता तस्यां नाड्यां स्थि
तो वह्निर्ज्वलंतं कालरूपिणं वि
षुवंतं विजानीयात् सर्वकार्य
विनाशनं यदानुक्रम मुल्लंघ्य
यस्य नाडीद्वयं वहेत् सदा तस्य
विजानीयादशुभं सशप स्थितं
क्षणं वामे क्षणं दक्षे विषमं भा
वमादिशेत् विपरीत फलं ज्ञेयं
ज्ञातव्यं च वहनेन उभयोरेव सं
चारे विषुवंतं समादिशेत्
न कुर्यात् क्रूरसौम्यानि तत्
सर्वं निष्फलं भवेत् जीविते म
रणे प्रश्ने लाभालाभे जया ॥
जयो विषुवे वैपरीत्यं स्मरेत्
संस्मरेज्जगदीश्वरं ईश्वरस्मर
णं कार्यं योगाभ्यासादिकर्म
स अन्यत्तत्र न कर्तव्यं जयला

मस्तूर्वाथिभिः सूर्येण वद्मा
नाथा ससम्नाया मुक्त स्तुकं
शुणं दद्यात वरं दद्यात सर्व
था च तदन्यथा नाडी संक्रम
णे काले तत्त्वसंक्रमणेन थाग्र
मं किंचित्र कर्तव्यं पुण्यदाना
दिको टिधा विषमस्योदये या
त्रां मनसापि न चिंतयेत् यात्रा
हानिकरी तस्य मत्युः क्लेश एव न
संशयः पुरो वामोर्द्धतश्चन्द्रो
दक्षाधः पृष्ठतो रविः पूर्णारि
क्त विवेकोयं ज्ञातव्यो देशिकैः
सदा ऊर्द्ध्व वामाग्रतो दूतो ज्ञेयो
वामपथि स्थितः पृष्ठदक्षिण
थाधस्तात सूर्यवाहगतः शु
भः अनादि विषमं सन्धिनि
राधारं निराकुलं परे सूक्ष्मे
विलीयेत सा संध्या संद्भिरुच्य
ते न संध्या सन्धिमित्याहुः सं
ध्या संधिर्निगद्यते विषुवत स
न्धिगः प्राणः सा सन्ध्या सन्धि
रुच्यते नवेदं वेदमित्याहुर्वे
दे वेदो न विद्यते परात्मा विद्य
ते येन सवेदो वेद उच्यते
इति नाडीभेदः समाप्तः अथ
तत्त्वनिर्णयः देव्युवाच देवदेव
महादेव संसारार्णवतारक ॥

स्थितं त्वदीयहृदये रहस्यं व
द मे प्रभो ईश्वर उवाच स्वरज्ञा
ने रहस्यं तन्न किंचिदिष्टदेवता
स्वरज्ञानरतो योगी स योगी प
रमो मतः पंच तत्त्वात् भवेत् सृ
ष्टिस्तत्त्वे तत्त्वं विलीयते पंचतत्त्वं
परं तत्त्वं तत्त्वातीतं निरंजनं तत्त्वा
नां नाम विज्ञेयं सिद्धियोगेन यो
गिनां भूतानां दुष्टचिह्नानि जानं
ति हि स्वरोत्तमाः पृथिव्यापस्त
था तेजो वायुराकाशमेव च पं
चभूतात्मकं सर्वं यो जानाति स
पूजितः सर्वलोकेषु जीवानां
न देहे भिन्नतत्त्वकं भूर्लोकात् स
त्यपर्यंतं नाडीभेदः पृथक् पृ
थक् वामे वा दक्षिणे वापि उद
याः पंच कीर्तिताः अष्टधा तत्त्व
विज्ञानं शृणु वक्ष्यामि सुन्दरि
प्रथमे तत्त्वसंख्यायां द्विती
ये श्वाससन्धिषु तृतीये स्व
रचिह्नानि चतुर्थे स्थानमेव
च पंचमे तस्य वर्णाश्च षष्ठे तु
प्राणमेव च सप्तमे स्वादसं
युक्तं अष्टमे गतिलक्षणं
एवमष्टविधं प्राणं विषुवं
तं चराचरं स्वरात् परतरं
देवि ॥ ॥ ॥ ॥

नान्यथा त्वं वुजानसे निरीक्षि
तव्यं यत्नेन यदा मत्सूयका
लतः कालस्य वंचनार्थाय क
र्म कुर्वन्ति योगिनः श्रुत्योरंगु
ष्ठकौ मध्यांगुल्यौ नासापुटद्व
ये वदनप्रांतयोरन्यतर्जन्यौ
दृगंतयोः अस्यांतरे पार्थिवा
दितत्त्वज्ञानं भवेत् क्रमात् पी
तश्वेतारुणश्यामैर्बिंदुभिर्नि
रुपाधिवं दर्पणेन समालोक्य
श्वासं तत्र विनिक्षिपेत् आका
रैस्तु विजानीयात् तत्त्वभेदं
विचक्षणः चतुरस्रं चार्द्धचन्द्रं
त्रिकोणं वर्तुलं स्मृतं बिन्दुभि
स्तु नभो ज्ञेयमाकारैस्तत्त्वलक्ष
णं मध्ये पृथ्वी ह्यधश्चापश्चोर्द्ध्वं
वहति चानलः तिर्यक् वायुप्र
चारश्च नभो वहति संक्रमे ॥
माहेये मधुरं स्वादुः कषायं जल
मेव च तिक्तं तेजश्च वायव्ये
आकाशे कटुकं तथा अष्टांगु
लं वहेद्वायुरनलश्चतुरंगुलं द्वा
दशांगुलं माहेयं षोडशांगुल
वारुणं आपः श्वेताः क्षितिः
पीता रक्तवर्णो हुताशनः मा
रुतो नीलजीमूत आकाशः भू
रिवर्णकं स्कंधदेशे स्थितो ॥

वह्निः नाभिमूले प्रभंजनः जा
नुदेशे मही तोयं पादांते म
स्तके नभः ऊर्द्ध्वं मृत्युरधः शां
तिः स्थिरे उच्चाटनं मध्यमध्ये
स्तंभं विजानीयात नभः सर्व
त्र मध्यमं पृथिव्यां स्थिरक
र्माणि चरकर्माणि वारुणे ते
जसा समकार्याणि मारणोच्चा
टने निले व्योम्नि किंचित्र कर्त्त
व्यमभ्यसेत् योगमेव या शून्य
तां सर्वकार्येषु नात्र कार्या वि
चारणा पृथ्वीजलाभ्यां सिद्धिः
स्यात् मृत्युर्वह्नौ क्षयो निले
नभसि निष्फलं सर्वं ज्ञातव्यं त
त्त्ववेदिभिः चिरलाभः क्षितौ
ज्ञेयस्तत् क्षणात्तोय तत्त्वतः
हानिः स्याद्वह्निवाताभ्यां नभ
सो निष्फलं भवेत् पीतः शनै
र्मध्यवाही मृणयाच्च गुरुध
निं कवोष्णः पार्थिवो वायुः
स्थिरकार्यप्रसाधकः अधो
वाही गुरुध्वानः शीघ्रगः शी
तलः स्थितः यः षोडशांगुलो
वायुः स आपः शुभकर्मकृत्
आवर्तगश्चात्युष्णश्च शोणाभ
श्चतुरंगुलः ऊर्द्ध्ववाही च यः क्रू
रः कर्मकारी स तेजसः उस ॥

पीतः कृष्णवर्णस्तिर्य्यग्गामी
षडंगुलः वायुः पवनसंज्ञोयं
चरकर्मसु सिद्धिदः यः समीरः
समरसः सर्व्वतत्व गुणावहः
अम्बरं तं विजानीयात् योगिनो
योगदायकः पीतेचैवचतु
ष्कोणं मधुरं मध्यमाश्रयं भो
गदं पार्थिवं तत्वंप्रवाहेद्वाद
शांगुलं श्वेत मर्द्धेन्दुसंकाशं
स्वादुकाषायमार्द्रकं लाभकृद्वा
रुणं तत्वं प्रवाहे षोडशांगुलं
रक्तं त्रिकोणं तिक्तं स्यात् ऊ
र्द्ध्वमार्गप्रवाहकं दीप्तंच तै
जसं तत्वं प्रवाहे चतुरंगुलं नी
लवर्त्तुलसंकाशं स्वाद्वम्लं ति
र्य्यगाश्रितं चपलं मारुतं त
त्वं प्रवाहेऽष्टांगुलं स्मृतं वर्णा
कारं स्वादुवाहं अव्यक्तं सर्व
गामिच मोक्षदं व्योमतत्वंहि
स सर्वकार्य्येषु निष्फलं पृथ्वी
जले शुभे तत्वे तेजो मिश्रफ
ले शुभे तत्वे तेजो मिश्रफलो
दयं हानि मृत्युकरौ पुंसाम
शुभौ व्योममारुतौ अपूर्व्वा पश्चि
मे पृथ्वी तेजश्च दक्षिणे तथा वायु
रुत्तरदिग्भागे मध्यकोणगतं न
भः चिरलाभः क्षितौ ज्ञेयस्तत्क्षणा
त्तोयतत्वतः हानिः स्याद्वह्नि
वाताभ्यां नभस्तालिंगनं लभ
तु चन्द्रे पृथ्वीजले स्यातां सू
र्य्येवाग्निर्यदा भवेत् तदा सि
द्धिं न सन्देहः सौम्यासौम्येषु क
र्म्मसु लाभः पृथ्वीकृतो वह्नि
र्निशायां लाभकृज्जले वह्नौ
मृत्युः क्षतिर्वायौ नभःस्था
नंदहेत् कृविन जीवितयोज
येलाभे कृष्याञ्च धनकर्षणे म
न्त्रार्थे युद्धप्रश्नेच गमनागम
नेतथा आयाति वारुणेतत्वे
तत्रस्थापि शुभंक्षितौ प्रया
ति वायुतोऽन्यत्र हानि मृत्यू
नभोऽनले पृथिव्या मूलचिंता
स्यात् जीवस्य जलवातयोः
तेजसा धातुचिंता स्यात् शू
न्यमाकाशतो वदेत् पृथि
व्या बहुपादाः स्युः द्विपदास्तो
यवायुतः तेजसा चतुष्पा
दानभसा पादवर्ज्जिताः कु
जोवह्नी रविः पृथ्वी सौरिरा
पः प्रकीर्त्तिताः वायुस्थान
स्थितोराहु र्दक्षरन्ध्रप्रवाह
कः जलंचन्द्रो बुधः पृथ्वी गुरुर्वा
तः सितोऽनलः वामनाडीस्थि
ताः सर्व्वे सर्व्वकार्य्येषु निश्चिताः ॥

प्रवासिप्रश्न चन्द्रादित्योप
विन्यस्य यदा राहुगतोऽनि
लः तदासौ चलितो ज्ञेयः स्था
नान्तरमपेक्षते आयाति वारु
णे तत्वे तत्रैवास्ति शुभं क्षितौ
प्रवासी पवनेऽन्यत्र मृत्युरे
वानले वदेत् पृथ्वीतो मूल
विज्ञानं जीवज्ञानं जलेत
था आग्नेय्यां धातुविज्ञानं
व्योम्नि शून्यं विनिर्द्दिशेत् तु
ष्टिपुष्टि रतिक्रीडा जयो हा
स्यं धरानले तेजो वायुश्च
सुप्तार्त्तः ज्वर कंप प्रवासिनः
गतायुर्मृत्यु राकाशेचन्द्राव
स्थाः प्रकीर्तिताः द्वादशैता
प्रयत्नेन ज्ञातव्या देशिकोत्त
मैः पूर्व्वायां पश्चिमे याम्ये उत्त
रायां यथाक्रमं पृथिव्यादी
नि भूतानि बलिष्ठानि विनि
र्द्दिशेत् पृथिव्यापस्तथा तेजो
वायु राकाशमेवच पंचभूता
त्मकं देहं ज्ञातव्यं चवरानने अ
स्थिमांसं त्वचानाडी रोमचैव
तु पंचमं पृथ्वीपंच गुणाः प्रो
क्ता ब्रह्मज्ञानेनभाषितं शुक्र
शोणित मज्जाचलाला मूत्रंच
पंचमं आपः पंच गुणाः प्रोक्ता
ब्रह्मज्ञानेनभाषितं क्षुधातृष्णा
तथा निद्रा क्रान्ति आलस्यमेव
च तेजः पंचगुणाः प्रोक्ता ब्र
ह्मज्ञानेन भाषितं धारणं
चालनं गन्धं संकोचन प्रसा
रणं वायोः पंचगुणाः प्रो
क्ता ब्रह्मज्ञानेन भाषिताः रा
गद्वेषौ तथा लज्जा भयं मोह
श्च पंचमः नभः पंचगुणाः प्रो
क्ता ब्रह्मज्ञानेनभाषितं पृथिवी
पंचाशत् चत्वारिंशदपस्तथा
तेजस्त्रिंशद्विजानीयाद्वायो र्विंश
ति र्द्दिर्नभः पार्थिवे चिरकालेन
लाभ श्चापेत्क्षणात् भवेत् जा
यते पवनात् स्वल्पः सिद्धोप्यग्नौ
विनश्यति वह्निवायुकृते प्रश्ने
लाभालाभं वदेद्बुधः पश्नोवा
रुणे लाभः स्थिरेणाच पुरन्दरे
ज्ञातव्यं जीवने शून्य सिद्धो
व्योम्नि विनश्यति पृथ्वी पं
चगुणा वेदाः गुणास्तेजो हि
वायूतः नभ एक गुणं चैव
तत्वज्ञानमिदं भवेत् फूत्का
रकृत प्रस्फुटिता विदीर्णापु
तिता धरा ददाति सर्व्वकार्य्येषु
अवस्थासदृशं फलं भरणी
कृत्तिका पुष्या॥



मघा पूर्वा च फल्गुणी पूर्वभा
द्रपदः स्वातिः तेजस्तत्त्वमिति प्रि
ये विशाखो तरफल्गुण्यो हस्ता
चित्रा पुनर्वसुः अश्विनी मृग
शीर्षा च वायुतत्त्व सदा स्मृतं पूर्वा
षाढानुराधाश्लेषा मूलमार्द्रा च रो
हिणी उत्तरभाद्रपदा तोयतत्त्वे श
तभिषा प्रिये धनिष्ठा रोहिणी
ज्येष्ठानुराधा श्रवणा तथा अ
भिजिन्नोत्तराषाढा पृथ्वी तत्त्वमु-
दाहृतं वह्न्याडी स्थितो दूतो
यत् पृच्छति शुभाशुभं तत्
सर्वं सिद्धिमायाति शून्ये शून्यं
न संशयः तत्त्वे रामो जयं प्रा
पुः सतत्त्वे च धनंजयः कौरवा
निहताः सर्वे युद्धे तत्त्वविपर्य
ये जन्मान्तरीयसंस्कारात् प्र
सादादथवा गुरोः केषांचिज्ज्ञा
यते तत्त्वे वासना विमलात्मनां
अथ पंचतत्त्वध्यानं लं बीजं
धरणीं ध्यायेत् चतुरस्रां
सुपीतभां सुगन्धां स्वर्णव
र्णत्व मारोग्यं देहलाघवं
वं बीजं वारुणं ध्यायेदर्धच
न्द्रं शशिप्रभं क्षुत् पिपासा
सहिष्णुत्वं जलमध्येषु मज्जनं
रं बीजं शिखिनं ध्यायेत् त्रि
कोण मरुणं ॥

प्रभं बह्वन्नपान भोक्तृत्वमा
तपाग्निसहिष्णुता यं बीजं प
वनं ध्यायेद्वर्तुलं श्यामल
प्रभं आकाशगमनाद्यं च पक्षि
वद्गमनं तथा हं बीजं गग
णं ध्यायेत् निराकारं बहुप्र
भं ज्ञानं त्रिकालविषयमैश्व
र्य्य मणिमादिकं स्वरज्ञानीन
रो यत्र धनं नास्ति ततः परं स्व
रज्ञानेन गमयेत् अनायास
फलं भवेत् सर्वं च धनमधनं
सर्वाधिकारसंयुतं लक्षैकेन
न सिध्यंति तज्ज्ञानीर्थसलिलैः
स्वर्ण्यापि प्राक्रावति यज्ज्ञानां
च कृतं हि कार्य्यमखिलं देवा
सुरसनरपितोः संसारा च समुद्ध
ता स्वपितरः त्रैलोक्य पूज्यो ध्य
सो यस्य ब्रह्मविचारणे तत्त्वम
पि स्थैर्य्यं मनः प्राप्नुयात् इति त
त्त्वज्ञानं संपूर्णं अथ युद्धप्रक
रणं देव्युवाच देवदेव महादे
व महाज्ञानं स्वरोदयं त्रिकाल
विषयज्ञानं कथं भवति शंक
र ईश्वर उवाच
अर्घकांडं जयप्रश्नं शुभाशुभ
मिति त्रिधा यतत् त्रिकालवि

ज्ञानं नाम भवति सुन्दरि त
त्त्वे शुभाशुभं कार्य्यं तत्त्वे जय
पराजयो तत्त्वे समर्घमहार्घं
तत्त्वे त्रिपद मुच्यते श्रीदेव्यु
वाच देवदेव महादेव सर्वसं
सारतारक किं नराणां परं मि
त्रं सर्वकार्य्यार्थसाधकं
शिव उवाच प्राण एव परं मित्रं
प्राण एव परः सखा प्राणतु
ल्यः परो बन्धुर्नास्ति नास्ति वरा
नने देव्युवाच कथं प्राणस्थि
तो वायुर्देहे किं प्राणरूपकं त
त्त्वेषु संचरेत् प्राणो ज्ञायते यो
गिभिः कथं शिव उवाच काया
नगरमध्ये तु मारुतः क्षितिपा
लकः भोजने वचने चैव गति
रष्टादशांगुला प्रवेशे दश
भिः प्रोक्तो निर्गमे द्वादशांगुलः
प्राणस्य तत्त्वनिर्दिष्टविस्तभा वा
द्वादशांगुला गमने च चतुर्वि
शा नेत्रे वेदास्तुधावने मैथुने
पंचषष्टिः शयने च शतांगुला
एकांगुलकृते न्यूने प्राणो निष्का
मतो मता आनन्दस्तु द्वितीये
स्यात् कविशक्तिस्तृतीयके
वाचासिद्धिश्चतुर्थे तु दूरदृष्टि
पंचमषष्ठे ॥

त्वाकाशगमनं चंडवेगश्च स
प्तमे अष्टमे सिद्धयश्चाष्टौ
नवमे निधयो नव दशमे दश
मूर्तिश्च छायनाशो दशैकके
द्वादशे हंसचारश्च गंगामृत
रसं पिबेत् आनखाग्रे प्राणपू
र्णे कस्य भक्ष्यं च भोजनं एवं
प्राणविधिः प्रोक्तः सर्वका
र्य्यफलप्रदः ज्ञायते गुरुवाक्ये
न न विद्याशास्त्रकोटिभिः प्रात
श्चन्द्रो रविः सायं यदि दैवान्न
लभ्यते मध्याह्नान्मध्यरात्राद्वा
परतस्तु प्रवर्त्तते दूरयुद्धे जयी
चन्द्रः समीपे च दिवाकरः व
हन्नाड्यां गतः पादे सर्वसिद्धिः
प्रजायते यात्रारंभे विवाहे च
प्रवेशे नगरादिके शुभकार्ये
षु सर्वेषु चन्द्रचारः प्रशस्यते
अयनातिथिदिनेशाः स्वीयत
त्त्वेन युक्तो यदि वहति कथं
चित् दैवयोगेन पुंसां स जयति
रिपुसैन्यं स्तंभमात्रस्वरेण प्र
भवति न च विघ्नः केशवस्या
पि लोके जीवलहं जीवरक्षां
जीवांगे परिधाय च जीवो व्र
जति यो युद्धे जीवो जयति
मेदिनी भूमौ जले ॥ ॥ ॥

चक्रान्तवं गमनं शान्तिक
र्म्मसु वेङ्को प्रदीप्ते न वि
पुनर्नभवत्यपि जीवेन शस्त्रं
बध्नीयात् जीवेनैव विकाश
येत् जीवेन प्रतिमेत् शस्त्रं
युद्धेजयति सर्वथा आक्रम्य
प्राणपवनं समारोहेत वाहनं
समुत्तरेत् पदं दत्वा सर्वकार्य्या
णि साधयेत् अपूर्णे वास्त्र
ले यदा क्रूरतेपूर्णतत्वस्पो
जयत्येको बहुन्यरो यन्नाडी
वहते चांगे तस्यामेवाधिदेव
ता सम्मुखापि दिशा तेषां स
र्वकार्य्यफलप्रदा
आदौ तत्कृयते मुद्रा पश्चा
युद्धं समाचरेत् सर्वा मुद्रा
कृता येन तेषां सर्वकार्यफ
लप्रदा आदौ तत्क्रियेनमुद्रा
पश्चाद्युद्धं समाचरेत् सर्वामु
द्राकृता येन तेषां सिद्धिर्नसं
शयः चन्द्रप्रवाहेऽप्यथ सू
र्य्यवाहे भटाः समायांतिच यु
द्धकामाः समीरणस्तत्वबि
दां प्रयातो या शून्यता सा प्रतिकूल
त्वमायदिस्या वहते वायुर्युद्धं तद्दिशि
दापयेत् जयत्येव न सन्देहः शक्रोपि
यदि वाग्रतः यन्नाडी वहेद्दाय

स्तदंतः प्राणमेव च आकृष्य
छेत् कर्णान्तं जयत्येव पुर
दरं प्रतिपतमहारेभ्यः पूर्णां
गयोऽभिरक्षति मनस रिपुभिः
शक्ति वलिष्टैरपि हन्यते अंगुष्ट
तर्जनी वध्ये पादांगुष्टस्तथा
ध्वनि युद्धकालेचकर्मव्यलक्ष
योद्धा जयी भवेत् निशाकरे
रवौचारे मध्ये यस्य समीरणः
स्थितो रक्षेत् दिगन्तानिजया
काङ्क्षीनरः सदासासमवेणका
लेषुद्धलोजल्पति वाञ्छितं तस्या
र्थाः सिद्धिमायांति निर्गमे नैवस
न्दरि लाभादीन्यपि कार्य्याणि ए
ष्टनिकीर्तितानिच जीवे विशति
सिध्यंतिहानि र्निः सरणे भवेत्
नरि दत्वा स्वकीयाच स्त्रियांवा
मामपास्यते ऊंभकं युद्धकाले
च तिस्रोनाडय स्वया गतिः हा
कारस्य सकारस्य विना भेदंस्व
रः कथं सोहं हंसपदेनैव जी
वो जति सर्वदा ॥ शून्यांगं पु
रितं कृत्वा जीवांगं गोपयेत्
यदि जीवांगे घातमाप्नोति शू
न्यांगं रक्षते सदावाममेवायघवा
दते यदि पृच्छति पृच्छकं तत्रघा
तोनजायेत भूत्ये घाते विनिर्दि

शेत् भूतत्वेनोदरेघातः पा
दस्थाने ऽम्बुना भवेत् उरःस्था
ने ऽग्नितत्वेन करस्थाने च वायु
ना शिरसि व्योमतत्वेनकृत
आघातनिर्णयः एवं पंचवि
धोघातः स्वरशास्त्रे प्रकाशितः
युद्धकाले यदा चन्द्रः स्थायीज
यति निश्चितं यदा सूर्य्यप्रवाह
स्तुवादीविजयतेतथा जयम
श्चेत्र सन्देहो नाडी मध्ये तत्व
तयेत् सुसम्नायां गतः प्राणं
समवेद्यारस्ताहशा युद्धमाश्रये
त् तेनासौजय माप्नोति नात्र
कार्य्या विचारणा यदि संग्राम
काले तु वामनाड्यां सदा वहेत्
स्थायिनो विजय विन्यात् रि
पुवश्यादयोपि च यदि संग्राम
काले तु सूर्य्यस्तु व्याहतो वहेत्
तदा जयीजयं विन्यात् सदेवा
सुरमानवात् रणे हरति शत्रु
स्तं वामायां प्रविशेन्नरः स्था
नं द्विधावयाराभ्यां जयं सूर्य्ये
ण धावति योधद्वयकृते प्रश्ने
पूर्णस्य प्रथमो जयः रिक्ते
चैव द्वितीयस्तु जयी भवति
नान्यथा पूर्णनाडीगतः पृष्टे

शून्यांशंच तदग्रतः शून्यस्था
नेकृतः शत्रुर्म्रियते नात्र संश
यः वामचारे समे नाम यस्तत
स्य जयोभवेत् पृच्छकोदक्षि
ण भागे विजयी विसमाक्षरः
यदा पृच्छति चन्द्रस्यस्तदासन्धा
नमादिशेत् पृच्छेद्यदा च सूर्य्य
स्यस्तदा जानीहि विग्रहं पार्थि
वेचसमं युद्धं सिद्धिर्भवतिवारु
णेवेङ्गाषुद्धेजयस्तस्य मृत्युवी
योचनाभसे नैमित्तिकप्रमा
दाद्वा यताद्वा नज्ञायते ऽनिलः
प्रश्नकाले तदा कुर्यात् इदं
यत्नेन बुद्धिमान् निश्चलांधा
रणां कृत्वा पुष्पं हस्तात् निपा
तयेत् पूर्णांगे पुष्पपतनं शून्ये
वातत् फलंघदेत् तिष्ठन्नुप
विशन् वापि प्राणमाकर्षयेन्
निजं मनोभंगमकुर्वाणः स
र्वकार्य्येषु पूजितः न कालो
विविधं घोरं न शस्त्रंनच पन्नगाः
न शत्रुव्याधि चौराद्याः शून्य
स्थानाशितं क्षमाः जीवेन स्था
पयेद्वायुं जीवेनारंभयेत्पुनः
जीवेन क्रीडते नित्यं द्यूतेजय
ति सर्वदा कथंचित् विद्धिजयी
युद्धे स्वरज्ञानं विना नृपः ॥



स्वरज्ञानबलादग्रेनिष्कलं को
टिधाभवेत् इहलोके परत्रै
व स्वरज्ञानी बलीसदा दशश
तायुतं लक्ष देशाधिपबलं क
त् शतक्रतुसुरेन्द्राणांबलं
कोटिगुणं भवेत् ऊमकारः
सर्ववर्णानां ब्रह्मांडे भास्करो
यथा मर्त्यलोके तथा पूज्यः
स्वरज्ञानी पुमानपि एकाक्षर
प्रदातारं नाडीभेदनिवेदकं पृ
थिव्यां नास्ति तद्द्रव्यं यद्दत्वाचा
नृणीभवेत् देव्युवाच
परस्परं मनुष्याणां युद्धे प्रोक्तो
जयः त्वया यमयुद्धे समुत्
पन्ने मनुष्याणां कथं जयः
ईश्वरउवाच ध्यायेद्देवं स्थिरेजी
वे जुहुयात् जीवसंगमे इष्ट
सिद्धि र्भवेत्तस्य महालाभोज
योभवेत् निराकारात् समु
त्पन्नं साकारं सकलंजगत्
तत् साकारं निराकारेज्ञाने
भवति तन्मयं इति युद्धप्रक
रणं श्रीदेव्युवाच नरयुद्धं
यमयुद्धं त्वयं प्रोक्तं महेश्वर
इदानीं देव देवीनां वशीकर
णंकं वद ईश्वरउवाच च
न्द्रं सूर्य्येणचाकृष्यस्थापयेज्जी

वमंडले आजन्मवशगावामाक
थितोऽयं तपोधनैः जीवेनगृ
ह्यते जीवोजीवो जीवस्यदीयते
जीवस्थाने गतोजीवो बालाजी
वांतवश्यकृत् चन्द्रंपिबतिसू
र्य्येण सूर्य्यंपिबतिचन्द्रतः अ
न्योन्यकालभावेन जीवेदाचन्द्र
तारकं प्रतज्ञानाति योयोगी
पतत् पठति नित्यशः सर्वदुःख
विनिर्मुक्तः लभते वांछितंफलं
सेफोंगेवदतेनाडीतन्नाडीवाय
नेऊरु करेवद्वा स्तमुखंचजरणं
जयते युवाउभयोः ऊंभकं कृत्वा
मुखे श्वासं निपीयते निश्चलाच
यदा नाडी देवकन्यावशं
ऊरु रात्रौचयामवेलायां
प्रसुप्तेकामिनीजने बलवी
जं पिबेयस्तु बालाजीवहरो
नरः इति देवीवश्यप्रकर
णं अष्टान्तरं जपित्वातु
तस्मिन् काले ऋतौ सति
ततत्क्षणं दीयतेचन्द्रो मोहमा
यातिकामिनी शयनेवा प्रसं
गेवाचुंबनालिंगनेपिवा यः
सूर्य्येण पिबेच्चन्द्रं सभवेन्मक
रध्वजः शिवमालिंगाते शक्त्या

तेन भवेत्तस्य लक्षकोटिरसाय
नं रवौ संक्रमेणं नाडीगता
न्येचप्रवर्त्तते सलिलेवह्निये
गेपि रौरवं जगतीतले इति
सवत् सरफलं ॥
अथ रोगप्रकरणं महीतत्वे
स्वरोगंच जलेच जलमातरः
रवौचारे तेजस्तत्वे वायुतत्वे
चशाकिनी शून्यतत्वेन रो
गश्चपित्तदोषसमुद्भवः दान
पुण्यं द्विजातीनां पिंडश्राद्धं
विधीयते आदौशून्यगतं पृच्छे
त् पश्चात् पूर्णा विशेद्यदि
मूर्छितोऽपि ध्रुवं जीवेत् य
दर्थं परिपृच्छति चन्द्रस्थाने
स्थितो जीवः सूर्य्यस्थाने च पृ
च्छति तदा प्राणविनिर्मुक्तो
यदि वैद्यशतैर्वृतः पिंगलायां
स्थितोजीवो वामे दूतस्तु पृच्छ
ति तदापि म्रियते रोगी यदि
त्राता महेश्वरः दक्षिणेन य
दा वायुर्दूतः रोद्राक्षरं वदेत्
तदाजीवतिजीवोऽसौचन्द्रेस
मफलं भवेत् जीवोऽसौच
न्द्रे समफलं भवेत् जीवाका
रे विलोकयत् जीवस्थो जीवि
तं पृच्छेत्तस्याजीवति तेध्रुवं ॥

प्रश्नेवाथः स्थितोजीवस्तदाजी
वो हि जीवति उर्द्ध्वचारगतोजी
वो यातिजीवो यमालयं विप
रीतात्तरं प्रश्ने रिक्तायां पृच्छ
को यदि विपर्य्ययेच विज्ञेये
विषमस्योदये सति यस्मिन्
भागे चरेत् जीव स्तत्रस्थः प
रिपृच्छति रोगैः प्रपीडितः
वातोदये वातकरेच भक्ष्ये
श्लेष्मोदये श्लेष्मकरेच भक्ष्यपु
क्ति प्रभुक्ते प्रभवंति रोगाः पक
स्य भूतस्य भूतस्य विपर्य्ययेण
रोगाभिभूतिर्भवतीह पुंसां
तयो ईषो वन्धुसुहृद्विपक्षिः
पतत्रये व्यत्ययतो मृतिःस्या
त् इति रोगज्ञानं अथकाल
ज्ञानं मासादौवत् सरादौच
पक्षादौच यथाक्रमं क्षयका
लं परीक्षेत वायुचारवशात्
सुधीः पंचभूतात्मकं देहं शशी
स्नेहेनसिंचति रक्षयेत्
सूर्य्यवातेन तेन जीवःस्थिरो
भवेत् ॥ मारुतं वन्धा
यित्वा तुसूर्य्यं वन्धयते य
दि अभ्यासाज्जीवते
जीवः सूर्य्यका ॥ ॥ ॥



लेपि वंचते गगणाद्रवते
चन्द्रः कायागस्थानि सिंचति क
र्मयोगः सदाभ्यासात् रमते श
शिनः स्रवात् शशांकं वारये
द्रात्रौ दिवा वार्य्यो दिवाकरः इ
त्यभ्यासरतो योगी सयोगी
नात्र संशयः दिवा न पूजयेत्
लिंगं रात्रौ देवीं न पूजयेत्
वहति ज्ञानजनकं पंचसूत्रे
समे दिने अहोरात्रं यदेकत्र
वहते यस्य मारुतः तदा त
स्य भवेदायुः संपूर्णं वत्सर
द्वयं अहोरात्रद्वयं यस्य पि
गलायां सदागतेः तस्य वर्ष
द्वयं ज्ञेयं जीवितं तत्ववेदिभिः
त्रिरात्रं वहते यस्य वायुरेकपु
टे स्थितः वत्सरं यावदायुः
स्यात् प्रवदंति मणीषिणः रा
त्रौ चन्द्रो दिवा सूर्य्यो वहेद्यस्य
निरंतरं विजानीयात्तस्य मृत्युः
षाण्मासाभ्यंतरे सुधीः पक्षा
दि षोडशाहानि यदि भानुर्नि
रंतरं वहेद्यस्य वै मृत्युः शेषा
हेन च मासिकैः संपूर्णं वह
ते सूर्य्य श्चन्द्रमा नैव दृश्यते प
क्षेण जायते मृत्युः कालज्ञाने
न भाषितं संपूर्णं वहते चन्द्रः ॥

सूर्य्यो नैव च दृश्यते मासेन दृ
श्यते मृत्युः कालज्ञानेन भाषि
तं मूत्रं पुरीषं वायुश्च समका
ले प्रजायते तदासौ चलितो
ज्ञेयो दशाहे म्रियते ध्रुवं पवे
चन्द्रप्रवाहश्च सर्वलाभजयस्त
था सूर्य्यचन्द्रप्रणाशेन स
द्यो मृत्युर्न संशयः अरुन्ध
ती ध्रुवश्चैव विष्णोस्त्रीणि प
दानि च आयुर्हीना न पश्यंति
चतुर्थं मातृमंडलं अरुन्धती
भवेज्जिह्वा ध्रुवो नासाग्रमुच्य
ते भ्रुवोर्मध्ये विष्णुपदं तारकं
मातृमंडलं नवध्रुवं सप्तमे
वा पंचतारा त्रिनासिका जिह्वा
मेकदिनं प्रोक्तं म्रियते मानवो
ध्रुवं कोणमक्ष्णोरंगुलीभ्यां तु
किंचित् पीडनिरीक्षयेत् य
दा न दृश्यते बिन्दुर्दशाहेन ज
नो मृतः इति कालज्ञानं ॥
इडा गंगेति विज्ञेया पिंगला
यमुना नदी मध्ये सरस्वती
विद्यात् प्रयागादिसमंततः
आदौ साधनमाख्यातं सद्यः
प्रत्ययकारकं बद्धपद्मास
नो योगी बन्धयेदुड्डियानकं पू
रकं कुंभकश्चैव रेचकश्च तृती

प्रसंगे दक्षिणे पिबा तमन्तेण
हापयेद्यस्तु मोहयेत् कामि
नी शतं सप्त नव त्रय पंच वारान्
संगस्तु सूर्य्यगे चन्द्रे हि तूर्य्य
षट् कृत्वा वश्या भवति कामि
नी सूर्य्यचन्द्रौ समाकृष्य सर्प्प
क्रान्त्या धरोष्ठयोः महापद्मे म
खं स्पृष्ट्वा वारं वारमिदं चरेत्
आप्राणमिति पद्मस्य यावन्नि
द्रावशं गता पश्चाज्जागृत वेला
यां चोष्यते गलचक्षुषी अने
न विधिना कामी वशयेत् स
र्व कामिनी इदं न वाच्यमन्य
स्मिन्नित्याज्ञा परमेश्वरि इति
रतिस्त्रीवश्यप्रकरणं अथ
गर्भप्रकरणं ऋतुकालभवा
नारी पंचमेऽह्नि यदा भवेत् सू
र्य्यचन्द्रमसोर्योगे सेवनात् पु
त्रसंभवः शंखवल्ली गवां दु
ग्धं पृथ्व्यापो वहते यदा भर्त्तुर
ग्रे वदेद्वाक्यं अंग्रे देहि त्रिभि
र्वचः ऋतुस्नाता पिबेन्नारी ऋ
तुदानं च योजयेत् रूपलावण्य
संपन्नो नरसिंहः प्रसूयते
सुषुम्ना सूर्य्यगा येन ऋतुदानं
च योजयेत् अंगहीनः पुमान् य
स्तु जायते क्रूरविग्रहः विषमा

के दिवा रात्रौ विषमांके दिना
धिपः चन्द्रनेत्राग्नितत्वेषु व
न्ध्या पुत्रमवाप्नुयात् ऋत्वारंभे
रविः पुंसां सुरतांते सुधाकरः
अनेन क्रमयोगेन नादत्ते दैव
दंडकः ऋत्वारंभे रविः पुंसां स्त्रि
याश्चैव सुधाकरः उभयोः सं
गमे प्राप्ते वन्ध्या पुत्रमवाप्नुया
त् प्रश्ने गर्भे कन्या तदा भवेत्
चन्द्रनाडी वहेत्
सूर्य्ये भवेत्तदा पुत्रो शून्ये ग
र्भो निहन्यते चन्द्रे स्त्री पुरुषः
सूर्य्ये मध्यमार्गे नपुंसकः गर्भ
प्रश्ने यदा दूतः तदा पुत्रः प्रजा
यते पृथ्व्यां पुत्री जले पुत्रः क
लकात प्रभंजने तेजसा गर्भ
पातः स्यात् नभस्यपि नपुंसकं
शून्ये शून्यं युगे युग्मं गर्भपा
तस्तु संक्रमे सूर्य्यभागे कृते
पुत्रश्चन्द्रवारेण कन्यका वि
षुवे गर्भपातः स्यात् भावी वा
प्यनपुंसकः तत्त्वविन्न विजा
नाति कथितं तत्र सुन्दरि य
र्भाधाने मारुते स्याच्चडुः स्त्री
दिशाव्याप्तो वारुणे सौख्य
युक्तः गर्भस्रावी स्वल्पजीवी
च वक्षोभोगी भव्यः पार्थि
वे नाथयुक्तः ॥



धनवान् सौख्यसंयुक्तो भोग
वान् गर्भसंस्थितः स्यान्नित्यं
वारुणेतत्त्वे व्योम्निगर्भं विद्
यते मादेयेषु सत्येन पति
वीरुणे दुहिता भवेत् योषेयु
गर्भहानिः स्यात् जातमात्र
स्य वामृतिः रविमध्यगतश्च
न्द्रश्चन्द्रमध्यगतोरविः ज्ञातव्य
गुरुतः शीघ्रं नविद्या शास्त्रको
टिभिः इतिगर्भप्रकरणं अ
थसंवत्सरप्रकरणं चैत्रशुक्ल
प्रतिपदि प्रातस्तत्त्वविभेदतः
पश्येद्विचक्षणो योगी दक्षिणे
चोत्तरायणे चन्द्रस्योदय वेला
यां वहमानेऽथ तत्वतः पृथि
व्यापस्तथा वायुः सुभिक्षं स
र्वशस्यजं तेजो व्योम्निभयं घो
रं दुर्भिक्षं कालतत्वतः एवंतत्व
फलं ज्ञेयं वर्षमासे दिनेतथा पृ
थिव्यादिक तत्वेन दिन मासा
द्युजं फलं शोभनंच तथा दुष्ट
व्योम मारुत वह्निभिः मध्य
मा भवति कृता दुष्टा च सर्व
कर्मसु देशभंग महारोग क्ले
शकष्टादिदुःखदा मेषसंक्रा
न्तिदिवसे स्वरभेदं विचारयेत्
संवत्सरफलं क्रयाल्लोकानां
तत्वचिंतकः सुभिक्षं राष्ट्रवृद्धिः
स्यात् वहुशस्या वसुन्धरा व
हुवृष्टि स्तथा सौख्यं पृथ्वी त
त्वंवहेद्यदि अतिवृष्टिः सुभिक्षं
स्यादारोग्यं सौख्यमेवच वहु
शस्या तथा पृथ्वी जलतत्वव
हेद्यदि दुर्भिक्षं राष्ट्रभंगः स्या
द्रोगोत् पत्तिस्तुदारुणा अस्य
दल्पतरा वृष्टिरग्नितत्वं वहे
यदि उत्पातोपद्रवा भीतिरल्प
वृष्टिः स्वरीतयः मेषसंक्रान्ति
वेलायां वायुतत्वं वहेद्यदि
उद्भ्रान्तोपद्रवा भीति रल्पा वृ
ष्टिः तितो भवेत् मेषसंक्रान्ति
वेलायां व्योमतत्वं वहेद्यदि
तत्रापि शून्यता ज्ञेया शस्या
दीनां सुखस्यच पूर्णे भवेश
नेस्थाने स्वस्वतत्वेन सिद्धिदः
सूर्यचन्द्रेऽन्यथा भूते संग्रहः
सर्वसिद्धिदः विषमे वह्नितत्व
स्य ज्ञायते केवलं नभः तत
कुर्याद्युक्त संग्राहं द्विमासे
च महार्घता स्वरज्ञानात्परं
पश्येल्लक्ष्मीपति स्तथा भवेत्
एकत्र शरीरं यस्य स्थाने तस्य
सदा भवेत् नाडीत्रयं विजाना
तितत्वज्ञाने तथैवच नैव ॥

यकः ज्ञातव्यो योगिभिर्नित्यं
देह संसिद्धि हेतवे पूरकः कु
रुते पुष्टी धातुसाम्यं तथैव
च कुंभकः स्तंभनं कुर्यात् जी
वरक्षा विवर्द्धनं रेचकोहरते
पापं कुर्याद्योगपदं व्रजेत्
पश्चात् संग्रामवत्तिष्ठेत् एमे
वन्धं चकारयेत् कुंभयेत् स
हजं वायुं यथाशक्त्याप्रयत्न
तः रेचयेत् चन्द्रमार्गेण सूर्ये
ण पूरयेत् सुधीः चन्द्रं पिव
ति सूर्यस्य सूर्यं पिवति चन्द्
माः अन्योन्यकालभावेन जीवे
दाचंद्रतारकं स्वीयांगे वहते ना
डी तन्नाडीरोधनं कुरु सुखवंध
मसुंचन् वैपवनं जायतेयुवा
सुखनासाक्षिकर्णानामंगुली
भिर्निरोधयेत्
तत्वोदय मिति ज्ञेयं संमुखीक
रणं प्रिये तस्य रूपं गतिः स्वा
दो मंडलं लक्षणंत्विदं योवेत्ति
वा नरो लोके सनु मूढोपि योग
वित् निराशी निर्मलो योगी
वित् न किंचिदपि चिंतयेत् वा
सना मुन्मनी कृत्वा कालंजय
ति लीलया विश्वस्य वेशिका
शक्ति नेत्राभ्यां परिदृश्यते ॥
तत्रस्थं तु मनो यस्य याममात्रं
भवेदिह तस्यायुर्वर्द्धते नित्यं
घटिकात्रिप्रमाणतः शिवे
नोक्तं पुरा तंत्रे सिद्धस्य गुणगो
चरं यद्वा पद्मासनस्थो गुदप
वनलयं संनिरुध्योर्द्ध सुच्चैः प्रा
ण रंध्रेण कुंभत्रय जितमनि
लं प्राणशक्त्या निरुध्य एकी
भूतं सुषुम्नाविवरमुपगतं ब्र
ह्मरंध्रे च नीत्वा निःक्षिप्याकाश
मार्गे शिवचरण रता यांति
ते केपि धन्याः एतज्जानाति यो
योगी एतत् पठति नित्यशः
सर्वदुःखै विनिर्मुक्तो लभते वां
छितं फलं स्वरज्ञानं शिरो य
स्य लक्ष्मीः करतले भवेत् एत
स्य शरीरे यस्य स्थावतस्य सदा भ
वेत् प्रणवः सर्ववेदानां ब्रा
ह्म भास्करो यथा मर्त्यलोके त
था पूज्यः स्वरज्ञानी ति तत्वज्ञा
नेतथैव च नैवतेन भवेत्तुल्य ल
क्षकोटि रसायनं एकाक्ष
र प्रदातारं नाडीभेदनिवेदकं
पृथिव्यां नास्ति तद्द्रव्यं य
द्दत्वा चानृणी भवेत् स्वर
स्तवं तथा ॥
ॐ श्रीपुमानपि नाडीत्रयंविजा



युद्धं देववर्षं त्रिय स्तथा ग
भीष्ट रोग कालाख्यं नवप्रक
रणान्वितं एवं प्रवर्त्तितं लोके
सिद्धिदं सिद्धयोगिभिः ॥
आचन्द्रार्कं ग्रही जीयात् पठ
नात् सिद्धिदायकं सत्यासने
समासीनं निद्रामाहार मल्पकं
चिंतयेत् परमात्मानं यद्वदेत
द्भविष्यति इति शिवगौरीसं
वादे नवप्रकरणान्वितपवन
विजयं नामस्वरोदयं समाप्त
स्वर्गः १ देवतानामालयः
तत् पर्य्यायः स्वः २ नाकः ३
त्रिदिवः ४ त्रिदशालयः ५ सु
रलोकः ६ द्यौः ७ द्यौ ८ त्रि
पिष्टपं ९ इत्यमरः मन्दरः १०
अवरोहः ११ गौः १२ रमतिः
१३ फलोदयः १४ इति जटा
धरः देवलोकः १५ स्वर्लो
कः १६ ऊर्द्धलोकः १७ सु
खाधारः १८ सौरिकः १९ शा
क्रभुवनं २० दिवानं २१ इति
शब्दरत्नावली तस्य गुणा हे
मायया सराक रुवाच.
स्वर्गस्य मे गुणान् ब्रूहि सा.
मतं द्विजसत्तम पतत सर्वं.
द्विजसत्तम पतत सर्वं
द्विजश्रेष्ठ करिष्यामि न ॥

संशयः जैमिनि रुवाच तत्र
नादीनि दिव्यानि रम्याणि वि
विधानि च तत्रायानानि पुण्या
नि सर्वकामप्रभानि च सर्वका
मफलै र्युतैः शोभितानि सम
ततः विमानानि सुदिव्यानि
परितान्यप्सरोगणैः सर्वत्रै
व विचित्राणि कामगानि सु
कामालंकृतानि च चन्द्रमंडल
शुभ्राणि हेमशय्यासनानि च
सर्वकामसमृद्धाश्च सुखदुःख
विवर्जिताः नरा सुकृतिनस्त
त्र विचरंति यथासुखं न तत्र ना
स्तिका यांति न स्तेया नाजिते
न्द्रियाः न नृशंसा न पिशुनाः
कृतघ्ना न च मानिनः सत्यास्त
पः स्थिताः शूरा दयावंतः क्षमा
पराः यज्वानो दानशीलाश्च त
गच्छंति तेनराः न रोगो न जरा
मृत्यु र्न शोको न हिमादयः न
तत्र क्षुत् पिपासा च कस्यग्लानि
र्न दृश्यते एतेचान्येच बहवो गु
णाः सन्ति च भूपते ॥
दोषास्तत्रैव ये संति तान् शृणु
ष्व समाहितः शुभस्य कर्म
णः कृतस्य फलं तत्रैव भू
ज्यते ॥ न॥

चात्र क्रियते भूयः सोऽत्रदो
षो महान् अतः असंतोषश्च
भवति दृष्ट्वा दीप्तां परश्रियं
संप्राप्ते कर्मणामंते सहसा
पतनं तथा इहयत् क्रियते कर्म
फलं तत्रैव भुंजते कर्मभूमि
रियं राजन् फलभूमिरसौस्मृ
ता इति पाद्मे भूखंडे ९० अध्या
यः अन्यत् वह्निपुराणे शिवे
रूपाख्याननामाध्याये मान
से १०३ १०४ अध्याययोरपि
द्रष्टव्यं अपिच स्कन्द उवाच
शृणु राजन् प्रवक्ष्यामि त्रैलो
रद्भुतकर्मणः विराड्रूपस्य संस्था
नमाख्यानं महदद्भुतं यावती
भूः सप्तद्वीपा समसुद्राद्रिका
नना प्रतिभाता महाराजा किर
णैश्चन्द्रसूर्ययोः
वियच्च तावदुपरि विस्तार
परिमंडलं पंचविंशतिको
स्य योजनानां ततस्ततं
नवतीनां सहस्राणि योजना
नि महीपते भूमेरूर्द्धं च लोका
नां सिद्धचारणरक्षसां येच वि
द्याधरा यक्षरक्षो गन्धर्व कि
न्नराः भूत प्रेत पिशाचाश्च ते
षां तत्स्थानमीरितं ततो ॥ ॥

राक्षस महावाहो त्रयोदशसह
स्रकं योजनानां प्रविस्तारं
मंडलं तस्य कथ्यते स्मरन् वै
रं पुरा प्राप्तं यः पर्वणि महाग्र
हः ग्रासाय धावति क्रोधात्
पुष्पवन्तौ महीपते तदेव भग
वच्चक्रं सहस्रार्कोपमद्युति उ
पतिष्ठति तद्भीत्या पुनरेव निवर्त्त
ते उपरागं वदंत्येवं पुण्यकाल
स्य कथ्यते लक्षयोजनतोभा
नुर्भूमेरप्यवस्थितः भानोः स
काशादुपरि लक्षेलक्ष्यं तथा
करः नक्षत्रमंडलं चन्द्राल्ल
क्षयोजनमुच्छ्रितं नक्षत्रमं
डलात् सोम्यउपरिष्टाद्द्विलक्षतः
बुधात् शुक्रो द्विलक्षेण शुक्रा
च्चैमो द्विलक्षके मंगलादुपरि
ष्टाच्च गीष्पति र्लक्षकद्वये
द्विलक्षयोजनात् सौधः सौरि
र्देवगुरोद्विलात् राजानुलक्ष्मु
क्ष्याये सौरेः सप्तर्षिमंडलं
सप्तर्षिभ्यः सहस्राणां शताद्
र्द्धं ध्रुवास्थितिः पादगम्यं हि य
त् किंचिद्वस्तु स्थिरचरात्मकं
तद्भूर्लोक इति ख्यातं शाक
द्वीपादि काननं भूर्लोकाच्च भु
वर्लोकः सूर्यावधि॥



रुद्रीरितः आदित्यादाध्रुवं त
जन् स्वर्लोकः कथ्यते बुधैः
महर्लोकः स्थिते ऊर्द्धमेकको
टिप्रमाणतः कोटिद्वये वर्त्त
मानोजनो भूर्लोकतोनृप उ
परिष्टात् तिस्रष्टो कोटयः
सत्यमीरितं सत्याद्रुपरि वैकु
ण्ठो योजनानां प्रमाणतः भू
र्लोकात् परिसंख्यातः कोटि
रष्टादशप्रभा यत्रास्ते श्रीप
तिः साक्षात् सर्वेषामभयप्रदः
वैकुण्ठादन्तरे शैवो लोकः षो
डशकोटयः तिर्य्यग्गेवम हा
राज कैलासाख्यस्तु पर्वतः
पार्वत्या सहितः शंभुर्यत्रास्ते स्व
गणैर्वृतः इति पाद्मे स्वर्गखण्डे
भुरादिलोकवर्णनं ९ अथाय
स्वर्गस्वरूपं कर्मविशेषेण स्व
र्गविशेषगमनं च यथा सूत
उवाच स्वर्गस्थानं महापुण्यं
प्रोच्यमानं निबोध मे भारते कृ
तपुण्यानां देवानामपि चाल
यं मध्ये पृथिव्या मद्रीन्द्रो भास्वा
न् मेरु र्हिरण्मयः योजनानां
सहस्राणि चतुरशीतिः समुच्छ्रि
तः प्रविष्टः षोडशाधस्ताद्धरण्याध
रणीधरः तावत् प्रमाणं पृथिवी

पर्वतस्य समंततः तस्य शृंगत्र
यं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः
नानाद्रुम लताकीर्णं नानार
त्नोपशोभितं मध्यगं पश्चिमे
पूर्वे मेरोः शृंगाणि त्रीणि वै
मध्यतोश्रितमात्राणि हे शृंगे
तस्य मध्यतः मध्यस्थं स्फाटिकं
शृंगं वैडूर्य्यकरकामयं इन्द्रनी
लमयं पूर्वं माणिक्यं पश्चिमस्य
ते योजनानां सहस्राणि नियु
तानि चतर्दश उच्छ्रितं मध्य
गं शृंगं स्वर्गो यत्र प्रतिष्ठितः
प्रयुतानीरितं शृंगं मूर्द्धि च्छत्रा
कृतिस्थितं पूर्वपश्चिमशृंगा
णं सकलं मध्यमस्य च त्रिविष्ट
पेनाकपृष्ठो अप्सरः शांति नि
र्वृती आनन्दोथ प्रमोदश्च स्व
र्गाः शृंगे च मध्यमे श्वेतश्च पौ
ष्टिकश्चैव उपशोभनमन्मथो
आह्लादः स्वर्गराजश्च स्वर्गाः शृं
गेतु पश्चिमे निर्म्मलो निरहंका
रं सौभाग्यश्चाति निर्मलः सौ
ख्यश्च निर्वृतिश्चैव पुण्याहश्च
तथा द्विज स्वर्गा श्चैते द्विजश्रेष्ठ
पूर्वशृंगे समाश्रिताः एक विंश
तिये स्वर्गा निविष्टा मेरुमूर्द्धनि
अहिंसादानकर्त्तारो यज्ञा ॥ ॥

नांतपसां तथा तेषु तेषु वसं
ति सज्जनाः क्रोधविवर्जिताः
जलप्रवेशी चानन्दं प्रमोदं
वह्निसाहसः भृगुप्रपाते सौ
ख्यस्तु रणे चैवास्य निर्म्मलः
अनशने तु संवासे मृतो गच्छे
त्रिविष्टपं क्रतुयाजी नाकपृ
ष्ठमग्निहोत्री च निर्वृतिं तडाग
कूपकर्त्ता च लभते पौष्टिकं
द्विज सौवर्णदायी सौभाग्यं ल
भेत् स्वर्गं महातपाः शीतका
ले महावह्निं प्रज्वालयति यो
नरः सर्वसत्वहितार्थाय स्वर्गं
चाप्सरसं लभेत् हिरण्य गोप्र
दानेन निरहंकार माप्नुयात्
भूमिदानेन शुद्धेन लभते शां
तिकं पदं रौप्यदानेन शुद्धेन स्व
र्गं गच्छति निर्म्मलं अश्वदानेन
पुण्याहं कन्यादानेन मंगलं
द्विजेभ्य स्तर्पणं कृत्वा दत्वा व
स्त्राणि भक्तितः श्वेतं तु लभ
ते स्वर्गं यत्र गत्वा न शोचति
कपिलागोप्रदानेन परार्द्धं वा
नुभूयते गोवृषस्य प्रदानेन
स्वर्गं मन्मथमश्नुते माघमासे
सरित् स्नायी तिलधेनुप्रदस्त
था छत्रोपानद्दाता च ॥ ॥

स्वर्गं यात्युपशोभनं देवायतनक
र्त्ता वै शुश्रूषणपरस्तथा तीर्थया
त्रापरश्चैव स्वर्गराजे महीयते एकान्नभो
जी च नित्यशः उपवा
सी त्रिरात्राद्यैः शांतिस्वर्गं शु
भं लभेत् सरित्स्नायी जितक्रो
धो ब्रह्मचारी दृढव्रतः निर्म
लं स्वर्ग माप्नोति तथाभूत
हिते रतः विद्यादानेन मेधा
वी निरहंकार माप्नुयात् ॥
येन येन हि भावेन यद्यद्दानं
प्रयच्छति तत्तत् स्वर्गमवाप्नो
ति यद्यदिच्छति मानवः यस्तु
सर्वाणि दानानि ब्राह्मणेभ्यः प्र
यच्छति समाप्य न निवर्त्तते दि
वं शांत मनामयं शृंगेतु प
श्चिमे यत्र ब्रह्मा तत्र स्थितः स्व
यं पूर्वशृंगे स्वयं विष्णु र्मध्ये चैव
शिवः स्थितः अतः परं तु वि
प्रेन्द्र स्वर्गोद्यान मिमं शृणु
विमलं विपुलं शुद्धं शुभ
मुपरि संस्थितं प्रथमे नंद
मारस्तु द्वितीये मातरः स्थिताः
तृतीये सिद्ध गंधर्वा स्तुर्य्ये वि
द्याधरा द्विज पंचमे नागराज
स्तु षष्ठे तु विनतासुतः सप्त
मे दित्या ॥ ॥



पितरो धर्मराज स्तथाष्टमे न
वमेवतथा दश आदित्या दश
मेपपि भूर्लोकाच्छतसाहस्र
मूर्द्धं चरति भास्करः योजनानां
सहस्रे द्वे विष्कंभेन समन्वितः
त्रिगुणः परिणाहेन सूर्य्यबिंब
प्रमाणतः सोमसूर्य्यौ विभाव
र्य्यांमध्याह्नेवार्य्यमा यदा महे
न्द्रस्यामरावत्यां तत स्तिष्ठति भा
स्करः मध्याह्ने त्वमरावत्यां य
दा भवति भास्करः मध्याह्नेत्व
मरावत्यां यदा भवति भास्करः
तदा संयमनेयाम्ये तदोद्यं स्त
मदृश्यते मेरुं प्रदक्षिणं ऊर्व
न् भात्येवं सविता सदा ध्रुवाधार
रथे तिष्ठन् वालिखिल्यादिभिः
स्तुतः सूर्य्यमंडलमानाद्द्विगुणं
सोममंडलं पूर्णे शतसहस्रेतत
स्मान्नक्षत्रमंडले द्विलक्षेत वुधस्या
पिस्थानं नक्षत्रमंडलात् तावत्
प्रमाणभागे त्वबुधस्याप्युशना
स्थितः अंगारकोपि शुक्रस्यता
वन्मानेव्यवस्थितः लक्षद्वयेन भौम
स्यस्थितो देवपुरोहितः शौरिर्द्वि
पाते स्थोर्द्धं द्विलक्षेनव्यवस्थि
तः तस्मात्स्थाने स्वराहूर्द्धं लक्षे स
प्तर्षिमंडलं सप्तर्षिमंडलादूर्द्धं मेक

लक्षे ध्रुवः स्थितः मेधीभूतः
समस्तस्य ज्योतिश्चक्रस्य सत
मभास्वांस्तपति विप्रेन्द्र ऊर्द्धं ॥
किरणरश्मिभिः कालसंख्यां
त्रिलोकस्य स करोति युगे युगे
जनस्तपस्तथा सत्यमेतान्लो
कान् द्विजास्तथा ब्रह्मणो मु
निपाहूल विलुप्ताक्लिविदीपि
तः ऊर्द्धं गते द्विजश्रेष्ठ रश्मि
भिस्तपते रविः अधोगतैस्तु
भूलोकं द्योतते दीप्तदीधितिः
तमःपापहरः सूर्य्यः कर्त्ता त्रि
भुवनस्य च छत्रवत् परिट
येपत मंडलान्मंडलं चरन् द्वि
गुणेन च विस्तीर्णं भूतलान्त
तमप्रतिष्ठितं आदित्यमंडलाध
स्तात् भुवर्लोकः प्रतिष्ठितः
तदधस्तात्तु विप्रेन्द्र भूर्लोकः
संप्रतिष्ठितः एवमेतत्त्रिभुव
नं विप्रकायेव्यवस्थितं त्रैलो
क्यस्यैश्वरत्वंच विप्रदत्तं शत
क्रतोः लोकपालैश्च सहितो
लोकान् रक्षति धर्मतः वसन्
स्वर्गेमहाभाग देवेन्द्रः सत
कीर्त्तितः अतो धस्ताद्द्विजश्रे
ष्ठ पातालं सप्तयथाक्रमं न तत्र
तपते सूर्य्योन रात्रिर्नेनिशा

करः दिव्यं रूपं समास्थाय त
पंते सततं जनाः पातालस्थाः
द्विजश्रेष्ठ दीप्यमानाः स्वतेज
सा स्वर्लोकान्महर्लोकाज्जम
हर्लोकः कोटिमाने व्यवस्थितः
ततो योजनमानेन द्विगुणे मं
डलेतु जनलोकस्थितो विप्र प
चमा मुनिसेवितः तस्योपरि
तपोलोक स्त्रिभिः कोटिभिः
स्थितः सत्यलोकोष्टकोटीभिः
सर्वेषामुपरिस्थितः सर्वेष्ठ
त्राकृति स्तैया भुवना भुवनो
परि ब्रह्मलोकाद्विस्तलोकोद्वि
गुणेन व्यवस्थितः वाराहेन
समाहात्म्यं कथितं लोकचिं
तकैः ततः परं द्विजश्रेष्ठ ततो
ण्डकपालकं ब्रह्मांडात्परत
तः साक्षात् निर्लेपः पुरुषः ।
स्थितः यमपाशविमुक्तेतत
पोज्ञानसमन्विताः इतितेसं
स्थितिः प्रोक्ता भुगोलस्य म
यानघ यस्त्वसम्यगिमां वेत्ति
सयातिपरमांगतिं इतिनृसिंह
पुराणे [illegible] अध्यायः
पारिभाषिकस्वर्गो यथा मनोज्ञ
कूलाः सुमदा रूपवत्यः स्वलं
कृताः वासःप्रासादपृष्ठेषुस्वर्गः

स्याच्छुभकर्मणः इति गारुडे
१९ अध्यायः न्यायमतेस्वर्ग
लक्षणं यथा दुःखासंभिन्न
त्वादिविशिष्टसुखत्वं तदेव स्व
र्गपदशक्यतावच्छेदकमिति
सिद्धांतः आदिपदेन अनंतर
दुःखग्रस्तभिन्नत्वाभिलाषो
पनीतत्वयोः परिग्रहः अ
तएव यन्नदुःखेन संभिन्नं न
चग्रस्त मनंतरं अभिलाषो
पनीतं यत् तत् सुखं स्वःप
दास्पदं इति स्वरादिपदशक्ति
ग्राहकार्थवादोपि संगच्छते
इति गदाधरभट्टाचार्य्यकृतवा
दार्थः किंच मनः प्रीतिक
रः स्वर्गोनरक स्तद्विपर्य्यय
नरकस्वर्ग संज्ञे वै पापपुण्ये
द्विजोत्तमाः इति ब्रह्म पुरा
णे १९ अध्यायः
स्वर्गगामी त्रि स्वर्गगमनक
र्त्ता यथा सर्वहन्तोविदितात्मा
येचसर्वंमहानराः सर्वेस्यप्रिय
भूताश्च तेनराः स्वर्गगामिनः
इति कर्मलोचनं
स्वर्गंगा स्त्री मन्दाकिनी इति
शब्दरत्नावली
स्वर्गजित् त्रि स्वर्गजेता स्वर्ग

धातूर्ध्वक जिधातोः क्विप्प्र
त्ययेननिष्पन्नः ॥
स्वर्गपतिः पुं इन्द्रः इति हेम
चन्द्रः ॥
स्वर्गलोकेशः पुं शरीरं इति
जटाधरः इन्द्रश्च ॥
स्वर्गवधूः स्त्री अप्सरसः इति
हेमचंद्रः ॥
स्वर्गसरिद्वरा स्त्री गंगा इति
राजनिर्घंटः ॥
स्वर्गापगा स्त्री गंगा इति हे
मचन्द्रः
स्वर्गिगिरि पुं सुमेरुः इति
स्वर्गिगिरिः हेमचंद्रः स्वर्गिवधूः स्त्री
अप्सरसः इतिहेमचंद्रः
स्वर्गी पुं देवता इति त्रिका
ण्डशेषः स्वर्गगामिनि त्रिलं
लक्षणं यथा दया भूतेषु संवा
दो परलोकं प्रति
क्रिया
सत्य पराहिता चोक्ति वेदप्रा
माण्यदर्शनं ॥
गुरुदेवर्षिपूजा च केवलं सा
धुसंगमः सत् क्रियाभ्या
सनं मैत्री स्वर्गिणां
लक्षणं विदुः इति गारुडे
२२५ अध्यायः ॥
स्वर्गौकाः पुं देवता इति
हलायुधः ॥
स्वर्ग्यः त्रि स्वर्गीयः स्वर्गशब्दा
त्यप्रत्ययेन निष्पन्नः ॥
स्वर्जिकः पुं सर्जिकाक्षारः इति
राजनिर्घंटः यवक्षारः यथा
पाक्यः क्षारो यवक्षारो पाक्यसू
को यवाग्रजः स्वर्जिकोपिस्व
तः क्षारः कापोतः सुखवर्च्च
कः कथितः स्वर्जिकाभेदो
विशेयज्ञैः स्ववर्चिका वह्निदी
पनः निहंति मूलं वातामश्लेष्म
श्वासगलामयान् स्वर्जिका
ल्पगुणा तस्मात् विशेषात्
गुल्मशूलहृत् सुवर्चिका स्व
र्जिकावत् बोद्धव्या गुणतोज्ज
नैः इतिभावप्रकाशः ॥
स्वर्जिकाक्षारः पुं स्वर्जिक्षारः
साचिक्षारः पुं स्वर्जिक्षारः
साविक्षारः इति भाषा प्रसः ।
गुणाः यवक्षारो जयेदर्शः
श्वासान् वातकफामयान्
गुल्महृद्ग्रहणी पांडु प्लीहा
नाहगलामयान् तस्मादल्पा
तरगुणाः स्वर्जिकाक्षारउच्यते
इति राजवल्लभः ॥
स्वर्जिक्षारः पुं सर्जिकाक्षारः
तत्पर्य्यायः स्वर्जिकः २ क्षारः

३ स्वर्जी ४ स्वर्जिकः ५ स
वर्चिकः ६ सुवर्चिः ७ सुव
र्च्ची ८ अस्य गुणाः पटुत्वं
कटुत्वं तीक्ष्णत्वं वातकफा
र्तिनाशित्वं गुल्माध्मान कृमि
व्रण जठरदोषनाशित्वंच इति
राजनिर्घंटः ॥
स्वर्जिकाक्षारः पुं सर्जिक्षारः
साचिक्षार इति भाषा प्रसः ॥
गुणाः यवक्षारो जयेदर्शः श्वा
सान् वातकफामयान् गुल्म
हृद्ग्रहणी पांडु प्लीहानाहग
लामयान अस्मादल्पांतरगुणाः
सर्जिकाक्षार उच्यते इति
राजवल्लभः
स्वर्जी पुं स्वर्जिक्षारः इति
राजनिर्घंटः ॥
स्वर्णं क्ली सुवर्णं धुस्तूरः
इत्यमरः गौरसुवर्णशाकं
नागकेशरं इति राजनिर्घंटः
स्वर्णस्योत्पत्तिर्यथा एक
दासर्वदेवाश्च समूषं स्वर्गसं
सदि तत्र कृत्वा च नृत्यं च गा
यंत्यप्सरसा गणाः विलोक्य
रंभां सुश्रोणीं सकामो वह्नि
र्व च पपात वीर्य्यं वस्त्राद्गल
ज्जयावायसस्तथा उतस्यौस
णं पुंजस्य वस्त्रे तिस्मज्ज्वलत्प्रभः
तेनेनवर्द्धयामास सुमेरुं व
भुवह हिरण्यरेतसं वह्निप्रव
दंति मनीषिणः इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे १३
अध्यायः तस्य गुणाः सुवर्णं
तिक्तं मधुरं कषायं गुरु लेखनं
हृद्यं रसायनं बल्यं चक्षुष्यं कां
तिदं शुचि आयुर्मेधावयः
स्थैर्य्य वाग्विशुद्धिस्मृतिप्रदं
हृद्योन्मादगदार्तानां शमनं
परमुच्यते इति राजवल्लभः
सुवर्णस्य शोधनमारणविधि
र्यथा मारणाय यथा स्व
र्णमादौ दाहे रक्तं सितं छेदे
निकषे कुंकुमप्रभं तारशु
ल्वोज्झितं स्निग्धं कोमलगु
रु हेमसत् सत्तउत्तमं तच्छ्वे
तं कठिनं रूक्षं विवर्णं समलं
दलं दाहे छेदे सितं श्वेतं क
षे स्फुटलघुत्यजेत्
अथ शोधनविधिः पत्रली
कृतपत्राणि हेम्नो वह्नौ प्र
तापयेत् निषिंचेत्तप्ततप्तानि
तैले तक्रे च कांजिके गोमू
त्रे च कुलत्थानां कषाये त्रि
धा त्रिधा एवं हेम्नः परे ॥॥




यांच धातूनां शोधनं भवेत्
अथास्य शुद्धस्य स्वर्णस्य दोषमा
ह । बलं सवीर्य्यं हरते नरा
णां रोगव्रजं पोषयतीह
काये असौख्यकार्य्यं च सदा
स्वर्णमशुद्धमेतन्मरणं च कु
र्य्यात् । अथ स्वर्णमारणवि
धिः स्वर्णस्य द्विगुणं सूतम
म्लेन सह मर्द्दयेत् तद्गोलकसमं
गन्धं निदध्यादधरोत्तरं स्वर्ण
स्य अतितनूकृतपत्रस्य गन्धं
गन्धकचूर्णं गोलके च ततो
रुद्ध्वा सरावसम्पुटे त्रिंशद्व
नोपलैर्द्दद्यात् पुटान्येवं चत
र्द्दश निरुत्थं जायते भस्मग
न्धोदेयः पुनः पुनः रुद्ध्वा स्व
र्णं अटति विक्रमामृतिकया
वनोपलः गोइठा इति लोके
निरुत्थं यत् पुनर्नजीवति
अथान्यप्रकारः काञ्चने गलि
ते नागं षोडशांशेन निःक्षिपे
त् चूर्णयित्वा तथाम्लेन घृष्ट्वा
कृत्वा तु गोलकं गोलकेन स
मं गन्धं दत्वा चैवाधरोत्तरं स्था
लसम्पुटे धृत्वा पुटे त्रिंशद्वनो
पलैः एवं सप्तपुटैः हेमनिरु
त्थं भस्म जायते अत्रापि ॥

पूर्ववद्गन्धः प्रदातव्यः पुनः पुनः
काञ्चनारिरसैर्घृष्ट्वा समसूत
कगन्धयोः कज्जली हेमपत्रा
णि लेपयेत् समयात्तया का
ञ्चनारित्वचः कल्कैर्मूषायुग्मं
प्रकल्पयेत् धृत्वा तत्सम्पुटे गो
लं सन्धिं रुद्ध्वा सम्पुटे च तत् निधा
य सन्धिरोधं च कृत्वा सम्यक्
गोलकं वह्निं खरतरं कुर्य्यादे
वं दद्यात् पुटत्रयं निरुत्थं जा
यते भस्म सर्वकर्म्मसु योजयेत्
काञ्चनारिप्रकारेण लाङ्गली
हन्ति काञ्चनं लाङ्गलीकरि
हारी ज्वालामुखी तथा हन्या
त्तथा हन्ति मनःशिला शिला
सिन्दूरयोर्चूर्णसमयोरर्कदु
ग्धकैः सप्तधा भावना दद्या
च्छोषयेच्च पुनः पुनः ततस्तु
गलिते हेम्नि कल्कोऽयं दीयते
समः पुनर्द्धमेदतितरां यथा
कल्को विलीयते एवं वेलात्र
यं दद्यात् कल्कं हेम्नः ततो भ
वेत् एवं मारितस्य स्वर्ण
स्य गुणाः स्वर्णं शीतलं वृष्यं
बल्यं गुरु रसायनं स्वादु तिक्तं
च तुवरं पाके च स्वादु पिच्छिलं
पवित्रं बृंहणं नेत्र्यं मेधा ॥

स्मृतिमतिप्रदं हृद्यमायुष्करं
कान्ति वाग्विशुद्धि स्थिरत्वकृ
त् विषद्वय क्षयोन्माद त्रिदोष
ज्वरशोषजित् दृष्यं तृषाय
कामुकामदितं असम्यक् मारितं
स्वर्णं बलं वीर्य्यं च नाशयेत्
करोति रोगान्मृत्युं च तद्धन्या
द्यत्नतस्ततः इति भावप्रकाशः
अन्यत् स्वर्णशब्दे द्रष्टव्यं स्व
र्णकणः पुं कणगुग्गुलुः इ
ति राजनिर्घण्टः स्वर्णकणा
च स्वर्णकणिका स्त्री कनककणा
यथा कुर्वन्त्याः सरसि स्नाने पार्व
त्यास्तु शरीरजाः निःसृताः स्व
र्णकणिकास्ता वहन्ति जले
रिमाः इति कालिकापुराणे
८२ अध्यायः ॥
स्वर्णकायः पुं गरुडः इति
हेमचन्द्रः स्वर्णमयशरीरे
त्रिः स्वर्णकारः पुं जातिविशेषः
सेकरा इति भाषा तत्पर्य्यायः
नाडीन्धमः २ कलादः ३
रुक्मकारः ४ इत्यमरः कणा
दः ५ इति तट्टीकासारसुन्दरी
हेमलः ६ इति जटाधरः तस्यो
त्पत्तिर्यथा विश्वकर्म्मा च
शूद्रायां वीर्य्याधानं चकार

सः ततो बभूवुः पुत्राश्च नवै
ते शिल्पकारिणः मालाका
रः कर्म्मकारः शङ्खकारः कुवि
न्दकः कुम्भकारः कंसकारः ष
डेते शिल्पिनां वराः सूत्रधार
श्चित्रकरः स्वर्णकारस्तथैव
च पतितास्ते ब्रह्मशापादया
ज्यावर्णसङ्कराः स्वर्णकारः स्व
र्णचौर्य्यात् ब्राह्मणानां द्विजो
त्तम बभूव सद्यः पतितो ब्रह्मशा
पेन कर्म्मणा इति ब्रह्मवैवर्त्ते
ब्रह्मखण्डे १० अध्यायः ॥
तस्य कर्म्मविपाको यथा तैल
चौरस्तैलकीटो मूर्द्धिकीट
स्त्रिजन्मकं ततो भवेत् स्वर्ण
कारो जन्मैकं दुष्टमानसः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ८५ अध्यायः ॥
स्वर्णकृत् पुं स्वर्णकारः इति
शब्दमाला
स्वर्णकेतकी स्त्री हरिद्रावर्ण
केतकीपुष्पं तत्पर्य्यायः हे
मकेतकी २ कनकप्रसवा ३
हैमी ४ छिन्नरुहा ५ विष्ट
रुहा ६ स्वर्णपुष्पी ७ काम
खड्गदला ८ अस्या गुणाः के
तकीकुसुमं वर्ण्यं केशदौर्गन्ध्य
नाशनं ॥




हेमाभं मदनोन्मादवाफलं
सौख्यकारि च तस्याः स्तनो
ति शिशिरः कटुः पित्तकफा
पहः रसायनकरो वर्ण्यो दे
हदार्ढ्यकरः परः इति राजनिर्घं
टः स्वर्णगैरिकं क्ली स्वर्ण
गैरिकं वर्णकुमाटी इति भा
षा इति राजनिर्घंटः अस्य विव
रणं गैरिकभेदशब्दे द्रष्टव्यं स्व
र्णग्रीवा स्त्री नाटकशैलपूर्वभा
गात् निःसृता नदीविशेषः यथा
यानिःसृता पूर्वभागात्
तस्माद्गिरिवरात् नदी स्वर्ण
ग्रीवेति विख्याता सा गंगास्न
द्दशीफले इति कालिकापुरा
णे ८२ अध्यायः
स्वर्णचूडः पुं पक्षिविशेषः य
था चाषः कीकीदिविः स्वर्णचू
डोऽथ पीतमुंडकः इति जटा
धरः ॥
स्वर्णजं क्ली वंगं यथा वंगं
त्रपुः स्वर्णजनागजीवने स
ङ्गः वंगे गुरुपत्रपिच्चटे स्या
च्चक्रसंज्ञं तमरं च नागजं क
स्तीरमालीनकसिंहले अपि
इति हेमचन्द्रः
स्वर्णजीवन्ती स्त्री वृक्षवि
शेषः ॥

शेषः सोनाजीव इति हिन्दीभा
षा तत्पर्यायः हेमाह्वा २ हेम
जीवन्ती ३ तृणग्रंथिः ४ हिमा
श्रया ५ स्वर्णपर्णी ६ सुजीवं
ती ७ स्वर्णजीवा ८ सुपर्णिका
९ हेमपुष्पा १० स्वर्णलता ११
हेमवल्ली १२ हेमलता १३ अस्या
गुणाः वृष्यत्वं मधुरत्वं चक्षुष्य
त्वं शिशिरत्वं वातपित्तास्रदाह
नाशित्वं बलवर्द्धनत्वं च इति॥
राजनिर्घंटः ॥
स्वर्णदी स्त्री मन्दाकिनी इत्य
मरः वृश्चिकाली इति राजनिर्घं
टः सितगंगा सा तु कामाख्या
याः पूर्वभागे दिक्करवासिन्याः प
नद्याः स्वर्णश्रियाः पूर्वं नदी कामा
ख्या तथा कामाख्यायाः पू
र्वभागे नदी सोमासना कथ्या
सोमासनायाः पूर्वस्यां नदी
नाम्ना वृषोदका ततः पूर्वे
कामरूपपीठान्ते जगतां प्र
सूः जगन्माया महामाया दे
वी दिक्करवासिनी एताया
कथिता नद्यः सकला दक्षि
णस्रवाः तासु स्नात्वा च स्व
र्गलोकमवाप्नुयात् प्रान्ते
दिक्कर ॥

वासिन्याः सदा वहति स्वर्ण
दी सितगंगाख्या लोके स्नात्वा
तु गंगाफलमदा साभूमिपीठ
संस्थानु देवी दिक्करवासिनी
श्वेतजलैः प्लावयन्ती याति
प्रत्यक्ततां स्वैः सितगंगाज
ले स्नात्वा सद्गृशांभुं हरिं विधिं
इष्ट्वा ललितकान्ताख्यां पुन
र्योनौ न जायते इति कालि
कापुराणे ८२
अध्यायः ॥
स्वर्णदीधितिः पुं अग्निः इति
त्रिकाण्डशेषः स्वर्णद्रुः पुं आरग्व
धः इति राजनिर्घंटः स्वर्णपक्षः पुं गरुडः
इति त्रिकाण्डशेषः
स्वर्णपद्मा स्त्री स्वर्गंगा इति
शब्दरत्नावली ॥
स्वर्णपाठकः पुं टंकणः
इति शब्दमाला ॥
स्वर्णपारेवतं क्ली महापारे
वतं क्ली महापारेवतं इति
राजनिर्घंटः ॥
स्वर्णपुष्पः पुं आरग्वधः चं
पकः इति राजनिर्घंटः चं
पकपुष्पे विष्णुपूजाफलं
यथा माघे चंपकपुष्पेण ।
योऽर्च्चे ॥

येत् कमलापतिं स गच्छेत् पर
मं धाम विमुक्तः सर्वपातकैः
यावन्ति सर्वपुष्पाणि दीयन्ते च
क्रपाणये तावद्युगसहस्रा
णि स्थीयते विष्णुमन्दिरे
मेरुतुल्यसुवर्णानि दत्वा भ
वति यत्फलं एकेन स्वर्णपु
ष्पेण दत्वा भवति तत्फलं स्व
र्णपुष्पं विप्रेन्द्र सर्वदा केशव
प्रियं माघे मासि विशेषेण पवि
त्रं केशवार्च्चने स्वर्णकुसुमै
र्दिव्यैर्येन नाराधितो हरिः
रत्नैः हीनः सुवर्णाद्यैः सम्भवे
ज्जन्मजन्मनि इति पाद्मे क्रिया
योगसारे ९ अध्यायः वाचस्
पतिः इति शब्दचन्द्रिका स्वर्ण
पुष्पा स्त्री कलिकारी सु
र्णली सातला इति राजनिर्घंटः
स्वर्णपुष्पी स्त्री आरग्वधः
इति शब्दचन्द्रिका
स्वर्णकेतकी ॥
इति राजनिर्घंटः ॥
स्वर्णफला स्त्री पीतरम्भा इ
ति राजनिर्घंटः ॥
स्वर्णवणिक् पुं वर्णसंकर
जातिविशेषः सोनारवेने इति
भाषा तस्य कर्मविपाको
यथा ॥



तैलचौर स्तैलस्तकीटो मूर्द्धि
कीट स्त्रिजन्मकं ततोभवेत्
स्वर्णकारो जन्मैकं डुष्टमान
सः नमः कुंडे वर्षशतं स्थित्वा
स्वर्णवणिक् भवेत् जन्मैकं
च डुराचारो जन्मैकं करणो
भवेत् विस्सैकलिपिकर्त्ता च
भवदाव हेनं हरेत् काय
स्थेनोदरस्थेन मातर्मांसेन न
ख्यादिते तत्रनास्तिकृपातस्य
देताभावेन केवलं स्वर्णका
रं स्वर्णवणिक् कायस्थश्च
व्रजेश्वर नरेषुमध्ये तेधूर्त्ताः
कृपाहीना महीतले हृदयेत
रथारामं तेषांच नास्तिसादरे
शाभेषुसज्जनः कोपिकापस्था
नेतरोवत्तौ इति ब्रह्मवैव
र्त्तेश्रीकृष्णजन्मखंडे ८५
अध्यायः ॥
स्वर्णभृंगारः पुं स्वर्णभृंगारा
जः इति राजनिर्घंटः स्वर्ण
कलसश्च ॥
स्वर्णमहा स्त्री नदीविशेषः य
था तत्रोमायाः शरीरात्संस्र
वेतिजलैः सह ततः स्वर्णम
हानाम स्वर्णश्रीः सर्वतोऽधि
कापतासचैत्रमासे तुस्नात्वा
मर्त्यो नरर्षभ कृतपदेव तद्ट
ष्णं त्रिकालं यश्च मानवः
चिरं शिवगृहे स्थित्वा शेषे
व्रह्मगृहे व्रजेत् भुक्तावत्भूतं
पश्चात् सार्वभौमो नृपो भवे
त् इति कालिकापुराणे ८२
अध्यायः ॥
स्वर्णमाक्षिकं क्लीं स्वनामख्या
तउपधातुः तस्य नामानिगुणा
श्च स्वर्णमाक्षिकं तीक्ष्णमाक्षिक
धातश्च मधुधातश्च सस्मृतः
किंचित् सुवर्णसाहित्यात् स्वर्ण
माक्षिक मीरितं उपधातुः सुव
र्णस्य किंचित् स्वर्णगुणान्वितं
तथाचकांचनाभावेदीयतेस्व
र्णमाक्षिकं किंतत्स्यात्कल्य
त्वात् किंचिद्धीनगुणस्ततः
नकेवलं स्वर्णगुणा वर्त्तन्तेस्व
र्णमाक्षिके द्रव्यान्तरस्य संस
र्गात् सन्त्यन्येपि गुणास्ततः
सुवर्णमाक्षिकं स्वादु तिक्तं
वृष्यं रसायनं चक्षुष्यं वस्ति
रुक् कंठपांडु मेह विषोद
रं अर्शः शोथं विषं कंडु
त्रिदोष मपि नाशयेत् अस्य
हस्वर्णमाक्षिकस्य दोषमाह:

मन्दानलत्वं वलहानि मुग्रां
विष्टंभितां नेत्रगदान् संगाष्टा
न् मालां तथैव व्रणपूर्विकां
च कुर्यादसुद्धं खलमाक्षि
कं च तद्दोषशान्त्यर्थं शोधन
माह माक्षिकस्य त्रयोभा
गा भागैकं सैन्धवस्य च मा
तुलंगद्रवै वाथ जम्बीरस्यद्र
वैः पचेत् चालयेल्लोहजे पा
त्रे यावत् पात्रस्य लोहितं
भवेत्ततस्तु संसुद्धिं स्वर्णमा
क्षिकमृच्छति तन्मारणं
यथा कुलत्थस्य कषायेण
घृष्ट्वा तैलेनवापुटेत् तैलेनै
वाजमूत्रेण म्रियते स्वर्णमा
क्षिकं इतिभावप्रकाशः स्व
र्णयूथी स्त्री पीतवर्णयूथि
का तत्पर्य्यायः हरिणी २
पीतिका ३ हेमपुष्पिका ४ इ
ति शब्दरत्नावली ॥
स्वर्णलता स्त्री ज्योतिष्मती
इतिराजनिर्घंटः ॥
स्वर्णवर्णा स्त्री हरिद्रा इति
राजनिर्घंटः सवर्णसदृशव
र्णयुक्तेत्रि ॥
स्वर्णवल्कलः पुं श्योणाकवृक्षः
इति शब्दचन्द्रिका ॥
स्वर्णवल्ली स्त्री लताविशेषः
तत्पर्य्यायः रक्तफला २ का
कायुः ३ काकवल्ली ४ अस्या
गुणाः शिरःपीडा त्रिदोषनाशि
त्वं डुग्धदातृत्वंच इतिराजनि
र्घंटः स्वर्णविन्दुः पुं विस्तु इति
त्रिकांडशेषः सवर्णकणिका
च स्वर्णसेफालिका स्त्री आरग्व
धः इति शब्दमाला पीतसेफा
लिका च ॥
स्वर्णक्षीरी स्त्री ओषधिविशेषः
तत्पर्य्यायः पट्टपर्णी २ हैम
वती ३ हिमावती ४ इत्यमरः
चत्वारिस्वर्णक्षीर्य्यां इयं पी
तक्षीरा नागजिह्विकाकारा हे
मवर्णं पयस्तस्या हिमवद्भूमि
संभवा स्वानागजिह्विकाका
रा तन्मूलं वाणिज्ञेषु यथ क्षिति
पट्टनिच्छिद्राणि पर्णानि अस्याः
पट्टपर्णी जातेरत इति ~प्
हिमवति जाता हैमवतीस
स्वर्णमिवपीतत्वात् क्षीरमस्याः
स्वर्णक्षीरी नद्यादिः हिमयुक्तो
त् पतिस्थानयोगात् हिमा
वती मौंजकपाद्वत्विति व
तः नामस्यस्त्वर्थे इतिदीर्घः इति

भरतः अपि च स्वर्णक्षीरी स्व
र्णदुग्धा स्वर्णिका रुक्मिणी
तथा सुवर्णा हेमदुग्धी च हेम
क्षीरी च कांचनी स्वर्णक्षीरी
हिमा तिक्ता कृमि पित्त कफा
पहा मूत्रकृच्छ्राश्मरी शोफहृत्
हृज्ज्वरहरा परा इति राजनिर्घ
ण्टः स्वर्णांगः पुं आरग्वधः इ
ति राजनिर्घण्टः ॥
स्वर्णारि क्ली गन्धकं इति के
चित् स्वर्णुली स्त्री क्षुपविशेषः
तत्पर्यायः हेमपुष्पी २ स्व
र्णपुष्पा ३ मधुजा ४ अस्या
गुणाः कटुत्वं शीतत्वं कषाय
त्वं व्रणापहत्वं च इति राजनि
र्घण्टः स्वर्त्त क गत्यातंके इति क
विकल्पद्रुमः स्वर्तोडुः खिन्नजी
वने कस्स्वर्त्तयति जनो गच्छति
दुःखेन जीवति वेत्यर्थः अ
सिस्वर्तत् इति दुर्गादासः स्व
दँ ङ प्रीतिः [illegible] इति क
विकल्पद्रुमः प्रीतिः प्रीतिकर
णं लिट् वस्वोपादानं ङ स्वदते
विविधास्वादं स्वादते च रसाय
न मिति हलायुधः इति दुर्गादा
सः स्वर्नदी स्त्री स्वर्गंगा इत्यमरः
स्वः स्वर्गस्य नदी स्वर्णदी ञ्चुणत्वमिति

योगविभागात् णत्वं पूर्वपदे
संज्ञायां णत्व मिति परेषां
प्रकरणे मिति नद्यादीनामुप
संख्यान मिति वा णत्वं इति
मधुमाधवः स्वर्णदी दंभनका
रवती त्येके इति भरतः स्वर्भा
नवः पुं गोमेदकमणिः इति
राजनिर्घण्टः ॥
स्वर्भानुः पुं राहुः इत्यमरः स्व
र्भानुसूदनः पुं सूर्यः इति
पुराणं ॥
स्वर्यातः त्रि मृतः यथा याज्ञ
वल्क्यः पत्नी दुहितरश्चैव पि
तरो भ्रातरस्तथा तत्सुतो गो
त्रजो बन्धुः शिष्यः सब्रह्मचा
रिणः एषामभावे पूर्वस्य
ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः
इति दायभागः ॥
स्वर्लोकः पुं स्वर्गः इति शब्द
रत्नावली ॥
स्वर्वधूः स्त्री अप्सरसः इति हेम
चन्द्रः स्वर्गीयस्त्रीमात्रं च ॥
स्वर्वापी स्त्री गंगा इति हेम
चन्द्रः ॥
स्वर्वेश्या स्त्री उर्वश्याद्यप्सरसः
इत्यमरः ॥

स्वर्वैद्यौ पुं अश्विनीकुमारौ
तत्पर्यायः अश्विनीसुतौ २
नासत्यौ ३ अश्विनौ ४ दस्रौ ५
आश्विनेयौ ६ इत्यमरः द्वित्व
विशिष्टत्वादेकवचनाभावः
इति स्वामी सर्व्व एते नित्य द्विव
चनान्ता अपि यथा नासत्य
श्चैव दस्रश्च स्मृतौ द्वौ नाम
तोऽश्विनौ इति मार्कण्डेयपु
राणे इति भरतः
स्वलीनः पुं दानवविशेषः य
था तामायातीन्न रोधाय स्वली
नो नाम दानवः पार्वतं रूपमा
स्थाय वर्षाणामयुतं द्विजाः
ततो भगीरथो राजा राधयामा
स कौशिकं सन्नहः सदहीना
गंवाहनं तं भगीरथः ॥
तस्मादुलागमतत्र यत्र रु
द्धा भगीरथी
तेन नागेन तं देवी संविदा
र्य्य न सं गता शतधा तां स
माधाय मूर्द्धन्यैरावणो गजः
मही तलं समापेदे स याव
न्नागसाक्रयं ॥
तस्मादाचटनाद्विमा अभ्र
न्नागपुरं वरं इति वह्निपुरा
णे गंगावतरणे नामाध्या
यः ॥ स्वल्पः त्रि ॥ ॥ ॥

अमल्पः यथा नेहाभिक्रम
नाशोऽस्ति प्रत्यवायो न वि
द्यते स्वल्पमप्यस्य धर्मस्य
त्रायते महतो भयात् इति
भगवद्गीतायां २ अध्यायः
स्वल्पकेशरी पुं कोविदारः
इति राजनिर्घण्टः ॥
स्वल्पकेशी पुं भूतकेशः य
था गोलोमी स्वल्पकेशी च भू
तकेशश्च केशधृक् इति शा
ब्दचन्द्रिका अल्पल्पकेशवि
शिष्टे त्रि ॥
स्वल्पपत्रकः पुं गौरशाकः
सत्त्रमधूकभेदः यथा गौर
शाको मधुलोऽन्योऽपि विज्ञः
स्वल्पपत्रकः इति रत्नमाला
स्वल्पफला स्त्री हपुषाभेदः
तत्पर्यायः कच्छूघ्नी २ धाजना
शिनी ३ प्लीहशत्रुः ४ विष
घ्नी ५ कफघ्नी ६ अपराजिता
७ अस्या गुणाः हपुषा गुण
तुल्याः इति राजनिर्घण्टः
स्ववासिनी स्त्री ऊढा अनू
ढा वा पितृगृहस्थिता तत्
पर्यायः चिरिंटी २ इत्यमरः ३
ऊढा या मनूढा या वा पितृगृ
हस्थितायां पितृकुलस्नेहात् चिर

मेटति गच्छति चिरिंटी इट
गतौ अत्र मनीषादिं सुवा
सिन्यां चिरिंटी स्यात् द्विती
ययवयसि स्त्रिया मितिरुद्रः वि
रंटीत्येके स्वेषु ज्ञातिषु वस
ति सुवासिनी ग्रहादित्वा णि
न् स्वेनवसति सुवासिनीति
द्राविडाः इत्यमरटीकायां भर
तः स्वबीजः पुं आत्मा इति श
ब्दरत्नावली निजकारणे स्त्री
यवीर्ये च क्ली ॥
स्वसा स्त्री भगिनी इत्यमरः
स्वस्क ङ गत्यां इति कविक
ल्पद्रुमः ङ स्वस्कते इति दु
र्गादासः ॥
स्वस्ति व्य आशीः क्षेमं पु
ण्यादि इत्यमरः आशी
राशीर्वादः क्षेमं निरुपद्र
वः पुण्यं पापप्रक्षालनं
पुण्यादिना मंगलादौ च
स्वस्ति स्वस्ति मंगलाशी
र्वाद पापनिर्णेजनादिषि
ति भागुरिः इति भरतः दा
नस्वीकारमंत्रः यथा डोमि
त्युक्त्वा प्रतिगृह्यस्य स्वस्त्युक्त्वा
सावित्रीं पठित्वा कामस्तुतिप
ठेत् इति स्मृतितत्वं तद्योगे च
तुर्थी स्यात् यथा स्वाहाग्नये स्व
धा पित्रे स्वस्ति धात्रे नमः सते
इति मुग्धबोधव्याकरणं ॥
स्वस्तिकः पुं क्ली आप्यानां
गृहविशेषः इत्यमरः तस्य
लक्षणं यथा स्वस्तिकं प्राङ्
मुखं यत् स्याद् लिन्द्यानुगतं
भवेत् तत् पार्श्वानुगतौ चा
न्यौ तत् पर्यन्तगतोऽपरः
इति भरतधृतसांकः अन्यद्वा
स्तुशब्दे द्रष्टव्यं सितावरणकः
इति राजनिर्घंटः योगांगास
नविशेषः ॥ तस्य लक्षणं
आसनशब्दे द्रष्टव्यं ॥
स्वस्तिकः पुं मंगलद्रव्यं तत्र
तंडुलचूर्णनिर्मितत्रिकोणा
रादिवासद्रव्यं चतुष्पथः गृ
हभेदः इति मेदिनी पिष्टक
विकारः रक्तालिकः इति
विश्वः जिनानां चतुर्विंशति
चिह्नान्तर्गतचिह्नविशेषः
यथा वृषो गजोऽश्वः प्लवगः
क्रौंचोऽब्जं स्वस्तिकः
शशी मकरः श्रीवत्सः
खड्गी महिषः सूकरस्तथा
श्येनो वज्रं मृग च्छागो नं
द्यावर्तो घटोपि च कू
र्मो नीलोत प ॥

लं शंखः फणी सिंहोऽर्हतां
ध्वजाः इति हेमचन्द्रः रसो
नकः इति त्रिकांडशेषः
स्वस्तिमुखः पुं लेखः ब्राह्मणः
वन्दिनि त्रि इति मेदिनी ॥
स्वस्तिवाचनं क्ली मांगल्यकर्म्मा
रंभकालीनवक्ष्यमाणमंत्रोच्चार
णपूर्वकतंडुलविकिरणं तन्मं
त्रो यथा अमुककर्म्मणि पु
ण्याहं भवंतो ब्रुवंतु इत्युक्ते पु
ण्याहमिति ब्राह्मणास्त्रिरुक्तेऽअ
मुककर्मणि ऋद्धिं भवंतो ब्रुवं
तु ततः ऋध्यतामिति ब्राह्मणा
स्त्रिर्ब्रूयुः एवं स्वस्ति भवंतो ब्रुवं
तु इत्युक्ते स्वस्ति इति ब्राह्मणा
स्त्रिर्ब्रूयुः ततः स्वस्ति न इन्द्रो
वृद्धश्रवाः स्वस्ति नः पूषा विश्व
वेदाः स्वस्तिनस्तार्क्ष्योऽरिष्टने
मिः स्वस्ति नो बृहस्पतिर्दधातु
इति पठित्वा तण्डुलान् विकिरेत
प्रमाणं यथा व्यासः संपूज्य गं
न्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति
वाचयेत् धर्म्मे कर्म्मणि मांग
ल्ये संग्रामाद्भुतदर्शने धर्म्मक
र्म्मणि इति सप्तमी निर्देशात्
अमुककर्म्मणि स्वस्ति भवंतो
ब्रुवंतु इति ब्रूयात् यमः ॥॥
पुण्याहवाचनं दैवे ब्राह्मणस्य
विधीयते एतदेव निरोंकारं
कुर्य्यात् क्षत्रियवैश्ययोः
ओंकारं ब्राह्मणे कुर्यात् निरों
कारं महीपतौ उपांशुश्च त
थावैश्य शूद्रे स्वस्ति प्रयो
जयेत् इत्युद्वाहतत्वं ॥ अ
पि च नन्द उवाच अलक्षितोऽ
स्मिन् रहसि मामकैरपि गोव्र
जे कुरु द्विजातिसंस्कारं स्व
स्तिवाचनपूर्वकं इति श्रीभा
गवते १० स्कन्धे ८ अध्यायः
स्वरूपं भगवान् हरिः श्रीवत्
सं संस्थानधरमनन्तेच समाश्रि
तं प्रधानं बुद्धिरप्यास्ते गदारू
पेण माधवे भूतादिमिन्द्रिया
दीञ्च द्विधाहंकारमीश्वरः बि
भर्त्ति शंखरूपेण शार्ङ्गरूपेण
च स्थितं चलस्वरूपमत्यन्तजवे
नान्तरितानिलं चक्रस्वरूपंच
मनोधत्ते विष्णुः करस्थितं पंच
रूपात्तु या माला वैजयन्ती गदा
भृतः सा भूतहेतुसंघातो भूत
माला च वै द्विज यानी
न्द्रियाण्यशेषाणि बुद्धिक
र्म्मात्मकानि वै शररूपाण्य
शेषाणि तानि धत्ते जनार्दनः
बिभर्त्ति यच्चा ॥ ॥

इति गारुडे हयायुर्वेदः २०
अध्यायः युक्तिकल्पतरुक
हयपरीक्षा घोटकशब्दे द्र
ष्टव्या हये वर्णनीयानि य
था वेगः १ औन्नत्यं २ तेजः
३ सत्वगुणस्थितिः ४ खु
रात् खातरजः ५ रूपं ६ जा
तिः ७ गतिविचित्रता ८ इति
कविकल्पलता अथ हय
शकुनं हेषारवं मुंचति वा
मतो यः स्वन्नतिनि देक्षिणपा
दघातैः कंडूयते दक्षिणमं
गभागं तेनं तुरंगः स ददं
दाति इति वसन्तराजे हय
शकुनः १३ वर्गः
हयकान्तरा स्त्री अश्वकान्त
राहृ हयकान्तरिका तः ञ्चो
डकाथरा इति हिन्दीभाषायया
कातरा हयपर्य्यायैः कान्तरातैः
प्रकीर्त्तिताः अश्वकान्तरिका
तिक्ता वातघ्नी दीपनी परा
इति राजनिर्घण्टः
हयगंधं क्लीं काचलवणं
इति राजनिर्घण्टः
हयगन्धा स्त्री अश्वगन्धा इ
ति रत्नमाला अजमोदा इति
राजनिर्घण्टः ॥

हयग्रीवः पुं मधुकैटभज
वेदोद्धारार्थं विष्णोरवतार
विशेषः तस्य रूपं यथा स
नासिकेनकायेन भूत्वा चन्द्र
प्रभस्तदा कृत्वा हयशिरः
शुभ्रं वेदानामालयं प्रभुः
तस्य मूर्द्धा समभवत् द्यौः
सनक्षत्रतारका केशाश्चा
भवन् दीर्घाः रवेरंशुसमप्रभाः
कर्णावाकाशपाताले ललाटं
भूतधारिणी गंगासरस्व
तौ श्रोण्यौ भ्रुवावास्तां महो
दधी चक्षुषी सोमसूर्य्यौ ते
नासा सन्ध्या पुनः स्मृता प्रण
वस्त्वथ संस्कारो विद्युज्जिह्वा
च निर्म्मिता दन्ताश्च पितरो रा
जन् सोमपा इति विश्रुताः
गोलोको ब्रह्मलोकश्च ओ
ष्ठावास्तां महात्मनः ग्रीवा
चास्याभवद्राजन् कालरा
त्रिर्गुणोत्तरा एतद्धयशिरः
कृत्वा नानामूर्त्तिभिरावृतं
इति महाभारते विष्णुवध्य
दैत्यविशेषः इति हेमचन्द्रः
सच कल्पान्ते ब्रह्मणोऽपहृते
वेदे हतवान् तद्वेदोद्धारणार्थं
विष्णुना मत्स्यावतारेण हतः



अपि च हृद्गंगा जल सं
तत्तीरे ब्रह्मसुतस्य च वि
ख्याताख्यया देवः शिवलि
गसमन्वितः विश्वदेवी महा
देवी योनिमण्डलरूपिणी ह
यग्रीवेण पूजितेथ तत्र देवो
जगतः पतिः हयग्रीवं यत्र
देवो जगत्पतिः हयग्रीवं
यत्र हत्वामणिकूटं तथामा
मत् इति कालिकापुराणे ८२
अध्यायः हयग्रीवहा पुं
विष्णुः इति हेमचन्द्रः हयग्री
वा स्त्री दुर्गा यथा नारसिंहे
हयग्रीवा दिग्वसना तु विना
शिनी इति तस्याः सहस्रना
मस्तोत्रं ॥
हयङ्कषः पुं मातलिः इ
न्द्रसारथिः इति त्रिकाण्डशेषः
हयनं क्ली कर्णीरथः इत्यम
रः तस्य रूपान्तरं अयनं इति
तट्टीकायां भरतः हयपुच्छी
स्त्री माषपर्णी इत्यमरः ॥
हयप्रियः पुं यवः इति हेम
चन्द्रः ॥
हयप्रिया स्त्री अश्वगन्धा ख
र्जूरी इति राजनिर्घण्टः ॥
हयमारः पुं करवीरः इति ॥

राजनिर्घण्टः ॥
हयमारकः पुं करवीरवृक्षः
इत्यमरः
हयमारणः पुं अश्वत्थवृक्षः
इति शब्दचन्द्रिका
हयवाहनः पुं रेवन्तः सत्तसू
र्य्यपुत्रः इति हेमचन्द्रः कुवे
रः इति केचित् ॥
हयवाहनशङ्करः पुं रक्तका
ञ्चनः इति शब्दचन्द्रिका ॥
हयशाला स्त्री अश्वालयः
यथा गवां स्थानं तथैवात्र त
रङ्गाणां येव च उत्तराभिमुखा
श्रेणी तुरङ्गाणां विधीयते द
क्षिणाभिमुखा वाथ पश्चिमा
स्तु गर्हिताः तुरङ्गास्तु तथा
धार्य्याः प्रदीपैः सर्वरात्रिकैः
कुक्कुटा वानरा श्चैव मर्कटा
श्च नराधिपः धार्य्या हयशाला
यां सवत्सा धेनुमेव च
अजाश्च धार्य्या यत्नेन तुरगा
णां हितैषिणा गोगजाश्वादि
शालासु तत् पुरीषस्य निर्ग
मे अस्तंगते नकुर्वीत देवेदे
वे दिवाकरे इति मात्स्ये २१९
अध्यायः ॥
हयशीर्षः पुं विष्णुः यथा तत्रै

जगाम हृष्टो हृष्टः वा
जिशिरं तत्र देवहृदे स्नात्वा
तर्पयित्वा पितॄन् सुरान् सं
पूज्य हयशीर्षं च जगाम गज
साह्वयं इति वामनपुराणे
८१ अध्यायः ॥
हया स्त्री अश्वगन्धा इति
राजनिर्घण्टः ॥
हयाध्यक्षः पुं अश्वाध्यक्षः त
स्य लक्षणं यथा हयशिक्षा
विधानज्ञ श्चिकित्सितपा
रगः अश्वाध्यक्षो महीभर्त्तुः स्वा
म्भवश्च प्रशस्यते इति मात्स्ये
१८९ अध्यायः ॥
हयानन्दः पुं मुद्गः इति रा
जनिर्घण्टः ॥
हयायुर्वेदः पुं घोटकचिकि
त्सा शास्त्रविशेषः तच्छास्त्रं
हयशब्दे द्रष्टव्यं ॥
हयारिः पुं करवीरः इति
रत्नमाला ॥
हयाशना स्त्री शल्लकीवृ
क्षः इति शब्दचन्द्रिका ॥
हयी स्त्री घोटकी इति ज
टाधरः ॥
हयेष्टः पुं यवः इति राज
निर्घण्टः

हयोत्तमः पुं कुलीनाश्वः त
त्पर्य्यायः वातास्यः २ जा
त्यः ३ आजानेयः ४ इति त्रि
काण्डशेषः ॥
हरः पुं शिवः इत्यमरः अ
ग्निः गर्दभः इति केचित्
हरणं हस्तकर्णास्त्रं हरण
कल्केकसर्णाः त्रि
हरकः पुं शिवः चौरः इति
केचित् हरणकर्त्तरि त्रि ह
रगौरी स्त्री अर्द्धनारीश्वर
मूर्त्तिः यथा देव्युवाच यथा
तवाहं सततं छायेवानुगता
हर भवेयं साहचर्य्येण तथा
मां कुरुष्व महेश सर्वगात्रेण सं
स्पर्शनित्यालिङ्गनविभ्रमं
अह मिच्छामि भवतस्त्वं चे
त् कर्त्तुमर्हसि श्रीभगवान्
वाच रोचते तन्ममाप्यपि चेत्त्व
मिच्छसि भाविनि तत्रोपाय
मद्य वक्ष्ये यदि शक्नोषि तत् कु
रुष्वाहं मम शरीरस्य गृह्णाण
त्वं मनोहरे अर्द्धं भवतु मे ना
री तथैवाहं पुमानिति यदि
त्वं नहि शक्नोषि हर्षेण तत्त्वं मी
हरणं तदाहं नेहरिष्यामि सा॥
शीरार्द्धं वरानने तवैवार्द्धं ॥ ॥



तथा नारी अहं भवत्र पुरु
षः विद्यते तत्र शक्ति मैव
भवतान् महेशि श्रीदेव्युवाच
तवैवाहं हरिष्यामि शरीरा
र्द्धं वृषध्वज किंत्वहं त्वकामि
च्छामि यच्चेत्वं हर इच्छसि त
थाहमर्द्धं भवतो सुतासि हा
मितावता त्वज्जाग्रहं यदा ते
र्द्धं संपूर्णं सा तदा हृये इत्यर्द्धं
भागदाणं भवेयदि यद्येप्सि
तं तदेवाहं तदा शंभोः शरीरा
र्द्धं हराम्यहं श्रीईश्वरउवाच प
व मस्तु भवेन्नित्यं यथा त्वं कत्
मिच्छसि शरीरार्द्धस्य हरणं भु
यात्तव यथेप्सितं श्रीऔर्वउ
वाच अथ गौरी तदा पूर्वम
नुभूतं तपः स्थितो योगनिद्रा
स्वरूपं तदात्मनो चिंतयद्धिया
हरं प्रणम्य प्रथमं ब्रह्माणंच
ततः परं ततस्त्रिजगतामीशं
हरिं नारायणं प्रभुं चिंतयि
त्वा तथा तेषामेकतां साजग
न्मयी आत्मानं योगनिद्रां वचि
तयित्वा मनस्विनी दक्षिणे स्व
शरीरस्य भागार्द्धं शशभृद्धृतः
शरीरस्य तथा वाम मतिप्रेम्णा
निजं देहे हरोपि स्वशरीरा॥॥
र्द्धं गौरीकाये तदा स्वयं
प्रेम्णा निवेशयत्तस्या स्त्रिकौ
षुः प्रिय मद्भुतं अथ स्थित्वा
तदाभर्गः कात्या सह चिरं तदा
परित्यज्य शरीरार्द्धं पृथगेव
बभौ रुचा कालीभूत्वा स्वर्ण
गौरीशरीरार्द्धं तत्पुरः प्रा
प मोहात्तदात्मानं संतपाव
जगन्मयी एवं यदा शरीरार्द्ध
मादाय परमेश्वरी हरस्यति
ष्ठति तदाराजते तीवशोभया
अर्द्धं धम्मिलसंयुक्तं जटाजूटा
र्द्धयोजितं एकस्मिन् श्रवणे
भोगीभागेज्जांबूनदाचितं कु
डले श्रवणे न्यस्मिन् पौषे
नस्माद्यराजत अर्द्धं समाति
चास्यार्द्धं वृषभाति व्यराजत
अर्द्धं स्थूलनखं चारुतिलपुष्प
नसंपरं दीर्घपक्ष्मश्रुतस्थैवार्द्ध
मर्द्धं पक्ष्मश्रुविवर्जितं आरक्त
चारुशंखरक्तौष्ठमेकतस्तथा
अपरं शुक्लविपुलदीर्घाकु
ति रदं परं अर्द्धं नीलगलं चा
र्द्धं मपरं हारसंयुतं अर्द्धं के
कणकेयूरयुक्तवाकतथाप
रं नागकेयुरसंयुक्तस्थूलवा
क्रुनिहृत्मिकं अर्द्धं विषायतभ
जं कविद्दस॥

त्रिकांडशेषः
हिमाम्भ्रया स्त्री स्वर्णजीवंती
इति राजनिर्घंटः॥
हिमिका स्त्री तृणोपरिपति
त हिमं इति केचित्
हिमेलु त्रि हिमक्लेशितः हिमा
र्तः इति केचित्
हिमोत्तरा स्त्री कपिलद्राक्षा
इति राजनिर्घंटः॥
हिमोत्पन्ना स्त्री शावनाली
इति राजनिर्घंटः॥
हिमोद्भवा स्त्री शटी इति रा
ज निर्घंटः॥
हिम्यः त्रि हिमभवः हिमशब्दा
त्यत् प्रत्ययेन निष्पन्नः इति
सिद्धांतकौमुदी॥
हिरंगुः पुं राहुः इति केचित्
हिरण्यं क्ली रेतः स्वर्णं वरा
टकः इति मेदिनी हिरण्मयं
क्ली भारतवर्षादिनववर्षांतर्गत
वर्षविशेषः इति त्रिकांडशेषः
तद्विवरणं यथा उत्तरेणेलावृ
तं नीलः श्वेतः शृंगवान् इति त्र
यो रम्यक हिरण्मय कुरूणां वर्ष
णां मर्यादागिरयः प्रागायता उ
भयतः क्षारोदावधयो द्विसहस्र
योजनपृथव एकैकशः पूर्वस्मा
त् पूर्वस्मादुत्तरोत्तरोदग्दीर्घा
धिकांशेन दैर्घ्य एव ह्रसंति इति
श्रीभागवते ५ स्कंदे १६ अध्या
यः हिरण्मयः पुं ब्रह्मा सवर्ण
मये त्रि इति मेदिनी॥
हिरण्य क्ली स्वर्णं धुस्तूरं इ
त्यमरः रेतः द्रव्यं वराटः अ
क्षये मानभेदः अकुप्य इति मे
दिनी रजतं धनं इति शब्दरत्ना
वली
हिरण्यकशिपुः पुं दैत्यविशेषः
सतु कश्यपस्य दित्यां पत्न्यां जा
तः तस्य प्रह्लादः हिरण्याक्षः
तस्य भार्या कयाधुः तस्य पु
त्राः संह्लादः १ अनुह्लादः २
ह्लादः ३ प्रह्लादः ४ कन्या सिं
हिका इति श्रीभागवतं अपि
च तथायौ निहतौ देवदानवौ
मधुकैटभौ अवतीर्णौ पुन
र्दैत्यौ भूत्वा कश्यपनंदनौ॥
हिरण्यकशिपुश्चैव हिरण्या
क्षो महासुरः ज्येष्ठोजयोद्वतौ
तौ च पुनर्जातौ महाबलो एत
स्मिन्कल्पे देव॥



गतस्तेन्द्रावरीच तौ तयोस्तपा
दविन्यास मसहंतौ जनार्दन
नवांतिक मनुप्राप्ता दशास्य
कुंभकर्णयोः इति वह्निपुरा
णे वैश्रवण वरप्रदान नामाध्या
यः तदुक्त पद्मादि यथादित्याः
पुत्रद्वयं जज्ञे कश्यपादिति नः
श्रुतं हिरण्याक्षस्तु इद्वयो हि
रण्यकशिपु स्तथा कश्यपस्या
श्रमोप्याशुत् पुण्ये वै पुष्करे पु
रा ऋषिभि दैवताभिश्च गन्धर्व
रुपशोभितः आसनान्युपक्लृ
प्तानि कंचनानित्तपंच वै ऋषी
णां मृत्विजां तेवै उपविष्टा यथा
क्रमात् होतृस्तत्रासनं यत्र
दविस्तत्राप्यक्षनः अंतर्वत्नी
दिति श्चैव पत्नीच समुपागता
दशवर्षसहस्राणि गर्भस्तस्या
मवर्द्धत सद्गर्भा दितिःस्तस्या
मातुर्वै उदरात्तदा नियमादा
सने गर्भः कश्यपस्यापि संनि
धौ तं दृष्ट्वा मुनयस्तस्य नामा
कुर्वंत तद्धितं हिरण्यकशिपु
स्तस्मात् कर्मणानेन सस्मृतः
हिरण्याक्षोऽनुजस्तस्य सिंहिका
चतथानुजा राहोः साजननी ॥

देवीविप्रचित्तेः परिग्रहः हि
रण्यकशिपुर्दैत्य श्चारपर
मंतपः ततो वर्षसहस्राणि
निराहारो ह्यधःशिरा तेन ब्रह्मा
छन्दयामास दैत्यं तुष्टो वरे
ण स सर्वामरत्वं वव्रे स पाद्मा
द्वैव दिवानिशि अहं सर्वं
विनिर्जित्य सर्वदेवत्व मास्थि
तः अणिमादि गुणैश्चर्य-
मेषमेदीप्ततां वरं तेनैवग्र
क्तो ब्रह्मात तस्मैदत्वा यथे
प्सितं दत्वा चास्य सभां दिव्यां
तत्रैवांतरधीयत हिरण्यक
शिपुर्दैत्यः श्लोकै गीतः पु
रातनैः राजा हिरण्यकशिपु
दैत्यो यां यां निषेवते तस्यां
नमश्चक्रुः दैवता ऋषिभिः स
ह एवं प्रभावो दैत्योऽभूत् हि
रण्यकशिपुः पुरा स्वयमग्नि
श्च सूर्यश्च वायुरिन्द्रो जलेश्व
यं भूत्वा चकार राज्यं स मंवंत
रचनदेशात्तस्यासीत् नरसिंह
स्त महस्तु विभुः पुराकिल नावे
स्तेन विनिर्मिंत्रो नाद्दे प्रख्या
नाखाः स्मृताः हिरण्याक्षसु
ताः पंच विक्रांताः सुमहाब
लाः हिरण्यकशिपोः ॥ ॥

पुत्राश्चत्वारः सुमहाबलाः प्र
ह्लादः पूर्वजस्तेषा मनुह्लादस्त
थैवच संह्लादश्चैव ह्लादश्चह्ला
दपुत्रात् मृगांववान् इति व
ह्निपुराणे कश्यपीयप्रजासर्ग
नामाध्यायः
हिरण्यकशिपुहा पुं विष्णुः इति
हेमचन्द्रः ॥
हिरण्यकामधेनुः स्त्री षोडश
महादानांतर्गतमहादानविशेषः
यथा मत्स्य उवाच अथातः सं
प्रवक्ष्यामि कामधेनुविधिं परं
सर्वकामप्रदं नृणां महापात
कनाशनं लोकेशावाहनं तद्व
द्धोमकार्याधिवासनं तुलापु
रुषवत् कार्यं कुंडमंडपवेदि
कं स्वल्पेष्वेकाग्निवत् कुर्यात्स
के वेकास माहितः कांचनस्या
तिशुद्धस्य धेनुं वत्सं च कार
येत् उत्तमा पलसाहस्रा तद
र्द्धेन तु मध्यमा कनीयसी तद
र्द्धेन कामधेनुः प्रकीर्तिता श
क्तितस्त्रिपलादूर्द्ध्वं अशक्तोपीद
कारयेत् वेद्यां कृष्णाजिनं न्य
स्य गुडप्रस्थसमन्वितं न्यसेदुप
रि तां धेनुं महारत्नैरलंकृतां
कुंभाष्टकसमोपेतां नानाफल

समन्वितां तथाष्टादशधान्या
नि समंतात् परिकल्पयेत् इ
क्षुदंडाष्टकं तद्वत् नानाफलवि
भूषितं भाजनंचासनं तद्वता
म्रदोहनकं तथा कौषेयवस्त्र
द्वयसंप्रयुक्तां दीपातपत्राभर
णाभिरामां सचामरां कुंडलि
नीमचंटां मणित्रिकांचन्द्र
करोपिपादां सर्वैश्च सर्वैः पु
रतोऽभिजुष्टां हरिद्रया पुष्प
फलैरनेकैः अजाजिकुस्तुंबु
रुधाकैराभिर्वितानकेचोपरि
पंचवर्णं स्नानं ततो मंगलवे
दघोषैः प्रदक्षिणीकृत्यस पु
ष्पहस्तः तारादृशेभां गुडधेनु
मंत्रैः द्विजाय दद्यादथदर्भपा
णिः त्वं सर्वदेवगणमन्दिरम
गभूता विश्वेश्वरत्रिपथगोद
धिपर्वतानां त्वद्दानशस्त्रशक
लीकृतपातकौघः प्राप्तोस्मि
निर्वृतिमतीव परां नमामि लो
के यथेप्सितफलार्थविधायि
नीत्वामामाश्यकोद्दिभवदुःख
मुपेति मर्त्यः संसारदुःखशमना
य यतस्व काम त्वां कामधेनुमि
ति वेदविदो वदंति आमंत्र्य शील
कुल रूप गुणा ॥

नित्याय विप्राय यः कनकधेनु-
मिमां प्रदद्यात् प्राप्नोति धाम
स पुरन्दरदेहजुष्टं कल्याणयौ-
परिवृतं पद मिन्दुमौलेः ॥
इति मात्स्ये हिरण्यकामधे-
नुप्रदानिको नाम २५२
अध्यायः ॥
हिरण्यकोषः पुं कृताकृतस्व-
र्णरूप्ये इति हेमचन्द्रः ॥
हिरण्यगर्भः पुं ब्रह्मा इत्यमरः
हिरण्यगर्भे उत्पत्तिस्थानम-
स्य हिरण्यस्य गर्भो भ्रूण इति
वा हिरण्यगर्भं यत्स्याण्डं हि-
रण्यवर्णमभवत् तथा च स्मृ-
तिः हिरण्यवर्णमभवत्तदण्डमु-
दके प्लवं तत्र जज्ञे स्वयं ब्रह्मा
स्वयम्भूरिति विश्रुतः इति
उपचारात् हिरण्यवर्णमण्डं हि-
रण्यं इति भरतः अस्य च हि-
रण्यगर्भोऽभूदुद्यानेन बु-
द्धिर्मता असौ इति देवीपुरा-
णे देवीनिरुक्तं ४५ अध्यायः
षोडशमहादानान्तर्गत द्वितीय-
महादानं यथा मत्स्य उ-
वाच अथातः संप्रवक्ष्यामि
महादानमनुत्तमं नाम्ना हि-
रण्यगर्भाख्यं महापातकनाशनं
पुन

पुण्यां तिथिं समासाद्य तुलापु-
रुषदानवत् ऋत्विङ्मण्डपसं-
भार भूषणाच्छादनादिकं कु-
र्यादुपोषित स्तद्वल्लोकेशावा-
हनं बुधः पुण्याहवाचनं कृत्वा
तद्वत् कृत्वाधिवासनं ब्राह्मणै-
रानयेत् कुण्डं तपनीयमयं शु-
भं द्वासप्तत्यङ्गुलोच्छ्रायं हेमप-
ङ्कजगर्भवत् त्रिभागहीनं वि-
स्तारमाज्यक्षीराभिपूरिते द-
शास्त्राणि सरत्नानि तत्र सूची
तथैव च हेमनालं सपिटकं व-
हिरादित्यसंयुतं तथैवावर-
णं नाभेरुपवीतं च काञ्चनं
पार्श्वतः स्थापयेत्तद्वद्धेमदण्डं
कमण्डलुं पद्माकार पिधानं स्या-
त् समन्तादङ्गुलाधिकं मु-
क्तावली समोपेतं पद्मराग-
दलान्वितं तिलद्रोणोपरिग-
तं वेदिमध्ये ततो न्यसेत् त-
तो मङ्गलशब्देन ब्रह्मघोषवरे-
ण च सर्वौषध्युदकस्नानं स्ना-
पितो वेदपुङ्गवैः शुक्लमा-
ल्याम्बरधरः सर्वाभरणभूषि-
तः इममुच्चारयेन्मन्त्रं गृहीतकु-
सुमाञ्जलिः नमो हिरण्यगर्भा-
य हिरण्यकवचाय च सप्तलोकसु-
राध्यत ॥

श्रीभागवते १ स्कन्धे २ अध्या-
यः
हृदयङ्गमं क्ली युक्तियुक्तवा-
क्य इति भरतः तत्पर्यायः
सङ्गतं २ इत्यमरः ॥
हृदयवान् त्रि हृदयालुः इत्य-
मरटीकायां सारसुन्दरी ॥
हृदयस्थानं क्ली वक्षस्थलं
तत्पर्यायः क्रोडं २ उरः ३
वक्षः ४ वत्सं ५ भुजान्तरं ६
इति हेमचन्द्रः
हृदयाला पुं कङ्कपक्षी इति
शब्दचन्द्रिका ॥
हृदयालुः त्रि प्रशान्तमनाः त-
त्पर्यायः सुहृदयः २ इत्यम-
रः सहृदयः ३ इति भरतः हृद-
यी ४ हृदयिकः ५ हृदयवान्
६ इति टीकान्तरं विक्रपः ७
इति जटाधरः ॥
हृदयिकः त्रि हृदयालुः इत्य-
मरटीकायां सारसुन्दरी
हृदयी त्रि हृदयालुः इति
जटाधरः ॥
हृदयेशः पुं भर्त्ता इति त्रि-
काण्डशेषः तत्पर्यायः प्रे-
यस्याद्याः पुं प्रियपत्यौ भर्त्ता
सेक्ता पतिर्वरः विवोढा

रमणो भोक्ता रुच्यो वरयिता
धरः इति हेमचन्द्रः
हृदयेशा स्त्री भार्या यथा
प्रेयसी दयिता कान्ता प्राणे-
शा वल्लभा प्रिया हृदयेशा
प्राणसमा प्रेष्ठा प्रणयिनी च
सा इति हेमचन्द्रः ॥
हृदावर्त्तः पुं अश्वहृदयावर्त्तः
तत्पर्यायः श्रीवृत्तकः इति
त्रिकाण्डशेषः
हृदिस्पृक् त्रि हृद्यः इति केचि-
त् हृदयस्पर्शकर्त्ता च हृद्रो-
लीयः त्रि हृद्रोलपर्वतोद्भवः
इति केचित् ॥
हृद्रोलः पुं पर्वतविशेषः
इति केचित्
हृदग्रहः पुं हृद्रुणः इति
राजनिर्घण्टः ॥
हृद्यं क्ली गुडत्वक् इति श-
ब्दरत्नावली
हृद्यः पुं वशकृद्वेदमन्त्रः इ-
ति मेदिनी ॥
हृद्यः त्रि मनोहरः इत्यमरः
अस्य पर्यायः मनोज्ञशब्दे
द्रष्टव्यः हृज्जः हृदितः हृत-
प्रियः इति मेदिनी हृद्यग-
न्धं क्ली स्थूलजीरकं ॥



इति शब्दचन्द्रिका सौवर्चलं
इति राजनिर्घण्टः ॥
हृद्यगन्धः पुं बिल्ववृक्षः इ
ति जटाधरः
हृद्यगन्धा स्त्री जाती इति रा
जनिर्घण्टः ॥
हृद्यगन्धि क्ली स्वर्जीरकं
इति रत्नमाला ॥
हृद्या स्त्री वृद्धिनामौषधिः
इति मेदिनी हृद्रोगः पुं कु
म्भराशिः इति शुद्धिदीपिका
कामः यथा हृद्रोगमाश्वप
हिनोत्यचिरेण धीरः इति श्री
भागवते हृदयपीडा तत्र
हृद्रोगस्य विप्रकृष्टं निदान
माह अत्युष्णगुर्वम्लकषाय
तिक्तश्रमाभिघाताध्यशन
प्रसंगैः संचिन्तनैर्वेगविधा
रणैश्च हृदामयः पंचविधः
प्रदिष्टः प्रसंगः सतते सेवा
संचिन्तनमतिचिन्ताराजभया
दिकमिति यावत् पंचविधः
वातिकः पैत्तिकः श्लैष्मिकः
सान्निपातिकः क्रिमिजश्चे
ति तस्य संप्राप्तिपूर्वकं लक्ष
णमाह दूषयित्वा रसं दोषा
विगुणा हृदयं गताः हृदि बाधां

प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते
विगुणाः दुष्टाः बाधां दोषभे
दे नानाविधां व्यथां भंगवत्
पीडामिति गयदासः वातिकं
हृद्रोगमाह आयम्यते मारु
तजे हृदयं तुद्यते तथा निर्म
थ्यते दीर्यते च स्फोट्यते पा
ट्यते पिच मारुतजे हृद्रोगे इति
शेषः आयम्यते व्यथया वि
स्तार्यत इव तुद्यते सूचीभि
रिव निर्मथ्यते मंथानेनेव दी
र्यते करपत्रेण द्विधाक्रियत
इव स्फोट्यते आरयेव पाट्य
ते कुठारेण बहुधा क्रियत इ
व पैत्तिकमाह तृष्णोष्मदा
हचोषाः स्युः पैत्तिके हृदये
क्लमः धूमायनं च मूर्च्छा च स्वे
दः शोषो मुखस्य च उष्मा शरी
रगात्रस्यैव शीतवाताभिला
ष हेतुः किंचिदंतरोसं दाहः
पार्श्वस्थेन वह्निनेव दुःखदे
हगात्रसंतापः
चोषः चूषणेनेव पीडा हृ
दये क्लमः हृदयाकुलत्वे
ग्लानिरित्यर्थः धूमायनं कं
ठाद्धूमनिर्गम इव क्लेदः किं
चिद्दुर्गन्धः सलिलइव ॥ ॥

श्लैष्मिकमाह गौरवं कफ
संस्रावोऽरुचिः स्तंभोऽग्नि
मार्दवं माधुर्यमपि चास्यस्य
वर्त्तते हृदि यस्य स्तंभो ज
डता मार्दवं जलप्लुतमिव मा
धुर्यं मुखे त्रिदोषजमाह
विद्यात् त्रिदोषमप्येवं स
र्वलिंगं हृदामयं क्रिमिज
माह कृमयो जायंते अस्मि
न्निति कृमिज इति निरुक्तिः
अस्य निदानपूर्विकां संप्राप्ति
माह त्रिदोषहेतुर्हृद्रोगे यो
दुरात्मा निषेवते तिलक्षीर
गुडादींश्च ग्रंथिस्तस्योपजाय
ते मर्म्मैकदेशे संक्लेदं रसश्चो
पगच्छति संक्लेदात् कृमय
श्चास्योपगच्छति संक्लेदात्
कृमयश्चास्य भवंत्युपहता
त्मनः मर्म्मैकदेशे हृदयैक
देशे संक्लेदं सार्द्रत्वं रस
उपगच्छति संक्लेदात् रस
स्य सार्द्रत्वात् उपहतात्मनः
तिलादिहिताहारेण तस्य ल
क्षणमाह उत्क्लेदः ष्ठीवनं
तोदः शूलं हृल्लासकस्तमः
अरुचिः श्यावनेत्रत्वं ॥

शोषश्च कृमिजे भवेत् उत्
क्लेदः वमनमिवोपस्थितं
शोषो यत्ना हृद्रोगस्योपद्र
वानाह क्लमसादो भ्रमः शो
षो ज्ञेयास्तेषामुपद्रवाः कृ
मिजातकृमीणां ये श्लेष्मिका
णां हि ते मताः क्लमः पिपा
सास्थानस्य सादः शोषः शोषो
मुखस्य तेषां हृद्रोगाणां कृ
मिजे तु हृद्रोगे श्लैष्मिकाणां
कृमीणां ये उपद्रवा हृल्लासा
दयः अस्य वर्णान्नाविपाकादयस्ते
मताः अथ हृद्रोगस्य चिकित्
सा घृतेन दुग्धेन गुडांभसा वा
पिबंति चूर्णं ककुभत्वचो ये
हृद्रोग जीर्णज्वररक्तपित्तं हत्वा
भवेयुश्चिरजीविनस्ते १
हरीतकी वचा रास्ना पिप्पली
नागरोद्भवं शठी पुष्करमूलो
त्थचूर्णं हृद्रोगनाशनं २ पुट
दग्ध हरिणशृंगपिष्टं गव्येन
सर्पिषा पिबतः हृत्पृष्ठशूल
मचिरादुपैति शांतिं स्वकष्टमपि
३ तैलाज्य गुडविपक्वं चूर्णं गो
धूम पार्थजस्य पिबति पयोभु
क् स भवति गतसकलहृदाम
यः पुरुषः पार्थः कोहः ॥ ॥




वालुकाक्लिन्ना इत्याद्युपक्रम्य
वास्तुखण्डे महादोषा तस्मादि
वर्जयेत् इति युक्तिकल्पतरुः ॥
हेरं त्रि मुकुटभेदः हरिद्रा ॥
ग्रामसरीमाया इति केचित् हे
रंबः पुं गणेशः इत्यमरः
महिषः शौर्य्यगर्वितः इति
मेदिनी बुद्धविशेषः तत्प
र्यायः शौर्य्यगर्वितः इति
मेदिनी बुद्धविशेषः तत्पर्य्या
यः हेरुकः २ चक्रसंवरः ३
देवः ४ वज्रकपाली ५ निशु
म्भी ६ शशिशेखरः ७ वज्रटी
कः ८ इति त्रिकाण्डशेषः अ
थ हेरंबमन्त्रः स च ऊंकार
युक्तो गकारः सबिन्दुः प्रण
वादिनमोऽन्तश्चतुरक्षरः निव
त्त्यर्पचान्तको बिन्दुयुक्तो वा
मकर्णविभूषितः तारादिहृ
दयान्तोऽयं हेरंब मनु रीरितः
चतुर्वर्णात्मकोन्यत्रा चतुर्व
र्गफलप्रदः अस्य पूजाप्रयो
गः प्रातः कृत्यादि पीठन्या
सान्तं विधाय गणेशोक्तपी
ठशक्तीः पीठमन्त्रं च विन्यस्य ऋ
ष्यादिन्यासं कुर्य्यात् अस्य गण
कऋषिर्गायत्री छन्दो हेरंबो देव

छेव निद्रालस्यारुचि ज्वरः सर्व
लिंगं त्रिभि र्दोषैः क्रिमिभिः
श्यामनेत्रता तमःप्रवेशो
हृल्लासः शोषः कण्डूः कफ
स्तुतिः हृदये प्रततंचात्र कक
चेनेवदार्य्यते चिकित्सेदा
मयं घोरं तत्क्षीणं पाचका
ग्राणि इति गारुडे १५९ अध्या
यः मुंठी सौवर्चलं हिंगु
पीत्वा हृदयरोगजित् इतिच
गारुडे १८८ अध्यायः ॥
हृद्रोगवैरी पुं अर्जुनवृक्षः
इति शब्दचन्द्रिका ॥
हृल्लासः पुं हिक्का यथा हि
क्काहिक्का च हृल्लासः प्रति
स्यायस्त्वपीनसः इति हेमच
न्द्रः अस्य निदानादि हिक्का
शब्दे द्रष्टव्यं ॥
हृल्लेखः पुं ज्ञानं इति राज
निर्घण्टः तर्कः इति त्रिकाण्ड
शेषः
हृल्लेखा स्त्री उत्कंपं
इति हलायुधः
हृष ३ हर्षे
इति कविकल्पद्रुमः
हृष्टश्चित्तोत्साहः ॥ ॥॥

हनुमान् पुं वानरविशेषः स
तु अंजनागर्भे पवनौरसाज्जातः
रावणवधार्थं श्रीरामदूतश्च
तत्पर्य्यायः हनूमान् २ आं
जनेयः ३ योगचरः ४ अनि
लीः ५ हिडिंबारमणः ६ रामदू
तः ७ अर्जुनध्वजः ८ इति त्रि
काण्डशेषः मरुतात्मजः ९ इ
ति जटाधरः अथ हनूमत्
कल्पः देव्युवाच शैवानि गा
णपत्यानि शाक्तानि वैष्णवानि
च साधनानि च सौराणि चा
न्यानि यानि कानि च श्रुतानि ता
नि देवेश त्वद्वक्त्रान्निःसृतानि
च किंचिदन्यत्तु देवानां साध
नं यदि कथ्यतां शंकर उवाच
शृणु देवि प्रवक्ष्यामि सावधाना
वधारय हनूमत्साधनं पुण्यम
हापातकनाशनं एतद्गुह्यतमं
लोके शीघ्रसिद्धिकरं परं जयो
यस्य प्रसादेन लोकत्रयजितो
भवेत् तत्
साधनविधिं वक्ष्ये नृणां सिद्धि
करं द्रुतं वियत् सलवकं हनू
मते चतदनन्तरं रुद्रात्मका
यकवचं फडिति द्वादशाक्षरं
एतन्मन्त्रं समाख्यातं गोपनीयं

प्रयत्नतः तव स्नेहेन भक्त्या च
दासोऽस्मि तव सुन्दरि एतन्मन्त्रं
अर्जुनाय प्रदत्तं हरिणा पुरा
येन साधनं कृत्वा जितं सर्वं च
राचरं नदीकूले विष्णुगेहे
निर्जने पर्वते वने एकाग्रचित्त
माधाय साधयेत् साधनं महत्
ध्यानमाह महाशैलं समुत्
पाट्य धावन्तं रावणं प्रति तिष्ठ
तिष्ठ रणे दुष्ट घोररावं समुत्सृ
जन् लाक्षारक्तारुणं रौद्रं का
लान्तकयमोपमं ज्वलदग्निस
मं नेत्रं सूर्य्यकोटिसमप्रभं अंग
दाद्यैर्महावीरै र्वेष्टितं रुद्ररूपिणं
एवं रूपं हनूमन्तं ध्यात्वा यः प्रजपे
न्मन्त्रं लक्षजपात् प्रमन्त्रः स्यात् सत्य
ते कथितं मया ध्यानैकमात्रतः
पुंसां सिद्धिर्भवेन्न संशयः प्रातः
स्नात्वा नदीतीरे उपविश्य कु
शासने प्राणायामं षडं
गं च मूलेन सकलं चरेत्
पुष्पाञ्जल्यष्टकं दत्वा ध्यात्वा
रामं ससीतकं ताम्रपात्रे ततः
पद्ममष्टपत्रं सकेशरं रक्तच
न्दनपृष्टेन लिखेत्तस्य
शलाकया कर्णिकायां लि
खेन्मन्त्रं तत्रावाह्य ॥ ॥ ॥



कपिं मध्ये कर्णिकायां हनू-
मन्तं ध्यात्वा पाद्यादिकं ततः
सुग्रीवं लक्ष्मणं चैव अङ्गदं न
लनीलकं जाम्बवन्तं च कुमुदं के
शरिणं दले दले पूर्वादि क्रम
तो देवि पूजयेद्गन्धचन्दनैः प
वनं चाञ्जनां चैव पूजयेद्दलवाम
तः दलाग्रेषु कपिभ्योऽपि पुष्पा
ञ्जल्यष्टकं ततः ध्यात्वा
तमेवराजं वै लक्षं यावत्साध
कः लक्षान्तदिवसं प्राप्य कुर्या
च्च पूजनं महत् एकाग्रचित्त
मनस्मिन् पवननन्दने दिवा
रात्रौ जपं कुर्यात् यावत्
संदर्शनं भवेत् सुदृढं साधकं
मत्वा निशीथे पवनात्मजः सु
प्रसन्नस्ततो भूत्वा प्रयाति सा
धकाग्रतः यथेप्सितं वरं दत्वा
साधकाय कपिप्रभुः वरं लब्ध्वा
साधकेन्द्रो विहरेदात्मनः सु
खैः एतद्धि साधनं पुण्यं देवा
नामपि दुर्लभं तवस्नेहात् स
माख्यातं भक्तासि मयि पार्वति
इति गारुडे हनुमत्साधनमि
ति तन्त्रसारः हनुमतोऽतिगुह्यं त
लिख्यते वीरसाधनं ब्राह्मे मुहू
र्ते उत्थाय कृतनित्यक्रियो द्वि

जः गत्वा नदीं ततः स्नात्वा तीर्थं
मावाह्य चाष्टधा मूलमन्त्रं ततो
जप्त्वा सिञ्चेदादित्य संख्यया
ततो वाससी परिधाय गङ्गाती
रे पर्वते वा उपविश्य ह्रौं अङ्गुष्ठा
भ्यां नमः इत्यादिना करांगन्या
सौ कुर्यात् ततः प्राणायामः
अकारादिवर्णान्तज्ञाप्य वामना
सापुटेन वायुं पूरयेत् पंचवर्गा
न् जप्त्वा वायुं स्तम्भयेत् यका
रादिवर्णान् जप्त्वा दक्षिणनासा
पुटेन रेचयेत् एवं वारत्रयं
कृत्वा मन्त्रवर्णैः रंगन्यासं कृत्वा
ध्यायेत् ध्यायेद्रणे हनूमन्तं क
पिकोटिसमन्वितं धावन्तं रावणं
जेतुं दृष्ट्वा सत्वर मुत्थितं
लक्ष्मणं च महावीरं पतितं रणे
भूतले गुरुं च क्रोधमुत्पाद्य
गृहीत्वा गुरुपर्वतं
हाहाकारैः सदर्पैश्च कंपयन्तं ज
गत्रयं आब्रह्माण्डं समाव्याप्य कृ
त्वा भीमं कलेवरं इति ध्यात्वा
षट्सहस्रं जपेत् अस्य मन्त्रः
स्ववीजं एवं सुसाध्य पवनं च
ततो वदेत् नन्दने च ततो देयं
नेऽ वमानेऽ नतप्रिया दशार्णायं
मन्त्रः प्रोक्तो नरा॥ प

ह्रौं स्फुरपादपं ह्रौं पवनन
न्दनाय स्वाहा इति मन्त्रः सप्त
मदिवसे दिवाभात्रं व्याप्य जपे
त् ततो महाभयं दत्वा त्रिभा
गशेषासु निशासु नियतमा
गच्छति साधको यदि मायां न
इति तदेप्सितं वरं प्राप्नोति वि
द्यां वापि धनं वापि राज्यं वा
शत्रुनिग्रहं तत्क्षणादेव च प्रा
प्नोति सत्यं सत्यं सुनिश्चितं इ
ति च तन्त्रसारः हनूः स्त्री हनुः
इत्यमरटीकायां
भरतः
हनूमान् पुं हनुमान् इति
त्रिकाण्डशेषः
हनूषः पुं राक्षसः इति त्रिका
ण्डशेषः
हन्त व्य हर्षः अनुकम्पा वाक्या
रम्भः विषादः इत्यमरः
अन्तिः वाहः सम्भ्रमः
इति शब्दरत्नावली खेदः
इति मेदिनी अन्तकल्पने इ
त्यजयपालः
हन्तकारः पुं अतिथिदेयतण्डु
ल इति केचित् हन्तशब्दः य
द्यायन्त्रलिवीमी हन्तकारेणाम
त्रघ्रांस्तर्पयेदथ कुर्यात्समध्य

शेनन्तृतीयेन उदन्वतः इति
लघुविष्णौ मां हन्तप्रयोगेणाज
लदानमुक्तं तत् सनकादिभ्ये
कल्पेण यथा सनकस्तृप्यन्ता
नम्येतदुकं हन्त इत्यादौ नत प
मपुराणीयमिलितं तर्पणे
इत्याह्निकाचारतत्वं
निर्णये दानार्थयोरिष्टाग्रासं
यथा पूजयेदतिथिं नित्यं नम
स्येदर्च्चयेद्द्विजं मनोवाक्कर्म
भिः शान्त मागतं स्वगृहं ततः
हन्तकारमथाग्रं वा भिक्षां वा
शक्तितो द्विजः दद्यादतिथये
नित्यं वुद्ध्येत परमेश्वरं भिक्षा
माहुर्ग्रासमात्रमग्रं च
स्याच्चतुर्गुणं पुष्कलं हन्तकारं
च तच्चतुर्गुणं मुच्यते इति कू
र्मपुराणे उपरिभागे १२ अ
ध्यायः अपि च भिक्षां च यावता
दद्यात् परिव्राड् ब्रह्मचारिणां
ग्रासप्रमाणं भिक्षास्यादग्रं ग्रा
सचतुष्टयं अग्रं चतुर्गुणं प्राहु
र्हन्तकारं द्विजोत्तमाः भोजनं
हन्तकारं वाऽग्रं भिक्षामथा
पि वा अदत्वा तन्न भोक्तव्यं य
थाविभव मात्मनः इति मार्क
ण्डेयपुराणे मदा




नवा कटु तिक्तान् मूत्रान् हये
व्याधिते व्याधिते स्नाने त्रिदो
सर्वरोगे प्रथमे ऽ क्षिपलं ददेत्
विवर्द्धियेत् ततो वर्षमेकादि
पलप्रचकं उत्तमे स्यात्त्व च
त्वारि त्रीणि मध्य जघन्य
योः पानेन भोजनेनैव ग्रभी
तिपलकं द्वे मध्ये षष्टि
स्त्राधमे ऽ थ चत्वारिंशात्त्वभो
गिषु अणे कुष्टेषु खंजेषु
त्रिफलाक्काथसंयुतं मंदा
ग्नौ शोथरोगेच गवांमूत्रेण
योजयेत् वात पित्तो ल्वणे
क्वाथे गोक्षीर घृतसंयुतं दे
यं कुष्ठाणां पुष्टयर्थं माषै
र्युक्तं च भोजनं सूपिष्टायां
प्रदातव्यं गुडूच्या पलपंच
कं प्रभाते घृतसंयुक्तं प्रभ
द्गौ क्षेषु वाजिनां रोगत्रं
पुष्टिदं वापि वलतेजो विव
र्द्धनं तदेवाश्वाय दद्याद्दै लीरयु
क्तमथापि वा गुडूचीकल्कयो
गेन शतावर्य्यश्वगन्धयो चत्वा
रि त्रीणि मध्यमा जघन्यस्य पला
नि हि अंकस्माय्य वाहानामेक
रूपे यदा भवेत् क्रियते च तदादि
ग्रे उपसर्गं तमादिशेत् होमः ॥

द्दोरतया विप्रभोजनैर्बलिक
मणा शांत्या पसर्गं शांतिः स्या
हुरीत क्यादिकल्पतः हरीत
कीसगोमूत्रा तैलेन लवणा
न्विता ग्रादौ पंच ततः पंचवृ
द्धाः पूर्णा शतावधि उत्तमाश्व
शतं प्रोक्तमशीतिः षष्टिरुत्तरे
गजायुर्वेद माख्यास्य उक्तं
कल्पा गजे हिता गजे चतुर्गुणा
मात्रा नाभि गजरुगर्हितं गजो
पसर्गव्याधीनां शमनं शांति
कर्मच पूजयित्वा सुरान् वि
प्रान् ब्राह्मणे कपिलां ददेत्
दंतिदंतद्वये मालां विवध्नीषा
डुणोषितः मंत्रेण मंत्रिता वैद्या
वचा सिद्धार्थकामले सूर्य्यायाः
शिवदुर्गाग्नी विश्वतारकेभ्यो ग
णः बलिं दद्याच्च भूतेभ्यः स्था
पयेच्च चतुर्वेदैः भोजनं मंत्रि
तं दद्यात् भस्मनोद्वर्तयेत्तनो
भूतीरक्षा प्रभा मेध्या वाह
णीरक्षसां सदा त्रिफला पंच
कोलेच दणमूलं विडंगकं शा
ताह्वी गुडूचीच निंवासन क
किंशुकाः गजरोग विनाशाय
प्रोक्तः कल्कः कषायकं अ
युर्वेदो गजाश्वानां शुक्तं संहिताया
रतः

भृंगं परं पकत्र सोभ्मिकां
शाखाः करस्तान्यत्र तो विना
पकल्पनं तु हृदयं रोमावल्यद्ध
संयुतं रंभास्तंभ समाकोरुस्त
पार्ष्णि मृदुपादकं पकं तथा
परं स्थूलसंहतोरु परो वुजं
पकं वरुस्तड स्थूल जघनं सुम
नोरं तथापरं हस्तकटिसंह
तोद्भुपदांवुजं पकं वैयाघ्र
चर्मोपयुक्तं भूतिविलेपनं अ
परं सूक्ष्मकौषेयवसनं चल्नो
त्तिनं पवमर्द्धं तथा जातं यो
षित्लक्षणसंयुतं अपरं वल
वद्भूरि स्तनाढ्यं पुरुषाकृति
पवमर्द्धं स्मररिपो जेद्दाररि
विजासती हिताय सर्वजगतां
कामाख्या कालिकोपमा त
स्याः शरीरं राजेन्द्र हरस्तेवार्द्ध सं
युतं येनोपमेयं तन्नास्ति मार्गि
तं भूवनत्रये संतानः पारिजाते
वा यकं तद्विघट्टत रं अमोघ
या यथा वन्ध्या तौ चापि य
तने हि वक्रथा च पृथकेन तौ
रेमाते नरेश्वर अर्द्धनारीश्व
रो भूत्वा मत्तौ रेमे कदाचन॥
इति यद्यपि भूतेषां स्वयं
शक्नोति कालिका गौरीकर्त्तुं

तदा सर्वभूतकारणकारणाः
तथापितो गिरिसुतो संयो
ज्य विविधैः पुरा तपस्यो ज
यद्देव क्रियोपाये रनेकशः
तपो विधूत सर्वांगौ पश्चाद्गौ
री मथाकरोत् अर्द्धं च मद
दौ तस्मै शरीरस्य महेश्वरः॥
नैवास्य तत्वं जानंति शाक्का
द्याः सकलाः सुरा पार्वती
हृदयानस्य तपसा योजनस्य
च पुत्रस्य तत्वं जानंति महा
त्मानो महावलाः नंदी भृंगी म
हाकालो वेतालो भैरवस्तथा
अंगभूता महेशस्य वीतभी
तास्तपोधनाः येमानुषशरी
रेण प्रापिरे तपसो वलात् ग
णानां साधिमन्यंते ते जानं
ति हरं परं एवं सदात्वया ये
ष्याः सानुगानृपसत्तम वनि
तासत क्रियोपाये स्ततोभ
द्रमवाप्स्यसि यदिदं मृण
याक्तिस्समद्धृत पुण्यदायकं
शिवयोः प्रीतिकरणं शारी
राद्धग्रहं तथा गौरीत्वापाद
नं चैव कालिकायाः प्रभाव
हं ततस्य विद्या जायं ते सच
पुण्यतमो मतः दीर्घायुः स
खो सुषात पुत्रपौत्र ॥॥




समेवितः सततं परिभृंवा
णः शिवयो स्फुरितं महत्
शिवलोकमवाप्नोति हविरं
शिवलभः इति श्रीकालिका
पुराणे षष्ठ अध्यायः ॥
हरचूडामणिः पुं चन्द्रः इति
भूरिप्रयोगः शिवशिरोरत्नं
च हरणं क्ली यौतकादिदेय
द्रव्यं तत् पर्यायः दायः २
इत्यमरः यौतकं याविना उ
पनयनभिक्षा मस्तादिना।
उपनयनभिक्षा मस्तादिदि च
यत् देयं तत् दायहरणपद
वाच्यं कन्यादानकाले यामा
त्रादिभ्यो यत् भिक्षादौ ब्राह्म
णादिभ्यश्च यत् द्रव्यं दीयते
तत् दायादिद्रव्य मित्यर्थः यु
तकं योनिसंबन्धः तत्र भवमि
ति स्मृयौतकं युतयो वेधूवर
यो रिदमिति वा कणि यौत
कं यौतकमकार मध्यमपि
यौतकं यौतुकं च तत् इति
वाचस्पतिः दीयते दायः क
र्माणि घञ सुदृदीयते सदा
यः इति पाठः इत्यन्ये ह्रियते ह
रणं कर्माणि ल्युट इति भरतः
भुजः स्वामिः इति मेदिनी युक्ते
स्वर्णो कपर्दकं उमादकं ॥

इति केचित् भार्याकान् भा
जकांकहारा भागग्रहणं
इति लीलावती ॥
हरतेजः क्ली पारदं इति
राजनिर्घंटः [illegible] शिववीर्यं
च हरनेत्रं क्ली सोम्यात्रयं इति
ज्योतिः शास्त्रे शिवचक्षुश्च
हरचूडः पुं शिवः इति शब्द
रत्नावली ॥
हरवीजं क्ली पारदं इति भू
रिप्रयोगः ॥
[illegible] ॥
हरशेखरा स्त्री गंगा इति हे
मचंद्रः हरहरा स्त्री हारहूरा द्रा
क्षा इति केचित्
हराद्रिः पुं कैलासपर्वतः
इति केचित् ॥
हरिः पुं विष्णुः सिंहः शु
कपक्षी सर्पः वानरः भे
कः इत्यमरः चंद्रः सूर्यः
वायुः अश्वः यमः शिवः
ब्रह्मा किरणः इन्द्रः वर्ण
विशेषः इति मेदिनी मयूरः
कोकिलः हंसः अग्निः इति
शब्दरत्नावली भर्तृहरिः
इति त्रिकाण्डशेषः पिंगव
र्णः हरितवर्णः इति ॥ ॥

हेमचंद्रः हरेरष्टोत्तरशतना
मानि यथा श्रीसदाशिव उवा
च श्रीकृष्णाष्टोत्तरशतं नाम
मंगलदायकं तत्र शृणुष्व म
हाभाग सर्वकल्मषनाशनं श्री
कृष्णः पुंडरीकाक्षो वासुदेवो जना
र्दनः नारायणो हरिर्विष्णुर्माध
वः पुरुषोत्तमः गोविन्दः केश
वोऽनंतो वामनो मधुसूदनः दा
मोदरो हृषीकेशः पद्मनाभ स्त्रि
विक्रमः वैकुंठश्चाच्युतो राम
श्चक्रपाणिरधोक्षजः पीतांबरो
जगन्नाथो नृसिंहो गरुडध्वजः रा
धिकापति रानन्दस्वरूपो विश्वमो
हनः यशोदानन्दनः मत्स्यः श्रीगो
पीजनवल्लभः गदाधरो हयग्रीवो
वराहश्च गवीश्वरः गोवर्द्धनध
रो विश्ववीजं कमललोचनः सर्वा
न्तर्यामी जगदीश श्चानूरमर्द्द
नः प्रभुः विश्वंभवो यज्ञभोक्ता
वनमाली सनातनः पुराणपु
रुषो नन्दात्मजः श्रीवत्स लां
छनः देवकीनन्दनः श्यामः
श्रीश्यामाप्राणवल्लभः अनि
रुद्धः परं ब्रह्म मुरारिः
श्रीधरस्तथा श्रीगोपीमोह
नः शार्ङ्गधन्वा ब्राह्मणप्रियः

बलदेवः क्षेत्रज्ञ स्तापत्रयविनाश
नः कैटभारि र्गुणातीतो रुक्मि
णीरमणो विराट् संकर्षणः शे
षशायी दैत्यारि र्बकभिन्मुधा
सर्वशास्त्रप्रणेता च मुकुन्दो भ
क्तवत्सलः अघासुरघ्नः मधु
घ्नो हंसश्च मुरलीधरः कुवल
यापीडघाती च पद्मधारी चतुर्भु
जः भक्तलोकैकशरणो गोपा
लो वैष्णवप्रियः वेणुपाणि
र्गुणमयः कोटिकंदर्पमोदनः
वेणुवाद्यविनोदी च कंसारि
र्यादवस्तथा चतुर्वेदमयो नि
त्यः सच्चिदानन्दविग्रहः दीन
नाथैकशरणं भक्तानुग्रहका
रकः एतदष्टोत्तरशतं कृष्ण
नाममंगलं मया हि यः पठे
त् प्रातः त्रिसंध्यं वा विशेषतः
द्विजादि मुन्नरो भक्त्या शृणो
ति जपति स्मरेत् दुःस्वप्नना
शनं तस्य मनोमलविनाशनं
तस्य मनोमलविनाशनं सर्वा
पराधशमलविनाशनं सर्वाप
राधशमनं सर्वपापक्षयं भवेत्
पावनं शांतिदं पुण्यं तापत्रय
विनाशनं आयुष्यं सर्वसौख्यदं
सर्वदुःखापहं शुभे व्रत यज्ञ
तपोदानयो ॥



गतीर्थफलप्रदं पुत्रदं चाप्यु
वन्ध्यानां ग्रहपीडादिनाशनं
सर्वाभीष्टप्रदं सर्वैश्वर्यदं विघ्न
नाशनं सर्वोपद्रवदारिद्र्यना
शनं मानवस्यव सद्बुद्धिविद्या
विज्ञान यशो धर्मप्रदं तथा स
र्वभीतिहरं भक्तिमुक्तिप्राप्त्यर्थन
प्रदं सर्वरोगार्त्तयंकरं वाञ्छितं
शुद्धिदं परं फलकामिनां वै
ष्णवस्य सर्वकामफलप्रदं स
र्वशत्रुक्षयो याति हरिभक्तिश्च
जायते सरस्वतीव वशगा
कमला विरते भवेत् ॥
तेत्रतीर्थेच मरणं गंगायां
वा विशेषतः मोचनं भवब
न्धस्य यमभीतिविनाशनं नि
ष्कामिनस्तु नन्यस्य प्रेमभक्ति
सुखप्रदं भवेद्देहेतकंक्षाने मा
दात् कृष्णः प्रसीदति इति
श्री मोक्षखंडे १११ अध्यायः
श्रीहरिपाद चिह्नानि यथा
श्रीसदाशिव उवाच सच्चि
दानन्दरूपस्य कृष्णस्याद्भुत
कर्मणः संस्मरेत् पादचि
ह्नानि प्रातर्भक्तो नरोत्तमः
प्रतिगुह्यानि देवेषु यानि भ
क्तिप्रदानि च सर्वसौख्यप्रदा
नीह तव प्रोक्तानि वै यथाम

यानि भुवनेश्वर्य्यै कथितानि प्रय
त्नतः पुरासौ तुष्टचित्ताभूत् त्र्य
ता कृष्णस्य च प्रदा दीलीपउवाच
कानि कानि चिह्नानि कृष्णस्य पा
दयोः सन्ति वशिष्ठ श्रोतुमिच्छा
मि कथयस्व तत्पूर्वकं व
शिष्ठ उवाच शृणु विज्ञान् सर्वं
ब्रह्मा नारदाय नराधिप तत्
स्मृणुष्व मदत्त प्राप्तमतिगोप्य
तमं वचः विधिर्देवर्षिणा दृष्ट
उपाख्यानमिदं पुरा महाभाग
तं प्रणाममेकदातत्र ब्राचह ब्रह्मो
वाच शृणु नारद वक्ष्यामि पाद
योश्चिह्नलक्षणं भगवत् कृष्ण
रूपस्य तानेकरसस्य च अव
ताराः ह्यसंख्याश्च कथिता येन
वाग्रतः परे स्वक प्रवक्ष्यामि
कृष्णस्तु भगवान् स्वयं देवानां
कार्य्यसिद्ध्यर्थं मुषीणां वा नृणां
तथा आविर्भूतस्तु भगवान् स्वा
नां प्रियचिकीर्षया केनैवताय
ते देवो भगवान् भक्तवत्सलः
तान्यहं वेत्ति नान्योस्ति सम्य मेत
न्मयेरितं ऊनविंशतिचिह्ना
निमया दृष्टमितत् पदे
दक्षिणे दशचिह्नानि वामे
च नवकानरद यज्ञोनपत्रं ॥ ॥

कमलं वज्रावाम अंकुशो यवः
स्वस्तिकं चोर्द्ध्वरेखा चाष्टकोणं
वक्रमेव च तवान्यानि प्रवक्ष्यामि
सांप्रतं वैस्नवोत्तम चिह्नानि वा
मचरणे गोविन्दस्याद्भुतानि
च इन्द्रचापं त्रिकोणं च कलसं
चार्द्धचन्द्रकं शंखोम्बरं मत्स्य
चिह्नं गोष्पदं जाम्बवं स्मृतं अंका
न्येतानि भो विप्र दृष्यं ते च यदा
कदा कृष्णस्यचैत परं ब्रह्मभुविजा
तेन संशयः इयं चाष्टत्रयं चाष्टच
त्वारः पंच पर्व्वा दृष्यं ते ब्रह्मवि
त् श्रेष्ठ सर्व्वतामः कथं च न म
येधन्या न विज्ञेयापद्मं द्व्यंगुल
मानतः वज्रं तु दक्षिणे पार्श्वं वा
कुशो वैतरयतः यवोप्यंगुष्ठमू
लेस्यात् स्वस्तिकं यत्र कुत्रचित्
ख्यातपत्रं चोर्द्ध्वरेखा वामेचकेव
दक्षिणे आद्यमंगुलिमारभ्य याव
द्धे मध्यमास्थिता तावद्वैचोर्द्ध्वरे
खाच कथिता पद्मसंज्ञके अ
ष्टकोणं ततो वत्स समाना
ष्टांगुले स्मृतत् निर्द्दिष्टं दक्षि
णे पादे चेत्याक्र म्मुनयो द
दशः ~~से पादे चेत्स्य~~ पंचपादस्य
चिह्नानि नाम्ने ॥ ॥ ॥ ॥

वदति वैस्नवः दक्षिणेतवस्था
नानि संवदामी हुसंस्करेत् च
तुरंगुलमानेन द्व्यंगुलिसम्मो
पतः इन्द्रचापं ततो विद्यादन्यत्र
चतते इच्छित् त्रिकोणं मध्यनि
र्दिष्टं कलसो यत्र कुत्रचित् अ
ष्टांगुलप्रमाणेन तद्वत् अर्द्धचन्द्र
कं अर्द्धचन्द्र समाकारं निर्दिष्टं
तस्य सुव्रत इन्दुं वै यश्च चिह्नं
स्यायीन वै निरूपितं त्रिकोणं दृ
क्षिणे भागेत्वम्बरं तदधो यवं ज
न्तू फलं त्रिकोणस्य वामपार्श्वे नि
रूपितं गोष्पदं द्विखुरं ज्ञेयं तदा
ष्टांगुलमानतः त्रिकोणाधस्तन्नि
र्दिष्ट मध्यवा कलसो यथा ॥
श्रीनारदउवाच नश्रुतं नव दृष्टं
च चिह्नमेतन्मयोदितं रूपं वैत
दर्शं ब्रह्मन् वदत्वं सांप्रतं मम
श्रीब्रह्मोवाच पताका च ध्वजामो
क्षा प्रोक्ते त्रैलोक्यकालयः पद्मं वै
चापपद्मं च सातवे श्रुतिनोदितं
वज्रं त्विड इति प्रोक्तं दृष्टं ॥ ॥
वै गोत्रभित् करे सहस्रारं समा
ख्यातं कविहृद्विदो विदुः अं
कुशो नागशिक्षास्त्रं निर्मि ॥ ॥



तंयद्विप्रत्रक ताहशं तद्रेखि
ह्नं विज्ञाय वैष्णवै नरैः यवो
ऽप्यंगुष्ठमूलेषु कथितो मुनि
भिर्ध्रुवं आतपत्रं वृषच्छत्रा
कारं वत् सत्त्वशोभनं चक्रं सुद
र्शनाकारं यच्चिह्नं तन्मनोहरं
वासुदेव करे यद्वत् मुनिभिः प
रिकीर्तितं विवाहादौ च मंग
ले पुत्रे जाते तथैव च सौभिक्षे
वसदा कार्यं स्वस्तिकंच तद्व्य
ते रेखा श्रुतस्त्वः संख्याता स्त्रिय्थ
गृहीता यदीरिताः पल्लवेन च संयु
क्तमष्टकोणं तदुच्यते दंडाकारो
द्विरेखास्यात् नवक्रा दृश्यते
यदा मध्यमांगुष्ठमानेन कथिता
मुनिभिः किल दशभिश्चिह्नितैः
पादं वन्द्यं पूज्यं च सर्वदा चिह्ना
न्येतानि भो विप्र दक्षिणे चरणे वि
भोः मत्प्रीकृष्ण इति ज्ञेयो
बुद्धिमद्भिर्नरोत्तमैः यद्रूपाणि च
चिह्नानि वामपादे च तत् शृणु
इन्द्रचापं धनुश्चिह्नं यात् ह्यंगुलेव
चतुर्गुणं मौर्वीसंयुक्तवक्रं च
तदाकुं सुनयो भ्रुवं त्रिकोणन्तु
त्रिरेखाख्यं शाकटाकारकं य
दालदावैन त्रिकोणाख्यं चिह्नं च

मुनिनोदितं कलसो वर्तुलाका
रो ग्रीवया सहितो यदा दृश्यते
तादृशं पूज्रचिह्नितं सकलाधि
कं द्वितीयायां यथा चन्द्रो दृश्य
ते चांबरे क्वचित् तदर्द्धचन्द्रं वि
ज्ञेयं श्रुतौ च प्रतिपादितं अंबरं
बिन्दुरित्येवं द्विरेखा समन्वितं
वर्तुलंच सदा दृष्टं श्रीकृष्णे परमा
त्मनि मत्स्याकारो भवेद्यत्र त
च्चिह्नं मत्स्यसंज्ञकं जंबूफलस
माकारं जम्बूचिह्नं विदुर्बुधाः
एतच्चिह्नं समाख्यातमूनविंश
ति संख्यकं पादयोरुभयो राज्ञः
कृष्णस्य मुनयोनघाः एवं वृन्दा
वनेश्वर्याः पादयोर्म्मुनिसत्तम
कमलविंशतिचिह्नानि कथया
मीह तत् शृणु
दक्षिणे नवचिह्नानि राधायाः द
शवामतः भेदोऽयं कथितो विप्र
कृष्णस्याद्यांगरूपिणी एतानि प
दचिह्नानि दृष्टानि च श्रुतानि च
तदग्रे कथितान्येव पुत्रं किं कथ
यामहं नारदउवाच
चिह्नान्येतानि भो ब्रह्मन् किं
कर्तव्यानि वैष्णवैः
कथयस्व हि सर्वज्ञ युग्मयोपां॥

दयोर्मम ब्रह्मोवाच सौवर्णं
राजतं वापि पाषाणं काष्ठजा
दिकं युगलं युगलं पादं कृ
त्वा चिह्नैश्च चिह्नितं स्वगात्रे वि
भूषयन्तानि पदचिह्नानि वैष्णवः
नाभे हृदि मुनिः स्नात्वा वत्स
वृन्दावनेशयोः अथवा चिह्नि
तं पादं कृत्वा भागवतोत्तम पूजा
मारभते तावत् यावज्जीवति ना
रद पूजितो देवदेवेशः फलं भ
वति देहिनो तथा तच्चिह्नितं पा
दं अर्चनं कुरुते यदि राजसू
याश्वमेधादि फलं भवति सर्व
था तदनंतगुणं प्रोक्तं यैर्य
कं पूजयेत् सुधीः इति पा
द्मे नारदखंडे श्रीकृष्णपदचिह्नमा
हात्म्यं नाम ११२ अध्यायः ॥
तन्नाममाहात्म्यं यथा श्रीसदा
शिवउवाच शृणु नारद भद्रं ते
कथयिष्यामि वानघ पार्वत्यै
यदहं पृष्ठः प्रावोचं न यथा त
पं वेदस्याध्ययनं यज्ञं तपोयो
गः प्राणोदमः कृष्णनाम सहस्रां
शो देवर्षे न हि तस्य कं ज्ञानं दे
वार्चने ध्यानं धारणा नियमो
यमः प्रत्याहारः समाधिश्च ह
रिनाम समं न च गोवि॥ ॥

न्दनामसदृशं नत्यागोन व्रतं स्ना
ने न संकल्पो नापि शौचं न पु
ण्यं न फलं तथा वानप्रस्थं ब्र
ह्मचर्यं गार्हस्थ्यं कर्मन्यासकं
धर्म एवं सदाचारो न हरेर्नाम
वत्सकः न हरेर्नामसदृशं कर्म
किंचित् तपस्तथा सर्वतीर्था
टनं चैव चतुर्द्धामुक्तिरेव च कृ
ष्णनाम परा शक्तिः कृष्णनाम प
रा गतिः कृष्णनाम परं पुण्यं
कृष्णनाम परं फलं कृष्णनाम
परो धर्मः कृष्णनाम परं तपः
कृष्णनाम परा शान्तिः कृष्णना
म परा स्तुतिः कृष्णनाम परा भ
क्तिः कृष्णनाम परा स्मृतिः कृ
ष्णनाम परं यज्ञं कृष्णनाम परा
मतिः कृष्णनाम परं ज्ञानं कृष्ण
नाम परा स्थितिः कृष्णनाम परं
ध्यानं कृष्णनाम जगत्प्रियं कृ
ष्णनाम परं श्राद्धं पितॄणां तर्प
णं सदा कृष्णनाम परा प्रीतिः
कृष्णनाम परः प्रभुः कृष्णनाम
जगत् सत्यं जन्तूनां कारणं परं
जीवनेशरणं कृष्णनामेव विपु
लं धनं कृष्णनाम जगद्वन्द्यं त्रै
गह्वीजं गुणाः परं विश्वाधारं
कृष्णनाम जगतां पावनं परं।



कृष्णनाम जगज्जन्म यत् किंचि
त् सचराचरं धार्यते पाल्यते
विश्वं कृष्णनाम्नाप्रलीयते यत्
किंचित् क्रियते कर्म कृष्णना
मपरायणाः तत् कर्म कर्मप
सात्तादसूक्तानिकेशवः श्रीह
रेर्नामसंग्रहणं प्रशस्तं च युगेयुगे
कृतापिनभवेत् सिद्धिर्दित्तान
ज्ञाम कर्मच ॥ विशेषतः कलि
युगे कृष्णनामेव केवलं त्वज्ञाना
त्यव देवर्षे लोकस्य गतिरन्य
था हरिनाम परः शान्तः त
माशीलो जितेन्द्रियः नीलाक्र
लसहस्राणि कृष्ण प्राप्नोति
स्नानिच श्रीकृष्णहरि गोवि
न्ददामकामादिकोजनः यः
कश्चिद्याति कल्मषं सर्वं तन्ना
मकीर्तनात् हत्यायुतं पान
सहस्रमुग्रं गुर्वङ्गनाकोटिनि
षेवणं च स्तेयान्यनेकानि हरेः
प्रियेण गोविन्दनाम्ना निहतानि
सद्यः अवृक्ष्यापिदहतिस्प
र्शोऽनलवद्योयथा हरिनामदह
त् पापं तथाज्ञानवनिरीतं सकृ
दुच्चारितं येन हरे कृष्णेति निश्चयं
यमाधिकारं नो याति कापरे
नविना मृते अज्ञानादयः॥॥

वाज्ञानाद्भक्तिभावेन वा पुनः॥
कृष्णनामैव यच्चिन्तां सयाति प
रमं पदं वह्निहाम यथाः स्तेयी
त्त्वज्ञानाद युक्तस्यगः भवार्णवं
तरेदं ते कृष्णनाम परायणाः॥
पितृहा नृपहा गोघ्नस्त्रीहन्ता पा
पिनोऽपरे गोविन्दनाम्नोच्चारे
ण पश्यन्ते शुद्धिमायुः यदृ
तं पापमज्ञानाद्धर्मार्जनं चना
रदे यद्विषति तत् सर्वं कृष्ण
नाम दहेद्ध्रुवं वीणानां त सदा
द्रोही चाण्डाल निन्द्याकर्मकृ
त् स पूतो जायते धन्यो नामकी
र्तनतो हरेः क्षेत्रतीर्थतपोव्र
त व्रतात्र्येन फलं तथा शक्ति
श्च सर्वयज्ञानां सक्रेरध्यात्मवत्
नः स्नानं च दैवमहतां सर्वसिद्धि
प्रदं फलं नैमित्तिकानां नित्या
नां तथा च काम्य कर्मणां
वर्णाश्रमानां योगानां स्थापि
ते येषु नामस्त आकृष्य सर्वोच
हरे पुरा कृष्णेन नारद त्रैलोक्ये
यानि पुण्यानि धर्म्म कर्म फ
लानि च तत्स्ततानिनो॥
यान्ति हरिनाममात्रकीर्तने
नाम्नोऽस्य यावती शक्तिः पाप
निर्हरणे हरेः तावत् कर्त्तुं न

तत्र क्रोतिपातकं पातकी
जनः स्वपचो हन्ति नं कर्तुं
नदिक्रोतियत्नतः तावद्धर्म्मं
मुनेयावत् कृष्णनाममात्रकी
र्तनं मानसं कर्मजं वाग्जं लो
केतत्रास्ति कल्मषं सर्वोप्य
भंगुराणि वदं यद्धरेर्नाम कीर्त्त
नं चान्द्रायणादिभिः कृच्छ्रैः
शुद्धिर्नस्यात्तथा नृणां कीर्त्त
नेन हरेर्नाम्नः सकृदेव भवेद्य
था सकृदाख्यातिं येन कृष्ण
नाम सुमंगलं तज्जिह्वावैष्णवी
नान्यं वचो वक्तव्यकारणं ऋ
ग्वेदोऽथ यजुर्वेदः सामवेदो
ऽप्यथर्वणः अधीतास्तेन येना
क्तं हरिरित्यक्षरद्वयं पापिनो
पि हरेर्नामकीर्त्तयं तिय थाय
था सर्वाघं भस्मसात् कृत्वा कृ
ष्णभक्तिस्तथा तथा सकृन्नारा
यणेत्युक्त्वा पुमान् कल्पशतत्रयं
गंगादि सर्वतीर्थेषु स्नातो भवे
द्यत् तीर्थावगाहादिफलं
यस्येष्टं गोविन्दनाम्नोऽपि क
लाप्राप्तांस्तस्यंभवेन्नैव अनेक
दाविसमाचरितो मासचत्रस्थिमत

सामयष्ठं किंचन कृष्णगोविन्दना
मादिनेयं गायस निलाषाः गोको
टिदाने ग्रहणे खगस्य प्रयाग
गंगामुनिकल्पवासः यज्ञा
युतं मेरुसुवर्णदानं गोविन्द
नाम्नेन समं प्रमाणोः ऊरु
ते त्रेणाकिं तस्य किं कायशा
पुष्करेणच जिह्वाग्रे वर्ततेय
स्य हरिरित्यक्षरद्वयं विष्णुना
नि वक्तव्येव तीर्थानि वक्तव्यान
चकोपस्थेनापि तत्स्यानि ना
मकीर्त्तनतो हरेः इष्टापूर्त्तानि
कर्माणि सुबहूनि कृतान्य
पि भवहेतूनि तान्येव हरेर्ना
मतमुक्तिदं परिहासेपिहा
स्यादेर्विस्मार्गकृति नामये
कृताः ऽस्तेपिमनुजा स्तेभ्योपी
हनमोनमः स्त्रीशूद्रः पुरुषो
वापि येवान्ये पापयोनयः की
र्त्तयन्ति हरिभक्त्या तेभ्योपीह
नमोनमः नदेशनियमस्तत्र
नकालनियमस्तथा नोच्छिष्टा
दौनिषेधश्च नाम्न हरेर्नाम्नी
हरेः चक्रायुधस्य नामानि स
दा सर्वत्रकीर्त्तयेत् नापो चकी
र्त्तने तस्य सपवित्रकरो यतः
नकालशौचनियमा न देशाशौच

निर्णयं हरेः संकीर्तनादेव ना
स्त्रो नारद सच्यते स्नाने कालोस्ति
दानेच कालोस्तिजपत्तयोः कृष्ण
संकीर्तने कालो नास्त्यत्र पृथि
वीतले किं सांख्ययोगैः किंय
ज्ञैस्तपोभिः किंकुविद्यालि चे
न्मुक्तिमिच्छेद्भक्तिंच कुर्याद्गो
विन्दकीर्तनं परदाररतः पापी
परहिंसापकारकः
मुक्तिमायाति संस्पृष्टो हरेर्ना
मानुकीर्तनात् कृष्णनामध
नः कृष्णमामेकी हरी सदा न
रः तत्वतः कृष्णमाप्नोति कृ
ष्णनामजनप्रियः हित्वा गो
विन्दनामानि सर्वकर्मकरो
तियः वन्ध्यायतस्यतत् क
र्मनि मोहायतुनारद सर्व
कर्मपरित्यज्य हरिनामस्म
रेतत् सदायस्तस्य कर्मसि
द्धिःस्यात् कृष्णनामप्रसंगतः
कामांस्त्यक्त्वा मनोभोगान् वि
षयांश्च चरंतिये तेषां दयात्
परां भक्तिं हरिनामपरायणाः
हरिनामरतोभूत्वा सर्वकर्माणि
त्यजेत् सर्वपापाक्तो यः पर्म
हित्वोदकं यथा कृष्णनामेव यत्रि
नेवैषं तस्य कर्मच सत्लोकात् जि
त्वातत्वतः कृष्णमाप्नुयात् हरि
नाम सदागीत्वा विचरंति म
हीतले नमाप्नुवंति तद्धामदेवा
इन्द्रादयोपरे श्रद्धया हेलया ये
तु हरिनामसुमंगलं गायंते
कीर्तिन स्त्रिते च्युत स्तिष्ठति
संततं प्रकीर्तितः कृष्णना
माश्रया येचहरेः प्रियाः यदि
स्युरंत्यजा वेदपारगा ततधा
मुने कृष्णनामानि गायंतित
स्सेवादिकर्मच सदाकुर्वंति
येविप्र तेभ्योनित्यं नमोनमः
स्तेयी गुर्वंगनागामी ब्रह्मघ्नो
मद्यपः खलः तत् पापेभ्यः स
मुक्तो न श्रीहरे नाम यज्ञपः
पूर्वजन्म पवित्रकृत्यासकृत्
कृष्णनामस्य यथालाभोति
कादेहात् ससूतः सर्वपातका
त् हरिनाम व्रतं यस्य हरि
नामचयज्ञतपः स्वयंभवार्णवा
त्त्रातघोविन्दो मुनिपुंगव श्र
द्धयाविरतं कृष्णनामगानर
तोजनः कुर्यात् सदैव सर्वत्र त
चिंता कृपया च्युतः मात सर्वलो
भमोहैश्च कामक्रोधमदैर्युतः सर्वा
पहारीतन्मुक्तः कृष्णनामैवयज
पः सर्वदोषयुतो विप्र॥

व्यामस्त्राधोयमानकैः मुक्तः
सर्वहृजिनादस्मात् कृष्णनामै
वयज्ञपः स्वधर्मवर्जितः पापो
जीवद्रोहीच हिंसकः समुक्तः
सर्वपापेभ्यः कृष्णनामैवयज
पः विप्रक्षत्रियविट्शूद्राः सं
करांत्यजजारकाः कानीना गो
लकाश्चैव पितृजीतास्त्वहेत्र
जाः ब्रह्मचारीगृहस्थश्च वा
नप्रस्थोयतिस्तथा यद्योनेपा
पिनो विप्रमहापातकिनःपि
वा उपपातकिन स्त्यातिपापि
नोप्युपपापिनः भ्रष्टाचाराश्च
पाखंडाः स्वस्वधर्मविवर्जिताः
जीवहत्यारता ब्रात्यानिन्दका
श्चाजितेन्द्रियाः पश्चात्तप्तानस
मृतयज्ञा गुरोः कृष्णप्रसादतः
ततस्तथावज्जीवंति हरिनामप
रायणाः मुक्ता स्तेः खिल
पापेभ्यः पूर्वजेभ्योद्दिनारदना
मादेषां रटन्नस्मीहवेः स्व
तिएवकं ॥ महद्भयं यम
जित्वा परं गोविन्द मानसः
गृहान्धकूपपतितः सर्वदा
येस्तसंप्लुताः संसारवामनालि
प्ताः सर्वधर्मवदिष्कृताः मुक्ता
स्ते सर्वतस्तस्माद्भवबंधो ह॥
रेद्विज मृत्योर्महद्भयेन नामयो
ति गोविंदमव्ययं हरिनामा
नितिष्ठंति सेति वक्त्राणि प्रा
णिनां भवंतिकर्मसंबद्धा लो
कानरकगामिनः निसृज्यकृ
ष्णनामानि कर्ममार्गरता नराः
पुनर्जन्म पुनर्मृत्युं भ्रमंतः स्यु
स्ततस्ततः कृष्णनामानिगा
यंतिकुर्वंति तत्ससेवनं तेषां
नित्यम्देवस्थाने परममव्य
यं वर्णाश्रम स्थिता विप्र हरि
नामपरायणाः तेषां वक्तुं नश
क्नोमि महिमान महदपि हित्वा
गोविन्दनामानि कर्माण्येवं क
रोतियः पापमप्राप्यकृष्णस्य
भ्रमतेकर्मवर्त्मनि मायामो
हितविज्ञेन पापिष्ठा स्तेनरा
धमाः त्यक्त्वा कृष्णस्य नामा
निभ्रमंतेसर्वयोनिषु यदृच्छया
शयानाम पितयायः स्मरेद्ध
रेः सर्वाचमुक्तो देवर्षे सततं
कृष्णनामतः येन तेन प्रकारे
णमुकुन्दनामजल्पकः घोरा
द्भवार्णवात् पूतोमुक्तः सकृष्ण
नामतः नामास्थिके जने दृष्टा
यस्यश्रद्धा भवेद्धरेः सयातिवै
स्वधामपरमं कृष्णनामतः ह

ष्टामणामं कुर्वंति हरेर्नाम
प्रपंजनं सकलादंदसो मुक्ता
मानवाः साधुवज्जनाः कृष्ण
मस्रदानीत्वा विचरेत् कृष्ण
त्रिधोतथ्यो वदामि तेविप्रक्रीत
स्तस्य जनार्द्दनः नीत्वा करोति
नामानि श्रीहरेः करतालिकां
विक्रीतोहमतं तस्यवदामित
वनारद पक्रीतीनाममीत्वात
सन्निधौनत्येद्धरेः सत्यंतस्य
हरिः क्रीतो देवतानांचकाक
थायेभावगद्गदा सूत्वा हृदंत्य
च्युतसन्निधौ तेषां कृष्णः पवि
क्रीतो ब्रह्मादीनांचकाकथा
येपतंत्यवनौ गीत्वाहरेर्नामानि
गद्गदा भावेन तेषां गोविन्दः
क्रीतो नारद नान्यथा जन्मना
ये न गृह्णंति कृष्ण दीतांसतो
गुरोः तेषांनदर्शनं कार्य्यं दूरतः
परिवर्जयेत् कदाचित् योनगृ
ह्णाति कृष्णनामभवाम्रतं मेनः
स्थावर कोलानां सतयोनिस
जायते देवर्षे हरिनामानिभव
निस्तारहेतनि नगृह्णीयाद्व
यो मोहात्मृतेस्यात्तदधोगतिः
गुणकर्म्माणि नमानि न
गृह्णाति च यो ॥

हरेः दर्शनस्पर्शनेचैवभुवत्
स विवर्जयेत् मनुष्यजन्मसं
प्राप्य ननाम ग्रहणं हरेः
कुर्य्यात् कदापि स्वप्ने वा स्वर
पपः सनसाधमः ध्यानं सत्ययु
गे विष्णोः त्रेतायां यज्ञसाधनं
अर्च्चनं द्वापरयुगे हरिनामक
लौयुगे ध्यानं तपः सत्ययुगे
त्रेतायां यज्ञकर्मच द्वापरे पू
जनं दानं हरेर्नामकलौयुगेक
लौ भवार्णवोत्तीर्णो मानवोयु
नियुगव वर्त्तते यस्यजिह्वाग्रे
हरिरित्यक्षरद्वयं सर्वलोको
जित स्तेन कृष्णः प्राप्तः सना
तनः सकृदुच्चारितं येन हरेर्ना
मविदात्मकं फलंनाप्तवतोमाव
के सहस्रवदनो विधिः जितं ते
नजितं तेनजितं तेनेतिनिश्चितं
वर्त्ततेयस्यजिह्वाग्रे हरिरित्य
क्षरद्वयं सत्यं कलियुगे विप्र
श्रीहरेर्नाममंगलं परंस्वस्य
यनं नृणांनास्त्येव गतिरन्य
था इति पाद्मोत्तरखण्डे श्री
कृष्णनाममाहात्म्ये एष अ
ध्यायः कलौ दशसहस्रव
र्षपर्य्यंतं पृथिव्यां तस्याव
स्थितिर्यथा प्रालप्राप्तो हरे


सिरत्न मच्युतोः त्यंत निर्मलं
विद्यामयेन तज्ज्ञान मविद्या
चर्मसंस्थितं इत्थं पुमान् मथा
नवं बुद्ध्यहंकार मेवच भूतानि
च हृषीकेशोमनः सर्वेन्द्रियाणि
च विद्या विद्येच मैत्रेय सर्वमे
तत् समाश्रितं अस्त्रभूषण सं
स्थानस्वरूपं रूपवर्जितः वि
भर्त्ति मायारूपोसौ श्रेयसेप्रा
णिनां हरिः सविकारंप्रधानं
यत् पुमांश्चैवाखिलंजगत्
विभर्त्ति पुंडरीकाक्षस्तदेवं प
रमेश्वरः याविद्यायातथाऽवि
द्या यत् सत् यच्चासदव्ययं
तत् सर्वं सर्वभूतेशो मैत्रेयमधु
सूदने कलाकाष्ठानि मेषादि
दिनर्त्वयनहायनैः कालस्वरू
पो भगवानपरो हरिरव्ययः भू
र्लोकोथ भुवर्लोकः स्वर्लोको
मुनिसत्तम महर्जनस्तपः सत्यं
सप्तलोका इमे विभुः लोकात्म
मूर्त्तिः सर्वेषां पूर्वेषामपि पूर्वजः
आधारः सर्वविद्यानां स्वयमेव
हरिः स्थितः देवमानुषपश्वा
दि स्वरूपैर्बहुभिर्विभुः स्थि
तः सर्वेश्वरोऽनंतो भूतमूर्त्ति
रमूर्त्तिमान् ॥

ऋचो यजूंषि सामानि तथैवा
थर्वणानिच इतिहासोपवेदा
श्च वेदान्तेषु तथोक्तयः वेदां
गानि समस्तानि मन्वादिगदि
तानिच शास्त्राण्यशेषाण्य
ख्यानान्यनुवादाश्च ये क्वचि
त् काव्यालापाश्च येकेचि
त् गीतकाव्यविलानिच स
र्वमूर्त्तिधरस्यैतेवपुर्विष्णोर्म
हात्मनः यान्यमूर्त्तानिमूर्त्ता
नि यान्यत्रान्यत्र वाक्वचित् सं
ति वै वस्तुजातानितानिसर्वा
णि तद्वपुः इति विष्णुपुराणे
१ अंशे २२ अध्यायः हरिस्था
नविख्यातानि यथाभरद्वाज
उवाच केषु केषु विभोनित्यं
स्थानेषु पुरुषोत्तम सान्निध्यं
भवतो ब्रूहि ज्ञातुमिच्छामित
त्वतः वामन उवाच श्रूयतां
कथयिष्यामि येषु येषु गुरो
रहं निवसामि स्वरूपेण
स्थानेषु बहुरूपवान् मत्सा
वतारे वैकुण्ठ नभस्थले पा
तालमंतोनिचवर्षे दिवे च दिशां
समस्ता गिरयो नदाश्च व्यासो
भरद्वाज नमानुरूपैः ये दिव्या
येचभौमा जल गगणाचरास्था
वरा येऽत्र विषोसेन्द्राः सा ॥



कौः सचन्द्रा यम वरुणाः
सा मयः सर्वपालाः ब्रह्माद्या
स्थावरांता द्विजवर सहिता
मूर्तिमंतोह्यमूर्ता स्ते सर्वमत्
प्रसूता बहुविविधगुणाः पु
ण्यार्घे इष्टिध्याः पते दिशाव्याः
सुरसिद्धदानवैः पूज्यास्तथा सवि
हिता महीतले ये द्विसमाश्रितैः सर
सैव नाशं प्रयाति पापं द्विजवर्य
कीर्तितैः इति वामने दप अध्या
यः अपिच श्रीभगवानुवाच श्रा
द्यं मत्स्यं महद्रूपं संस्थितं मान
से ह्रदे सर्वपापहरं यकरं कीर्तन
स्पर्शनादिभिः कौर्ममन्यत् सान्नि
ध्यानं कौशिक्यां पापनाशनं हृ
यग्रीवं च कृष्णांगे गोविन्दं हस्ति
ने पुरे त्रिविक्रमं च कालिंद्यां
लिंगभेदे भवं विभुं केदारे माध
वं शौरं कुब्जाम्रे कुलमूर्द्धजं
नारायणं बदर्यां च वाराहे
गरुडासनं जयेशं भद्रकर्णे
च विपाशायां द्विजप्रियं रूप
धारिं इरावत्यां कुरुध्वजं
कृतशौचे नृसिंहं च ॥ ॥
गोकर्णे विश्वकर्माणं प्रा
चीने कामपालं च पुंडरी
कं महाम्भसि ॥ वि
शाखेये चापराजितं हंसं हंसपदे
तथा पयोष्ण्यां च तमः खंडं वि
तस्तायां स्वभूविलं मणिमत्प
र्वते ब्रह्मन् ब्रह्माण्यं च प्रजापतिं
मधुनद्यां चक्रधरं शूलबाहुं हि
माचले विष्णुरिति मुनिश्रेष्ठ
स्थितमोषधसम्पानि भृगुतुंगे
सुवर्णाक्षं नैमिषे पीतवाससं
गयायां गोपतिं देवं गदापाणि
नमीश्वरं त्रैलोक्यनाथं वरदं
गोप्रभावे कुशेशयं अर्द्धनारी
श्वरं पुण्ये महेन्द्रे दक्षिणे गिरौ
गोपालमुत्तरे नित्यं महेन्द्रे सो
मपिंडिनं वैकुंठमपि सह्याद्रौ
पारियात्रे पराजितं कशेरु
देशे देवेशं विश्वरूपं तपोध
न मलयाद्रौ च सौगन्धिं विन्ध्य
पादे सदाशिवं अवंतिविषये
विष्णुं निषधे चामरेश्वरं पां
चालिकं च ब्रह्मर्षे पंचालेषु
व्यवस्थितं महोदये हय
ग्रीवं प्रयागे योगशायिनं
स्वयंभुवं मधुवने अयोगन्धिं
च पुष्करे तथैव विप्रप्रवर वा
राणस्यां च केशवं अविमुक्त
कमत्रैव लोलस्तत्रैव गीयते
पद्मायां पद्मकिरणं समुद्रे वड

वाभवं कुमारवने चाक्रोशं
कार्त्तिकेयं च बर्हिणं यज्ञेशं
भुम्नवर्णं स्थाणुं च कुरुजांगले
वनमालिनं माकर्मं किष्किंधा
वासिनो जनाः वीरं कुवलया
श्वं शंखचक्रगदायां श्रियःप
तिं सरित्सहस्रं त्रिनयनं तत्रैव
चक्रनाशनं अर्बुदेषु त्रिसौप
र्णं त्रैलोक्याधारं शूकराचले त्रिगा
विकेतं ब्रह्मर्षे प्रभासे कप
र्दिनं तथैवाश्वापि विख्यातं त
तीर्थं शाकिशोखरं उदये शाक्षि
नं सूर्यं ध्रुवं च त्रितयं स्थितं
मन्दरे यज्ञपुरुषं स्कन्दे शरव
णे स्थितं मन्दरे यज्ञपुरुषं स्क
न्दे शरवणे स्थितं महालये स्व
तेरुद्रं चक्रेषु कृष्णाय पद्मनाभं
मुनिश्रेष्ठ सर्वसौख्यप्रदायकं
सप्तगोदावरे ब्रह्मन् विख्यातं हा
टकेश्वरं तत्रैव च महावासं
प्रयागे पितृदेश्वरं भल्लीवने
महायोगं ~~[struck out]~~ महेषु
पुरुषोत्तमं सुलावतरणे श्री
मत् श्रीनिवासं द्विजोत्तम सू
र्पारके चतुर्बाहुं मगधायां सु
धापतिं गिरिव्रजे पशुपतिं
श्रीकंठं यमुनातटे वनस्पतिं समा
ख्यातं दंडकारण्यवासिना का
लंजरे नीलकंठं शारय्वां शंभु
मुत्तमं हंसयुक्तं महाकोशां
सर्वपापप्रणाशनं गोकर्णे
दक्षिणे सर्वं वासुदेवं प्रजामु
खे विन्ध्यशृंगे महासौरिं कथा
यां मधुसूदनं त्रिकूटशिखरे
ब्रह्मचक्रपाणिनमीश्वरं लौ
हदंडे हृषीकेशं कोशलायां मनो
हरं महावाहं सुराष्ट्रे च नवरा
ष्ट्रे यशोधरं भूधरं देविकानद्यां
महोदयायां कुशप्रियं गोमत्यां
छादितगदं शंखोद्धारे च शंखि
नं सुनेत्रं सैन्धवारण्ये शूरं शू
रपुरे स्थितं भद्रालेच द्विरं वसा
वीरभद्रं त्रिपिष्टपे शंकुकर्णे
भीमायां भीमं शालवने विद्रुं
विश्वामित्रं च गादिन्तं कैलाशै
ले कामरूपे शशिप्रभं वडवा
मपि गोमित्रं पद्मे हेपंकज
प्रियं उपेन्द्रं सिंहलद्वीपे श
क्राब्धे कुन्दमालिनं रसातले
च विख्यातं सहस्रशिरसं प्र
ने कालाग्निरुद्रं त
त्रैव तथान्यं कीर्तिवाससं
सुतले कूर्ममचलं वितले
पंकजासनं ॥ ॥ ॥



महातले सुरो ख्यातं देवे
शं छागलेश्वरं तले सहस्रच
रणं सहस्रभुजमीश्वरं सहस्रा
क्षं परिख्यातं सुतलाकृष्टा
न्तं पाताले योगिनामीशं स्थि
तं च हरिशंकरं धरातले को
कनदं महिम्नां च कृपाणीतानं
भूर्लोके च गरुडं स्वर्लोके
विष्णुमव्ययं महर्लोके तथा
गस्त्यं कपिलं च जने स्थितं
ब्रह्मन्तवाख्यं सत्यसंत्यसंस्थि
तं ब्रह्माणं ब्रह्मलोके सप्त
स्वेव प्रतिष्ठितं सनातनं
तथा शैवं परं ब्रह्म चैव सर्वश्र
प्रतर्कं निरालंबं निराकाशे
तपोमयं जंबुद्वीपे चतर्वोङ्कं
ङ्कशाद्वीपे क्रौंचेऽश्वयं प्लक्षद्वी
पे तु निश्चेष्ट ख्यातं गरुडवा
हनं पद्मनाभं तथा क्रौंचे शा
ल्मले वृषभध्वजं सहस्रांशुः
स्थितः शाके धनवाह पुष्क
रे स्थितः तथा पृथिव्यां ब्रह्म
देवे पालग्रामे स्थितोस्म्यहं
सजलस्थलपर्यन्ते चरे पुंच
प्रलानि पुराणानि समानि तथा
नि ब्रह्मन् पुराणानि सनातना
नि पद्मप्रधानानि महोजसा

नि संकीर्त्तनीयान्यघनाशना
नि संकीर्त्तनात् स्मरणाद्दर्श
नाच्च संस्पर्शनाद्देव च देवतायाः
यस्मान्धकामान्यपवर्गमेव ते
नि दैत्यामनुजाः समाध्याः प
तानि तभ्यो विनिवेदितानि इति
वामनपुराणे स्वस्थानोकीर्त्ती
म ८९ अध्यायः हरिहरयोर
भेदो यथा याम्यः मार्गविज्ञा
प्रोक्ता योहरिः सत्रिलोचनः प
वे सर्वेषु शास्त्रेषु पुराणेषु च य
च्यते एतस्मादन्यथा यस्तु क
ते शास्त्रं पृथक् तया तेनास्ति
कं विजानीयात् सर्वधर्म्मव
हिष्कृतं इति वाराहे सौम्याय
न्तनामाध्यायः ब्रह्मविष्णु
महेश्वराणामेकत्वं सत्वादि
पंचयथा महेश्वर उवाच ना
रायणः परो देवः सत्वरूपो ज
नार्दनः त्रिधात्मानं सभगवा
न् ससर्ज परमेश्वरः रजस्तमो
भ्यां युक्तोऽभूद्हमः सत्वाधिकं
विभुः ससर्जनाभिकमला
त् ब्रह्माणं कमलासनं
रजसा तमसा युक्तं सोपि मां
त्वसृजत् प्रभुः यत् सत्वं
स हरिर्देवो योहरिस्तत् ॥

परं पदं येसत्वरजसी सो पिब्र
ह्मा कमलसंभवः यो ब्रह्मा सैव दे
वस्तयोदेवः स च तत्त्वभुवः यद्
जस्तमसोपेतं सोयं नास्त्यत्र संशा
यः सत्वं रजस्तमश्चैव त्रितीयं चै
तदुच्यते सत्वेन सच्यते जंतुः सत्वं
नारायणात्मकं नतस्मात् परतो
देवो भविता न भविष्यति योवि
ष्णुः स स्वयं ब्रह्मा यो ब्रह्मा सोह
मेव च वेदत्रयेपि यत्तेःस्मिन् पं
डितैषा निश्चयः यो भेदं कुरुतेऽ
स्माकं त्रयाणां द्विजसत्तम सपा
पकारी दुष्टात्मा दुर्गतिं समवाप्नु
यात् इति तत्रैव रुद्रगीता नामाध्या
यः तद्गुणा यथा ब्रह्मादयः स
राः सर्वे येचान्ये देवदानवाः सत्र
प्राः पतिहृतायाः सर्वे तद्गुण
संभवाः तत्र योऽसौ परो देवो ।
व्यापको मुनिसत्तम निर्लेपोऽ
चलः सूक्ष्मः कारणैः परिवर्जितः
अनौपम्य स्वनिर्देश्यो
सत्वादन्तरं परं
निष्प्रपंचो निरालंबो विषयाती
तगोचरः सर्वज्ञः सर्वकर्त्ता च
प्रत्यक्षः सर्वदा वरः अनामा नाम

तर्कवादान् समागताः कुक्कु
टमिश्रपादाः अस्य नाटकमे
लकप्रभृतिषु परिपोषो द्रष्ट
व्यः अत्र च यस्य हासः स चेत्
क्वापि साक्षान्नैव निबध्यते त
थाप्येष विभावादि सामर्थ्या
दुपलभ्यते अभेदेन विभावा
दिसामर्थ्यादुपलभ्यते अभेदे
न विभावादि साधारण्यात् प्र
तीयते सामाजिकैस्ततो हास्यर
सोयमनुभूयते एवमन्येष्वपि
रसेषु द्रष्टव्यं इति साहित्यद
र्पणे ३ परिच्छेदः तस्य शु
भाम्बुभवलक्षणं यथा अकंप
इतिम अह मीलितालसचा
पदं अस्मकृद्धसितं दृष्येत्
तत् सोन्मादस्येकथा इति
मार्कण्डे ९९ अध्यायः हाहलं
क्ली हलाहलविषं इति ॥ ॥

पाहूरत्नावली ॥
हाहाः पुं देवगन्धर्वविशेषः
इत्यमरटीकायां भरतः ॥
हाहाः पुं देवगन्धर्वविशेषः
यथा हाहा हूहूश्चैवमाद्या गं
धर्वास्त्रिदिवौकसां इत्यमरः
देवानां हाहा हूहू विश्वावसु
तुंबुरु चित्ररथप्रभृतयो गन्ध
र्वा हूवाच्याः उपास्योपासक
लक्षण संबंधः अद्भुत पञ्चो
पंहाहाशब्दः हा इति शब्दं जह
तीति जहातेः क्विप् हाको विच् इत्ये
वं श्रुत पञ्चेन शास्यापि योरा
लोपः च्यवाविस्यालोपः स्यात्
अस्मिन्नत्यालोपः स्यात् अस्मि
न्नयेहाहः शाहूस्सांतो पीरा
धर्वौ हाहाहूसि प्रोक्तो गन्धर्वौ गा
यनेपि च इति साहसांकः
गन्धर्वः पीतिहाहको रितिवा
चस्पतिः हाहाशाद्वोपिह
श्यते हंहा हाहा हूहूश्च दोह
षाश्चैव तुंबुरुरिति व्याडि
प्रभृतयः इति भरतः
विस्मयशब्दे शोकशब्दे च
यथा ततो हाहाकृतं
सर्वदैत्यसैन्यं ततस्ततः प्र
हर्षं च परं जग्मुः सकला देवता




गणाः इति मार्कण्डेयपुरा
णेदेवीमहात्म्य ३ अध्यायः
हाहाकारः पुं युद्धकलरवः
इति केचित् शोकध्वनिः य
था उद्दहो विकटोवायुः क
रालो वात्ययान्वितः देशाव्
वलताञ्चहाहाकारायकल्प
ते इति ज्योतिषेवायुफलं हा
हालं क्लीं विषं इतिशब्दरत्ना
वली ॥
हि न वर्द्धने गतौ इतिकवि
कल्पद्रुमः गतिरिहप्रेतर्भू
तत्वर्थत्वात् गतिप्रेरणेन प्र
हिणोत्यसूत मितिभाहुः व
र्द्धने विरलप्रयोगः इति दु
र्गादासः ॥
हि अ हेतुः अवधारणे इत्य
मरः पादपूरणे विशेषे प्र
श्ने हेत्वपदेशः संभ्रमे अ
सूया इति मेदिनी शोकः
इति शब्दरत्नावली ॥
हिंसकः पुं हिंस्रपशुः
अथर्ववित्ब्राह्मणः शत्रुः इ
ति शब्दरत्नावली ॥
हिंसकः त्रि हिंसाकर्त्ता
तत्पर्य्यायः
घातकः २ हिंस्रः ३

शरारुः ४ हिंता ५ इतिशब्द
रत्नावली सचाष्टविधः यथा
भोक्तानुमन्ता संस्कर्त्ता क्रयि
विक्रयि हिंसकाः उपहर्त्ता घा
तयिता हिंसका चाष्टधाथमाः
इति काशीखण्डं ॥
साध्वीभार्य्यांप्रियसखीं यस्तु
साध्वीं भार्य्यांप्रियसखीं यस्तु
साध्वीं हिंसति निर्घृणः नतेः
मृतं प्राप्नुवंति हिंसकादुष्ट
योनिजाः इति वामने ब्राह्म
णादीनां सूत्रनामाध्यायः
शरणागतादिहिंसकस्य अ
व्यवहार्य्यत्वं यथा शरणाग
तवालस्त्रीहिंसकान् संवसेन्न
न चीर्णव्रतानपि सहाकृतव्र
सहितानिमान् इति प्रायश्चित
तत्वधृतयाज्ञवल्क्यवचनं ॥
हिंसा स्त्री घातः इति मेदिनी
चौर्य्यादिकर्म्म यथा हिंसा
चौर्य्यादिकर्म्मच इत्यमरः
चौरस्य कर्मचौर्य्यं आदिना
वन्धनताडन हत्तिनाशादा
सादिच चकाराद्वधोपि हिंसा
इति तट्टीकायां भरतः
हिंसिते प्रतिहिंसायां दोषा
भावो यथा हते प्रतिहते

कुर्य्यात् हिंसिते प्रतिहिंसि
तं नतत्र दोषं पश्यामि दुष्टे
दोषं समाचरेत् इति गारुडे
११५ अध्यायः विष्णुभक्तानां
ब्राह्मणादीनांच हिंसाकर्त्तुर
विनाशोयथा दुष्टायदामे
भक्तानां ब्राह्मणानां गवाम
पिक्रतूनां देवतानांच हिंसां
कुर्वंतिनिश्चितं तदाचिरेणैव
ध्वंसन्ति यथा वह्नौतृणानिच
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ९ अध्यायः पशुहिंसा
निषेधोवलिशब्देद्रष्टव्यः अ
थ वैधहिंसाविचारः माहिं
स्यात् सर्व्वा भूतानि इत्यत्र
सर्व्वशब्दस्य व्यापकार्थपरत
या एतद्विधि मनुलध्य वाय
व्यं श्वेत मालभेत इत्यादिवि
धेर्विषयाप्राप्ते रगत्या वैधाति
रिक्त विषयत्वं सर्व्वा सर्व्वाणि
च्छंदसि वेत्यनेन तत्परं सि
द्धं यदपि नानादर्शनटीकाकृ
द्भिर्वाचस्पतिमिश्रै स्तत्वकौमु
द्या अविहिंसितं नच माहिंस्यात्
सर्व्वभूतानि इति सामान्यशा
स्त्रं विशेषशास्त्रेणाग्नीषोमी
यं पशुमालभेत इत्यनेन वाध्येत

इति वाच्यं विरोधाभावात्
विरोधे हि वलीयसा दुर्व्वलं
वाध्यते नचास्ति विरोधः भिन्न
विषयत्वात् तथाहि माहिंस्या
दितिनिषेधेन हिंसायाः अन
र्थहेतुभावो ज्ञाप्यते नतु क्रतुं
त्वर्थत्वमपि नचानर्थहेतुत्व क्रतू
पकारकत्वयोः कश्चिदस्ति वि
रोधः हिंसाहि पुरुषस्य दोष
मावहति क्रतोश्चउपकरिष्यति
मन्त्रेण तदपि सांख्येनैयमीमां
सकमते नविरोध एव तथाहि
गुरुनयेन केवलं सर्व्वशून हिंसाभा
वविषयकं कार्य्यं इति निषे
धविध्यर्थस्यवाधं विना अग्नी
षोमीय पश्वालभन विषयकं
कार्य्यं इतिभावविध्यर्थ उपप
द्यते भट्टनये तत्प्रयोगे यथा तथा
स्तनच मुख्यपशुयागे पुरुषा
र्थपशुहिंसनस्यार्थसाधनत्व म
नर्थसाधनत्वंचोपपद्यते विरो
धात् वस्तुतस्तु अंगेपि विरोधः
वस्तेव क्रतो विधेः शेषस्वभावो
यः स्वविषयस्य साक्षात् पर
म्परया वा पुरुषार्थसाधनत्व
मवगमयति अन्यथा अंगानां
प्रधानोपकारकत्वं मपि नांगीकृ



यतेऽर्थसाधनत्वं बलवदनि
ष्टाननुबन्धीष्टसाधनत्वं अन
र्थसाधनत्वंबलवदनिष्टसाध
नत्वं नचानयो रेकत्र समावे
श इति अतएवोक्तं तस्मात्
यज्ञेवधोऽवध इति नन्वेवं श्ये
नेनाभिचरन् यजेत इत्यत्र श्ये
नस्य शत्रुवधरूपेष्टसाधनत्व
मवगतं अभिचारो मूलकर्म
चेति मनुना उपपातकगणेन
मध्येपाठात् अनिष्टसाधनत्व
मवगतंतद्वेतत् कथ मुपपद्य
तामिति चेत्सैवं आततायिनमा
यांतं हन्यादेवाविचारयन् इत्ये
कवाक्यतया आततायिस्थले
इष्टसाधनत्वं अनाततायिस्थ
लेनूपपातकत्वेन बलवदनिष्ट
साधनत्वं इत्यविरोध इति ति
थ्यादितत्वं ब्राह्मणस्य हिंसा
निषेधो यथा हिंसाचैवनक
र्त्तव्या वैधहिंसातु राजसीत्रा
ह्मणैः सानकर्त्तव्या यतस्ते
सात्त्विका मताः इति श्राद्ध
विवेकटीकायां
गोविन्दानन्दधृतवृहन्मनुव
चनं हिंसाकर्म्म
क्ली अथर्ववेदोक्तमंत्रयंत्रा
दिनिष्पादितमारणोच्चाटना
दि तत्पर्य्यायः अभिचा
रः २ इत्यमरः
हिंसारुः पुं व्याघ्रः इति त्रि
कांडशेषः
हिंसालुः त्रि वधशीलः घा
तकः हिंसधातोरालुप्रत्यये
ननिपन्नः ॥
हिंसालुकः पुं हिंसाशील
कुक्कुरः यथा हिंसालुकः त्वा
डुकः श्वायोगिलोऽलर्क इष्य
ते इति हारावली हननशी
लेत्रि हिंसितः त्रि हिंसामाप्तः
यथायस्तुभागवतान् दृष्ट्वा
भूत्वाभागवतः सुधीः अभ्यु
त्थानं नकुर्वीत अर्द्धं तेनापि
हिंसितः यस्तुकन्यां पिताद
त्वानमयच्छति तां पुनः अष्टौ
पितृगणाः स्तेन हिंसिता ना
त्रसंशयः इति वाराहे ब्राह्म
णदीक्षासूत्रनामाध्यायः ॥
हिंसीरः पुं व्याघ्रः खलः
इति हिंसधातो रौणादिक
ईरणप्रत्ययेन निष्पन्नः हिंस्रः
त्रि हिंसाशीलः तत् पर्य्या
यः शरारुः २ घातकः ३
इत्यमरः हिंसकः ४ हंसाः ५

इति शब्दरत्नावली शार्वरः
६ इतिजटाधरः हिंस्राणां
हिंसने दोषाभावो यथा क्रू
राकार्य्यामनोशस्वत् अहिं
स्रेषुवजन्तुषु हिंसायानहि
दोषश्चहिंस्राणांचत्रजेश्वर
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ८५ अध्यायः
हिंस्रः पुं चोरः भीमसेनः रु
द्रः इत्युणादिकोषः
हिंस्रकः पुं हिंस्रपशुः इति
शब्दरत्नावली ॥
हिंस्रपशुः पुं हिंसकजंतुः
तत्पर्य्यायः व्याडः २ हिंस्र
कः ३ हिंसकः ४ श्विविः ५
इति शब्दरत्नावली श्वापदः
६ इति त्रिकांडशेषः
हिंस्रा स्त्री पत्नावली काका
दनीमांसी जटामांसी इति
मेदिनीकर हेमचन्द्रौ गवेदु
का गवेधुका नाडीशिरा
इति शब्दचन्द्रिका
हिक्क न् कूजे इति कविक
ल्पद्रुमः कोपधः न् हिक्कति
हिक्कते कूजोऽव्यक्तशब्दः हि
क्कायामेवाय मितिभट्टमल्लः
हिक्कतिलोकः इति दुर्गादासः
हिक्क कंड हिंसे इति कवि
कल्पद्रुमः कोपधः कंड
हिक्कयते इति दुर्गादासः हि
का स्त्री रोगोपसर्गविशेषः
हिंचकी इतिभाषा इत्यमरः हे
करी इति ख्यातो व्याधिविशे
षः हिक्कति कूजत्यनया हि
क्का हिक्क न् कूजेसेमक्तात् स
ये विति अः हिक्कतकंड हिंसेप
चादित्वादन्वहिंसितिकृत्वाकाय
तिपाह्यायते इतिवाहिकाकैपा
वेहनजनादिनिडः इतिभरतः
अथ हिकारोगनिदानं धन्वंत
रुवाच हिकारोगनिदानेच ब
ह्लेस्वश्रुतनच्छृण सासेकहे
तुमाश्रय संख्याप्रकृतिसंश्रया
हिका भक्तोद्भवा तद्वा यमला
महतीतिच गंभीराचमरुत्र
नत्वरया भक्तिसेवितैः
वृक्षतीत्वरवराणांते रत्नपाने
रपीडितः करोति हिका म
रुत्जामन्दशब्दा त
धातुगा ॥
समंमत् स्नात्रपानेनया
श्रायातिचसात्रजा
श्रायासात् पव
नः क्रुद्धः तद्वा हिकां
प्रवर्त्तयेत् ॥ ॥ ॥॥



तत्र मूल प्रविसृता मस्य
वेगयुक्तोच सा हृद्धि मायास
तो याति भुक्तमात्रे च साद्दवं
विरेण यमले वैगे ग्रहारेण
तुवर्त्तते परिणाममुखे हिक्किं
परिणामेच गच्छति कंपयं
तोशिरोग्रीवा माध्मातस्याति
तृष्णः प्रलापच्छर्द्यतीसार
नेत्रविप्लुतजृंभिका यमला
वेगिनी हिक्का परिणामवती च
सा ध्वस्तत्रु शोषयुतस्य क्षुति
विप्लुतवत्सः स्तम्भयेती तत्रं
वाचे स्मृतिं संज्ञांच मुंचतोत्त
दतो मार्गमन्यस्य कुर्वतो मर्म
घट्टनं घट्टतो नमनं साध्यम
हाप्रोक्ता महावेगा महाबला
पक्वाशयाद्धोनाभेर्वा प्रवैव
त् साप्रवर्त्तते तद्रूपा साम्यह
त् कुर्याज्जृंभ मंगप्रसारणं
गंभीरेणानिनादेन गंभीरांत
समाधयेत् आद्ये द्वे वर्जये
देत्ये सर्वलिंगांच वेगिनी सर्व
स्मरेंचितामस्य स्थविरस्यवा
पिनः व्याधिभिः क्षीणदे
हस्य भक्तच्छेदकृशस्य च ॥
सर्वेपि रोगानाशाय मत्वेवं
पाच्चकारिणः हिक्कास्था ॥

सोतयातो हिमस्तु कालेकृता
स्तयैः इति गारुडे १५९ अ
ध्यायः तदोषधं यथा ऊ
लत्थः स्वासहिक्कानुत्कफ
गुल्मानिलापहः त्रिदोषघ्नं
मधुप्रोक्तं वानलं च प्रकीर्त्ति
तं हिक्काश्वासहृन्मिच्छर्दिमे
हकुष्ठ विषापहं इति च गा
रुडे ११३ अध्यायः तथा हि
क्कां हरेत् पीता सौवर्चलयु
ता सुरा इत्यपि गारुडे १९० अ
ध्यायः अन्यच्च अथ हिक्काधि
कारः तत्र हिक्काया विप्रकृष्ट
निदानमाह विदाहि गुरु विष्ट
निदानमाह विदाहि गुरु विष्टं
भिरूक्षाभिष्यन्दिभोजनैः शीत
पानाशनस्थानरजो धूमेस्त
थानिलैः व्यायामकर्म भारा
ध्व वेगाघातापतर्पणैः हिक्का
श्वासश्च कासश्च नृणां समुप
जायते अपतर्पणमनशनादि सं
प्राप्तिमाह वायुः कफेनानुगतः
पंचहिक्काः करोति हि अन्नजां
यमलां क्षुद्रां गंभीरां महतीं तथा
सामान्यलक्षणमाह मुहुर्मुहु
र्वायुरुदेति सस्वनो यकृत् प्लि
हांत्राणि मुखादिवाक्षिपन् सघो
षवान् आशु हिनस्त्यसून् यत स्तत्त

हिक्केत्यभिधीयते बुधैः वायु
रत्र सोदानः प्राणो वाड्वः उ
देति ऊर्द्धं याति सस्वनो हिग्गि
ति शब्दवान् ऊर्द्धगमने विशि
नष्टि यकृदित्यादि क्षिहत्वशा
हेः प्यस्तिदीर्घत्व विकस्मात्
मुखादिति पंचमी तेन
यकृत् प्लीहांत्राणि मुखमानी
य आक्षिपन् निःसारयन्निवेत्यर्थः
स वायुः दोषवान् दोषोत्वकफः
तद्वान् वायुः कफेनानुगतः इ
ति संप्राप्तेः हिनस्तीति हिक्का
पृषोदरादित्वात् रूपसिद्धिः हि
क्किति कायति शब्दं करोतीति वा
पूर्वरूपमाह कंठोरसो गुरु
त्वंच वदनस्य कषायता हि
क्कानां पूर्वरूपाणि कुर्वते सटो
पपवच वदनस्य कषायता वा
तत् तत्कफात् माधुर्य्यंव्या
धिप्रभावात् अन्नजामाह
णमाह पानान्नैरतिसंयुक्तैः
सहसा पीडितोऽनिलः हिक्का
यत्यूर्द्धगो भूत्वा तां विद्यादन्नजां
भिषक् अनिलः प्राणो वायुः
यमलामाह चिरेण यम
लैर्वेगैर्या हिक्का संप्रवर्त्तते कं
पयन्ती शिरोग्रीवं यमला ॥

तां विनिर्दिशेत्
क्षुद्रामाह विकृष्टकालेर्या
वेगैर्मन्दैः समभिवर्त्तते
क्षुद्रिका नाम सा हिक्का यत्रुमू
लात् प्रधावति विकृष्टकालैः
चिरेण यत्रुकत्वोरसोः सन्धिः
गंभीरामाह नाभिप्रवृत्ता याहि
क्का घोरा गंभीरनादिनी अने
कोपद्रववती गंभीरा नामसा
स्मृता अनेकोपद्रववतीं तृष्णा
ज्वरादियुक्ता महतीमाह मर्मा
ण्यपीडयंतीव सततं या प्रवर्त्त
ते महाहिक्केति सा ज्ञेया सर्व
गात्रप्रकंपनी मर्माणिव
स्ति हृदयशिरः प्रभृतीनि अ
साध्यत्वमाह आयम्यते हिक्क
तो यस्य देहो दृष्टिश्चोर्द्ध्वमाम्य
तेयस्य देहो दृष्टिश्चोर्द्धमाम्यते
नित्यमेव क्षीणोन्नद्विट् क्षौति
यश्चातिमात्रं तौ द्वौ चांत्यौ वर्ज
येद्धिकमानौ आयम्यते विस्ता
र्यते इव नोद्धावति आयम्यत
इत्यादिना नित्यमेवेत्यंतेनैको
हिक्कमानः क्षीण इत्यादिना
तिमात्रमित्यंतेनापरः तौ द्वौ
अंत्यौच गंभीरया महत्या
च हिक्कमानौ वर्जयेत् अप
रंच अतिसंचितदोषस्य ॥



भक्तच्छेदकृशस्य च ॥
व्याधिभिः क्षीणदेहस्य वृद्ध
स्याविष्टवायिनः श्वासा
श्चसतत् यत्रा हिक्का हंत्याशु
जीवितं यमिकाच प्रलापा
र्त्तिमोहतृष्णासमन्विता साध्य
त्वमाह अक्षीणश्चाप्यदीन
श्च स्थिरधात्विन्द्रियश्च यं न
स्य साधयितुं शक्या यमिका
हंभ्यतोऽन्यथा अथ हिक्काया
श्चिकित्सा यत् किंचित् कफ
वातघ्नमुष्णं वातानुलोमनं भे
षजं पानमन्नं वा हिक्काश्वासेषु
तद्धितं हिक्काश्वासे सुतहितं
हिक्काश्वासातुरे पूर्वं तैलाक्ते
स्वेद इष्यते ऊर्द्ध्वाधः शोधनं
शक्ते दुर्वले शमनं मतं प्राणा
वरोधतर्जनविस्मापनभीत
वारिपरिषेकैः चित्रैः कथाप्र
योगैः शमयेद्धिक्कां मनोभि
घातैश्च हिक्कार्त्तस्य पयश्छा
गं हितं नागरसाधितं मधु
सौवर्च्चलोपेतं मातुलुंगरसं
पिबेत् मधुकं मधुसंयुक्तं पि
प्पलीशर्करान्विता नागरं गुड
संयुक्तं हिक्काघ्नं नावनत्रयं
कृष्णामलकशुण्ठीनां चूर्णं म
धुसिताचुतं मुहुर्म्मुहुः प्रयोक्त

व्यं हिक्काश्वासेषु तद्धितं चूर्णं
कर्णगैरिकयोः सलेहं वा
वलेहयेत् प्रवालशंखत्रिफ
लाचूर्णं मधुघृतप्लुतं पिप्पली
गैरिकं चेति लेहो हिक्कानिवा
रणः नैपाल्या गोविषाणाद्वा
ऊष्णात् सर्जरसस्यवा धूमं कु
शस्य वा साज्यं पिबेद्धिक्कोपशा
न्तये नैपाली मनःशिला निर्धू
मांगारविः क्षिप्तहिंगुमाषवलो
द्भवः हिक्कापंचापि हंत्याशु धू
मः पीतोऽनसंशयः हरेणूनां
कणानां च क्वाथो हिंगुसमन्वि
तः हिक्काप्रशमनः श्रेष्ठो धं
वंतरिवचो यथा चन्द्रसूरस्य वी
जानि लिपेद्दशगुणे जले यदा
स्युः हनिगद्ध्री यात्मनो वाससि
गालयेत् हिक्कातिवेगविक
लः स्वजलं पलमात्रया पिबेत्
पुनः पुनस्त्रापि हिक्कावश्यं
प्रशाम्यति चन्द्रसूररसः
इति हिक्काधिकारः इति भा
वप्रकाशः हिंकारः पु
व्याघ्रः इति केचित्
हिंगु क्ली मूलविशेष
निर्यासः सत्तु पारस्य खोरा
सान मूलता ॥ ॥ ॥

नाद्देशे भवति हिं इति भा
षा तत्पर्यायः सहस्रवे
धि २ जतुकं ३ वाह्लीकं ४
रामठं ५ इत्यमरः वाह्लीकं ६
रमठं ७ इति भरतः जंतुघ्नं ८
इति रत्नमाला पिण्याकं ९ बा
ह्लीं १० सहस्रवेधि ११ गृहिणी
१२ मधुरा १३ सूपधूपनं १४
जतु १५ इति शब्दरत्नावली के
शारं १६ इति जटाधरः उग्रगं
धं १७ भूतारि १८ जंतुनाशनं
१९ सूपांगं २० रक्षोघ्नं २१ उ
ग्रवीर्य्यं २२ अगूढगंधं २३ ज
रणं २४ भेदनं २५ दीप्तं २६
अस्य गुणाः लघुत्वं कटुत्वं
उष्णत्वं कृमिवातकफवि
वन्धध्मानशूलगुल्मनाशित्वं
चक्षुष्यत्वंच इति राजनिर्घंटः
अपिच हिंगूष्णपाचनं रुच्यं
तीक्ष्णं वातवलासहृत् रसेपा
के च कटुकं स्निग्धं च वह्नि
दीपनं शूलगुल्मोदरानाह
कृमिघ्नं पित्तवर्द्धनं इति भा
वप्रकाशः अन्यच्च हिंगुती
क्ष्णं कटुरसं शूलाजीर्णविबंध

हृत् लघूष्णं पाचनं स्निग्धं दीपनं क
फवातजित् इति राजवल्लभः वंश
पत्री इति भावप्रकाशः
हिंगुनाडिका स्त्री नाडीहिंगु
इति राजनिर्घंटः हिंगुनिर्य्यासः
पुं निम्ववृक्षः इत्यमरः
हिंगुरसः इति मेदिनी ॥ ॥
हिंगुपत्रः पुं इङ्गुदीवृक्षः इति
राजनिर्घंटः ॥
हिंगुपत्री स्त्री हिंगुनः पत्रं हिं
गुपत्रमिव पत्रमस्याः इत्यम
टीकायां भरतः तत्पर्यायः
कारवी २ पृथुला ३ पृथुः ४ वा
ष्पीका ५ कवरी ६ पृथ्वी ७ त्व
कपत्री ८ कवरी ९ इति जटाध
रः पृथ्वीका १० वाष्पिका ११
वाष्पका १२ वाष्पा १३ पत्री १४
इति शब्दरत्नावली दीर्घिका १५
तन्वी १६ दारुपत्री १७ विल्वी १८
वाष्पी १९ अस्या गुणाः क
टुत्वं तीक्ष्णत्वं तिक्तत्वं उ
ष्णत्वं कफवातामकृमिहृ
द्रेरुच्यत्वं पथ्यत्वं दीपनत्वं
पाचनत्वंच इति राज
निर्घंटः अपिच
हिंगुपत्री भवेद्रुच्या ॥ ॥



तीक्ष्णोष्णपाचनी कटुः हृद्वस्ति
रुग्विबन्धार्शः श्लेष्मगुल्मानि
लापहा इति भावप्रकाशः ॥
हिङ्गुपर्णी स्त्री वंशपत्री इति
रत्नमाला ॥
हिङ्गुलः पुं क्ली रागद्रव्यविशे
षः तत्पर्य्यायः हिङ्गुलः २ इ
ष्टमरभेतो हिङ्गुलं ३ रक्तं ४
मर्कटशीर्षं ५ दरदं ६ रसः ७
इति रत्नमाला हंसपाद ८ कु
रुविन्दः ९ इति हेमचन्द्रः ॥
हिङ्गुलिः १० रक्तपारदः ११ इ
ति जटाधरः बर्ब्बरं १२ सुरंग
१३ सुगरं १४ रंजनं १५ दरदं
१६ म्लेच्छं १७ चित्रांगं १८ चू
र्णपारदं १९ चर्म्मारकं २० म
णिरागं २१ रसोद्भवं २२ ई
जकं २३ रसगर्भं २४ अस्य
गुणाः मधुरत्वं तिक्तत्वं उ
ष्णत्वं वातकफत्रिदोषद्वन्द्व
दोषज्वरनाशित्वंच इति रा
जनिर्घण्टः अपिच अथ हिं
गुलस्य नामानि लक्षणानि
गुणाश्च हिङ्गुलं दरदं म्लेच्छं
चित्रांसं चूर्णपारदं दरदस्त्रिवि
धः प्रोक्तः चर्म्मारः शुकतुण्डकः
हंसपाद स्तृतीयः स्याद्गुणा

वानुत्तरोत्तरः चर्म्मारः
शुक्लवर्णः स्यात् सपीतः
शुकतुण्डकः जवाकुसुमसङ्का
शो हंसपादो महोत्तमः तिक्तं
कषायं कटु हिङ्गुलं स्यान्नेत्रा
मयघ्नं कफपित्तहारि हल्लास
कुष्ठज्वरकामलाश्च प्लीहाम
वातौ च गरं निहन्ति कुष्ठपानत
मर्कटरुत्तमरुग्यन्त्र पाचितं हिं
गुलं तस्य सूतं तच्छुद्धमेव नशो
धयेत् इति तत्र हिङ्गुलस्य शो
धनविधिः मेषीक्षीरेण दरद
मम्लवर्गैश्च भावितं सप्तवा
रान् प्रयत्नेन शुद्धिमायाति
निश्चितं एवं शोधितस्य हिं
गुलस्य गुणाः तिक्तं कषायं
कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफ
पित्तहारि हल्लासकुष्ठज्वर
कामलांश्च प्लीहामवातौ च
गरं निहन्ति इति अथ हिङ्गुला
द्रसाकर्षणविधिः निम्बूरसे
निम्बपत्ररसे वा याममात्रकं
चूर्णं दरदं मर्द्दं ऊर्द्ध्वपातयेत्
सूतं युक्तिवत् तज्ज्ञोर्द्ध्वपिठरी
शीलग्नं ग्राह्यं सूतं शुद्धमेव हि
वहितासूतं सर्व्वकर्म्मसु योजयेत् इति
च भावप्रकाशः ॥

हिङ्गुला स्त्री देशविशेषः य
था ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो
भीमलोचनः कोट्टरी सा महा
माया त्रिगुणा या दिगम्बरी इ
ति तन्त्रचूडामणौ पीठमाला
अन्यच्च कन्याचोत्तरदेसंज्ञा
ता साहृविलिलिहेद्दुला तत
स्ता माहृवालार्कप्रभा भैरवमू
र्त्तिमान् शंकरो वरदो लोक
श्रेयार्थाय वचो महत् त्वा पूज
यिष्यन्ति सततं ब्रह्माद्याः पितरस्त
था यत विद्याधराश्चैव मान
वाश्च सुभेक विन्तो स्तोष्यन्ति स
दा देवि वलिपुष्पोत्करैः करैः
चर्च्चिकेति सुभं नाम यस्मात्तु
षिरचर्च्चिका भूता तुष्टा ह्यदि
चर्म्मवासिनी मही समन्ताद्वि
चचार सुन्दरी स्थलं गता हिङ्गु
लमायसुसमं इति वामनपु
राणे ९०
अध्यायः हिङ्गुलिः पुं
हिङ्गुलः इति जटाधरः
हिङ्गुलिका स्त्री कण्ट
कारी इति
शब्दचन्द्रिका ॥
हिङ्गुली स्त्री वार्त्ताकी स्वल्पमः

बृहती इति भावप्रकाशः हिं
गुलः पुं क्ली हिङ्गुलः इत्य
मरः
हिङ्गुशिराटिका स्त्री वंशपत्री
इति रत्नमाला ॥
हिङ्गुलं क्ली मधुमूलं आलु
इति ख्यातं इति शब्दचन्द्रिका
हिज्जः पुं हिज्जलवृक्षः इति
शब्दचन्द्रिका ॥
हिज्जलः पुं वृक्षविशेषः हि
जल इति वंगभाषा इजर
इति हिन्दीभाषा तत्पर्य्यायः
निचुलः २ इज्जलः ३ इति
हेमचन्द्रः पिचुलः नदीका
न्तः ५ अम्बुजः ६ इति जटा
धरः धनदः ७ कान्तः ८ ज
लजः ९ दीर्घपत्रकः १० न
दीजः ११ रक्तः १२ कटुत्वं उ
ष्णत्वं पवित्रत्वं भूत बाधामय
नानाग्रहवाधादिदोषनाशित्व
ञ्च इति राजनिर्घण्टः अपिच
इज्जलो हिज्जलश्चापि निचु
लश्चाम्बुजस्तथा जलवेतसव
द्वेयो हिज्जलोऽ यं विषापहः
इति भावप्रकाशः हिञ्जीरः
पुं हस्तिपादवन्धः यथा॥



विद्युज्ज्वाले पुनः पद्मं शृङ्खलो निगडोऽन्दुकः हिञ्जीरस्तु पादपाशो वारिस्तु गजबन्धभूः इति हेमचन्द्रः ॥
हिड ङ उ गतौ अनादरे इति कविकल्पद्रुमः इति अते उ हिण्डते इति दुर्गादासः ॥ हिडिम्बः पुं राक्षसविशेषः स भीमसेनेन हतः इति महाभारते हिडम्ब इति च पाठः ॥ हिडिम्बजित् पुं भीमसेनः इति त्रिकाण्डशेषः ॥
हिडिम्बनिसूदनः पुं भीमसेनः हिडिम्बभित् इति भूरिप्रयोगः ॥
हिडिम्बा स्त्री हिडिम्बराक्षसभगिनी यथा हृष्टो मानुषमांसस्य महाकायो महाबलः आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् उपपन्नश्चिरस्याद्य भक्ष्योऽयं मम सुप्रियः स्नेहस्रवान् प्रस्रवति जिह्वा पर्येति मे मुखं एवमुक्ता हिडिम्बा तु हिडिम्बेन तदा वने भ्रातुर्वचनमाज्ञाय त्वरमाणेव राक्षसी इति महाभारते आदिपर्व्वणि १५२ अध्यायः तस्यां भीमसेनौरसेन च घटोत्कचो जातः यथा प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलं विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणं प्रणम्य विकचः पादावग्रहीत् स पितुस्तदा मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः घटो हास्योत्कच इति माता तं प्रत्यभाषत अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह इति महाभारते आदिपर्व्वणि १५५ अध्यायः ॥
हिडिम्बापतिः पुं हनूमान् इति शब्दरत्नावली
हिडिम्बारमणः पुं हनूमान् इति त्रिकाण्डशेषः ॥
हिण्डनं क्ली भ्रमणं रतं इति मेदिनी लेखनं इति विश्वः ॥
हिण्डिकः पुं लग्नाचार्य्यः इति हारावली ॥
हिण्डिरः पुं हिण्डीरः इति शब्दरत्नावली ॥
हिण्डी स्त्री दुर्गा इति त्रिकाण्डशेषः ॥ हिण्डीप्रियतमः पुं शिवः इति शब्दरत्नावली ॥
हिण्डीरः पुं समुद्रफेनः इत्य

मरः वार्त्ताकुः पुं रुचकः इति मेदिनी रुचकं इत्युणादिकोषः
हितं त्रि पथ्यं गतं धृतं इति मेदिनी इष्टसाधनं इति मुग्धबोधटीकायां दुर्गादासः मङ्गलं यथा गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो न यत् सर्वसत्त्वहितार्थाय तत् पशोरिव चेष्टितं अहितहितविचारचेष्टितं अहितहितविचारशून्यबुद्धेः श्रुतिसमयैर्बहुभिर्विवर्जितस्य उदरभरणमात्रतुष्टबुद्धेः पुरुषपशोः पशोश्च को विशेषः इति गारुडे ११५ अध्यायः मित्रं यथा हित सम रिपुसंज्ञा ये निसर्गैर्निरुक्ता अधिहित इति मध्यास्तेऽपि तत्कालमित्रैः इति ज्योतिस्तत्त्वं ॥
हितकः पुं शिशुः इति राजनिर्घण्टः ॥
हितकारी त्रि मङ्गलकारकः हितं करोतीत्यर्थे हितशब्दपूर्वक कृधातोः कर्त्तरि णिन् प्रत्ययनिष्पन्नः हितप्रणीः पुं चारः इति शब्दरत्नावली ॥
हितवादी त्रि हितकथनशीलः सत्परामर्शी हितशब्दपूर्वकवदधातोर्णिन् प्रत्ययेन निष्पन्नः ॥
हितावली स्त्री औषधविशेषः हिथावली इति हिन्दीभाषा तत्पर्यायः सुस्राबी २ कुष्ठघ्नः ३ अङ्गारकुष्ठकः ४ अङ्गारग्रन्थिः ५ ग्रन्थिः ६ ग्रन्थिलः ७ अस्या गुणाः सारकत्वं तिक्तत्वं प्लीहगुल्मोदरकृमिकुष्ठगदास्रग्वर्ज्जकं त्रिनाशित्वं च इति राजनिर्घण्टः ॥
हितैषी त्रि हितेच्छाकारी यथा वृद्धराजमार्त्तण्डे यात्राविवाहव्रतबन्धवेश्मप्रासादचूडाकरणं हितैषी नष्टे भृगौ नोपदिशेन्नराणां देवप्रतिष्ठामपि कर्णवेधं इति मलमासतत्त्वं ॥
हितोक्तिः स्त्री पथ्यवचनं इति धनञ्जयः हितोपदेशः पुं सत्परामर्शदानं विष्णुशर्म्मकृतमित्रलाभसुहृद्भेदविग्रहसन्धिनामकचतुष्टयात्मकग्र



निशान्ते यथाशिष्टिः साध्येसता
मस्तमसादात्तस्य धूर्जटेः जाह्न
वीफेणरेखेव यन्मूर्द्धि शशि
नः कला कृतो हितोपदेशोऽ
यंपाटवं संस्कृतोक्तिषु वाचां
सर्वत्रवैचित्र्यं नीतिविद्यांददा
तिच इति हितोपदेशप्रथम
श्लोकद्वयं
हिंतालः पुं वृक्षविशेषः हेंता
ल इति भाषा तस्य फलं ३
ह्नेगं इत्यमरः तत्पर्य्यायः
मृगरोटः २ तत्फलं किरि
टि इति त्रिकांडशेषः तस्य
पर्य्यायांतरं गुणाश्च हिंतालः
स्थूलतालश्च वन्यपत्रो हृद
ढलः स्थिरपत्रो द्विधालेख्यः
शिरापत्रोऽस्थिराम्लिकः गंर्भ
स्रावी नीलतालोभीषणो वक्र
कंटकः अम्लसारो हृदतालः
स्याच्चतदेशधाभिधः हिंता
लोमधुराम्लश्चकफकृत्पित्त
दाहकृत् श्रमतृष्णापहारी च शिशि
रो वातदोषकृत् इति राजनिर्घ
टः स तत्तणराजविशेषः यथा
क्रियाकौमुद्यां वशिष्ठः गुवाक
तालहिंतालास्तथातालीचकेत
की खर्ज्जूर नारिकेलो चसः
मैते तृणराजकाः तृणराज
शिरापत्रैर्यैः कृष्यादेतथाव
ते तावद्भवति चंडालो याव
ज्ञानेवपश्यति इत्याह्निका
चारतत्वं ॥
हिंडुः पुं जातिविशेषः हिंदु
इति भाषा यथा पश्चिमाम्ना
यमंत्रास्तु प्रोक्ताः पारस्यभाष
या अष्टोत्तरशताशीति येषां
संसाधनात् कलौ पंचखानाः
सप्तमीरा नवशाहा महाबलाः
हिन्दुधर्मप्रलोप्तारो जायन्ते वरि
नुधर्मप्रलोप्तारो जायंते चक्रव
र्त्तिनः हीनं च दूषयत्येव हिन्दु
रित्युच्यते प्रिये पूर्वाम्नायेनव
षातेयडशीतिः प्रकीर्त्तिताः
फिरिंगभाषया मंत्रा स्तेषां
संसाधनात् कलौ अधिपामं
डलानां च संग्रामेष्वपराजिताः
इंग्रेजानवषट्पंचलंड्जाश्चा
पि भाविनः इति मेरुतंत्रे २३
प्रकाशः हिंदोलः पुं श्रावणशु
क्लपक्षविहितभगवद्दोलाविशे
षः झुलनयात्रा इति यस्य प्रसि
द्धिः षड्रागांतर्गतरागविशेषः हिं

डोल इति हिन्दीभाषा यथा भै
रवः कौशिकश्चैव हिन्दोलो
दीपक स्तथा श्रीरागो मेघराग
श्च षडेते पुरुषाह्वयाः अस्य
स्त्रियः वेलावली रामकली
देशाख्या पटमंजरी ललिता
सहिता एता हिन्दोलस्य वरां
गनाः अथ हिन्दोलस्य ध्यानं रमि
तंविनी मन्दतरंगिता सुदोला
सु खेलासु समादधानं खर्वः
कपोलद्युति कामपुत्रो हिन्दः
तत् पुत्रा यथा आभीरश्च
अथवलो चन्द्रकासविमोदकाः
चन्द्रकान्तः स्वदेवदः हिन्दो१
लात्मज कीर्तितः इति संगी
तदर्पणः तस्य गानसमयो य
था हिन्दोलः पंचमः सिन्धुललि
तश्च वसन्तकः भावारोभटीयारी
व आयथामे प्रगीयते इति हि
दत् संगीतरत्नाकरः हनुम१
मते षड्रागाणां मध्ये द्वितीयरा
गः ब्रह्मणः भरीरान्निर्गतः के
विन्मते नाभितः अस्य जातिः
ओडवः अर्थात् रगमप
न इति पंचस्वरमिलितः अ
स्य ग्रहे षड्ज ॥ ॥ ॥
स्वरः वसंतर्त्तौ दिवा प्रथम
भागे गानसमयः रागमालाया
मस्य रूपं अल्पवयः सुन्दरः
पीतवर्णः उत्तमांगः स्वर्णम
यहिन्दोलारूढः सप्तजितसुन्द
रीस्त्रीभिः गीतं गायंतीभिः हि
न्दोलान्दोलयंतीभिश्च सह परमा
नंदेन हास्य कौतककारी अस्य
पंचरागिण्यः यथा रामकरी १
देशाखी २ ललिता ३ विलाव
ली ४ पटमंजरी ५ अस्य पुत्रा
अष्टौ यथा चन्द्रबिंबः १ मंगलः २
सुभः ३ आनन्दः ४ विनोदः ५
प्रथनः ६ गौरः ७ विभास ८
भरतमते अस्य रागिण्यो यथा
रामकली १ मालावती २ आ
शावरी ३ देवारी ४ गुणक
ली ५ तन्मते पुत्रा यथा वसंतः
१ मालवः २ मारुः ३ कुपा
लः ४ वाखरवन्दः ५ लंका
दहनः ६ नागधुनः ७ धवलः
८ पक्षं भार्या यथा लीलावती १
केरवी २ चयती ३ हरवी
४ पारावती ५ तिरवणी ६ दे
वगिरी ७ सरस्वती ८ इति
संगीतशास्त्रे हिन्दालकः पुं
यानविशेषः ॥ ॥ ॥



तत्पर्य्यायः प्रेङ्खा २ दोला
३ इति जटाधरः दोलिका ४
हिन्दोला ५ इति हारावली हि
न्दोला स्त्री दोलिका हिंदला
इति भाषा इति हारावली हि
मं त्रि शीतगुणविशिष्टः शी
तलवस्तु तत्पर्य्यायः सुषी
मः २ शिशिरः ३ जडः ४ तु
षारः ५ शीतलः ६ शीतः ७
इत्यमरः ॥
हिमं क्ली आकाशवाष्पः त
त्पर्य्यायः अवश्यायः २ नीहा
रः ३ तुषारः ४ तुहिनं ५ प्राले
यं ६ महिका ७ इत्यमरः इ
न्दाग्निधूमः ८ खवाष्पः ९ र
जनीजलं १० इति हारावली अ
स्य गुणाः कफवायुवर्द्धकत्वं
इति राजवल्लभः चन्दनं इति
मेदिनी पद्मकाष्ठं रंगं मौ
क्तिकं इति राजनिर्घंटः न
वनीतं इति शब्दचन्द्रिका
शीतं इति हेमचन्द्रः
हिमः पुं चन्दनवृक्षः इ
ति हेमचंद्रः
इति शब्दचन्द्रिका कर्पूरः इ
ति राजनिर्घंटः हेमंतर्त्तुः
सत्त्वस्य ॥

हायण पौषमासात्मकः यथा
हिम शिशिर वसंत ग्रीष्म वर्षा
शरत्सु स्तनतपनवनांभो हर्म्य
गोतीरपानैः सरभसभवराज
स्तद्विषो यांतनाशं दिवसकम
ललज्जा शर्वरी रेणुपंकाः इति
ऋतुसंहारः हिमालयपर्वतः
इति ऋतुसंहारः हिमालयप
र्वतः इति हिमजादि शब्ददर्शना
त् हिमकरः पुं विकंकतवृ
क्षः इति राजनिर्घंटः ॥
हिमकरः पुं कर्पूरः इति राज
निर्घंटः चन्द्रः यथा द्रष्टाद्रा
ग्धीषस्या दरदलितनीलोत्पल
रुचा दवीयांसं दीनं स्नपय कृ
पया मामपि शिवे अनेनायं
धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर निपा
तो हिमकरः इत्यानन्दलहरी
हिमकूटः पुं शिशिरर्त्तुः इति
राजनिर्घंटः ॥
हिमगिरिः पुं हिमालयपर्व
तः यथा धनुः पौष्पं मौर्वी मधु
करमयी पंचविशिखा वसंतः
सामंतो मलयमरुदायोधनरथः
तथाप्येकः सर्वं हिमगिरिसुते

कामपि कृपा मपांगात्ते लब्ध्वा
जगदिद मनंगो विजयते इत्या
नन्दलहरी ॥
हिमजः पुं मैनाकगिरिः इति
मेदिनी ॥
हिमजा स्त्री पार्वती शटी इति
मेदिनी क्षीरिणी इति राज ॥
निर्घंटः ॥
हिमजकटिः पुं ऊजकटिः इ
ति हारावली क्वचित् पुस्तके
हिमकंटिरिति पाठः हिमतैलं
क्ली कर्पूरतैलं इति
इति राजनिर्घंटः
हिमदुग्धा स्त्री क्षीरिणी इति
राजनिर्घंटः ॥
हिमदुर्दिनं क्ली हिमसमूह
पातेन दुःखदायकदिनं तत्प
र्य्यायः पद्महिमं २ इति त्रिकां
डशेषः
हिमद्युतिः पुं चन्द्रः इति शब्द
माला हिमद्रुमः पुं महानिंबः
इति राजनिर्घंटः
हिमधातुः पुं हिमालयपर्वतः
इति केचित्
हिमप्रस्थः पुं हिमालयः इ
ति हेमचन्द्रः ॥

हिमवत्सुतः पुं मैनाकपर्वतः
इति त्रिकांडशेषः ॥
हिमवत्सुता स्त्री गंगा इति
धनंजयः उवाच ॥
हिमवान् पुं हिमालयपर्वतः
इत्यमरः तत्कन्या गंगा यथा
गंगा हिमवतो यज्ञे सर्वलोकै
कपावनी स्वयोगाग्निबलाद्दे
वी लेभे पुत्री महेश्वरी इति देवी
पुराणे १२ अध्यायः हिमविशि
ष्टे त्रि हिमवालुकः पुं कर्पूरः इ
ति राजनिर्घंटः ॥
हिमवालुका स्त्री कर्पूरः इत्य ॥
मरः
हिमशर्करा स्त्री यावनाली इति
राजनिर्घंटः ॥
हिमशैलजा स्त्री दुर्गा इति
शब्दरत्नावली ॥
हिमसंहतिः स्त्री हिमसमूहः
वरफ इति पारस्यभाषा तत्प
र्य्यायः हिमानी २ इत्यमरः
महद्धिमं ३ इति जटाधरः हि
मह्रासकः पुं हिंतालवृक्षः ॥
इति शब्दरत्नावली ॥
हिमा स्त्री सूक्ष्मैला रेणुका ।
भद्रमुस्ता नागरमुस्ता एका ।



वर्णिका इति राजनिर्घण्टः
हिमांशुः पुं चन्द्र इत्यमरः क
र्पूरः इति राजनिर्घण्टः
हिमाश्वाभिख्यं क्ली रौप्यं इति
हेमचन्द्रः
हिमागमः पुं हिमन्तः इति रा
जनिर्घण्टः हिमाद्रिः पुं हिमाल
यपर्वतः इति भूरिप्रयोगः ॥
हिमाद्रिजा स्त्री क्षीरिणी इति
राजनिर्घण्टः पार्वती च ॥
हिमाद्रितनया स्त्री दुर्गा इति
वत्सामाणयाहृदर्शनात् ॥
हिमाद्रितनयापतिः स्त्री शिवः
इति कविकल्पलता ॥
हिमानी स्त्री हिमसंहतिः इत्य
मरः यावनालशर्करा इति
राजनिर्घण्टः
हिमारातिः पुं अग्निः सूर्यः
इति मेदिनी चित्रकवृक्षः ॥
अर्कवृक्षः इत्यमरे वह्निसंज्ञ
काकोकशब्दयो दर्शनात्
हिमालयः पुं श्वेतखदिरः इ
ति शब्दचन्द्रिका स्वनामख्या
तपर्वतः तत्पर्यायः नगप
तिः २ मेनाधवः ३ उमागुरुः ४
इति त्रिकाण्डशेषः हिमाद्रिः ५ न
गाधिपः ६ इति जटाधरः उदग
द्रिः ७ अद्रिराट् ८ मेनकाप्रा
णेशः ९ हिमवान् १० हिम
प्रस्थः ११ भवानीगुरुः १२
इति हेमचन्द्रः स च लंकाया
उत्तरे वर्त्तते भारतवर्षस्य सीमा
पर्वतोऽयं अस्यदैर्घ्यंदशसहस्र
योजनानि प्रस्थेद्विसहस्रयो
जनानि मध्येद्विसहस्रयोजना
नियथा पर्वदतिणेनलाहृतं
निषधो हेमकूटो हिमालयः
इति प्रागायता यथा नीला
दयः अयुत योजनोत् सेधा
हरिवर्ष किं पुरुष भारतानां
यथासंख्यं इति श्रीभागवते ५
स्कन्धे १६ अध्यायः ॥
हिमालयसुता स्त्री उमा इति
कविकल्पलता ॥
हिमालया स्त्री भूम्यामलकी
इति राजनिर्घण्टः ॥
हिमाजं क्ली उत्पलं इति
राजनिर्घण्टः ॥
हिमावती स्त्री स्वर्णक्षीरी इत्य
मरः
हिमाह्वः पुं कर्पूरं इति
केचित् ॥
हिमाह्वयः पुं कर्पूरं इति ॥

जगद्धात्रे नमो नमः भूर्लोकप्र
मुखा लोकास्तव गर्भे व्यवस्थि
ताः ब्रह्मादयः स्तथा देवा नम
स्ते विश्वधारिणे नमस्ते भुवना
धारनमस्ते भुवनाश्रय नमो हि
रण्यगर्भाय गर्भाय यस्य पितामहः
यतस्त्वमेव भूतात्मा भूते भूते व्य
वस्थितः तस्मात्मा समुद्धराशेष
दुःखसंसारसागरात् एवमामं
त्रितमथ्य माविशेषाभउदमुखः
मुष्टिभ्या परिगृह्य धर्मराजंच
तुर्मुखौ जानुमध्ये शिरः कृत्वाति
ष्ठेत् श्वासपंचकं गर्भाधानं पुंस
वनं सीमन्तोन्नयनं तथा कुर्यु
र्हिरण्यगर्भस्य ततस्ते द्विजपुंगवाः
गीत मंगलघोषेण गुरुः सन्त्या
पयेत्ततः जातकर्मादिकाः कु
र्य्युत् क्रियाः षोडश चापराः
सूत्यादिकं च गुरवे दत्वा मंत्रमि
मं जपेत् नमो हिरण्यगर्भाय वि
श्वगर्भाय वै नमः चराचरस्य जग
तो गृहभूताय वै नमः मात्राहं
जनितः पूर्वं मर्त्यधर्मा सुरोत्तम
त्वद्गर्भसंभवादेष दिव्यदेहो भ
वाम्यहं चतुर्भिः कलशैर्भूय
स्ततस्ते द्विजपुंगवाः स्नानं कु
र्युः प्रसन्नाः सर्वाभरणभूषि
ताः देवस्य त्वेति मंत्रेण स्थितस्य
कनकासने अद्यजातस्य तेऽङ्गा
नि अभिषेक्ष्यामहे वयं दिव्येनाने
न वपुषा चिरंजीव सुखी भव
ततो हिरण्यगर्भं तं तेभ्यो दद्या
द्विचक्षणः ते पूज्याः सर्वभावे
न बहवो वा तदाज्ञया तत्रोप
करणं सर्वं गुरवे विनिवेदये
त् पादुकोपानहच्छत्र चाम
रासन भाजनं
ग्रामं वा विषयं वापि यदन्यदपि
तद्भवेत् अनेन विधिना यस्तु पु
ण्येऽह्नि विनिवेदयेत् हिरण्य
गर्भदानं स ब्रह्मलोके महीयते
पुरेषु लोकपालानां प्रतिमन्व
न्तरं वसेत् कल्पकोटिशतं या
वत् ब्रह्मलोके महीयते कलि
कलुषविमुक्तः सेवितः
सिद्धसंघैरमरचमरमालावीज्य
मानोऽप्सरोभिः पितृपान मथ
वन्धून्पुत्रपौत्रप्रपौत्रानपि
नरकनिमग्नांस्तारयेदेक एव
इति पठति य इत्थं यः शृणो
तीह सम्यक् मधुमुरविपुलो
के पूज्यते सोऽपि सिद्धः मति
मपि च जनानां यो ददाति ॥
प्रियार्थं ॥



विबुधपतिजनानां नायकः
स्यादमोघं इति मात्स्ये २४६
अध्यायः विष्णुः इति तस्य स
हस्रनामस्तोत्रं सूक्ष्मशरीर
समष्ट्युपाहितचैतन्यं ॥
तत्पर्यायः प्राणात्मा २
सूत्रात्मा ३ इति वेदान्तसारः ॥
हिरण्यदः पुं समुद्रः इति के
चित् हिरण्यदातरि त्रि ॥
हिरण्यदा स्त्री पृथिवी इति
केचित् ॥
हिरण्यनाभः पुं मैनाकपर्व
तः इति हेमचन्द्रः हिरण्यबाहुः पुं शो
णनदः इत्यमरः शिवः इति केचित्
हिरण्यरेताः पुं अग्निः चि
त्रक वृक्षः इत्यमरः सूर्यः
इति मेदिनी शिवः इति शब्दर
त्नावली अग्ने स्तन्नामकार
णं यथा यत् पीतं वीतिहो
त्रेण वीर्य्यं त्यक्तं पिनाकिना
तेजाकृशानुः ततो जगाम
देवानां सकाशममितद्युतिः
देवानां सकाश
ममितद्युतिः देवतैः प्रदि
ते स्वर्गं ब्रह्मलोकं जगा
म स भगवान् कृत्तिका दे
वी ददर्श पथि पावकं ।

तां दृष्ट्वा प्राह वाचं स तेजोयन्म
मद्भुतं महेश्वरेण संत्यक्तं नि
र्दहेद्भुवनान्यपि तद्धारणाच्च
कुटिले पुत्त्रो धन्यो भविष्यति
इत्यग्निना सा कुटिला श्रुत्वा स
तमद्भुतं प्रतिपुमात्रं
मग्राकू तेज पेपौ सा तोपेसं
तत समधारयद्देवी पावके तेजः
सहसुषत् कृशानोपि च
भयाद्यत्र तत्र परिभ्रमन् प
च वर्षसहस्राणि त्यक्त्वा ले ह
त्यभुक् ततः सांसमस्थीनि
रक्तानि मेदो मज्ज त्वचस्तथा
रोमाणि चाक्षि केशाद्याः
सर्वे जाता हिरण्मयाः हिरण्य
रेता लोकेस्मिन् विख्यातः
पावकस्तदा इति वामने ५४
अध्यायः ॥
हिरण्यवः पुं देवधनं देवस्व
हिरण्यशब्दात् व प्रत्ययेन नि
ष्पन्नः इति केचित् ॥
हिरण्यवर्णा स्त्री नदी इति
हेमचन्द्रः ॥
हिरण्यबाहुः पुं शोणनदः
इति शब्दरत्नावली भरतश्च
हिरण्याश्वः पुं तुलापुरुषादि
षोडशमहादानान्तर्गतमहादा

नविशेषः यथा मत्स्य उवाच
अथातः संप्रवक्ष्यामि हिरण्या
श्वविधिं परं यस्य प्रदानाद्भव
ने आनन्त्यफलमश्नुते पुण्यां
तिथिं समासाद्य कृत्वा ब्राह्मण
वाचनं लोकेशावाहनं कुर्य्यात्तु
लापुरुषदानवत् ऋत्विङ्मण्डप
संभारभूषणाच्छादनादिकं स्व
ल्पैः षट्काग्निवत् कुर्य्याद्धेमवाजि
मथ द्वयं स्थापयेद्वेदिमध्ये
तु कृष्णाजिने तिलोपरि कौशे
यवस्त्रसंवीतं कारयेद्धेमवाजि
नं शक्तितस्त्रिपलादूर्द्ध्वमास
हस्रपलाद्बुधः पादुकोपानह
च्छत्र चामरासनभाजनैः पूर्ण
कुम्भाष्टकोपेतं माल्येक्षुफलसं
युतं शय्यां सोपस्करां तद्वद्द
समार्द्धसंयुतां ततः सर्वौष
धीस्नानैः स्नापितो वेदपुङ्गवैः
इमम्मन्त्रमुच्चारयेन्मन्त्रं गृहीतकुसु
मांजलिः नमस्ते सर्वदेवेशवे
दाहरणलम्पटः वाजिरूपेणमा
मस्मात् पाहि संसारसागरात्
त्वमेव सप्तधा
भूत्वा छायारूपेण भास्करः यं
चाङ्गमयसे लोकानतः पाहि
सनातनः यवसूर्य्यगुरुवे

नमस्यं विनिवेदयेत् दत्वा पा
पक्षयाद्दानो लोकमभ्येति शा
श्वतं गोभिर्विभवतः सर्वान्
त्विजश्चापि पूजयेत् सर्वधा
न्योपकरणं गुरवे विनिवेदये
त् सर्वशय्यादिकं दत्वा भुञ्जी
तातैलमेव हि पुराणश्रवणं
तद्वत् कारयेद्भोजनादनु इ
मं हिरण्याश्वविधिं करोति यः
पुण्यं समासाद्य दिनं नरेन्द्र वि
मुक्तपापः स पुरं सुरारेः प्राप्नो
ति सिद्धैरभिः पूजितः सन् इति
पठति य इदं हेमवाजिप्रदा
नं सकलकलुषमुक्तः सोऽश्व
मेधेन भूयः कनकमयविमा
नेनार्कलोकं प्रयाति त्रिदश
पतिवधूभिः पूज्यते योऽथ
पश्येत् यो वा शृणोति पुरु
षोऽल्पधनः स्मरेद्वा हेमाश्वदा
नमभिनन्दयती ह लोके सोपि
प्रयाति हतकल्मषः पुरुहूत
स्थानं पुरन्दरमहेश्वरलोक
जुष्टं इति मात्स्ये हिरण्या
श्वमहादानिको नाम २५४ अ
ध्यायः हिरण्याश्वरथः पुं
षोडशमहादानान्तर्गतमहा
दानविशेषः यथा



मात्स्ये आद्यन्तु सर्वदाना
नां तुलापुरुष संज्ञितं हि
रण्यगर्भदानञ्च ब्रह्माण्डं त
दनन्तरं कल्पपादपदानञ्च गो
सहस्रञ्च पञ्चमं हिरण्यकामधे
नुश्च हिरण्याश्वस्तथैव च पञ्च
लाङ्गलकञ्चैव धरादानं तथै
व च हिरण्याश्वरथस्तद्वत् हे
महस्तिरथस्तथा द्वादशं वि
श्वचक्रञ्च ततः कल्पलतात्म
कं सप्तसागरदानञ्च रत्नधेनु
स्तथैव च महाभूतघटस्तद्व
त् षोडशः परिकीर्त्तितः इति
मलमासतत्त्वं तद्विधिर्यथा
मत्स्य उवाच अथातः संप्रव
क्ष्यामि महादानमनुत्तमं हि
रण्याश्वरथं नाम महापात
कनाशनं पुण्यं दिनमथासा
द्य कृत्वा ब्राह्मणवाचनं लोके
शावाहनं कुर्यात्तुलापुरुष
दानवत् ऋत्विङ्मण्डपसम्भारभू
षणाच्छादनादिकं कृष्णाजिने
तिलान् कृत्वा काञ्चनं कारयेद्र
थं सप्ताश्वं चतुरश्वं वा चतुश्चक्रं सकू
बरं इन्द्रनीलेन कुम्भेन ध्वजरूपेण सं
युतं लोकपालाष्टकोपेतं पद्मरागद
लान्वितं चत्वारः पूर्णकलशा धान्यान्य
ष्टादशैव

तु कौशेयवस्त्रसंयुक्तमुपरि
ष्टाद्वितानकं माल्येक्षुफलसं
युक्तं पुरुषेण समन्वितं यो
यद्भक्तः पुनः कुर्यात् ततस्ता
न्वाधिवासनं छत्रचामरकौषे
यवस्त्रोपानहपादुकाः गोभि
र्विभवतः सार्द्धं दद्याच्च शय
नादिकं अभावत् त्रिपलाद
र्द्धं शक्तितः कारयेद्बुधः
अश्वाष्टकेन संयुक्तं चतुर्भिरथ
वाजिभिः द्वाभ्यामथ युतं दद्या
दिमं मन्त्रमुदीरयेत् नमो नमः
पापविनाशनाय विश्वात्मने
वेदतुरङ्गमाय धाम्नामधीश
य भवाभवाय पापौघदावानल
देहि शान्तिं वस्वष्टकादित्यमरु
द्गणानां त्वमेव धाता परमं
निधानं यतस्ततो मे हृदयं प्र
यातु धर्मैकतानत्वमघौघना
शात् इति तुरगरथप्रदानमेत
त् भवभयसूदन मत्र यः करो
ति सकलुषपटलैर्विमुक्तदेहः
परमुपैति पदं पिनाकपाणेः
देदीप्यमानवपुषा विजितप्र
भावमाक्रम्य मण्डलमखण्डल
चण्डभानोः सिद्धाङ्गनानयन
षट्पदपीयमानवक्त्राम्बुजोः
अ

जभवेन चिरं सहास्ते इति प
ठति शृणोति वाय इत्थं कन
करथतुरङ्गप्रदानमस्मिन् नह
नरकपुरं व्रजेत् कदाचित् नर
करिपो भवनं प्रयाति भूप।
इति मात्स्ये हिरण्याश्वरथप्र
दानिको नाम २५५ अध्यायः
हिरण्याक्षः पुं आद्यदैत्यविशे
षः स च दितिगर्भे कश्यपाज्जातः
वराहरूपिविष्णुना हतः यथा
दितिस्तु भर्त्तुरादेशादपत्यप
रिशङ्किनी पूर्णे वर्षशते सा
धी पुत्रौ प्रसुषुवे यमौ प्रजाप
तिर्नाम तयोरकार्षीत् यः प्रा
क् स्वदेहात् यमयोरजायत
तं वै हिरण्यकशिपुं विदुः प्रजा
यं तं हिरण्याक्षमसूत साग्रतः
इति श्रीभागवते ३ स्कन्धे १७
अध्यायः हतो हिरण्यकशिपु
र्हरिणा सिंहरूपिणा हिरण्या
क्षो धराद्धारे बिभ्रता शौकरं
वपुः इति तत्रैव ७ स्कन्धे १
अध्यायः अपि च तेजस्वी ना
म वैशाखो हिरण्याक्षो रिपुः
स्मृतः हतो वराहरूपेण हि
ण हिरण्याक्षोऽथ विष्णुना ॥

इति गारुडे ८७ अध्यायः ॥
हिरुक् अव्ययं विनार्थः मध्यार्थः
सामीप्यार्थः इत्यमरभरतौ अ
धमार्थः इति शब्दरत्नावली
हिल शहावकृतौ इति कविक
ल्पद्रुमः पकोऽयं शाहिलति
तरुणा तरुणः इति ॥
दुर्गादासः
हिलमोचिः स्त्री हिलमोचिका
इति शब्दरत्नावली ॥
हिलमोचिका स्त्री शाकविशे
षः हिंचा इति हिलंचा इति चवं
गभाषा हरफच इति हिन्दीभा
षा तत्पर्यायः हिलमोचिः २
हिलमोची ३ रोची ४ इति श
ब्दरत्नावली मत्सी ५ विषघ्नी ६
मत्स्याक्षी ७ चक्राङ्गी ८ इति र
त्नमाला ब्राह्मी ९ शोथहरा १०
आचारी ११ तस्या गुणाः शोथ
कुष्ठं कफं पित्तं हरते हिलमो
चिका इति भावप्रकाशः अ
पि च हिलमोची सरा तिक्ता कु
ष्ठघ्नी कफवातजित् श्लेष्मापि
त्तजित् इति वा पाठः इति राजव
ल्लभः हिलमोची स्त्री हिलमो
चिका इति शब्दरत्नावली ॥



हिलः पुं शशारिपक्षी इति
शब्दचन्द्रिका ॥
हिलोल त् कदोलने इति क
विकल्पद्रुमः अंतस्थतृतीय
द्वयमध्य स्त्वदेकोपध श्चायं
अजिहिलोलद्याबुलेतो इति
दुर्गादासः
हिलोलः पुं तरंगः म्लेच्छ इति
भाषा यथा आद्यं नीरसका
ष्टताडनशतं आद्धः प्रचंडा
तपः क्लेशः आद्यतरं स्वप
कनिचयः आद्यंचोतिदाहान
लः यत्र कांताकुचकुंभ बाहु
लतिका हिलोललीला सुखं ल
द्धं कुंभवरत्वयानदिसबं दुःखे
विनालभ्यते इति कालीदासकृ
तशृंगारतिलकः रतिबन्धवि
शेषः सच षोडशबन्धांतर्गता
ष्टमबन्धः तस्यलक्षणं यथा
हृदि कृत्वा स्त्रियः पादौ करा
भ्यां धारयेत् कटौ यथेष्टं ता
डयेद्योनिं बन्धो हिलोलसंज्ञ
कः इति रतिमंजरी हिल्वला स्त्री
मृगशिरोनक्षत्रशिरोदेशस्थाः
पंचस्वल्पतारकाः यथा मृगशी
र्षशिरोदेशे तारका या वसंति
हि हिल्वला इल्वका ॥

ल्वाः स्युरिल्वला इति क्वचित्
इति शब्दरत्नावली ॥
हिव इ प्रीतौ इति कविकल्प
द्रुमः इहिन्वती प्रीति विहमी
तीकरणं हिन्वति लोकः पि
तरं इति दुर्गादासः हिबुकं
क्ली पकस्मात्लग्नाच्चतुर्थलग्ने
तत् पर्यायः पातालं हिबुकं
चैव सुहृदं भस्सुचतुर्थकं
अपिच सपापात् भार्गवात्
पापो हिबुके मातृनाशकृत्
इति ज्योतिस्तत्वं ॥
हिस इ ध कि हिंसयति हिंसति
हेत्यर्थे नैव पातिक चुरादित्वे
सिद्धे किकरणं भ्वादित्वार्थं
इति दुर्गादासः ॥
हि हि अ आह्लादजनकाद्भुत
रणशब्दः इति साधुपाठः ॥
केचित् दीर्घान्तद्वयमिति
साधुपाठः ही अ विस्मयः
इत्यमरः दुःखे हेतुः विषा
दः इति मेदिनी शोकः
इति शब्दरत्नावली
हीनः त्रि ऊनः
गर्ह्यः इत्यमरः अधमः
इति जटाधरः ॥ ॥ ॥

त्ति वादिविशेषः सच पंच
विधः यथा नारदः अन्यवा
दी क्रियाद्वेषी नोपस्थायी नि
रुत्तरः आहूतप्रपलायी च हीनः
पंचविधः स्मृतः इति व्यव
हारतत्वं
हीनजातिः त्रि नीचवर्णः
इति केचित् ॥
हीनवर्णः त्रि नीचजातिः य
था हीनवर्णोपभुक्ता यात्वा
न्या वध्यापि वा भवेत् इति प्रा
यश्चित्ततत्वं ॥
हीनवादी त्रि वाक्यवर्जितः
बोवा इति भाषा तत्पर्यायः
अधरः २ इति हेमचन्द्रः वि
रुद्धार्थवादी यथा नारदः पू
र्ववादं परित्यज्य योन्यमाल
म्बते पुनः वादसंक्रमणाज्ज्ञे
यो हीनवादी स वै नरः इ
ति हीनवादी दंड्यो भवति नृप
कृत्वादर्थाद्धीयते इति चमि
ता तथा ॥
हीनसख्यं स्त्री नीचेन सह
मित्रता इति केचित् ॥
हीनांगः त्रि सभावतो न्यू
नावयवविशिष्टः तत् पर्या
यः पोगंडः २ विकलांगकः ३

क्षंगः ४ अपांगः ५ अपोगंडः
६ इति जटाधरः तेन सह रूप
रीहासनिषेधो यथा जाति
हीनं वित्तहीनं रूपहीनमद
क्षिणं हीनांग मतिविकलांगं
तेनदोषेणनातिपेत् इति च
ला पुरा प्राह वेदोच्चार्य विनि
श्चयं तं चावमन्य भवतापरी
हासोपि भाषित इति कालि
कापुराणे ४४ अध्यायः
हीनांगी स्त्री क्षुद्रपिपीलि
का इति हेमचन्द्रः ॥
हीतालः पुं हिन्तालवृक्षः
इत्यमरटीका ॥
हीरं क्ली वज्रं इति राज
निर्घंट ॥
हीरः पुं शिवः वज्रं इति
मेदिनी सर्पः इति हेमचन्द्रः
हारः इति जटाधरः सिंहः
इति केचित् श्रीहर्षपिता
यथा श्रीहर्षं कविराजरा
जिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियच
यं मामल्लदेवी च यं ह्यैतीये
कतया मितोऽयमगमत् त
स्य मबन्धे महाकाव्ये चारु
णि नैषधीयचरिते सर्गो निस



गोज्ज्वलः इति नैषधे २ सर्गः ॥
हीरकः पुं रत्नविशेषः अ
यं श्वेतवर्णः बहुमूल्यः शुक्र
देवताकश्च तत्पर्यायः व
ज्रकं ५ इति शब्दरत्नावली सू
चीमुखं ६ वराटकं ७ रत्नमु
ख्यं ८ वज्रपर्यायनाम ९
विराटदेशजहीरकपर्यायः
विराटकदेशजहीरकपर्यायः
राजावर्त्तः १२ इति हेमचन्द्रः
अस्य गुणाः सारकत्वं शीत
त्वं कषायत्वं स्वादुत्वं वांति
कारित्वं वस्त्यर्द्दितकारित्वं
धारणे पापालक्ष्मीनाशित्वं
च इति राजवल्लभः अन्यत्
वज्रशब्दे द्रष्टव्यं ॥
हीरा स्त्री लक्ष्मीः तैलाम्बु
कः इति मेदिनी पिपीलिका
इति हेमचन्द्रः काम्बरी
इति राजनिर्घंटः ॥
हीरांगः पुं इन्द्रस्य वज्रं
इति शब्दमाला
हीलं क्ली रेतः इति केचित्
हीलुकं क्ली गौडीमद्यं इति
शब्दचन्द्रिका ॥
हीही अ विस्मयः हासः इ
ति मेदिनी ॥

हु लि होमे अदने इति क
विकल्पद्रुमः हौत्री देवता
संप्रदानक वह्न्यधिकरणक
वस्तुत्यागः लिङ्होतिचूतम
ग्नौ कुलाय होता प्रतेप्पवं
चिरायमंतर्ध्यसमेभिरग्निं यो
मंत्रपूतां अस मप्यहोषीदि
ति रघुः जटाधरः समजुहुधी
हपावकमिति किराते भीम
नाथ्योपि इति दुर्गादासः
हुंकृतं क्ली हुंकारः इति ध
रणिः वषट्कारशब्दः इति
केचित् हुं इति मंत्राक्षर
तेत्रि ॥
हुड शिमगने संहे इति क
विकल्पद्रुमः पि हुडति
अहुडीत् जहोड मनेह
मज्जनं इति दुर्गादासः हुड
इङ संहे इति कविकल्पद्रुमः
इहं डते ङ हुडते धनं लो
कः राशीकरोतीत्यर्थः
इति दुर्गादासः ॥
हुड ऋड गतौ इति कवि
कल्पद्रुमः ऋ अजुहोडत्
ङ हुडते इति दुर्गादासः
हुडः पुं मेषः इति हेमच
न्द्रः राजनिर्घंटश्च चौरादिभिः

वारणार्थं भूमिनिहितलो
हमयतीक्ष्णशंकुविशेषः त
स्य नामांतरं गुडः पाजिका
टा इति भाषा लगुडः इति
महाभारतं ॥
हुडुक्कः पुं वाद्यभेदः ॥
दात्यूहपक्षी मदमत्तः इति
मेदिनी देडकः हुडुका इति
भाषा इति शब्दरत्नावली
तत्र हुडुक इति च पाठः
हुडुत् क्ली वृषशब्दः इति
काशीखंड मिति केचित्
हुडुम्बः पुं अक्षिपिटः हु
डुम् इति भाषा इति शब्दमा
ला हुंडः पुं व्याघ्रः ग्रामसू
करः मूर्खः राक्षसः इति केचि
त् हुतं त्रि अग्नौप्रतिपुंहू
तं त्रि अग्नौप्रतिसंहृता
दि तत्पर्यायः वषट्कृतं २
इत्यमरः हुताग्नानं इति
केचित् होमे क्ली हुतभुक्
प्रिया स्त्री अग्निभार्या स्वाहा
इत्यमरः
हुतवहः पुं अग्निः इति हे
मचन्द्रः ॥
हुताशः पुं अग्निः इति श


पुं अग्निः शिखकवर्त्मः इत्यमरः हुतभुक्

ब्दरत्नावली भयं इति व्यवहार
सिद्धं ॥
हुताशनः पुं अग्निः यथागो
भिलपुत्रकृतगृह्यासंग्रहोक्त
होमे तवर्ज्जिः स्यात् कोटिहोमे
हुताशनः एषां हुतांमहोना
म शान्तिके वरदः सदा इति
तिथ्यादितत्वे अपि च आरो
ग्यं भास्करादि च्छेदन मिच्छे
हुताशनात् ज्ञानं तु शंकरा
दिच्छेन्मुक्ति मिच्छेज्जनार्दना
त् इति याणविस्तृतमत्स्य
पुराणं शिवं इति केचित्
हुतिः स्त्री हवनं हुधातोः
क्तिप्रत्ययेन निष्पन्ना ॥
हुम् अ स्मृतिः अपाकृतिः
प्रश्नः अभ्यनुज्ञा इति
मेदिनी तर्के वितर्के रुषा
हे दीर्घादिः ह्रस्वादिरपीति
केचित् इत्यमरटीकायां
भरतः ॥
हुल्ल अ कौटिल्ये इति
विकल्पद्रुमः हुल्ली क्विपि
राल्लुलोपे हूर्णे हुरं आ
हुल्लित हूर्णं तेन हुल्ल
ति विलः कुटिलः स्यादित्यर्थः



हूर्छति चौरः अपसरतीत्यर्थः इति धातुप्रदीपः इति दुर्गादासः ॥
हुल ञ हृति संवरणयोः इति कविकल्पद्रुमः ञ होलः हुलः इति दुर्गादासः
हलहली स्त्री रणमंगलजनक शब्दध्वनिः हल २ इति भाषा तत् पर्य्यायः शब्दघंटा २ इति त्रिकांडशेषः ॥
हहः पुं गन्धर्वविशेषः हहः यथा हाहाहूहूश्चैव विश्वे हहहूहूश्च कत्रचित् इति शब्दरत्नावली ॥
हू अव्याकाने अवज्ञा अहंकारे शोकः इति केचित्
हूं अव्य मंत्रविशेषः तत्पर्य्यायो यथा हकारो वाम कर्णाढ्यो नादबिंदुविभूषितः कूर्च्चं क्रोधं रुषदीर्घं हुंकार उच्यते शब्दश्च दीर्घ कवचं तथा प्रणव इत्यपि किंच शिखावषट् च कवचं क्रोधो वर्म हमित्यपि क्रोधाख्यो हुं तन्त्रेच शास्त्रादौ त्रिपुरसंज्ञकः अपिच व्योमस्थ तालजंघास्थनादबिन्दुविभूषितं कूर्च्चं कालो महाकालः क्रोधबीजं निरंजनं इति नानातंत्रे ॥
हुंकारः पुं हुमितिभयार्त्तध्वनिः यथा इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः हुंकारेणैव तं भस्म साच कारांबिका ततः इति मार्कंडेये देवीमाहात्म्यं ॥
हुड ऋङ गतौ इति कविकल्पद्रुमः ऋ अजुहुडत् ङ हुडते इति दुर्गादासः
हूतं त्रि आहूतं आह्वानी कृतं ह्वेञ धातोः क्तप्रत्यये निष्पन्नं ॥
हूतिः स्त्री आह्वाने इत्यमरः हूनः पुं म्लेच्छजातिविशेषः यथा श्वपाक शबर म्लेच्छ हूनो यवन इत्यपि लोकवासलशो वाजिगवाश्यपाचारवर्जितः म्लेच्छः किरात शबर पुलिन्दाद्यास्तु तद्भिदा इति जटाधरः माद राजदेशीय स्वर्ण मुद्रा विशेषश्च ॥
हूम् अव्ययं वितर्कः इत्यमरः सम्मति क्रोधः भयं निन्दा अवज्ञा इत्यमरटीका ॥ ॥

यं नारायणचक्रवर्त्ती वितर्के हुं चैवं ओंऽपि पंडितः प्रश्ने हुं कोलंकाधिपतिः असमैता वहुं कृतं हुं भये चहुं भवतं अन्यत्र हुं शाब्देह्रस्वं
हूरवः पुं शृगालः इति हेमचन्द्रः ॥
हूल्लनं स्त्री कौटिल्ये इति केचित् ॥
हूहूः पुं गंधर्वविशेषः इति हूहूः शब्दरत्नावली ॥
हृ ञ हरणे इति कविकल्पद्रुमः हरति देशाद्देशान्तरं प्रापणं ञ हरति हरते गांवनं गोपः इति दुर्गादासः हृलिट् प्रसह्यकरणे इति कविकल्पद्रुमः प्रसह्यकृतिर्बलात्कारः लिट् जहर्त्ति धनं दस्युः ट् वैदिकः इति दुर्गादासः
हृच्छयः पुं कामदेवः इति
हलायुधः हृदयशायिनि
हृच्छूलं क्लीं हृदयजात शूलरोगः तदौषधं यथा क थितोदकपानेन शाम्यत्कामकेन श्यामग्न्यंगं सन्निदग्धं गव्या ज्येन समंवितं पीतं हृत्पृष्ठशूलानां भवेन्नाशकरं शिव इति गारुडे १९५ अध्यायः अपि च बिल्वाग्निमंथ श्योनाक पाटला पारिभद्रकं प्रसारण्यश्वगन्धा च बृहती कंटकारिका बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्णवा परंड शारिवा पर्णी गुडूची कपिकच्छुरा एषां दश पलिकान् भागान् क्वाथयेत् सलिलेऽमले तेन पादावशेषेण तैलं पात्रे विपाचयेत् आजं वा यदि वा गव्यं क्षीरं दत्वा चतुर्गुणं शतावरीरसंचैव तैलतुल्यं प्रदापयेत् द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तत् शृणु शतपुष्पा देवदारु मांसपर्णी वचा गुरु कुष्ठं मांसी सैन्धवं चपलमेकं पुनर्णवा पानेन श्वेतं नाभ्यंगे तैल मेतत् प्रदापयेत् हृच्छूले पार्श्वशूले च गंडमालां च नाशयेत् । अपस्मारं वातरक्त मातृष्णा प्रमावभवेत इति च गारुडे १९८ अध्यायः ॥



हृणिया स्त्री हृणीया इत्यम
र टीकायां रायमुकुटः ॥
हृणीया स्त्री निन्दा इत्यमरः
हृत् क्ली हृदयं तत्पर्य्यायः
चित्तन्तु चेतो हृदयं स्वान्तं हृन्
मानसं मनः इत्यमरः
हृत्कंपः पुं हृदयकंपनं
यथा हृत्कंपो जायते ताव
त् यावत् तस्य कृपानवेत्
इति समयाचारतन्त्रोक्त भद्र
कालीकवचं ॥
हृतं त्रि अपहृतवस्तु यथा
शुराम्भुंभ निशुम्भाभ्यां मसुरा
भ्यां शचीपतेः त्रैलोक्यं यज्ञ
भागाश्च हृता मदवलाश्रया
त् इति देवीमाहात्म्ये ॥ अथा
यः हृद क्ली हृदयं मन इ
त्यमरः
हृदयं क्ली बुक्कं वक्षः मनः
यथा उरस्यपि च बुक्कायां हृ
दयं मानसेपि च इति त्रिकां
डशेषः बुक्काग्रमांसं हृदयं
हृत् दिति चत्वारि हृदये के
चित्तु वक्कात् इत्यमेव हृदया
न्तर्गते मांसविशेषे पद्माका
कारे हृदयादिद्वयमाकूः धा
तोरनेकार्थत्वात् इत्यमर ॥

टीकायां भरतः अत्र अनाह
तनामकद्वादशदलपद्ममस्ति
यथा आधारे लिंगनाभौ हृदय
सरसिजे तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदश
दले द्वादशार्द्धे चतुष्के वासा
न्ते वादिलान्ते डफ कठसहि
ते कंठदेशे स्वराणां हंसं
क्षोदंडमध्ये सकलदलगतं
वर्णरूपं नमामि इति षट्चक्र
भेदः किंच तस्योर्द्धे हृदि पंक
जं सुललितं वंधूककांत्युज्व
लं काद्यैर्द्वादशवर्णकैरुप
कृतं सिंदूर रागान्वितैः नामा
नाहत संज्ञकं सुरतरु वां
छातिरिक्त प्रदं वायोर्मंडल
मत्र धूमसदृशं षट्कोण
शोभान्वितं इति षट्चक्रक्र
मः तस्य सुभलक्षणं यथा
समोन्नतं च हृदयं मसृणं
च विरलोम शिरालकं इति
गारुडे ६९ अध्यायः हृदयग्रं
थि पुं हृदयग्रंथिर्भिद्य
ते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः
क्षीयन्ते चास्य कर्म्माणि दृष्टे
परात्मनीश्वरे इति ॥ ॥॥

उ हृषित्वा हृष्ट्वा क्त्वा इमौवे
दत्वात् नेम उ औ त्यादिना इ
मो निषेधे निष्ठायां हृष्टः
अस्मात् धृषादित्वान्नित्यमु॰
इत्यन्ये इति दुर्गादासः
हृष य ञि इर् हर्षे इति
कविकल्पद्रुमः यहृस्यति
लोकः सुखात् ञि हृष्टो
स्ति इर् अहृषत् अहर्षीत्
अस्मात् धृषादित्वान्नित्यं डइ
त्यन्ये इति दुर्गादासः
हृष उ ञि अलीके इति क
विकल्पद्रुमः उ हर्षित्वा हृ
ष्ट्वा ञि हृष्टोस्ति अलीके
मिथ्याकरणे हर्षति कथां
नीचः मिथ्या करोति इत्य
र्थः इति दुर्गादासः ॥
हृषितं त्रि विस्मितं प्रीतं प्र
हतं हृष्टरोम इति मेदिनी
प्रणतं वर्मितं इति धर
णी ॥
हृषी पुं अग्नीषोमौ इति
महाभारते मोक्षधर्मः
हृषीकं क्ली इन्द्रियं इत्यम
रः हृषीकेशः पुं विष्णु इत्यम
रः हृषीकाणामिन्द्रियाणामीशो
हृषीकेशः देवस्तद्रूपकत्वात्

परमात्मत्वाद्वा इन्द्रियाणि यद
शे वर्त्तन्ते स परमात्मा इति श
कराचार्यः पौराणिकास्त्वाहुः
हृष्टा जगत् प्रीतिकराः के
शा रश्मयोस्य स हृषीकेशः इ
त्येवमादिः अयं हि सूर्य्यचं
द्र रूपश्च तथा च मोक्ष
धर्मे सूर्य्याचन्द्रमसोः शश्व
त् अंशुभिः केशसंज्ञितैः वो
धयन् स्वापयञ्चैव जगदुद्वि
यते पृथक् वोधनात् स्वा
पनाच्चैव जगतो हर्षणं भवेत्
अग्नीषोमकृतैरेव कर्म्मभिः
पांडुनन्दन हृषीकेशोहमी
शानो वरदो लोकभावनः
इति भरतः अपि च हृषीका
णि नियम्याहं ततः मत्यव
तो गतः हृषीकेश इति ख्या
तो नाम्ना तत्रैव संस्थितः इति
वाराहे कुरुक्षेत्र हृषीकेश
महिमानामाध्यायः वृथाधर्मं
चरिष्यन्ति कलौ तस्मिन् युगां
तिमे येचास्य स्थापयिष्यन्ति गो
त्मस्य महात्मनः सर्वे तेऽहम्भ
विष्यन्ति आलणायासञ्जाति
षु विनिन्दन्ति हृषीकेशं ब्रा
ह्मणान् ब्रह्मवादिनः वेदा

वासाव्रताचारा दुराचाराहृथा
श्रमाः मोहयंतिजनान्सर्वान्
दर्शयित्वाफलानिच तमसा
विष्टमनसो वैडालव्रतिकाध
माः कलौरुद्रोमहादेवोलो
कानामीश्वरः परः नदेवता
भवोनृणां देवतानांचदैवतं
करिष्यत्यवताराणिशंकरो
नीललोहितः श्रौतस्मार्त
प्रतिष्ठार्थं भक्तानां हितका
म्यया उपदेक्ष्यतिज्ज्ञानं
शिष्याणां ब्रह्मसं हितं इति
कौर्मे २७ अध्यायः ॥
हृष्टः त्रि प्रीतः जातहर्षः
इत्यमरः अस्य पर्यायः प्रीत
णाहृष्टवान् रोमांचितः प्र
हसितः विस्मितः इति
विश्वमेदिन्यौ प्रति हतः
इति हेमचन्द्रः ॥
हृष्टमानसः त्रि हृष्टचित्तः
तत् पर्यायः
हर्षमाणः २ विकुर्वाणः
३ प्रमना ४ इत्य मरः
प्रीतमानसः ५ इति शब्दर
त्नावली ॥
हृष्टरोमा त्रि रोमांचितः ॥
इति त्रिकांडशेषः ॥

हृष्टिः स्त्री आनंदः मानः
इति धरणी ॥
हे अमन्त्रणे आह्वाने ॥
असूयादि इति मेदिनी अ
यस्य पर्यायः प्याट् २ पाट्
३ अंग ४ है ५ भोः ६ इत्यमरः
हंहो ७ कुंहो ८ अरे ९
अये १० अयि ११ इति भरतः
हेका स्त्री हिक्का इति हेम
चन्द्रः ॥
हेच बाधे इति कविकल्पद्रु
मः हेचति बाधो विहतिः
इति दुर्गादासः
हेच शाठ्ये इति कविकल्प
द्रुमः खचो भूति हृल्यो रुत
पतिः शाहेठती हेठती इति
दुर्गादासः
हेठ ऋ ङ बाधे इति कवि
कल्पद्रुमः ऋ अजिहेठत्
ङ हेठते मत सरः साधू इ
ति दुर्गादासः ॥
हेठः पुं बाधा विहेठः
इति मेदिनी ॥
हेड ङ ऋ अनादरे इति
कविकल्पद्रुमः ङ हेडते
जिहेडे ऋ अजिहेडत् इति
दुर्गादासः ॥

हेड म वेष्टे इति कविक
ल्पद्रुमः म हेडयति अहिडि
अहीडि हिडं हिडं हीडं ही
डं एकारस्य ह्रस्वविधानेकं
ध्यत्वेन समानोऽप्यकारोनस्या
त् प्रयोगत्वमित्यक्ते वि
कार एव स्यात् इकारस्य
दीर्घविधौ ऋकारएव एका
रस्य आशिक कंठत्वेन विरु
द्धत्वात् केचित्तु दीर्घत्वे गुणं
विधाय अहि अहेडीत्यादिम
न्यंते इति दुर्गादासः
हेडजः पुं क्रोधः इति के
चित् ॥
हेडावुकः पुं अश्वविक्रयका
री इति त्रिकांडशेषः ॥
हेतिः स्त्री अस्त्रं सूर्यकिरणः
अग्निशिखा इति भरतः सा
धने यथा मधु इ निषस्य
यतयो यम कर्महेतिं जह्युः
स्ववाडिव निपानखनित्रमि
न्द्रः इति श्रीभागवते २
स्कन्धे ७ अध्यायः कर्मा भे
दः तन्निरासोऽ कर्तः तत्रहे
तिं साधनं जह्युः इति श्रीधर
स्वामी हेतुः पुं कारणं इत्यमरः

न्यायमते व्यापकत्वापकः
व्याप्य इति यावत् ममेव
लिंग मामनेति तस्य लक्ष
णं यथा हेतुत्वंच अनुमिति
कारणीभूत लिंगपरामर्शप्रयो
जक शाब्दज्ञानकारणसाध्या
विषयक शाब्दधीजनक हेतु
विभक्तिमच्छब्दत्वं हेतुत्वम
तिपादक विभक्तिमन्न्यायाव
यवत्वं वाउदाहरणप्रयोजका
काङ्क्षाजनक शाब्दज्ञानजन
कन्यायावयवत्वं वा साध्यावि
षयक ज्ञानजनक हेतुपंचम्य
न्तावक्षितिपरशाब्दत्वं वा प्रति
ज्ञावाक्यधीजन्य कारणाका
ङ्क्षानिवर्तक ज्ञानजनकहे
तुविभक्तिमद्वाक्यत्वं वा पं
चम्यन्तलादाणिक्यपदवदनु
मितिपरवाक्यत्वं वा इतिगं
गेशोपाध्यायकृतावयववि
ताम णिः हेतुकः पुं कारणे
हेतुरेवस्वार्थेकः तत्संवन्धि
निमित्तत्र वक्त्रौस्वार्थे कप
त्ययः यथा प्रकृतसाध्यहेतु
कानुमितिपरत्वमावश्यके इति
सामान्यनिरुक्तिगादाधरी
हेतुता स्त्री कारणता हेतुत्वं



यथा समसंग उपोद्घातो हे
त्वन्तवसरस्तथा निर्वाहके
ककार्य्यत्वे षोढा संगतिरि
ष्यते इत्यत्र मितिजागदीशी
हेतुमान् त्रि कारणवान् य
था हेतु हेतुमतोर्लिङ् इति
पाणिनिसूत्रं ॥
हेतौ अहेतुना हेतोर्द्दीरा
इति केचित्
हेत्वाभासः पुं हेतुदोषः स
तु पंचविधः व्यभिचारः १
विरुद्धः २ असिद्धः ३ सत्
प्रतिपक्षः ४ बाधः ५ यथा
अनैकान्तो विरुद्धश्चाप्यसि
द्धः प्रतिपक्षितः कालात्यया
पदिष्टश्च हेत्वाभासास्तु पं
चधा आद्यः साधारणस्तु स्या
त् असाधारणकः परः त
थैवानुपसंहारी त्रिधानैका
न्तिको भवेत् यः सपक्षे वि
पक्षे च भवेत्साधारणो मतः
यस्तूभयस्माद्व्यावृत्तः स त्व
साधारणो मतः तथैवानुप
संहारी केवलान्वयिपक्षकः यः
साध्यवति नैवास्ति स विरुद्ध उदा
हृतः आश्रयासिद्धिराद्यास्यात्
स्वरूपासिद्धिरप्यथ व्याप्यत्वासि
द्धिरपरा स्यादसिद्धिरतस्त्रिधा
पक्षासिद्धि र्यत्र पक्षो भवेन्म
णिमयो गिरिः ह्रदो द्रव्यं धूमव
त्त्वासिद्धि रपरा नीलधूमादिके
भवेत् विरुद्धयोः परामर्शो हे
त्वोः सत्प्रतिपक्षता साध्य
शून्यो यत्र पक्षस्तु सौ बाध उ
दाहृतः उत्पत्तिकालीन
घटे गन्धादि र्यत्रसाध्यते
इति भाषापरिच्छेदः तस्यसा
मान्य लक्षणानि यथा यद्
मिति कारणीभूताभावप्रति
योगि यथार्थज्ञानविषयत्वं
यद्विषयत्वेन लिंगज्ञानस्यानु
मिति प्रतिबन्धकत्वं ताव
मानं सत् यद्वत्त्वमिति प्र
तिबन्धकं तत्त्वं वा हेत्वाभा
सत्वं तस्य विशेष्य लक्षणा
नि यथा उभयकोटिप
स्थापकतावच्छेदकरूपव
त्त्वे तत्त्वं विरुद्धान्यपक्षवृत्ति
त्वे सति अनुमितिविरोधि
संबन्धाव्यावृत्ति र्वा अनै
कान्तिकः विपक्षवृत्तित्वं सा
धारणत्वं सकलसपक्षव्यावृत्तोद
त्वमसाधारणत्वं व्याप्तिग्रहानु
कूलैकधर्म्यनुपसंहारिता ॥

यत्र सहेत्वभिमतोऽनुपसं
हार्य्यः साध्यव्यापकाभावप्र
तियोगित्वं विरुद्धत्वं
साध्यविरोध्युपस्थापनसमर्थ
समानबलोपस्थित्या प्रतिरुद्ध
कार्य्य लिंगत्वं तत्वं सत्प्रति
पक्षत्वं व्याप्तिपक्षधर्म्मता
निश्चयविरोधि रूपवत्वं अ
सिद्धिः पक्षनिष्ठप्रमाविषय
त्वप्रकाराभाव प्रतियोगिसा
ध्यकत्वं बाधः इति चिंताम
णि हेम क्लीं स्वर्णं इति के
चित् हेमः पुं माषकपरिमा
णं इति वैद्यकपरिभाषा कृ
ष्णवर्णाश्वः बुधः इति केचि
त् हेम क्लीं स्वर्णं धुस्तूरः इ
त्यमरः केशरं इति राजनि
र्घंटः हिमः इति हेमंतश
ब्दटीकायां भरतधृतमाध
वी हेमकन्दलः पुं प्रवालः
इति हेमचन्द्रः ॥
हेमकान्तिः स्त्री दारुहरिद्रा
इति राजनिर्घंटः स्वर्णद्युति
मति त्रि
हेमकारः पुं हेमकर्त्ता स्वर्ण
कारः यथा सर्वसंकरपापि
ष्ठं हेमकारं नराधिपः अन्याये
वर्त्तमाने च छेदयेल्लवशस्तु
दैः इति मत्स्यपुराणे २२१
अध्यायः ॥
हेमकिंजल्कं क्लीं नागकेश
रं इति राजनिर्घंटः ॥
हेमकूटः पुं पर्वतविशेषः
इत्यमरः स तु किंपुरुषवर्ष
स्य सीमापर्वतः नवतिसहस्र
योजनदीर्घः द्विसहस्रयोज
नप्रस्थः द्विसहस्रयोजनवि
स्तारः हिमालयादुत्तरे स्थितः
इति श्रीभागवतमतं ॥
हेमकेतकी स्त्री स्वर्णकेतकी
इति राजनिर्घंटः
हेमकेलिः पुं अग्निः इति
शब्दमाला ॥
हेमकेशः पुं शिवः इति
केचित् ॥
हेमगन्धिनी स्त्री रेणुका
ख्यगन्धद्रव्यं इति रत्नमाला
हेमगौरः पुं किंकिरातवृक्षः
इति राजनिर्घंटः स्वर्णवर्णे
स्वर्णद्युते त्रि
हेमगौरांगः त्रि स्वर्णतुल्य गौ
रवर्णांगविशिष्टः यथा विष
ण्णोऽस्मिहमानेन कालानलस
मत्विषा निर्दहेद्धेमगौरांगः



कृतः कृतो जनार्दनः तं दृष्ट्वा हेमगौराङ्गं कृतं कृतं जनार्दनं ततः सर्वे वयेभी भीता स्त्वा मेव शरणं गताः इति स्कान्देनीलकंठस्तोत्रं
हेमचन्द्रः पुं अभिधानचिंतामणिनामकोषकर्त्ता यथास्मानेकार्थनाममालात्मकः कोषवरः सुभः हेमचन्द्र प्रणीताभिधानचिंतामणिर्मणिः इति तस्य सूचीकारश्लोकः स्वर्णमयपर्णी च स्वर्णरचाद इति भाषा ॥
हेमज्वालः पुं अग्निः इति शब्दमाला ॥
हेमतारं क्ली तुत्थं इति हेमचंद्रः ॥
हेमदुग्धः पुं उडुंबरवृक्षः इति शब्दरत्नावली ॥
हेमदुग्धकः पुं उडुंबरवृक्षः इत्यमरः पीतवर्णक्षीरयुक्ते त्रि हेमदुग्धा स्त्री स्वर्णक्षीरी इति जटाधरः हेमदुग्धी पुं यज्ञोडुम्बरवृक्षः इति शब्दरत्नावली
हेमदुग्धी स्त्री स्वर्णक्षीरी इति राजनिर्घंटः ॥

हेमंतः पुं क्ली ऋतुविशेषः सतु अग्रहायणपौषमासात्मकः यथा षड्मी ऋतवः पुंसि मार्गादीनां युगैः क्रमादिति वक्ष्यमाणेनांवयः ते के इत्याह हेमंत इत्यादि मार्गपौषाभ्यामत्र हेमंतः हेति संतापमिति हिमोऽत्रास्तीति वा मनी यादित्वात् हेमंतः अर्द्धर्चादित्वमिति केचित् तेनग्रह्णियामित्यस्यानेनापि संबन्धः हेमन् शब्दोप्यस्तीति माधवी इति भरतः तत्पर्य्यायः हैमनः १ इति शब्दरत्नावली ॥ उष्मासहः २ शारदंत्यावलीहिमागमः ४ तत्कालोद्भव जलेगुणाः हेमंतिकं जलं स्निग्धंवृष्यं वल्यं दितं गुरु इति राजनिर्घंटः तत्रलोकमतपनार्थं मग्निप्रदानफलं यथा हेमंते शिशिरे चैवपुण्यमग्निं यः प्रयच्छति सर्वलोक प्रतापार्थं स प्राणंगति मात्मयात् इति वह्निपुराणे कन्यादाननामाध्यायः तत्र भगवत् सभीपे अग्निप्रज्वालनविधिः सेवाश
ब्दे द्रष्टव्यः

ष्टव्यः तत्र वर्णयानि
हेमंते दिनलघुता भीत यवस्तंबमरुवक हिमानि इति कविकल्पलता ॥
हेमंतनाथः पुं कपित्थः इति शब्दचन्द्रिका ॥
हेमपर्वतः पुं सुमेरुगिरिः इति हलायुधः ॥
हेमपुष्पं क्ली अशोकपुष्पं ॥ यवापुष्पं इति मेदिनी ॥
हेमपुष्पः पुं चम्पकवृक्षः इति शब्दचन्द्रिका ॥
हेमपुष्पकः पुं चम्पकवृक्षः इत्यमरः लोध्रः इति राजनिर्घंटः ॥ हेमपुष्पिका स्त्री स्वर्णयूथिका इत्यमरः हेमपुष्पी स्त्री मंजिष्ठा इति शब्दमाला स्वर्णजीवंती इन्द्रवारुणी स्वर्णुली मुषली कंटकारी इति राजनिर्घंटः ॥
हेमफला स्त्री स्वर्णकदली इति राजनिर्घंटः ॥
हेममाला स्त्री यमपत्नी इति केचित् स्वर्णस्रक् च ॥
हेममाली पुं सूर्य्यः यथाभविष्ये याम्यकां हरुपातेन वैशाखे

मासिवैतिथिः तृतीया साहि या लोके गीर्वाणैरभिवन्दिता योऽस्यांददाति करकान् वारिवाज समन्वितान् सजाति पुरुरुषो वीरलोकाननिः सूर्य्यस इति तिथ्यादितत्त्वं ॥
हेमयूथिका स्त्री स्वर्णयूथिका इति राजनिर्घंटः
हेमरागिणी स्त्री हरिद्रा इति त्रिकांडशेषः ॥
हेमलः पुं स्वर्णकारः कृकलासः प्रस्तरभेदः सनकषपाषाणः इति मेदिनी हेमलता स्त्री स्वर्णजीवंती इति राजनिर्घंटः ॥
हेमवलं क्ली मौक्तिकं इति राजनिर्घंटः हिमवल इति साधुपाठः ॥
हेमशंखः पुं विष्णुः इति त्रिकांडशेषः ॥
हेमशिखा स्त्री स्वर्णक्षीरी इति शब्दरत्नावली ॥
हेमसारं क्ली तुत्थं यथा तुत्थकंतु शिखिग्रीवं हेमसारं मयूरकं इति रत्नचन्द्रिका ॥ ॥



हेमसूत्रकं क्ली हारविशेषः
इति धरणिः ॥
हेमहस्तिरथः पुं महादानवि
शेषः तद्विवरणं यथा
तः संप्रवक्ष्यामि हेमहस्तिरथं
शुभं यस्य प्रदानात् भवनं
वैष्णवं याति मानवः पुण्यां
तिथिं समासाद्य तुलापुरुषव
त्ततः विप्रवाचनकं कुर्य्यात्
लोकेशावाहनं बुधः ऋत्वि
ङ्मण्डपसम्भारभूषणाच्छादनादि
कं अत्राप्युपोषितः स्तत्र ब्रा
ह्मणैः सह भोजनं कुर्य्यात् पु
ष्परथाकारं काञ्चनं मणिभू
षितं वलभीभिर्विचित्राभिश्चक्र
युक्तसमन्वितं लोकपालाष्ट
कोपेतं ब्रह्मार्कशिवसंयुतं
मध्येनारायणोपेतं लक्ष्म्या चैव
समन्वितं कृत्वा तिलद्रोणं
कृत्वा संस्थापयेद्रथं तथाष्टा
दशधान्यानि भाजनासन च
न्दनैः दीपकोपानहच्छत्रद
र्पणापादुकान्वितं ध्वजेन गरु
डं कुर्य्यात् कूवराग्रे विनायकं ना
नाफलसमायुक्तमुपरिष्टाद्वि
तानकं कोषेयं पंचवर्णंच अम्लान
कुसुमान्वितं ॥

चतुर्भिः कलसैः सार्द्धं गोभिरष्टा
भिरन्वितं चतुर्भिर्हैममातंगै
र्मुक्तादामविभूषितं
स्वरूपतः करिभ्यांतु युक्तं कृत्वा
निवेदयेत् कुर्य्यात् पंचपला
दूर्द्ध्वं सम्भवादपि शक्तितः ततो
मंगलशब्देन स्नापितो वेदपुंगवैः
त्रिः प्रदक्षिणमावृत्य गृहीतकुसु
माञ्जलिः इमं मुच्चारयन्मंत्रं ब्राह्म
णेभ्यो निवेदयेत् नमो नमः शंक
रपद्मजार्कलोकेशविद्याधरवा
सुदेवैः त्वं सेव्यसे वेदपुराणयज्ञ
तेजोमयस्यन्दन पाहि तस्मात्
यत्तत् पदं परमगुह्यतमं मु
रारेरानन्दहेतुगुणरूपविमुक्त मं
तः योगैकमानसदृशो मुनयः
समाधौ पश्यंति तत्त्वमसि ब्राह्म
रथेधिरूढः यस्मात्त्वमेव भवसा
गर संप्लुतानामानन्दभाण्डभृत म
धर पानुपात्रं
तस्मादघौघशमनेन कुरु प्रसा
दं चामीकररथ
माधव संप्रदानात् इत्थं प्रण
म्य कनकेभरथप्रदानं यः
कारयेत् सकलपापविमुक्तदे
हः विद्याधरामरमुनीन्द्रग
णाभिजुष्टं प्राप्नो ॥ ॥ ॥

त्यसौ पदमतीन्द्रियमिन्दुमौलेः
कृतडवितविलासा इत्यसद्धि
जाल व्यतिकरकृतदाहोद्वेग
भाञ्जोपि बन्धून् नयति च पितृ
पुत्रान् बान्धवानप्यशेषान् कृ
त राज रथदानं शाश्वते सम्भवि
ष्णोः इति मत्स्यपुराणे महादाना
नुकीर्त्तने हेमहस्तिरथप्रदानि
को नाम २७९ अध्यायः
हेमतीरी स्त्री स्वर्णतीरी इति
राजनिर्घण्टः ॥
हेमा पुं बुधग्रहः इति
त्रिकाण्डशेषः
हेमा स्त्री अप्सरःसः सुन्दरी
स्त्री इति केचित् ॥
हेमाङ्गः पुं गरुडः सिंहः
सुमेरुः ब्रह्मा इति मेदिनी
चंपकवृक्षः इति शब्दरत्ना
वली विष्णुः इति तस्य सहस्र
नामस्तोत्रं हेमवर्णशरीरे
स्त्री तद्युक्ते त्रि ॥
हेमाद्रिः पुं सुमेरुपर्वतः इ
त्यमरः तत्त्रियराजविशेषः स
च चिंतामणि कामधेनु कल्प
द्रुमनामस्मृति संग्रहकारकः य
था तस्यास्ति नाम हेमाद्रिः ॥॥

सर्वश्रीकरणप्रभुः निजोदार
तया यश्च सर्वश्रीकरणप्रभुः
अनेन चिन्तामणि कामधेनु क
ल्पद्रुमानर्थिजनाय दत्वान् वि
लोकयंकेकिमत्स्यसर्वगीर्वा
णानाथोपि करप्रद्येः भूत अथा
स्वना धर्मकथादिविद्रे त्रैलो
क्यमालोक्यकलेवलेन तस्मा
पकारे दधतानुचिन्ता चिन्ताम
णिः प्रादुरकारि चारुः पंचवि
ड्डात्मके शास्त्रव्रतखण्डदत्त
रं दानखण्ड मिदं तत्रद्वितीय
मथ कथ्यते इति तत्कृत च
तुर्वर्गचिंतामणौ दानखण्डीय
श्लोकाः हेमाद्रिजरणः पुं स्वर्ण
तीरी इति रत्नमाला ॥
हेमाह्वः पुं वनचम्पकः इति
राजनिर्घण्टः धुस्तूरः कनका
ख्य शब्ददर्शनात्
हेमाह्वा स्त्री स्वर्णजीवन्ती इ
ति राजनिर्घण्टः
हेम्ना पुं बुधग्रहः यथा
हेलिः सर्पसुन्दुमाः शीत
रश्मिर्हेम्ना विजेता बोधनश्चो
न्दुपुत्रः इति ज्योतिस्तत्त्वे हे
यः त्रि त्याज्यः यथा ऊपरा

बालकाञ्जिना इत्यायकस्य
बालखंडे मदद्वोया हेयास्त
स्याद्विचलतोः इति युक्तिकल्प
तरुः
हेरं त्रि मकुटभेदः हरिद्रा
ग्रामरीमाया इति केचित
हेरंबः पुं गणेशः इत्यमरः
महिषः शौर्य्यगर्वितः इति
मेदिनी वृद्धविशेषः ततप
र्य्यायः हेरुकः २ चक्रसंवरः
३ देवः ४ वज्रकपाली ५ निशु
म्भी ६ श्रीशिरोवरः ७ वज्रटी
कः ८ इति त्रिकांडशेषः अथ
हेरंबमंत्रः ॥ सच ऊकारयु
क्तो गकारः सविन्दुः प्रणवा
दिनमोऽन्तश्चतुरक्षरः निबन्धे
पंचांतको बिन्दुयुक्तो वामक
र्णविभूषितः ताराद्ये हृदया
न्तोः यं हेरंब मनुरीतः चतुर्व
र्गात्मको ह्यर्णो चतुर्वर्गफल
प्रदः अस्य पूजाप्रयोगः प्रातः
कृत्यादि पीठन्यासांतं विधा
य गणेशोक्त पीठशक्तीः पी
ठमंत्रं च विन्यस्य ऋष्यादिन्यासं
कुर्य्यात् अस्य गणक ऋषिर्गाय
त्रीछन्दो हेरंबो देवता गकारो

सिद्ध्यर्थे विनियोगः शिरसि
गणकऋषये नमः इत्यादि
ततः करांगन्यासौ गां गीं गूं
गैं गौं गः इत्येतैः षडंगानि
कुर्य्यात् तथा च षड्दीर्घभाजा
बीजेन षडंगानि प्रकल्पयेत्
ततो ध्यानं मुक्तांचननीलकुन्द
घुसृणच्छाये त्रिनेत्रान्विते
नागास्ये हरिवाहनं शशिधरं हे
रंब मर्कप्रभं दृप्तं दानमभीति
मोदक रदान् टंकंशिरोऽक्षात्मि
कां मालां मुद्गरमंकुशं त्रिशिख
कं दोर्भिर्दधानं भजे एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनं कु
र्य्यात् ततो गणेशोक्त पीठ
पूजां कृत्वा ॐ ह्रं ह्रं महासिंह
य गं हेरंब आसनाय नम इ
त्यासनं पूजयेत् तथा च निब
न्धे प्रणवं कवचद्वन्द्वं तथा च नि
बन्धे प्रणवं कवचद्वन्द्वं महासिं
हायगं ततः हेरंबेति पदं पश्चा
त् आसनाय हृदंततः अयमास
नमंत्रः स्यात् प्रदद्यादस्यासन
मिति पीठन्यासेप्येवं मंत्रः तत
ॐ गं मंत्रेण मूर्तिं संकल्पये
त् तथा च निबन्धे तारादिविघ्न
बीजेन मूर्तिं तस्य प्रकल्पयेत् ॥

पुनर्ध्यात्वावाहनादि पंचपुष्पा
ञ्जलिदानपर्य्यंतं विधायावरण
पूजामारभेत् यथा अग्न्यादि
कोणे मध्ये दिक्षु च गां हृदयाय
नम इत्यादिना पूजयेत् तद्बहि
रिन्द्रादीन् वज्रादींश्च संपूज्य
धूपादि विसर्जनान्तं कर्म्म समा
पयेत् अस्य पुरश्चरणं त्रिल
क्षजपः तथा च त्रिलक्षं च ज
पेन्मंत्रं दशांशं जुहुयात्ततः द्वा
मद्भिः यथा लक्षत्रयं जपेन्मं
त्रमिक्षुदंडैः दशांशतः अपूपैः
राज्ययुक्तैर्वा जुहुयान्मंत्रसि
द्धये मंत्रांतरं गं क्षिप्रप्र
सादनाय स्वाहा तथा च निब
न्धे संवर्तकौ नेत्रयुतः पार्श्वो
वह्न्यासने स्थितः प्रासादना
यमंत्रः सबीजाद्यो दशाक्ष
रः अस्य पूजा प्रातःकृत्यादि
पीठन्यासांतं कर्म्म विधाय कर
न्यासादिन्यासं कुर्य्यात् शिरसि
गणकऋषये नमः मुखे विरा
ट्छन्दसे नमः हृदि क्षिप्रप्रसाद
नाय देवतायै नमः तथा च निबं
धे गणको मुनिराख्यातो विरा
ट्छन्द उदीरितं क्षिप्रप्रसादनो
विघ्नो देवतास्य प्रकीर्तिता ॥

दीर्घयुक्तेन बीजेन षडंगानि
प्रकल्पयेत् प्रकारान्तरवत् क
रांगन्यासौ कृत्वा ध्यायेत् पा
शांकुशौ कल्पलतां विषाणं
दधत् स्वशुंडाहितबीजपूरः रक्तस्त्रि
नेत्रस्तरुणेन्दुमौलि हारोज्वलो
हस्तिमुखोऽवतात् इति ध्या
त्वा मानसैः संपूज्य शंखस्था
पनं कृत्वा पीठपूजादि पंचपुष्पा
ञ्जलिदानपर्य्यंतं विधाय आव
रणपूजामारभेत् अग्न्यादिना
पूजयेत् तथा च निबन्धे अं
गानि पूर्वमभ्यर्च्य विघ्नानष्टौ
यजेत्ततः पत्राग्रे पूजयेदेता।
ब्राह्म्याद्यास्तदनंतरं ॥
पत्रेषु विघ्नं विनायकं शूरं
वीरं वरदसंज्ञकं इभवक्त्रं
चैकरदं लंबोदरं प्रपूजयेत
पत्राग्रेषु ब्राह्म्याद्यास्तद्बहि
रिन्द्रादीन् वज्रादींश्च पूजयेत्
ततो धूपादि विसर्जनांतं कर्म
समापयेत् अस्य पुरश्चरणं ल
क्षजपः तथा च ॥
लक्षं जपेज्जपस्यांते जुहुयाद
घृतं तिलैः मधुरत्रितये
वापि द्रव्ये ॥



रष्टाभिरीरिभेः इति कृला न
त्कृत तेत्रासारः
हेरंवजननी स्त्री दुर्गा इति
शब्दरत्नावली ॥
हेरंवहट्टः पुं देशविशेषः
सच दक्षिणप्रदेशे वर्त्तते इति
शब्दरत्नावली ॥
हेरिकः पुं चरः इति हेम ॥
चेद्रः ॥
हेरुकः पुं बुद्धभेदः महाका
लगणः इति मेदिनी
शिवलिंगविशेषः यथा शिव
लिंगंच तत्रास्ति शिलायां दे
रुकाख्यं नदीदक्षिणदक्षिणए
वेस्यनायकं तेन पूजयेत् इति
कालिकापुराणे कामाख्यारू
पनिर्णये ८८ अध्यायः गणे
शः इति तत्रैव ॥
हेलंची स्त्री हिलमोचिका
हेलंचा इति भाषा इति
शब्दचंद्रिका हेलनं क्ली अव
हेला इति शब्दरत्नावली
हेला स्त्री स्त्रीणां शृंगारभाव
जक्रियाविशेषः इत्यमरः
सुरते प्रौढेच्छा हेला यदाह
प्रौढेच्छा याति हृष्यांनोना
रीणां सुरतोत्सवे शृंगारशा
स्त्रतत्त्वज्ञैः हेलासा परिकीर्त्तिता
इति अन्येत्तु सएव हेलास्यव्य
क्त शृंगाररससूचकः
इत्याहुः अस्यार्थः हावएवस्फु
ट शृंगाराङ्गभावो हेलेति
अन्येत्वाहुः विलासादयो दश
स्वाभाविकाः ताव हाव हेला
स्त्रयोऽङ्गजाः शोभादयः सप्त
प्रयत्नजाः इति विंशतिरलं
काराः तेषु देहात्मकं भवेत्
सत्वे सत्वाद्भावः समुत्थितः भा
वात् समुत्थिता हासोहावा
द्धेला समुत्थिता इति
हिलश हावकृतौ यच् स्त्री
त्वलोकाद्याप् हेलिरपि
हेलिः पुंसिरवौ हेलि हेलाप्य
पि योषिति इति हड्डः इति
भरतः अपिच हावएवभवे
द्धेला व्यक्तः शृंगारसूचकः
इत्युज्ज्वलनीलमणिः ॥
अवज्ञा इति मेदिनी ॥
ज्योत्स्ना इति केचित् हेला
बुकः पुं अश्वविक्रयी इति
हारावली
हेलिः पुं सूर्य्यः इति त्रिकां
डशेषः आलिंगनं इति ॥॥

केचित् ॥
हेलिः स्त्री हेला इति हड्डः
इत्यमर टीकायां भरतः हे
ष अव्य न स्वने अस्वानां
इति कविकल्पद्रुमः न हेषते
चौरकः जिहेष अव्य अजि
हेषत् इति दुर्गादासः
हेषा स्त्री अश्वानां निस्वनः त
त पर्य्यायः ह्रेषा २ इत्यमरः
ह्रेषा ३ इति तट्टीका ॥
हेषी पुं अश्वः इति त्रिकांड
शेषः ॥
हैहै अव्य संबोधनं हूतिः
इति मेदिनी ॥
है अव्य संबोधने आह्वाने
इति मेदिनी ॥
हैतुकः पुं शुष्कतर्कव्यवहारी
यथा मनुः त्रैविद्यो हैतुकस्त
र्की निरुक्तो धर्म्मपाठकः त्र
य आश्रमिणः पूर्व्वपरिषत्
स्याद्दशावरा त्रैविद्यं त्रि वे
दपारगः हैतुकः शुष्कतर्कव्य
वहारी इति अवराः तत्वे हे
तुहारा सन् कर्म्मसुसन्देहकर्त्ता
यथा पाषंडिनो विकर्म्मस्थान्
वैडालव्रतिकान् शठान् हैतुका
न् वकव्रतीन् सर्व्वां ॥
मात्रेणापिनार्च्चयेत् इति विष्णु
पुराणे ३ अंशे १८ अध्यायः
पाषंडादीनां लक्षणं अष्टः स्वध
र्म्मात् पाषंडोविकर्म्मस्थोनिषि
द्धकृत् यस्य धर्म्मध्वजो नित्यं
सुरध्वज इवोच्छ्रितः प्रच्छन्ना
निच पापानि वैडालं नाम तद्व्रतं
तद्वान् वैडालव्रतिकः ॥ प्रियं
विक्ति पुरोऽन्यत्र विप्रियं कुरुते
भृशं व्यक्तापराधचेष्टश्च शाठोऽ
यं कथितो बुधैः संदेहकृत् हे
तुभिर्यः सत् कर्म्मसु सहैतुकः
अधोगदृष्टिर्नैकृतिकः स्वार्थसा
धनतत्पर शठो मिथ्याविनी
तश्च वकव्रतिरुदाहृतः इति
तट्टीका हैमं क्ली प्रातर्हिमोद्भ
वजलं इति राजनिर्घंटः हिम
भवे हेमज्जातेच त्रि
हैमः पुं भूनिंबः इति राजनि
र्घंटः हेम्नोविकारः इति मु
ग्धबोधव्याकरणं
हैमनं पुं क्ली
हेमंतऋतुः यथा हेमंत है
मनावस्त्री इति शब्दरत्ना
वली ॥
स्वर्णज्जाते हिमज्जातेच त्रि ॥॥



हैमनः पुं मार्गशीर्षमासः इति राजनिर्घण्टः हिमकाले भवषष्टिकधान्यं अस्य गुणाः हैमनास्तु हिमा हृष्या मधुराव बद्धवर्चसः इति राजवल्लभः
हैमन्तं क्ली पुं हेमन्तर्तुः हेमन्तसम्बन्धिनि त्रि इति हेमन्तशब्दात् स्वार्थे तमप्रत्ययेन निष्पन्नः ॥
हैमन्तिकं क्ली शालिधान्यविशेषः भनधान इति भाषा यथा हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः इति हरि यज्ञाव प्रकरणे तिथ्यादितत्त्वं ॥
हेमन्तकालजाते त्रि
हैममुद्रिकः त्रि स्वर्णमुद्रिका विशिष्टः हैमी मुद्रिका यस्य इति
मुग्धबोधव्याकरणं ॥
हैमलः पुं क्ली हेमन्तर्तुः हिमल शब्दात् तमप्रत्ययेन निष्पन्नः इति कश्चित् शब्दरत्नावली हैमन इति साधु पाठः
हैमवतं क्ली भारतवर्षं इति
त्रिकाण्डशेषः ॥ ॥

हैमवतः पुं विषभेदः इति हेमचन्द्रः ॥
हैमवतवर्षं क्ली भारतवर्षं यथा एतद्धैमवतं वर्षं भारतं च यशस्विनः हेमकूटं परं यत्र नाम्ना किंपुरुषोत्तमः इति वाराहे रुद्रगीता ॥
हैमवती स्त्री पार्वती इत्यमरः स्वर्णक्षीरी श्वेतवचा इति मेदिनी ॥
गङ्गा इति धरणी रेणुका कपिलद्राक्षा अतसी इति राजनिर्घण्टः ॥
हैमा स्त्री पीतयूथिका इति हैमी शब्दरत्नावली ॥
हैयङ्गवीनं क्ली ह्योगोदोहोद्भवं घृतं इत्यमरः नवनीते इति रत्नमाला राजनिर्घण्टश्च तत् पर्यायः सरजं २ मेथजं २ कलेवुटं ४ इति हारावली ॥
हैरिकः पुं चौरः इति धरणी
हैहयः पुं कार्त्तवीर्य्यः इति हेमचन्द्रः देशविशेषः यथा पञ्चमे हैहयास्तालजङ्घा सम्बन्धाः कादयः इति ज्योतिः ॥

स्तवे कूर्म्मचक्रं ॥
हैहैयः पुं कार्त्तवीर्य्यराजः इति शब्दरत्नावली ॥
हो अ सम्बोधनं आह्वानं इति मेदिनी विस्मयः इत्यमरः
होड ऋ उ गतौ अनादरे इति कविकल्पद्रुमः ऋ अजहोडत् उ होडते इति दुर्गादासः ॥
होता पुं ऋग्वेदज्ञः इत्यमरः होमकर्त्ता यथा ॥
विशिष्टदेवतावच्छिन्नप्रक्षेपाय त्यक्तहविस्त्यागस्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तत्वं न तेन कृथात्वर्थतावच्छेदक प्रक्षेपानुकूलव्यापारवति कर्त्तरि होता इत्यादिव्यपदेशः इति प्रायश्चित्तटीकायां श्रीकृष्णतर्कालङ्कारः होतृकारः पुं होतृत्वकारः होतृमाता इति मुग्धबोधव्याकरणं ॥
होत्रं क्ली हविः इति त्रिकाण्डशेषः ॥

होमः इति हेमचन्द्रः ॥
होत्रा स्त्री स्तुतिः इति केचित्
होत्री पुं होता होत्रं विद्यतेऽस्य इति होत्रशब्दादिन् प्रत्ययेन निष्पन्नः ॥
होत्री स्त्री यजमानरूपा शिव मूर्त्तिः यथा या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वं यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः इत्यभिज्ञानशाकुन्तलप्रथमः श्लोकः
होत्रीयं क्ली हविर्गृहं इति हेमचन्द्रः होत्रसम्बन्धिनि त्रि ॥
होमः पुं पञ्चमहायज्ञान्तर्गतयज्ञविशेषः इत्यमरः स तु देवयज्ञः यथा अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं इति मनुः तल्लक्षणं यथा विधि



इष्टदेवावच्छिन्नमलेपोपहित
त्यागः इति श्रीकुलमर्कोल
कारः अथनित्यहोमः
तदुक्तं सोमशुम्भगावल्यां नाज
प्तः सिध्यते मंत्रो नाहुतस्तुफ
लप्रदः नानिष्टो यच्छतेका
मान् तस्मात्त्रितयमर्चयेत् ए
जयालभते पूजां जपात् सिद्धि
मेसंशयः विभूतिं चाग्निकार्ये
ण सर्वसिद्धिंच विन्दति तोलत
न्त्रेपि नित्यहोमं प्रवक्ष्यामि सर्वा
र्थं येनविंदति सपर्यां समसा
प्य वलिमेवं चरेद्विधिं ततोहो
मं तर्पणंच चरेत् साधकसत्त
मः वलिंवैश्वादिकंचैव ब्राह्मणं
समुपाचरेत अर्च्योदकेन संप्रो
क्ष्य निरीक्षादितैः समालिखेत्
विधिवदग्निमानीय क्रव्यादंशो
न्मस्तथा मूलमंत्रं समुच्चार्य
कुंडे वा स्थंडिलेपिवा भूमौवास्त
स्तरेद्वह्निं व्याहृतित्रितयेन च
स्वाहान्तेन त्रिधाकृत्वा षडंगाव
न्तं चरेत् तथा ततो देवीं समा
वाह्य मूलेन षोडशाकृतिं हु
त्वा स्तुत्वा नमस्कृत्य विसर्जयेदि
न्दुमंडले ष्टपमाद्ये विशेषः ॥

भैरवांश्चकृतेदष्टौ आस्फालितै
लिलैः शुभैः पूर्वादिदिक्
क्रमेनैव ततो होमं समाच
रेत् अथ संक्षेपहोम प्र
योगः कुंडे वा स्थंडिले वापि
वीक्षणादिभिः संस्कृते प्रागग्रा
उदगग्राश्च तिस्रो रेखाः समालि
खेत् तथाच वीक्षण मूलमं
त्रेण प्रोक्षणताडनं मतं तेनैव
मोक्षणं प्रोक्तं वर्मणाभ्युक्षणं
मतं ततोमूलमुच्चार्य कुंडाय
नम इति संपूज्य प्रागग्रा उद
गग्रास्तिस्रो रेखाः कर्तव्याः
प्रागग्रेषु मकृन्देण पुरन्दरान्
प्रादक्षिण्येन संपूज्य उदगग्राश्च
ब्रह्मवैवस्वतेन्दून पूजयेत् स्वद
रीपत्रेण सर्वत्र षट्कारी प्रयो
गः षट्तारीच ऐं ह्रीं श्रीं क्लीं
सौः ब्रह्मणे नमः एवंक्रमेण पू
जयेत् तथा ब्रह्मसंहितायां हो
मकुंडे पंचाशत्या वेदिकां हस्त
विस्तारोन्नतिपालिनीं कृत्वाग्नि
न् स्थापयेत् कुंभं यथोक्तक्रम
योगतः तत्र संपूजयेद्देवं यथावि
धुपचारकैः ततो होमं प्रकुर्वीत
देवतासन्निधा

ततः ततः कुंडमध्ये षट्कोण
वृत्तत्रिकोणं तद्बहिः रष्टदलपद्मं
तद्बहिः श्चतुरस्रं चतुर्द्वारसमेतं
लिखित्वा तदुपरि मूलेन पुष्पा
जलीन् दद्यात् सुन्दरीपदे न
वालया ततः सर्वाणि प्रणवे
णाभ्युक्ष्य वह्नेर्योगपीठमभ्यर्चयेत्
तद्यथा कर्णिकोपर्याधारशक्त्या
स्यादीन् संपूज्य अग्न्यादि को
णचतुष्टये ॐ धर्माय नमः ॐ
ज्ञानाय वैराग्याय ऐश्वर्याय पू
र्वादिदिक्षु अधर्माय अज्ञाना
य अवैराग्याय अनैश्वर्याय म
ध्ये ॐ अनंताय नमः एवं पद्माय
अं अर्कमंडलाय द्वादशकला
त्मने नमः उं सोममंडलाय
षोडशकलात्मने नमः मं
वह्निमंडलाय दशकलात्मने
नमः ततः केसरेषु पूर्वादि
मध्ये च ॐ पीतायै नमः श्वेता
यै धूम्रायै नीलायैनमः रक्ता
यैस्तम्भाय स्फुलिंगिन्यै रुचिरा
यै ज्वालिन्यै ततो रंवह्न्यास
नाय नमः ततो वागीश्वरीं स
द्यस्नातां नीलेन्दीवरलोचनां
वागीश्वरेण संयुक्तां क्रीडा
भावसमन्वितां ॥

इति ध्यात्वा ॐ ह्रीं वागीश्व
राय नमः ग्लं वागीश्वर्यै नमः
इति मंत्रेण पंचोपचारैः संपू
ज्य सूर्यकान्तादिसंभूतं श्रोत्रि
यगेहजं वा वह्निमानयेत् सु
न्दरीपदेन कामेश्वरं कामेश्वरीं
पूजयेत् गौतमीयेप्यारण्य
भव वह्निंच यदि वारणि संभ
वं श्रोत्रियाणां गेहजंचवनेस्थ
वा घवाहरेत् यदृच्छालाभस
युक्तो अयोगयो यागकर्मणि
निरग्निर्ब्राह्मणस्तद्वदुद्वेला
भकरो भवेत् तत्रवह्नौ श्व
नुष्ठापफलं दद्यात्कुलाशनः
वैश्यात् शूद्राच्च विफलं जा
यते होमकर्माणि तस्मात्
सर्वप्रयत्नेन वह्निमुक्तं स
माहरेत् तंत्रान्तरे द्विजातिभ
वनाद्वापि वह्निमानीय साध
कः वौषडंतेन मूलेन मंत्रि
तेन विलोकयेत् अग्निमात्मा
हृदयेदस्त्रमंत्रेण तदनंतरं हूं
फडंतेन मूलेन क्रव्यादां
शं परित्यजेत् ततः ॐ व
ह्नेर्योगपीठाय नमः चतुर्दि
क्षु ॐ वामायै नमः एवं ज्येष्ठायै
रौद्र्यै अम्बिकायै ततो मूल ॥ ॥

मुद्राध्यै अमकदेवताकुंडाय
नमः इति कुंडं संपूज्य त
द्ध्यो वागस्वरीं तत देवतारूपां
ऋतु मतीं ध्यात्वा यथोक्तव
ह्नि मानीयवीक्षणादिभिः सं
स्कृत्य रमितितस्माद्वह्निमुद्
त्य मूल मुद्राध्यैहूं फट्कृ
व्यादांशं परित्यज्य वह्निमंत्रेण
संरक्ष्य हूं इत्यवगुंठ्य धेनुमु
द्रया अमृतीकृत्य वाऊभ्यां
समुद्धृत्य कुंडोपरि त्रिः परिभ्रा
म्य जानुस्पृष्टमहीतलः शिववी
ज बुद्ध्या आत्मनोभिमुखे दे
व्यायोनौ प्रक्षिपेत् ततो ह्रीं
वह्निमूर्त्तयेनमः इत्यभ्यर्च्य
वह्निचैतन्याय नमः इति चै
तन्यं तत्र संयोज्य ओंचित्
पिंगल हनदहनदह पचपच
सर्वं ज्ञापयज्ञापय स्वाहा इ
ति ज्वालयेत् ततो अग्निं प्र
ज्वलितं वन्दे जातवेदं हुता
शनं सुवर्णवर्णं ममलं समि
द्धं विश्वतोमुखं इत्युपतिष्ठेत्
ततो अग्ने त्वमसुकनामासी
ति नामकृत्वा ओं वैश्वानर जात
वेद इहावहलोहिताक्षसर्वक
र्म्माणिसाधयस्वाहा अनेनाज्या

दिभिः संपूज्य ओं अग्नेर्हिरण्यादिस
प्तजिह्वाभ्यो नमः ओं सहस्रार्च्चिषे
हृदयाय नमः इत्यादि अग्निष
डंगेभ्यो नमः ओं अग्नये जात
वेदसे इत्याद्यष्टमूर्त्तिभ्यो नमः
तद्बाह्ये ओं ब्राह्म्याद्यष्टशक्तिभ्यो
नमः तद्बाह्ये ओं इन्द्रादिलोकपा
लेभ्यो नमः तद्बाह्ये ओं वज्राद्य
स्त्रेभ्यो नमः ततः प्रादेशमात्रं कु
शपत्रद्वयं घृतमध्ये निक्षिप्य स
व्यासव्य मध्यभागेषु इडां पिंग
लां सुषुम्नां ध्यात्वा होमं कुर्या
त् स्रुवेण दक्षिणभागादाज्यं
गृहीत्वा ओं अग्नये स्वाहा इति
अग्ने र्दक्षिणनेत्रे जुहुयात् ग
ध्या वामभागादाज्यंगृहीत्वा ओं
सोमाय स्वाहा इति वामनेत्रे
जुहुयात् ततो मध्यभागा
दाज्यं गृहीत्वा ओं अग्नी
षोमाभ्यां स्वाहा इत्यग्ने र्लला
टनेत्रे जुहुयात् पुन र्द
क्षिणतः नम इति घृतं गृ
हीत्वा ओं अग्नये स्विष्टिकृते
स्वाहा इत्यग्निमुखे ततो म
हा व्याहृतिहोमः ओं भूः
स्वाहा ओंभुवः स्वाहा ॥ ॥

ओं स्वः स्वाहा ओं वैश्वानर जात
वेद इहावह लोहिताक्ष सर्व्वक
र्म्माणि साधय स्वाहा इत्यनेन
त्रिवारं जुहुयात् ततो अग्नौ
मूलेन पीठपूर्व्वकं देवतां सं
पूज्य तन्मुखे हुतेन मूलमंत्रे
ण पंचविंशतिवारं जुहुयात्
वह्निदेवतयो रात्मना सह ए
क्यं विभाव्य मूलमंत्रेण षडा
हुत्याहुती र्जुहुयात् ततो मू
लमंत्रस्य अंगदेवताभ्यः स्वा
हा याकस्थेत् प्रत्येक मेकैकाहु
तिं जुहुयात् ततः संकल्पं वि
धाय तत्तत् कल्पोक्त द्रव्येण
होमं कुर्यात् ततोमूलमंत्रेण
पूर्णाहुतिं दत्वा संहारमुद्रया
स्वेष्टदेवतां हृदयेसमानीय त
मस्वेति विसृज्य दक्षिणां दत्वा
अच्छिद्रावधारणं कुर्यात इति
तंत्रसारः इहहोमप्रयोगस्तत
द्वेदद्रष्टव्यः
होमकः पुं होता यथा पूर्व्व
हारे च संस्थाप्य वह्नं चंवेद
पारगं यजुर्विदं तथा पास्य
पश्चिमे सामवेदिनं अथर्व
वेदिनं तद्दक्षिणे स्थाप ॥ ॥॥

येद्बुधः श्रेष्ठो न होमकाः का
र्य्या वेदवेदांगवेदिनः
इति मात्स्ये ८ अध्यायः ॥
होमकुंडं क्ली होमार्थकुंडं
तत् पर्य्यायः [1] अस्य विवरणं
कुंडशब्दे द्रष्टव्यं ॥ [1] हवनी २ इति त्रिकांडशेषः
होमधान्यं क्ली तिलः इति
राजनिर्घंटः ॥
हेमधूमः पुं होमीयाग्निधू
मः तत् पर्य्यायः निगणः २
इति हेमचन्द्रः
होमभस्म क्ली हुतभस्म तत्प
र्य्यायः वैहृतं २ इति हेम
चन्द्रः ॥
होमाग्निः पुं यज्ञवह्निः तत्
पर्य्यायः महाज्वालः २ महा
वीरः ३ प्रवर्ग्यः ४ इति हेम
चन्द्रः ॥
होमिः पुं अग्निः घृतं इति
मेदिनी जलं इति शब्दरत्ना
वली ॥
होमी [1] पुं होमकर्त्ता यथा
तिलोद्वर्त्ती तिलस्नायी ति
लहोमी तिलप्रदः तिलभु
क् तिलवापी च षट्तिली
नावसीदति इति तिथ्या
दितत्वं ॥ ॥ ॥ ॥ ॥

ह्रणीया स्त्री ह्रीणीया इत्यम
र टीकायां भरतः ॥
ह्रदः पुं अगाधजलाशयः
इत्यमरः तज्जलगुणाः
ह्रदवारि वह्निजननं मधुरं
कफवातहारि पथ्यञ्च इति
राजनिर्घण्टः किरणः इति
भरटीकायां रामाश्रमः ॥
ह्रदग्रहः पुं कुम्भीरः इति
त्रिकाण्डशेषः ॥
ह्रदिनी स्त्री नदी इत्यमरः
ह्रप क भाषणे रेफयुक्तादि
रित्येके कल्पयति भाषणे
कथनं इति कविकल्पद्रुम
टीकायां ह्रपधातु कथने दु
र्गादासः ह्रस रवे इति क
विकल्पद्रुमः रेफयुक्तः ह्र
सति इति दुर्गा
दासः ॥ ह्रसिमा पुं ह्रस्वता
ह्रस्वशब्दात् इमन्प्रत्ययेन
निष्पन्नः ह्रसिष्ठः त्रि अति
शयह्रस्वः ह्रस्वशब्दात् इष्ठ
प्रत्ययेन निष्पन्नः ॥
ह्रसीयान् त्रि अतिशयह्र
स्वः ह्रस्वशब्दादीयस् प्रत्य
यनिष्पन्नः ह्रस्वः स्त्री परि
माणविशेषः ॥ ॥

यथा अत्र दीर्घं मरुद्ध्रस्वमिति
तद्ध्रद ईरितः इति भाषा प
रिच्छेदः गौरसर्षपशाकं
पुष्पकासीसं इति राजनि
र्घण्टः ॥
ह्रस्वः पुं स्त्री प्रकृतपुरुषप्र
माणात् न्यूनमनुष्यः बाउने
इति भाषा तत्पर्य्यायः खर्व्वः
२ वामनः ३ वामनी ४ इत्यम
र भरतौ नीचकः ५ नीचः ६
इति शब्दरत्नावली अकर्म्मनः ७
इति जटाधरः एकमात्रवर्णे
यथा एकमात्रो भवेद्ध्रस्वो
द्विमात्रो दीर्घउच्यते त्रिमात्रस्तु
प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकं
इति मुग्धबोधटीकायां दुर्गा
दासः मुग्धबोधमते अस्य सं
ज्ञा यथा आवत् स्वर्चेस्नु अश्चाश्च
इति वर्णत्रये क्रमेण स्वर्चस्नु सं
ज्ञाः स्यात् वक्ष्यमाणादि ईदृश्यादि
पुंच नप्लते अस्य ह्रस्व ज्ञा
पि यथा स्वचोचुद्र स्वो
चुसंज्ञो चौरुसंज्ञः स्यात्
इति वोपदेवः मेष वृष
कुम्भमीन राशयः यथा ह्र
स्वास्तिमिंगोऽविचराः
इति ज्योतिः ॥ ॥ ॥ ॥

स्तवे ॥
ह्रस्वः त्रि खर्व्ववस्तुमात्रे तत्
पर्य्यायः वामनः २ न्यङ्कुः ३
नीचः ४ खर्व्वः ५ इत्यमरः
नीचैः ६ इति शब्दरत्नावली
अतुच्चः ७ इति जटाधरः ॥
ह्रस्वकुशः पुं श्वेतकुशः इति
राजनिर्घण्टः ॥
ह्रस्वगर्भः पुं कुशः इति रत्न
माला
ह्रस्वगवेधुका स्त्री गाङ्गेरुकी
इत्यमरः अस्याः पर्य्याय गुणा
नागवलाशब्दे द्रष्टव्याः ह्रस्वज
म्बुः पुं लघुजम्बुः इति
रत्नमाला ॥
ह्रस्वतण्डुलः पुं राजान्नं इति
राजनिर्घण्टः इति केचित् ॥
ह्रस्वदर्भः पुं श्वेतकुशः इति
राजनिर्घण्टे ह्रस्वकुशशब्ददर्श
नात् ह्रस्वदा स्त्री शल्लकी इति
राजनिर्घण्टः ॥
ह्रस्वपत्रकः पुं गिरिजमधूक
वृक्षः इति जटाधरः
ह्रस्वपत्रिका स्त्री अश्वत्थी इति
राजनिर्घण्टः ॥
ह्रस्वप्लक्षः पुं वृहत्प्लक्षवृक्षः ॥

तत्पर्य्यायः स्वपीतः २ पीत
बीजकः ३ पुण्ड्रः ४ महावरोहः
५ ह्रस्वपर्णः ६ पीपरिः ७ भि
डरः ८ मङ्गलच्छायः ९ अस्य गु
णाः प्लक्षः कटुः कषायश्च
शिशिरो रक्तदोषजित् मूर्च्छा
भ्रम प्रलापघ्नो ह्रस्वप्लक्षो विशे
षतः इति राजनिर्घण्टः ॥
ह्रस्वफला स्त्री भूमिजम्बुः इति
राजनिर्घण्टः ॥
ह्रस्वमूलः पुं रक्तेक्षुः इति
राजनिर्घण्टः ॥
ह्रस्वशाखाशिफः पुं क्षुपः इत्य
मरः ॥
ह्रस्वा स्त्री मुद्गपर्णी नागवला
भूमिजम्बूः इति राजनिर्घण्टः
वामनी च ॥
ह्रस्वाग्निः पुं अर्कवृक्षः इति
शब्दचन्द्रिका ॥
ह्रस्वाङ्गः पुं जीवकौषधं इत्य
मरः वामनश्च ॥
ह्राद ङ स्वने इति कविकल्पद्रु
मः रेफयुक्तो द्वितीयस्वरी ङ
ह्रादते इति दुर्गादासः
ह्रादः पुं शब्दः ॥
इति हेमचन्द्रः
हिरण्यकशिपुपुत्रः यथा हि



हिरण्यकशिपोः पुत्रा श्चत्वारः
सुमहाबलाः प्रह्लादः पूर्वज
स्तेषां अनुह्लाद स्तथैवच सं
ह्लाद श्चैवह्लादश्च ह्लादपुत्रान्
शृणुष्व तान् ह्लादस्य पुत्रोह्ला
वास्तो हिंडिभो सूक एवच
इति वह्निपुराणे कश्यपीय
प्रजासर्गः ॥
ह्लादिनी स्त्री विद्युत् वज्रं
इत्यमरः नदी इति भरतः
राजनिर्घण्टश्च शल्लकी इति
शब्दरत्नावली॥
ह्लादी त्रि शब्दविशिष्टः ह्राद
शब्दात् इन् प्रत्ययेन निष्पन्नः
ह्रासः पुं शब्दः इति त्रिकाण्ड
शेषः लयः यथा ह्रासवृद्धी
चसततं दिनरात्र्योर्यथाक्रमं
सन्ध्या मुहूर्तं मात्राणां ह्रासे
वृद्धौसमास्मृता इति तिथ्या
दितत्वं ॥
ह्रिणीया स्त्री लज्जा घृणा इ
त्यमरटीकायां भरतः अस्या
रूपान्तरं हृणिया हृणीयाच
ह्रितः त्रि लज्जितः विभक्तः नी
तः इति केचित् अंशे क्ती ह्रि
तिः स्त्री क्लृप्तिः हरणं इति
केचित् ॥

ह्रिवेरं क्ली ह्रीवेरं इति भरत
द्विरूपकोषः शब्दरत्ना
वलीच ॥
ह्री लि लज्जे इति कविकल्प
द्रुमः लिजिह्रेतिनीचमंगन्या
यः इति दुर्गादासः
ह्री स्त्री लज्जा इत्यमरः
ह्री का स्त्री त्रासः इत्युणादि
कोषः लज्जा इति सिद्धान्तकौ
मुद्यां सूत्रणादिवृत्तिः
ह्रीकुः त्रि लज्जितः सलज्जः
इत्युणादिकोषः
ह्रीकुः पुं जतुकः त्रपु इत्यु
णादिकोषः ॥
ह्रीच्छ लज्जे इति कविकल्प
द्रुमः रेफयुक्तादिवत्तर्घसरी
ह्रीच्छतिवधूः इति दुर्गादासः
ह्रीजितः त्रि लज्जाशीलः इति
जटाधरः ॥
ह्रीणः त्रि लज्जितः इत्यमरः
ह्रीतः
ह्रीवेरं क्ली वालकं वाला इ
ति भाषा इत्यमरः अस्यगुणाः
ह्रीवेरं छर्दिहृल्लास तृष्णाती
सारनाशनं इति राजवल्लभः
अन्यत् ह्रिवेरशब्दे द्रष्टव्यं ॥

ह्रीवेलं क्ली ह्रीवेरं इत्यम
रह्रीवेलक टीकायां भरतः
ह्रुड क्र उ गतौ इति कवि
ह्रुड कल्पद्रुमः क्र अजुह्रुडत्
अजुह्रोडत् उ ह्रुडते
ह्रोडते इति दुर्गादासः
ह्रेप क्र उ गत्यां इतिकवि
कल्पद्रुमः क्र अजिह्रेपत् उ
ह्रेपते जिह्रेपे इति दुर्गा
दासः ॥
ह्रेष क्र उ सर्पणे अश्वस्वने
इति कविकल्पद्रुमः रेफ
युक्ताद्यः क्र अजिह्रेषत् उ
ह्रेषते जिह्रेषे उ ह्रेष्टच स्वनेः
स्वानां उ ह्रेषते घोटकः जि
ह्रेषे क्र अजिह्रेषत् चक्रा
णां ह्रेषउ चा मधुरमधुरं ह्रे
षन्ते इति गणकृतानि
त्यत्वात् वस्तुतस्तु पचादित्वा
दनि ह्रेषा इवाचरन्तीति कौ
मार्यां इति दुर्गादासः ह्रेषा स्त्री
अश्वानां कण्ठाद्विनिर्गतशब्दः
इत्यमरः ह्रोड क्र उ गतौ इति
कविकल्पद्रुमः क्र अजुह्रोडत्
उ ह्रोडते इति दुर्गादासः ह्लग
मघ संवरणे इति कवि॥ ॥॥

कल्पद्रुमः मह्लगयति अजह्ला
गीत् इति दुर्गादासः ॥
ह्लप कभाषणे इति कविकल्प
द्रुमः कह्लापयति रेफयुक्तादि
त्वेके ह्रापयति अत्रस्यन्तत्वा
यपुक्तः कंसवर्गायादिरिति
दुर्गासिंहादयः ह्लापयति अ
जिह्लपत् भाषणं कथनं इति
दुर्गादासः ॥ह्लस रवे इतिकविकल्पद्रु
मः ह्लसति इति दुर्गादासः
ह्लाद ई उ मोदने स्वने इति
कविकल्पद्रुमः मोदनं हृष्टीक
रणं हृष्टीभावश्च ईह्लान्नः उ
ह्लादते वदनो इति गात्रं ॥
वलात् प्रह्लादते मनः इति
किराते इति दुर्गादासः ॥
ह्लादः पुं आह्लादः इति हे
मचन्द्रः ॥
ह्लादिनी स्त्री विद्युत् वज्रं
इत्यमरः शक्तिविशेषः यथा
ह्लादिन्यासंविदाश्लिष्टः सच्चिदा
नन्द ईश्वरः स्वाविद्यासंवृतो॥
जीवः
संक्लेशनिकराकरः॥
इति श्रीभागवते १ प्रथमस्कं
धे ७ अध्याय सप्तमश्लोकस्य
टीकायां श्रीधरस्वामी॥ ॥ ॥




क्लीका स्त्री लता इति सि
द्धांतकौमुद्या मुणादिवृत्तिः
क्लीकः त्रि क्लीकः इत्युणादि
कोषः ॥
क्लीकुः पुं जन्तु भेद इत्यु
णादिकोषः
क्लेषा स्त्री क्लेषा इत्यमरटीका
यां नीलकंठः ॥
क्वल मवाले इति कविकल्पद्रु
मः मवाले इति कविकल्पद्रुमः
म प्रक्वलयति मित्वेप्यस्य जौ
ज्वलक्वल इत्यादिना केवलस्य
ह्रस्वविकल्पनात् सोपसर्गस्य
नित्यं ह्रस्वः क्वलयति क्वाल
यति चालस्खलनं इति
दुर्गादासः ॥
क्वु कौटिल्ये इति कविकल्प
द्रुमः क्वरति लतां वायुः इ
ति दुर्गादासः
क्वे न ईमर्दे शब्दे इति क
विकल्पद्रुमः स्पर्द्धः पराभि
भवेच्छा इति वोपदेवः न
क्वयति क्वयते मल्लो मल्ल
मभिबभित लिप्सति क्वयति
जनं लोकं आक्वयतीत्यर्थः
पैठयात गोविन्दभट्टस्तमद्रोवि
षये व्यक्तवाकेऽ यमित्याह इ

ति दुर्गादासः त तकारः सप्तत्रिंश
न्तव्यञ्जनत्रिंशावर्णः अष्टमवर्गीयप
ञ्चमवर्णः एकपञ्चाशन्मात
कावर्णानां चरमवर्णश्च यथा
पञ्चाशल्लिपिभिर्माला विहिता स
र्वकर्मसु अकारादितकारान्ता
वर्णमाला प्रकीर्तिता तार्णं
मेरुमुखं तत्र कल्पयेन्मूर्तिमन्त
मः अनया सर्वमन्त्राणां जपः
सर्वसमृद्धिदः इति गौतमीयत
न्त्रे कंठदेशोद्भवोयं यथा श्रीशि
व उवाच विशेषं कथयाम्यद्य श्रो
तृणां कंठतः स्वराः सदृश्यं
जिह्वया मूर्द्धा ए इयं जिह्वादन
न्त मावस्थानादुत्त्ये वाच्यां तका
रः कंठ्यानन्तः इति वर्णदानतन्त्र
ए पटलः अस्य स्वरूपं
यथा तकारं मृणालचार्वंगि कुं
डली त्रयसंयुतं चतुर्वर्गमयं
वर्णं पंचदेवमयं सदा पंचप्राणा
त्मकं वर्णं त्रिशक्तिसहितं स
दा त्रिविन्दुसहितं वर्णं मा
त्मादितत्वसंयुतं
शारचन्द्रप्रतीकाशं हृदि
भावय सुन्दरि इति
कामधेनुतन्त्रे अस्याभि
धानानि ॥ ॥ ॥ ॥

यथा तः कोप संवुकः कालो
द्धतः संवर्तकः परः हरिदोवि
युता माया महातेजा युगान्त
कः परात्मा क्रोधसंहारो बला
लो मेरुवाचकः सर्वांगः सागरः
साम्रं संयोगान्साहिपुरकः द्वे
त्रणालोमहाहोभो मानुकांतान
लं तयः स्रवि कव्यवहानंता का
लजिह्वागणेश्वरः छायापुत्रश्च
संघातो मलयश्री ललाटकः
इति तंत्रशास्त्रे वर्णाभिधानं
तकारस्य ककारषकारयोगज
त्वेन केचित् पृथक्वर्णत्वेन न
मन्यंते तेषां मते तंत्रोक्तैकपंचा
शद्वर्णानुपपत्तिः तंत्रशास्त्रे त
स्य मेरुत्वेन गणनानुपपत्तिश्च
भवति अतः पृथं द्विःदिष्ठपते
तथाच यातः सूर्यपिंतोना
वर्णाना मनुरोधतः पृथक्क
मेणकथ्येत तथाप्येते समेव
पात् इति विश्वप्रकाशः अपि
च अकारादि तकारांता वर्णाः
पंचाशदीरिता संयोगात्
कषयोरियं तकारो मेरु री
तिः इति कुलानंदध्वततंत्र
शास्त्रे तः पुं ॥

तः पुं सम्वर्तः रातसः नरसिं
हः विद्युत् तेत्रे तेत्रपालः
नाशः इति मुद्राकितमेदिनी
तन्न इकृतता इति कवि
कविकल्पद्रुमः तको दुःखेन
जीवने इ कतंजयतिदीनः
इति दुर्गादासः ॥
तन्न इ य मङ् दागस्योः
तन यम ङ् इति कवि॥
कल्पद्रुमः इ तंञ्यते यतन्ना
सेमक्तत् सरो वित्य नेनैवेष्टसि
द्धौ अस्य यानुवन्धंत्वश्पर्थं
न यदादिभ्यो ङ् इति प्राचीन
मतानुरोधात् मअलंजि अतो
जि तन्न तेञ्ज तांम ताञ्ज मानु
वंधवलात् अनुपधाया अपि
दीर्घः स्वमतेतनुप्रत्रदीर्घविधि
रूपधां नापेक्षते ङ् तंञ्जते
यतन्ना मंतञ्जयति ङ् तञ्ज
यते दादानं इति दुर्गादासः
तण द ३ ञ वधे इति क
विकल्पद्रुमः द ञ तणो
ति तणुते ३ तणित्वा तत्वा
इति दुर्गादासः ॥
तणः पुं त्रिंशत् कलापमिमि
ते ॥



कालः स च दशपरिमितः अन्
सवः निर्व्यापारस्थितिः इत्य
मरः पर्व अवसरः
परतंत्रत्वं मध्यं इति हेम
चन्द्रः ॥
क्षणनः पुं क्षतः इति हेम
चन्द्रः क्षणनु इति च पाठः
क्षणदं क्ली जलं इति मे
दिनी ॥
क्षणदः पुं गणकः इति
मेदिनी ॥
क्षणदा स्त्री रात्रिः इत्य
मरः
क्षणनं क्ली वधः इत्यमरः
क्षणनिश्वासः पुं शिशुमारः
इति शब्दरत्नावली ॥
क्षणप्रभा स्त्री विद्युत् इत्य
मरः
क्षणभंगुरः त्रि क्षणिकनाश्यः
यथा यदि पुन रसौ किमपि
नाह मात्मद मस्ति किंचिदपि
वस्तु स्थिरं विश्व मेव क्षणभंगुरं
अलीकं वेत्यव धारयेरन् न चाकाम
यमानाः केचिदपि प्रवर्त्तन्ते इति
बौद्धाधिकारशिरोमणिः तारा
मो पुं पारावतः इति ॥

शब्दमाला ॥
क्षणिकः त्रि क्षणमात्रस्थायी
यथा क्षणभंगो विप्रतिपत्तिः
शब्दादिः क्षणिको न वा क्षणिक
त्वं च स्वाधिकरण समय प्राग
भावाधिकरण क्षणवृत्ति प्रति
कत्वे सति काशष्ठित्वकत्वं उत
पत्तिमत्त्वं वा उत्पत्तिश्च स्वाधि
करण क्षणवृत्ति प्रागभाव प्र
तियोगि क्षणसंबंधः क्षणश्च
स्वाधिकरण क्षणवृत्ति प्रा
गभाव प्रतियोगि क्षणसंबन्धः
क्षणश्च स्वाधेय पदार्थप्रागभा
वानाधारः समयः मति द्धिस्तु वि
धे नैयायिकानां प्रागभावे च
इमध्वंसे च निषेधस्य बौद्धानाम
लीके स्वाधिकरणसमय प्राग
भावाधिकरण क्षणवृत्तित्वं
क्षणिकत्वमिति न्यायः इति
बौद्धाधिकारे रघुनाथशिरोमणिः
अन्यच्च द्वयारंभश्च तत्पु स्यादया
काशशरीरिणां अव्याप्यवृत्ति
क्षणिको विशेषगुण इष्यते इति
भाषापरिच्छेदः क्षणिकत्वं च तृती
यक्षणवृत्ति ध्वंसप्रतियोगित्वं इति
सिद्धान्तमुक्तावली क्षणिका स्त्री वि
द्युत् इति हेमचन्द्रः क्षणिनी स्त्री रात्रिः

इति शब्दरत्नावली ॥
क्षतं क्ली स्रवद्रक्तपूयादिव्रण
इति भाषा तत् पर्यायः व्रणं
२ अरुः ३ ईर्मं ४ क्षणनं ५
इति हेमचन्द्रः तद्धति त्रिरात्रेण
मृतस्याशौचं यथा ब्राह्मं क्षते
न म्रियते यस्तस्याशौचं भ
वेद्द्विधा ज्ञानमाहात् त्रिरात्रं स्या
दशरात्रमतः परं शस्त्रघाते अ
हाहं तु यदि कश्चित् प्रमीय
ते अशौचं प्राकृतं तत्र सर्वव
र्णेषु निश्चयः अत्र शस्त्रघात
पदं क्षतेतरघातपरं पारि
भाषिकशास्त्रघातपरमपि
अन्यथा क्षतं विना पतनादि
भिर्विलंबमृतानां त्रिरात्रा
द्यशौचावसायः स्यात् इति शु
द्धितत्त्वं चन्द्रग्रहणादौ तत्तदा
शाभावो यथा पुलस्त्यः चन्द्रसू
र्य्यग्रहे चैव मृतानां पिंडकर्म
तु महातीर्थ्यचसंप्राप्ते तत्तदो
षो न विद्यते अन्यत्र तु देवलः
स्नात्राणः सूतकी सूर्य्यो मत्रो
भ्रात्रजस्वलाः सूतवत्स्यु रर
न्यत्र वर्ज्याभ्यष्टौ स्वकालतः
इत्यनेन वर्ज्यता ॥

मादौ अश्रुविलम यादृशं
तलग्नमसंहार्य्यं लेपं मन्येत
दंतवत् न तत्र बहुशः कुर्य्या
त् यत्न मुद्धरणे पुनः भवे
दशौचं मत्यर्थं तृणवेधात्र
णे कृते इति प्रायश्चित्त
तत्वं ॥
क्षतकासः पुं पंचविधकास
रोगांतर्गत कासरोगविशेषः
यथा पंचकासाः स्मृता वातपि
त्तश्लेष्मक्षतक्षयैः तथायोप
चिताः सर्वे बलिनः श्चोत्तरोत्त
रं पूर्वाद्रूपमाह पूर्वरूपं
भवेत्तेषां शूकपूर्णगलास्यता
कंठे कंड्वश्च भोज्यानामवरोध
श्च जायते भोज्यानामवरोधः क
वलगिलने कंठव्यथा अस्यनि
दानपूर्विकां संप्राप्तिमाह अ
तिव्यवाय भाराद्ध युद्धाश्व गज
निग्रहैः रूक्षस्योरःक्षतं वायु
र्गृहीत्वा कासमावहेत् अश्व
गजयो निग्रहो दमनं लक्षण
माह संपूर्वं कासते शुष्कं ते
तः ष्ठीवेत् सशोणितं कंठे
न रुजतात्यर्थं विरुद्धेनेव चो
रसा सूचीभिरिव तीक्ष्णा ॥

भिः नुद्यमानेन शूलिना दुः
खस्पर्शेन शूलेन भेदपीडाभि
तापिना पर्वभेदज्वरश्वासतृ
ष्णा वैस्वर्यपीडितः पारावत
इवाकूजेत् कामवेगात् ततो
द्रवात् कण्ठेनोत्पलवर्णेन
नीया एवमुरसेऽपि तस्य चि
कित्सा यथा इक्षुवालि
का पद्म मृणालात् पलचन्दनं
मधुकं पिप्पली द्राक्षा लाक्षा
शृङ्गी शतावरी द्विगुणा चैत
गान्धीरी सिता सर्वचतुर्गुणा
लिह्यात् मधुसर्पिर्भ्यां तृष्णा
कासनिवृत्तये इक्षुवालिका
इक्षुभेदः चन्द्र इति लोके प
द्म पद्मकाष्ठं मृणालं विसं
उत्पलं कमलं चन्दनं मत्र
धवलं चूर्णत्वात् शृङ्गी क
र्कटशृङ्गी तृगन्धीरी वंशलो
चना सा चेतो द्विगुणा इति
भावप्रकाशः
तृणज्रं पुं रूपविशेषः ज
रशोणा इति भाषा इति शब्द
चन्द्रिका तृणज्री स्त्री लाला यथा
लाला कुसुमयो राज्ञां गमाता
पलंकषा जव तृणज्री क्रमिजा
यावालकोनतद्रुमः इति हेमच
न्द्रः तृणज्रापिपाठः तृणजं
क्ली रक्तं इत्यमरः एवं इति
शब्दचन्द्रिका
तृष्णजस्तृष्णा स्त्री भक्तादितृ
युक्तस्य पिपासा तस्या निदान
पूर्विकां संप्राप्तिमाह भयश्र
माभ्यां बलसंक्षयाद्वा ऊर्द्धं वि
तं पित्तविवर्द्धनैश्च पित्तं सवा
तं कुपितं नराणां तालु प्रपन्नं
जनयेत् पिपासां स्रोतःस्वपां
वाहिषु दूषितेषु दोषेष्वतृट्
संभवतीह जन्तोः तिस्रस्तृ
ष्णाः तृष्णजा चतुर्थी तथान्न
घात्या गमसद्रकाच भक्तोद्
वा सप्तमिकेति तासां निबो
ध लिङ्गान्यनुपूर्वशस्तु नरा
णां चित्तं स्वस्थान एवसंचि
तं पित्तं सवातं कट्वम्ललाप
नविवर्द्धनैः कट्वम्ललादिभिः
कुपितं भयश्रमाभ्यां बलसंक्ष
याद्वा उपवासादेश्च वातः कु
पितः तद्द्वयं ऊर्द्धं प्रसरत्तालु
प्रपन्नं सत्पिपासां जनयेत् न
केवलं तालुन्येव दूषितेन तृषा
भवति किन्तु जलवाहिस्रोतःस्वपि
अत आह
स्रोतःस्विमादि नेवक्षवक्तव
चने न युक्तं पतो जलवहे दे
हस्रोतसी सत्फलेनोक्ते उच्य
ते तयो रेवानेक प्रतानयोगा
त्र दोषः अपांवाहि षु स्रो
तःस्विति जिह्वादे रप्युपल
क्षणं यत आह चरकः र
सवाहिनीश्च धमनीर्जिह्वा
हृदयगलतालुक्लोमच संशो
ष्य नृणां देहेषु कुरुतः तृष्णा
मति प्रवलौ पित्तानिलाविति सं
क्षेपमाह तिस्र इत्यादि तृष्णा
याः सामान्यलक्षणमाह सत
तं यः पिबेत्तोयं नतृप्तिमधि
गच्छति मुहुः काङ्क्षति तो
यं तं तृष्णार्दितमादिशेत् तृ
ष्णजामाह तृष्णस्य रूक्षशोणि
तनिर्गमाभ्यां तृष्णा चतुर्थीह
तज्जा मताल्न तृष्णस्य शस्त्रादि
हतयुक्तस्य रुक्पीडा तथ
तृष्णाया श्चिकित्सा वातज्व
मन्नपानं मृदु लघु शीतं च
वातनृष्णायां तृष्णायां परेतो
स्यायांमधुरं दधिप्रास्यते स्वा
दु तिक्तं द्रवं शीतं पित्ततृष्णाह
रं परं मुस्तपर्पटकोदीच्यक
त्राच्योशीरचन्दनैः शृतं ॥

शीतं जलं दद्यात् तृड्दाहज्व
रशान्तये क्षुद्राधान्याकं कश्चि
त् धात्रीं च दद्यात् चन्दनं मत्र
धवलं दद्यात् तस्मात् तृष्णा
इतस्तात् शृतं अर्द्धपक्वमत्र क
षेव्यं षडङ्गपानं लाजोदकं म
धुयुतं शीतं गुडविमर्दितं का
श्मरीशर्करायुक्तं पिबेत् तृष्णा
र्दितो नरः आस्तरणा मार्द्रवासः
आवरणं चार्द्रमेव स्यात् तेनापि
पासा शाम्यति दाहश्चोग्रोपि
दे हिने नियतं गोस्तनीद्रव
सक्षौद्रं यष्टीमधु मथितं पलेः
नियतं नासिकापीतैस्तृष्णा
शाम्यति दारुणा वैसर्पंच न
यमासे सन्दधाति मुखे जलं
तृष्णादाहप्रशमनं मधुगण्डूष
धारणं जिह्वातालुगलक्लो
मशोषे मूर्द्धानि दापयेत्
केशरं मातुलुङ्गस्य घृतसैन्ध
वसंयुतं दाडिमं बदरं लोध्रं
कपित्थं बीजपूरकं पिष्ट्वा मू
र्द्धनि लेपस्तु पिपासादाहनाश
नं वापि पीतं मधुयुतं माकन्दा
द्यपिपासितं पायये द्रामयेच्चापि
तेन तृष्णा प्रशाम्यति प्रातः स
शर्करं पेयो हिमो धान्याक ॥

संभवः जयेत् तृष्णां क्षयाद्य
दंभवेत् स्रोतोविशोषणं
अमलं कमलं कुष्ठं लाजाश्च
वटरोहकं पतङ्गोत्थं मधु
नागदतिकां धारयेन्मुखे तृष्णा
प्रवृद्धा हैमेया मुखशोषं च
दारुणं क्षतोद्भवां रुधिरनि
वारणेन जयेत् क्षतानां मसृ
क्स्रुपानैः क्षयोत्थितां क्षीर
जलं निहन्यान्मांसोदकं वाम
धुकोदकं वा आमोद्भवां बिल्व
वचायुतानां जयेत् कषायैर
ग्निदीपनानां गुर्वन्नजा मुल्लिख
नैर्जयेद्वमनं विना सर्वकृतां
चतुष्णां उल्लिखितैः लेखनद्र
वैः स्निग्धैर्न्नेर्भुक्तैः यातृष्णा
स्यात्तच गुडाम्बुना शमयेत्
अतिरोगा दुर्बलानां तृष्णाश
मयेन्नृणां सिद्धाम्बुपयः पयोः
न्त्रङ्गं मूर्च्छा छर्दि तृष्णा दा
ह स्त्रीमद्यभृशकर्षिताः पि
बेयुः शीतलं तोयं रक्तपित्ते
मदात्यये स्रात्वान्नपान भेषजैर्पे
ज्ञलां तस्य जयेत् पुनः तृष्णा
जिताया मन्योपि व्याधिः पाक
श्चिकित्सितुं तृष्यन् एवामय
क्षीणोनलभेत जलं यदि म ॥

रणं दीर्घरोगः वाप्नुयात्
त्वरितं नरः तृषितो मोहमा
याति मोहात् प्राणान्विमुंच
ति तस्मात् सर्वास्ववस्थास
नक्वचिद्वारि वारयेत् अन्नेना
पि विनान्तः प्राणान् धारयेत्
चिरं तोयाभावात् पिपासार्तः
क्षणात् प्राणैर्विमुच्यते इ
ति तृष्णाधिकारः इति भाव
प्रकाशः ॥
क्षतविधसी पुंरुद्धदसवृत्तः
इति शब्दचन्द्रिका ॥
क्षतव्रणः पुं षट्प्रकारव्रण
रोगान्तर्गतव्रणभेदविशेषः
इति भावप्रकाशः तद्विवरणं
व्रणशब्दे द्रष्टव्यं ॥
क्षतव्रतः त्रि धर्मनियमः
तत्पर्यायः अवकीर्णी २
इत्यमरः तथाच याज्ञवल्क्यः
अवकीर्णी भवेद्गत्वा ब्रह्मचा
रीतैर्णोषितं गर्दभं पशुमाल
भ्य नैरृतं स विशुद्ध्यति इति
प्रायश्चित्ततत्त्वं ॥
क्षतदर्वं क्ली अगुरु इति श
ब्दचन्द्रिका ॥
क्षतिः स्त्री अपचयः क्षयः
यथा जलमुचि वितरण विमुखे

कातति रक्तस्रावं वृषान्तराणां
केवल चतरसभक्षी वातकप
ली कमाश्रयति इत्यमरः क्ष
तोदरः पुं उदररोगविशेषः त
स्य सामान्यरूपमाह आध्मानं
गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्नि
ता शोथः सदनं मङ्गानां संगो
वात पुरीषयोः दाह तन्द्रा
च सर्वेषु जठरेषु भवन्तिहि स
न्निकृष्टनिदानपूर्विकां संख्या
माह पृथक्दोषैः समस्तैश्च
प्लीहबद्धक्षतोदकैः संभवन्त्युद
राण्यष्टौ तेषां लिङ्गं पृथक्
शृणु क्षतोदरमाह शल्यं तथा
न्नोपहितं यदन्नं भुक्तं भिनत्त्या
गत मन्यथा वा तस्मात् स्रुतोऽ
न्त्रात् सलिल प्रकाशः स्रावः स्र
वेद्वै गुदतस्तुभूयः नाभेरधश्चो
दरमेति वृद्धिं निस्तुद्यतेदाल्यति
चातिमात्रं एतत् परिस्राव्युद
रं प्रदिष्टं दकोदरं कीर्तयतो नि
बोध शल्यं कंटककर्करादि अ
न्नोपहितं अन्ननिहितं भुक्तं यत्
अन्त्रं भिनत्ति तथा अन्यथा आग
ते भोजनं विना आगतं शरादि
तदपि यदन्त्रं भिनत्ति

एतदुपलक्षणं जृम्भणमत्यशनं
वान्त्रं भिनत्ति एतदुक्तं चरके शर्क
रा तृणकाष्ठास्थिकंटकैरन्नसं
युक्तैः भिद्यतान्त्रं यदा भुक्तं जृ
म्भयात्यशनेन चेति तस्मात् भिन्ना
दन्त्रात् गुदतस्तुभूयः अन्त्रात्
संस्राव पुनर्गुदतः स्रवेदित्यर्थः
दाल्यति विदीर्यतेव पटस्फि
चिराद्यत्वात् एतत्क्षतोदरं तन्त्रा
न्तरे परिस्राव्युदरं प्रदिष्टं तस्य चि
कित्सा शालिषष्टिक गोधूमय
वनीवारभोजनं निरूहो रेचनं
श्रेष्ठं सर्वेषु जठरेषु च आनूपमौ
दकं मांसं शाकं पिष्टकृतं तिलाः
व्यायामाध्वदिवास्वप्न यान पाना
नि वर्जयेत् तथाम्ललवणोष्णानि
विदाहीनि गुरूणि च नाद्यादन्ना
नि जठरे तोयपानं च वर्जयेत्
उदराणां मलाध्यत्वात् बहुशः
शोधनं हितं तीक्ष्णैरेरण्डजं तैलं
पिबेन्मूत्रेणवा सह तत् इति
भावप्रकाशः क्षत्ता पुं
सारथिः
द्वाःस्थः क्षत्रियायां विप्राज्जातः
इत्यमरः दासीपुत्रः
निपुणः ॥ ॥ ॥ ॥ ॥

ज्वाला इति मेदिनी वैश्यायां
शूद्राज्जातः मत्स्यः इति सं
क्षिप्तसारोणादिवृत्तिः क्षत्रं क्ली
शरीरं इत्युणादिकोषः नगरं
इति राजनिर्घंटः ॥
क्षत्रः पुं क्षत्रियः इत्युणादि
कोषः ॥
क्षत्रबन्धुः पुं निन्दितक्षत्रि
य इत्यमरटीका ॥
क्षत्रवृक्षः पुं मुचुकुन्दः इति
राजनिर्घंटः ॥
क्षत्रियः पुं ब्रह्मबाहुजवर्ण
विशेषः क्षत्री इति भाषा तत्
पर्य्यायः मूर्द्धाभिषिक्तः २ रा
जन्यः ३ बाहुजः ४ विराट् ५
इत्यमरः क्षत्रः ६ विजलिंगी
७ राजा ८ नाभिः ९ इति जटा
धरः नृपः १० मूर्द्धकः ११ इति
शब्दरत्नावली पार्थिवः ॥ सा
र्वभौमः १२ इति राजनिर्घंटः
क्षदति रक्षति जनान् क्षत्रं
तद संवृत्तो क्षौत्रं ततस्त्वास
क्षितित्रः क्षतात् त्रायते इति
हेमनीयादित्वात् क्षतात्का
रलोपे वा क्षत्रः क्षत्रो हितका
रः पुं नपुंसकयोः क्षत्रं ॥॥

पति क्षेम क्षत्र महीषभूभृत्
प्रभाविरायो भरतस्य जिष्णुरि
ति राघवपाण्डवीये क्षत्र एव
क्षत्रियः स्वार्थे इयः अपत्यार्थे
इय इत्यन्ये इति भरतः ॥
नैव सूर्य्यचन्द्रवंशीय राजानः
कलेः सहस्रवर्षपर्य्यन्तं आस
न् ततः महानन्दिसुतो नन्दः
शूद्रायां समुत्पन्नः शतवर्षं
राज्यं चकार तदन्ते चाणक्यना
म्ना ब्राह्मणेन नन्दं तत्पुत्रांश्च ह
त्वा मुरवंशज चन्द्रगुप्त राजा
नं कृतवान् कलौ नन्दान्त क्षत्रिय
वंशः इति श्रीभागवते १२ स्क
न्धे १ अध्यायात् संगृहीतं
प्लक्षद्वीपे क्षत्रियस्य नाम पतंगः
शाल्मलद्वीपे वीर्य्यधरः कुश
द्वीपे कोविदः क्रौञ्चद्वीपे ऋ
षभः शाकद्वीपे सत्यव्रतः पु
ष्करद्वीपे सर्वे एकवर्णाः अ
स्य शास्त्रनिरूपितधर्म्माः स्वयं
अध्ययनं यजनं दानं च प्रजा
रक्षणं जीविका अस्याश्रमास्त्र
यः गार्हस्थ्यं ब्रह्मचर्य्यं वानप्रस्थं च
इति तत्रैव ५ अध्यायादितः संग
हीतं तल्लक्षणं यथा क्षत्रं सेवते कर्म

वेदाध्ययन संयुतः दानादान
वहि र्यस्तसै क्षत्रिय उच्यते
तस्य धर्म्मो यथा नारद उवाच
क्षत्रियस्यापि यो धर्म्मस्तं ते
वक्ष्यामि पार्थिव दद्याद्राजा
न याचेत यजेत न च याजये
त् नाध्यापयेदधीयीत प्रजाश्च
परिपालयेत् नित्योद्युक्तो
दस्युवधे रणे कुर्य्यात् पराक्र
मं ये तु क्रतुभिरीजानाः श्रुत
वन्तश्च पार्थिवाः य एतद्वि विजे
तारस्ते न लोकजितो नृपाः
अविक्षतेन शरीरेण संगराद्यो
निवर्त्तते क्षत्रियस्तस्य तत् कर्म्म
नोभयत्र यशः प्रदं क्षत्रियाणा
मयं धर्म्मो निर्णीतो मुनिभिः
परः नास्य कृत्यतमं किंचि
द्द्यस्ति दस्युविनिग्रहात् दान
मध्ययनं यज्ञो राज्ञां क्षेमोऽ
भिधीयते तस्माद्राज्ञा महा
राज योद्धव्यं धर्म्मशीलिना
प्रजाः स्वेषु च धर्म्मेषु स्थापये
त महीपतिः धर्म्माण्येव हि क
र्म्माणि कारयेत् सततं प्रजाः
परमां सिद्धिमाप्नोति नृपतिः
परिपालनात् कुर्य्यादन्यन्नवा

कुर्य्यान्मैत्रो राजन्य उच्यते
इति पाद्मे स्वर्गखण्डे २९ अध्या
यः अपि च राजन्यानां करा
दानं विना वैवाहिकं च यः प्र
तिग्रहः स नित्योत्र परत्र चा
सुखप्रदः युद्धे पलायनं चैव
तथा कातरतार्थिषु अपालनं
प्रजानां च दाने धर्म्मे विरक्त
ता अनवेक्षा स्वराष्ट्रस्य ब्राह्म
णानामनादरं अमात्यानाम
सम्मानं तेषां कर्म्मानवेक्षणं
भृत्यानां च परीहासो निषिद्धः त
त्रैजन्मना राजन्यस्तु महाराज
यथाश्रममवाप्नुयात् तत्र शृणु
ष्व तवाख्यास्ये धर्म्मसंग्रहतत्प
रः वेदानधीत्य धर्म्मेण राजशा
स्त्राणि चान च संतानादीनि का
र्म्माणि कृत्वा सोमं निषेव्य च पा
लयित्वा प्रजाः सर्व्वा धर्म्मेण जय
तां वर राजसूयाश्वमेधादीन् मखा
नन्यांस्तथैव च आनयित्वा यथा
पाठं विप्रेभ्यो दत्तदक्षिणः ॥
संग्रामे विजयं प्राप्य तथाल्पं
यदि वा बहु स्थापयित्वा प्रजा
पालं पुत्रं राज्ये च पार्थिव अ
न्यगोत्रे प्रशस्तं वा क्षत्रि
यं ॥ ॥ ॥ ॥ ॥॥

क्षत्रियर्षभ अर्चयित्वा पितॄन्
सम्यक् पितृयज्ञे यथाविधि
देवान् यज्ञे ऋषीन् वेदैरर्च
यित्वा प्रयत्नतः अन्तकाले च
संप्राप्ते य इच्छेदाश्रमान्तरं सो
ऽनुपूर्व्या आश्रमान् राजन् गत्वा सि
द्धिमवाप्नुयात् राजर्षित्वेन रा
जेन्द्र भैक्षचर्याधसेवया अपे
तगृहधर्म्मोऽपि चरेज्जीवितका
म्यया नचैतन्नैष्ठिकं कर्म्मत्रया
णां भूरिदक्षिणं चतुर्णां राज
शार्दूल प्राहुराश्रमवासिनां
वाह्यायत्तं क्षत्रियैर्मानवानां ।
लोकश्रेष्ठं धर्म्ममासेवमानैः
सर्वे धर्म्माः सोपधर्म्मास्त्रयाणां
राज्ञो धर्म्मादिति वेदात् शृणो
मि एवं धर्म्मान् राजधर्म्मेषु स
न्नान् सर्वावस्थं संप्रलीनान्निबो
ध अल्पाश्रयानल्पफलान् वद
न्ति धर्म्मानन्यान् वेदविदो मनु
ष्याः महाश्रयं बहुकल्याण
रूपं क्षात्रं धर्म्मं नेतरं प्राहुरा
र्य्याः सर्वे धर्म्माः राजधर्म्मप्र
धानाः सर्वे धर्म्माः पाल्यमाना
भवन्ति सर्वत्यागो राजधर्म्मेषु रा
जन् त्यागं धर्म्मं चाहुरग्र्यं पुराणं
मज्जेत्त्रयी दण्डनीतौ ॥ ॥ ॥

हतायां सर्वे धर्म्माः प्रलयेयुर्वि
रुद्धाः सर्वे धर्म्मा आश्रमाणां हृ
ताः स्युः क्षात्रे त्यक्ते राजधर्म्मे पु
राणे सर्वे त्यागा राजधर्म्मेषु चो
क्ताः सर्वा विद्या राजधर्म्मेषु यु
क्ताः सर्वे लोका राजधर्म्मे प्रवि
ष्टाः यथा जीवाः प्राकृतैर्वध्य
मानाः धर्म्मश्रुतानामुपपीड
नाय एवं धर्म्मा राजधर्म्मैर्वि
युक्ताः संचिन्वन्तो नाद्रियन्ते स्व
धर्म्मं चातुराश्रम्यधर्म्माश्च य
तिधर्म्माश्च पार्थिव लोकवेदो
क्ताश्चैव क्षात्रे धर्म्मे समाहिताः
सर्वाण्येतानि धर्म्माणि क्षात्रे
राजन्यसत्तम अप्रवृत्ते बकूह्वा
ं धर्म्ममाश्रमवासिनां क्षात्रेण
व हि धर्म्मेण प्रवृत्तं क्रियते नृ
प इति पाद्मे स्वर्गखण्डे २८ अध्या
यः अपिच द्विजात्युत्तमं क्षत्रिया
णां तथा नारायणाश्रितं राज्या
नां पालनं चैव रणे निर्भयता त
था नित्यं दानं ब्राह्मणेभ्यः श
रणागतरक्षणं पुत्रवत्प्रजा
नां च दुःखिनां परिपालनं ॥
शास्त्राणां च नैपुण्यं रणे सौ
न्दर्य्यमेव च तपश्च धर्म्मकृत्यं च

यत्नं कुरुते मुदा पण्डितं
नीतिशास्त्रज्ञं नित्यंच परिपा
लयेत् नियोजयेत् सभामध्ये नि
त्यं सद्भिश्च संयुतः हस्त्यश्वरथ
पादातं सेनांगंच चतुष्टयं पाल
येत् यत्नतो नित्यं यशस्वी च प्र
तापवान् रणे निमंत्रितश्चैव
दानेन विमुखो भवेत् रणे यो
वा त्यजेत् प्राणान् तस्य स्वर्गो
यशश्चैव इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे ८३
अध्यायः अथ सूर्य्यवंशीयक्ष
त्रियविवरणं परमेश्वरात्
ब्रह्मा जातः तस्य पुत्रो मरी
चिस्तस्य कश्यपस्तस्य सूर्य्यस्त
स्य वैवस्वतो मनुः सत्ययुगे मनु
रेव राजासीत् त्रेतायुगे तस्य पु
त्र इक्ष्वाकुः अयोध्यायां राजा
नो बहुकालं राज्यं कृतवन्तः
द्वापरे ततः किंचिन्न्यूनायुषः यु
गस्य प्रथमपादे या उत्तरोत्तरं आ
युषो ह्रासः कलियुगे अल्पमे
वायुः शेषे अल्पतरं भविष्यति
तस्य पुत्रो विकुक्षिस्तस्य ककुत्
स्थः तस्य अनेनाः तस्य पृथुः

आसीत् त्रेतायुगे प्रतिदीर्घायुषो राजा

तस्य विश्वगन्धिः तस्य चन्द्रः तस्य
युवनाश्वः तस्य श्रावः तस्य
बृहदश्वः तस्य धुन्धुमारः तस्य दृ
ढाश्वः तस्य हर्य्यश्वः तस्य निकुंभः
तस्य कृशाश्वः तस्य सेनजित् तस्य
युवनाश्वस्तस्य मान्धाता चक्रव
र्त्तिभूत् तस्य पुरुकुत्सः तस्य त्रस
दस्युः तस्य पुरुकुत्सः अनरण्यः
तस्य हर्य्यश्वः तस्य प्रारुणः तस्य
हर्य्यश्वः तस्य प्रारुणः तस्य त्रिव
न्धनः तस्य सत्यव्रतः तस्य त्रिशं
कुः तस्य हरिश्चन्द्रः यः राजसूयं
कृतवान् तस्य रोहितः तस्य हरितः
तस्य चम्पः तस्य सुदेवः तस्य विज
यः तस्य भरुकः तस्य वृकः तस्य
बाहुकः तस्य सगरः चक्रवर्त्ती त
स्य असमंजाः तस्य अंशुमान् तस्य
भगीरथः यस्तपः कृत्वा पृथिव्यां
गंगामानीतवान् तस्य श्रुतः तस्य
नाभः तस्य सिन्धुद्वीपः तस्य अयुता
युः तस्य ऋतपर्णः तस्य सौदासः
तस्य अश्मकः तस्य मूलकः तस्य द
शरथः तस्य एडविड तस्य विश्वसहः
तस्य खट्वाङ्गः चक्रवर्त्ती तस्य दी
र्घबाहुः तस्य रघुः तस्य अजः तस्य
दशरथः विष्णु श्रीरामरूपेण तस्य
पुत्रत्वमाप्तवान् तस्यात्मजा भरतल



त्राण शत्रुघ्नाः श्रीरामचरितं बहुविस्तीर्णं वाल्मीक व्यासादिमुनिभि र्वर्णितं अस्मौ त्रेताद्वापरयोः सन्धौ अवतीर्णः पतेव द्वापरमारभ्य श्रीरामपर्य्यन्ताश्चक्रवर्त्तिनः द्वापरस्य प्रथमे तस्य पुत्रः कुशो जातः तस्य अतिथिः तस्य निषधः तस्य नभः तस्य पुंडरीकः तस्य क्षेमधन्वा तस्य देवानीकः तस्य हीनः तस्य पारियात्रः तस्य बलस्थलः तस्य वज्रनाभः तस्य अर्कः तस्य खगणः तस्य विधृतिः तस्य हिरण्यनाभः तस्य पुष्यः तस्य ध्रुवसन्धिः तस्य सुदर्शनः तस्य अग्निवर्णः तस्य शीघ्रः तस्य मरुः यो योगसिद्धः सन् समेरुनिकटे कलापग्रामे आस्ते कलेरंतेनष्टं सूर्य्यवंशं पुनर्भावयिष्यति मरोः पुत्रः प्रसुश्रुतः तस्य संधिः तस्य अमर्षणः तस्य महस्वान् तस्य विश्वबाहुः तस्य प्रसेनजित् तस्य तक्षकः तस्य बृहद्बलः असौ युधिष्ठिरस्य समकालीनः भारतयुद्धे अभिमन्युना हतः तस्य बृहद्रणः तस्य उरुक्रियः तस्य वत्सवृद्धः तस्य प्रतिव्योमः तस्य भानुः तस्य दिवाकः तस्य सहदेवः तस्य वीरः तस्य बृहदश्वः तस्य भानुमान् तस्य प्रतीकः तस्य मरुद्देवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अंतरीक्षः तस्य सुतपाः तस्य अमित्रजित् तस्य बृहद्राजः तस्य बर्हिः तस्य कृतंजयः तस्य रणंजयः तस्य संजयः तस्य शाक्यः तस्य शुद्धोदनः तस्य लांगलः तस्य प्रसेनजित् तस्य क्षुद्रकः तस्य सुमित्रः एते राजानः कलेः सहस्रवत्सरपर्य्यंते राज्यं कृतवंतः एतत् पर्य्यंते सूर्य्यवंश विश्रांतिः पुनः सत्ययुगे सूर्य्यवंशोत्पत्तिर्भविष्यति इति श्रीभागवत नवमस्कंधे मते चन्द्रवंश विवरणं चन्द्रवंशशब्दे द्रष्टव्यं ॥

क्षत्रिया स्त्री क्षत्रियस्त्रीजातिः इत्यमरः क्षत्रियाणी
क्षत्रियी स्त्री क्षत्रियपत्नी इत्यमरः क्षद संवृतौ इति कविकल्पद्रुमः क्षंता इति दुर्गादासः क्षंता त्रि क्षमाशीलः इत्यमरः अस्य पर्य्यायः सहिष्णुशब्दे द्रष्टव्यः

क्षप इ क क्षान्तौ इति कविकल्पद्रुमः क्षान्तिरिह क्षमा इक क्षम्पयति दुःखं मुनिः सहत इत्यर्थः इति दुर्गादासः क्षप क क्षेपे इति कविकल्पद्रुमः म क्षपति प्रक्षापि क्षपं क्षपं क्षापं क्षापं मानुबन्धसामर्थ्यात् ण्यन्तादपि अभिधाने दीर्घः क्षमते तु अत्र दीर्घविधिरुपधां नापेक्षते इति दुर्गादासः ॥

क्षपणः त्रि निर्लज्जः इति त्रिकाण्डशेषः ॥

क्षपणकः पुं बुद्धभेदः इति जटाधरः सन्न्यासी यथा एकं क्षपणक शाकारहौ तत्र क्षपणैक दशशाकाश्च यत्र क्षपणक दशशाकाश्च तत्र क्षपणककाशाकाश्च इत्युद्भटः ॥

क्षपण्युः पुं अपराधः इति शब्दमाला ॥

क्षपा स्त्री रात्रिः हरिद्रा इत्यमरः ॥

क्षपाकरः पुं चन्द्रः कर्पूरः इत्यमरः ॥

क्षपाचरः पुं राक्षसः निशाचरशब्ददर्शनात् ॥

क्षपाटः पुं राक्षसः इति त्रिकाण्डशेषः ॥

क्षपापतिः पुं चन्द्रः कर्पूरः इति निशापतिशब्ददर्शनात् ॥

क्षम उ इर भय मर्षे इति कविकल्पद्रुमः मर्षः सहनं उ क्षमित्वा क्षान्त्वा षष्ठस्वरान् बन्ध इत्येके इर अक्षमत् अक्षमीत् अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये भय क्षाम्यति दोषं साधुः इति दुर्गादासः

क्षमू ऊ ङ ञि य मर्षे इति कविकल्पद्रुमः ऊ अक्षमिष्ट अक्षंस्त ङ क्षमते ञि क्षान्तोऽस्ति य क्षाम्यति इति दुर्गादासः

क्षमं क्ली युक्तं इत्यमरः क्षमः त्रि शक्तः हितः इत्यमरः आद्यस्य पर्य्यायः सहः २ प्रभूष्णुः २ इति हेमचन्द्रः

क्षमता स्त्री योग्यता सामर्थ्यं यथा श्रुति हितौ या क्षमता च लिंगं वाक्यं पदान्येव तु संहतानि सा प्रक्रिया स्याकर ॥॥



णस्य कांक्षा स्यात् क्रमो योग
वत् समाख्या इति भट्टवार्त्ति
कं क्षमता अर्थप्रकाशनसा
मर्थ्यं यथा वह्नि देवसदने दा
सीत्यत्र दासीति पदस्य छेदन
प्रकाशनसामर्थ्यात् वह्निरि
त्यस्य आस्तृतदर्भप्रकाशनसा
मर्थ्यात् आस्तृतदर्भच्छेदने स
मुदायमंत्रस्य नियोगा३ वगम्य
ते इति धर्म्मदीपिका ॥
क्षमा स्त्री तितिः क्षांतिः इत्य
मरः रात्रिः इति शब्दरत्नाव
ली क्षमालक्षणं यथाह बृह
स्पतिः बाह्ये चाध्यात्मिके
चैव दुःखे चोत्पादिते क्व
चित् न कुप्यति न वा हंति सा
क्षमा परिकीर्तिता इत्येका
दशीतत्त्वं अपिच अक्रुष्टो
भिहतो यस्तु नाक्रोशेत्र ह
न्देदपि अदुष्टो वाङ्मनः कायै
स्तितिक्षुः क्षमा स्मृता इति
मात्स्ये १२० अध्यायः
अन्यच्च विभागशीलः सततं
क्षमायुक्तो दयात्मकः गृह
स्थस्तु समायुक्तो न गृहेणगृही
भवेत् क्षमादयाच विज्ञानं स
त्यंचैव दमः शमः अध्यात्मनि
रतं ज्ञान मेतद्ब्राह्मणलक्षणं
विगर्हातिक्रमक्षेपहिंसाबन्ध
वधात्मनां अन्यमन्युसमुत्थानां
दोषाणां वर्जनं क्षमा इति
कौर्मे १४ अध्यायः दुर्गा
इत्यमरटीकायां मथुरानाथः
तथाहि जयंती मंगला का
ली भद्रकाली कपालिनी दु
र्गा शिवा क्षमा धात्री स्वाहा
स्वधा नमोऽस्तु ते इति दुर्गा
स्तोत्रं अपिच क्षमा तथैव मु
खिकार्या योगपट्टोत्तरीयका
पद्मासनकृताधारा वरदोद्यत
पाणिनी मूलमेखलसंयुक्ता
प्रशांता योगसंस्थिता सितप
द्मोपहारेण सितहोमेन सिद्धि
दा इति देवीपुराणे सवत्स
रदेवता विंशतिविधिः प्रथमः
गोपीविशेषः यथा राधिका
वाच मया सर्वंच तंदृष्टो गो
प्याच क्षमया सह सवेशयुक्तो
मालावान् गन्ध चन्दनसंयुतः
रत्नभूषितया गन्धनसंयुतः
रत्नभूषितया गन्धचन्दनाहि
तया तया सुखेन मूर्छितं तस्य
पुष्पचंदनसंयुते स्निग्धानिद्रित
यासयोः सखे ॥

नवसंगमात् मयाप्रबोधिता
साच भवांस्तुस्मरणं कुरु गृही
तं पीतवस्त्रं ते मुरली चमनोहरा
वनमाला कौस्तुभंचाप्यमूल्यं
रत्नकुंडलं पश्चात् प्रदत्तं प्रे
म्णाच सखीनां वचनाद्धो ल
ज्जया कृष्णवर्णाश्च तेनाप्याभि
शप्तत्वः क्षमादेहं परित्यज्य ल
ज्जया पृथिवीं गता ततस्तस्याः
शरीरंचगुणश्रेष्ठं बभूव ह संवि
भज्य त्वयादत्तं प्रेम्णा प्रकृष्टमा पु
राकिंचिद्दत्तं विप्रेभ्यश्च वैष्णवे
भ्यश्च किंचन धर्मिष्ठेभ्यश्च ध
र्माय दुर्बलेभ्यश्च किंचन त
पस्विभ्योपि देवेभ्यः पंडितेभ्य
श्च किंचन पतते किंचितं स
र्वं किंभूयः श्रोतुमिच्छसि
इति ब्रह्मवैवर्ते प्रकृतिखंडे ४९
अध्यायः खदिर इति राजनि
र्घंटः क्षमादेषाः पुं शिग्रुः इ
तिराजनिर्घंटः ॥
क्षमावान् त्रि क्षांतियुक्तः
यथा एकः क्षमावतां दोषो
द्वितीयो नोपपद्यते यदेनं
क्षमया युक्तं मशक्तं मन्यते
जनः इति गरुडे ११४ अध्या
यः ॥
क्षमिता त्रि क्षमाशीलः इत्य
मरः
क्षमी त्रि क्षमाशीलः तत् प
र्यायः सहिष्णुः २ सहनः ३ क्षं
ता ४ तितिक्षुः ५ क्षमिता ६
इत्यमरः क्षमः ७ शक्तः ८ स
हः ९ प्रभूष्णुः १० इति हेमच
न्द्रः ॥
क्षयः पुं नीतिवेदिनां त्रिवर्गांत
र्गतप्रथमवर्गः सप्तराज्ञामष्ट
वर्गस्यापचयः यथा क्षयः स्था
नंच वृद्धिश्च त्रिवर्गो नीतिवे
दिनां इत्यमरः नीतिवेदिनां
नीतिशास्त्रज्ञानां तया दिभि स्त्रि
वर्गः अन्ये षांतु धर्मकामार्थैः
पूर्वयुक्तः अष्टवर्गस्यापचयः क्ष
यः तस्यैवोपचयो वृद्धिः तस्य
नोपचयो नाप्यपचयः स्थानं
अष्टवर्गो यथा कृषिर्वणिक
पथो दुर्गसेतुः कुंजरबन्धनं क
र्याकरबलादानं सैन्यानांच नि
वेशनं अष्टवर्गः स्मृतो राज्ञा
मिति तट्टीकायां भरतः क्षयः
तत् पर्यायः संवर्त्तः २ प्रल॥



यः ३ कल्पः ४ कल्पान्तः ५ अप
चयः तत्पर्य्यायः तिया २ ति
लयः तत्पर्य्यायः गृहनाशहेतु
श्च्यः कासरोगविशेषः तत्प
र्य्यायः यक्ष्मा २ शोषः ३
इत्यमरः राजयक्ष्मा ४ रोगराजः
५ गदाग्रणीः ६ उष्मा ७ अति
रोगः ८ रोगाधीशः ९ नृपाम
यः १० इति राजनिर्घण्टः अस्य
निदानादि यक्ष्मशब्दे द्रष्टव्यं ॥
तस्यौषधान्तरं यथा श्वेतको
किलाक्षमूलं छागीक्षीरेण सं
युतं त्रिसप्ताहेन वै पीतं क्षयरो
गं क्षयं नयेत् इति गारुडे १९३
अध्यायः रोगमात्रे इति रा
जनिर्घण्टः
क्षयतरुः पुं स्थालीवृक्षः इति
राजनिर्घण्टः ॥
क्षयथुः पुं कासः इति हेम
चन्द्रः
क्षयनाशिनी स्त्री जीवन्तीवृ
क्षः इति शब्दमाला ॥
क्षय्यं त्री क्षरणीयं क्षयित
व्यं क्षययोग्यं क्षिप्यमोध्यं शक्यते
न निष्पत्ते इति व्या
करणं ॥ ॥ ॥ ॥

क्षरः ज संचलने इति कविक
ल्पद्रुमः न काशः क्षरः संचल
न मिह मोचनं स्रवणं च अ
द्यौ सकर्म्मकः स्रोतोभिर्हि रश
गजा मदं क्षरन्तः इति किरातोऽ
वणे क्षरत् क्षत जह्नुनयः
इति दुर्गादासः क्षरं त्री जले
मेघे पुं इति मेदिनी
क्षरणं त्री मोचनं स्रवणं इति
क्षरधातो रनट्प्रत्ययेन
निष्पन्नं
क्षरी पुं वर्षाकाल इति हेम
चन्द्रः क्षरणविशिष्टेत्यत्र
ज चाले चये इति कविकल्प
द्रुमः जक्षालः क्षलः चालः
कंपः चय स्थुयनं इति दुर्गाद
सः क्षल क शौचे इति कवि
कल्पद्रुमः शौचमिह स्फुटीकर
णं क क्षालयति पात्रं पयसा
लोकः इति दुर्गादासः
क्षवः पुं क्षुतं राजिका ॥
इत्यमरः कासः इति शब्दरत्ना
वली राजिकाभेदः तत्पर्य्या
यः क्षवाभिजननः २
चपलः ३ दीर्घशिम्बिकः ४ क्षक्कु

क्षारः ५ वृष्यबीजः ६ मधुरः ७
क्षरकः ८ असंडगाः कषा
यत्वं मधुरत्वं शीतलत्वं कफ
पित्त श्रमदाहत्वं वृष्यत्वं कच्य
त्वं पवनाध्मान पुष्टिदत्वं च ॥
इति राजनिर्घण्टः ॥
क्षवकः पुं अपामार्गः रा
जिका भूतांकुशः इति राज
निर्घण्टः ॥
क्षवकृत् त्री छिक्किनी इति
भावप्रकाशः क्षवथुः पुं क्षुतं कासः
इति मेदिनी कंठ कण्डूयनं इति शब्द
रत्नावली क्षवपत्रा त्री द्रोणपुष्पी
क्षविका त्री वृहतीभेदः तत्
पर्य्यायः सपितनुः २ पीततंडु
ला ३ पुत्रप्रदा ४ वक्रफला ५
गोधिनी ६ अस्याग्रणीः वृवि
काद्वृहतीतिक्ता कटुरुक्षा च
तत्समा इति राजनिर्घण्टः ॥
क्षान्तः त्रि सहनशीलः तत्प
र्य्यायः सोढः २ इत्यमरः क्ष
मावितः ३ इति शब्दरत्नाव
ली तितिक्षितः ४
इति जटाधरः ॥

क्षान्तिः त्री सत्यपि सामर्थ्ये अ
पकारिणि अपकाराचिकीर्षा
इति देवीमाहात्म्यटीकायां नागो
जिभट्टः तत्पर्य्यायः तितिक्षा २
इत्यमरः सहिष्णुता ३ क्षमा ४
इति जटाधरः ॥
क्षान्तुः त्रि क्षमाशीलः तत्प
र्य्यायः मर्षकः २ इत्युणादि
कोषः ॥
क्षान्तुः पुं पिता इति संक्षिप्त
साराणादिवृत्तिः ॥
क्षामः त्रि क्षीणः अबलः इति
शब्दरत्नावली ॥
क्षामवती त्री यागविशेषः
क्षामवतीष्टिः यथा भविष्योत्त
रवत्यादिना यद्वत् कर्म्मणा प्र
तेनापते दैवदोषाद्धुताशने
ते देवकर्दमके होमे नैकेन दो
षाणां सर्वेषां क्षयमादिशत्
पवंच एकमायश्चित्तेनानेकदो
षक्षयाय क्षामवतीष्टिः सर्वत्र
दृष्टान्तः इति प्रायश्चित्ततत्त्वं ॥
क्षामासं त्री कूपथ्य यथा
अपथ्य मदितं रोग्यं क्षामासं
परिकीर्त्तितं इति शब्दचन्द्रि
का पुस्तकान्तरे क्षमसं ॥ ॥



मितिच पाठः
क्षारं क्ली विड्लवणं इति रा
जनिर्घण्टः यवक्षारः इति त्रिका
ण्डशेषः ॥
क्षारः पुं रसविशेषः धूर्त्तः ॥
लवणं काचभस्म इति मेदिनी
गुडः इति हेमचन्द्रः टङ्कणः
सर्जिक्षारः इति राजनिर्घण्टः
क्षारविशेषगुणाः पलाशाश्
वमूलीककरञ्ज पाटलादिजाः
क्षारास्तु पाचनाः सर्वे रक्तपि
त्तकराः सराः गुल्मार्शः क्रिमि
शूलघ्नाः शर्कराश्मविनाशनाः
इति राजवल्लभः ॥
क्षारकः पुं अचिरजातफलेन
तत्पर्य्यायः जालकं २ जा
लि इति भाषा इत्यमरः पक्षि
मत्स्यादिपिटकं खाचा इति
भाषा इति मेदिनी रजकः
इति शब्दमाला ॥
क्षारतैलं क्ली शुष्कमूलक
शुण्ठीनां क्षारो हिंगुलनाग
रं शतपुष्पी वचा कुष्ठं
दारुशिग्रुरसाञ्जनं
सौवर्च्चलं यवक्षारं सामुद्रं
सैन्धवं तथा भूर्जग्रन्थिविडं

मुस्तं मधुशुक्तं चतुर्गुणं
मातुलुङ्गरसं चैव कदलीरस
मेव च तैलमेभिर्विपक्तव्यं
कर्णशूलापहं परं वाधिर्य्यं क
र्णनादश्च पूयस्रावश्च दारुणः
पूरणादस्य तैलस्य कृमयः क
र्णयोः खिलाः क्षिप्रं विनाशमा
यान्ति क्षारकतशोधरं क्षा
रतैलमिदं श्रेष्ठं मुखदन्तामया
पहं इति गारुडे १९८ अध्यायः
क्षारत्रयं क्ली त्रिविधक्षारः
अथ यथा सर्जिकं च यवक्षारं ट
ङ्कणक्षारमेव च क्षारत्रयं च वि
क्षारे क्षारत्रितयमेव च ॥
इति राजनिर्घण्टः
क्षारदला स्त्री चिल्ली इति रा
जनिर्घण्टः
क्षारदशकं क्ली दशविधक्षा
रः यथा शिग्रुमूलकपलाशचु
क्रिकाचित्रकार्द्रकसनिंवसंभ
वैः इक्षुशोधिकमोचिकोद्भवैः
क्षारसद्दशकं प्रकीर्त्तितं इति
राजनिर्घण्टः ॥
क्षारद्रुः पुं घण्टापाटलिवृक्षः
इति रत्नमाला ॥
क्षारपत्रः पुं वास्तूकः इति ॥

राजनिर्घण्टः ॥
क्षारपत्रकः पुं वास्तूकः
इति हेमचन्द्रः ॥
क्षारभूमिः पुं लवणमृत्तिक
देशः यथा जीवनं जीवनं ॥
हन्ति प्राणान् इति समीरणः
किमाश्चर्य्यं क्षारभूमौ प्राणदा
यमहतिका इत्युद्भटः लवण
भूम्यां स्त्री
क्षारमध्यः पुं अपामार्गः इ
ति रत्नमाला ॥
क्षारमृत्तिका स्त्री लवणमृत्ति
का तत्पर्य्यायः ऊषः २ इ
त्यमरः उषः ३ इति शब्दर
त्नावली ॥
क्षारवृक्षः पुं मुष्ककः इति
राजनिर्घण्टः ॥
क्षारश्रेष्ठं क्ली वज्रक्षारं इ
ति राजनिर्घण्टः ॥
क्षारश्रेष्ठः पुं पलाशः मुष्क
कः इति राजनिर्घण्टः ॥
क्षारषट्कं क्ली षड्विधक्षारः
यथा धातापामार्ग कुटजलेभा
ली तिलमुष्ककैः क्षारैरेतैस्तु
मिलितैः क्षारषट्कादयोगणः
इति राजनिर्घण्टः क्षारसिन्धुः पुं

लवणसमुद्रः सतु जम्बुद्वीपस्य
दक्षिणे शाकद्वीपस्य उत्तरेव
र्त्तते यथा भूमेरर्द्धं क्षारसिन्धो
रुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्य
वर्य्याः अर्द्धेऽन्यस्मिन् द्वीपषट्क
स्य याम्ये क्षारक्षीराद्यम्बुधीनां नि
वेशः शाकं ततः शाल्मलमत्र
कौशं क्रौञ्चं च गोमेदकपुष्क
रे च द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति इति
सिद्धान्तशिरोमणौ
गोलाध्यायः ॥
क्षारमेलकः पुं सर्वक्षारः इ
ति राजनिर्घण्टः ॥
क्षाराच्छं क्ली सामुद्रलवणं
इति हारावली ॥
क्षाराष्टकं क्ली अष्टप्रकार
क्षारः तद्यथा पलाशवज्रि
शिखरिचिञ्चार्कतिलनालजाः
यवजः सर्जिका चेति क्षाराष्ट
कमुदाहृतं क्षारा एतेऽग्निना
तुल्या गुल्मशूलहराभृशं इति
भावप्रकाशः क्षारिका स्त्री
क्षुधा इति हारावली ॥
क्षारितः त्रि अभिशस्तः अप
वादयुक्तः इत्यमरः स्वावि ॥



नं क्षारः इति मेदिनी क्षारोदः पुं लवणसमुद्रः यथा क्षारोदेक्षुरसोद सुरोद घृतोद क्षीरोदेक्षुरसोद सुरोद घृतोद क्षीरोद दधिमण्डोद शुद्धोदाः सप्तजलधयः सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः इति श्रीभागवते ५ स्कन्धे १ अध्यायः क्षालनं क्ली प्रक्षालनं धौतकरणं यथा स्त्रीशूद्रौ च यतिस्नातः क्षालनाच्च करौ पृथक् इति ब्रह्मपुराणं इत्याह्निकाचारतत्त्वं॥

क्षालितं त्रि कृतप्रक्षालनं॥ तत् पर्य्यायः निर्णिक्तं २ शोधितं ३ मृष्टं ४ धौतं ५ इति हेमचन्द्रः॥

क्षि न ग ष हिंसायां इति कविकल्पद्रुमः नक्षिणोति गा क्षिणाति यतिया ग्रायं पंचलीयत इति कर्म्मकर्तरि ला ध्यं इति दुर्गादासः क्षि क्षये स्वाध्यायोः इति कविकल्पद्रुमः क्षयति पा दुर्गादासः॥

क्षि ष वास गत्योः इति कविकल्पद्रुमः क्षियति इति दुर्गादासः

क्षि ण डु ञ वधे इति कविकल्पद्रुमः द ञ क्षिणोतिक्षिणुते उक्षिणित्वाक्षित्वा इति दुर्गादासः॥

क्षि त्रि निवासः गतिः क्षयः इति मेदिनी॥

क्षितः त्रि हिंसितः विधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः क्षितः कामो मयाहिंसित इत्यर्थः इति मुग्धबोधटीकायां दुर्गादासः॥

क्षितिः स्त्री पृथिवी वासः क्षयः इत्यमरः कालभेदः सत्वप्रलयः इति मेदिनी॥ रोचनाख्यामगन्धद्रव्यं इति शब्दचन्द्रिका तस्या व्युत्पत्तिर्यथा महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता काश्यपीकश्यपस्येयमचलास्थिररूपतः इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः क्षितिकाणः पुं शूलिः इति त्रिकाण्डशेषः॥

क्षितिजं क्ली खगोले आकाशामध्यात्ववतंपुनान्तरे तिर्य्यग्वृत्तं यथा पूर्व्वापरं विरचयेत् सममण्डलाख्यं यम्योत्तरं च विदिशो वलयद्वयं च ऊर्द्ध्वाध एवमिह वृत्तचतुष्कमेतद्द्रावेष्टि तिर्य्यगपरं क्षितिजं तदुद्दे इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः क्षितिजः पुं भूनागः इति राजनिर्घण्टः मंगलग्रहः यथा परमैश्वर्य्यं महले नानाविधमहलाश्रयं करोति सोमपुत्रस्तु क्षितिजान्तर्द्दशागतः इति ज्योतिस्तत्त्वं भुजाते त्रि क्षितिजन्तुः पुं भूनागः इति राजनिर्घण्टः॥


क्षितिधरः पुं पर्व्वतः इति हलायुधः कूर्म्मवासुकि क्षिगजाश्च॥

क्षितिनागः पुं भूनागः इति राजनिर्घण्टः॥ क्षितिनाथः पुं राजा क्षितेर्नाथ इति षष्ठी तत् पुरुष समास निष्पन्नः॥

क्षितिपः पुं राजा यथा॥॥

अरुंधुनाथ क्षितिपः प्रभंजन् चे वच स्तापसकुञ्जरेण इति भट्टि १ सर्गः॥

क्षितिपतिः पुं राजा यथा॥ गुर्व्वीः शान्तपस्ती क्षितिपतिरत्नेमामत् सरोष ममपीना दुःस्यो माली गदस्थः प्रभु इति कृपणः शास्त्रविद्धर्म्महीनः इति नवरत्नं क्षितिपालः पुं राजा यथानीतः तसं क्षितिरक्षुतं प्रथितेरमात्यैः साम्राज्यमस्य विहितं क्षितिपाल मौलिमालार्चितं भुवि पयोनिधि मेखलायां इति प्रबोधचन्द्रोदयनाटके १ अङ्कः क्षितिपालभाक् पुं राजा यथा आसिष नैकत्र शुचा व्यरंसीत् कृताकृतेभ्यः क्षितिपालभाग्भ्यः सवन्दनोपरीरन्ध्रणाल दिग्धः शोकाग्निनाग्राद्युनिवासभूयं इति भट्टि ३ सर्गः क्षितिपुत्रः पुं॥ नरकराजः यथा सतीरेनदराजस्य॥ लौहित्यस्य महात्मन ब्रह्मार्चनं॥॥



समारभ्य तपस्तप्त मुपस्थितः समानुषेण मानेन क्षितिपुत्रः शतं समाः जलाद्वार व्रतेनैव समानर्च्च पितामहं स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः मत्तस्तोभुय नरकस्यायतः समुपस्थितः इति कालिकापुराणे ३८ अध्यायः अन्यत् नरकशब्दे द्रष्टव्यं क्षितिवदरी स्त्री भूवदरी इति राजनिर्घण्टः॥

क्षितिरुहः पुं वृक्षः इति हेमचन्द्रः॥

क्षितिवर्द्धनः पुं भवः इति त्रिकाण्डशेषः भूमिवर्द्धके त्रिलि॥ क्षितिव्युदासः पुं गर्त्तः भाड़ सीति महाराष्ट्रीय भाषा इति केचित्॥

क्षितिक्षमः पुं खदिरवृक्षः इति राजनिर्घण्टः क्षितिदितिः स्त्री देवकी इति त्रिकाण्डशेषः

क्षित्या पुं वायुः इति सिद्धान्तकौमुद्या मुणादिवृत्तिः क्षिद्रः पुं रोगः सूर्य्यः विषाणं इति संक्षिप्तसारोणादिवृत्तिः॥ ॥ ॥॥।

क्षिप श म ओ तुदि इति कविकल्पद्रुमः तुदि प्रेरणे श म क्षिपति क्षिपते पञ्चमोऽयं ओ क्षेप्ता इति दुर्गादासः क्षिप य औ तुदि इति कविकल्पद्रुमः य क्षिप्यति औ क्षेप्ता इति दुर्गादासः

क्षिपः पुं क्षेपणं क्षेप्ता इति क्षिपधातोः कप्रत्ययेन निष्पन्नः॥

क्षिपकः पुं योद्धा इत्युणादिकोषः॥

क्षिपका स्त्री क्षिपणी क्षिपायव इत्यर्थे कणप्रत्यय निष्पन्ना इति मुग्धबोधव्याकरणं।

क्षिपणं क्ली क्षेपणं तत्पर्य्यायः क्षिपा २ इति जटाधरः क्षिपणिः पुं अस्त्रं इत्युणादिकोषः॥

क्षिपणिः स्त्री क्षेपणी नौकादण्डः इत्यमरटीकायां भरतः जालविशेषः मन्त्रः अध्वर्युः इति संक्षिप्तसारोणादिवृत्तिः॥

क्षिपणी स्त्री क्षिपणिः इत्यमरटीकायां भरतः॥

क्षिपणुः पुं वायुः इति त्रिकाण्डशेषः॥

क्षिपण्युः पुं वसन्तकालः इत्युणादिकोषः देहः सुरभौ त्रि इति मेदिनी

क्षिपा स्त्री क्षेपणं इत्यमरः रात्रिः इति तट्टीकायां भरतः

क्षिप्तः त्रि निक्षेपकृतवस्तु त्यक्तः तत् पर्य्यायः नुन्नः २ नुत्तः ३ अस्तः ४ निष्ठ्यूतः ५ विद्धः ६ इत्यमरः वायुग्रस्तः क्षेपा इति भाषा इति लोकप्रसिद्धः क्षिप्ता स्त्री रात्रिः इति हलायुधः॥

क्षिप्नुः त्रि निराकरिष्णुः निराकरणशीलः इत्यमरः

क्षिप्रं क्ली शीघ्रं तद्युक्ते त्रि इत्यमरः॥

क्षिप्रपाकी पुं गर्द्दभाण्डवृक्षः इति रत्नमाला शीघ्रपाकविशिष्टे त्रि॥

क्षिया स्त्री अपचयः इत्यमरः

क्षिव उ निरासे इति कविकल्पद्रुमः ह्रस्वी निराम इ॥॥ दकत कारः इति भट्टमल्लः मुखेन श्लेष्मादेर्वमनमिति केचित् पृथक् पाठात् पूर्वीभ्यादिः क्षिवति उ क्षेवित्वा क्षूत्वा इति दुर्गादासः॥

क्षिव य उ निरासे इति कविकल्पद्रुमः ह्रस्वी यक्षीव्यति उ क्षेवित्वा क्षूत्वा इति दुर्गादासः॥

क्षी ञ हिंसे इति कविकल्पद्रुमः ञ क्षयति क्षयते इति दुर्गादासः

क्षीज हिक्कने इति कविकल्पद्रुमः हीची हिक्कनमव्यक्तः शब्दः स चिदक्षैवाव्यक्तशब्दे क्षीजेः प्रयोगः इति रक्षितः क्षीजति सखेदो जनः इति दुर्गादासः

क्षीजनं क्ली कीचकानां नादः इति हेमचन्द्रः॥

क्षीणः त्रि सूक्ष्मं अबलः तत् पर्य्यायः दुर्बलः २ कृशः ३ क्षामः ४ तनुः ५ छातः ६ तलिनः ७ अमांसः ८ पेलवः ९ इति हेमचन्द्रः॥

क्षीणवान् त्रि क्षयविशिष्टः

इति मुग्धबोधव्याकरणं
क्षीणाष्टकर्म्मा पुं जिनः इति
हेमचन्द्रः ॥
क्षीव ऋ ङ मदे इति क
विकल्पद्रुमः मदे मत्ती भावे
ऋ अचिक्षीवत् ङ क्षीवते म
द्यपः इति दुर्गादासः
क्षीवः त्रि मत्तः इत्यमरः क्षी
रं क्ली जले दुग्धे इत्यमरः स
रलद्रवः इति शब्दरत्नावली
आसप्तरात्रं प्रसवात् क्षीरं पे
युष मुच्यते परतो मोरटं
विद्यादप्रसन्नं कफात्मकं
इति रत्नमाला दुग्धधारास्ना
नफलं येनु स्नाना द्विनिक्षा
तां धारां क्षीरस्य नरः पि
दन्ता प्रतिगृह्णाति स पापेभ्यः
प्रमुच्यते
इति वराहपुराणं
क्षीरेण विष्णोः स्नाने फलं
यथा येषु क्षीरवहा नद्यो ह्र
दाः पायसकर्द्दमाः तान्लो
कान् पुरुषा यान्ति क्षीरस्ना
पनका हरेः आह्लादं निर्वृ
तिं स्वास्थ्य आरोग्यं चातुरू
पतां समुज्ज्वलत्वमाप्नोति
क्षीरस्नापनयोर्हरेः दध्यादीनां
विकाराणां क्षीरतः संभवाय
था तथैवाशेषकामानां क्षी
रस्नापन मुत्तमं यथा च विम
लं क्षीरं यथा निर्वृतिकारकं
तथास्य विमलत्वं भविष्यति
फलमदं यद्दानुकूलतां पुष्टिं
प्रियत्वं चाखिले जने करोति
भगवान्विष्णुः क्षीरस्नापनतोषि
तः सर्वस्य स्निग्धतामेति दृष्ट
मात्रे प्रसीदति घृतक्षीरेण देवे
शे स्नापिते मधुसूदने ॥
इत्याद्ये वह्निपुराणोक्रियायो
गनामाध्यायः ॥
क्षीरपाकविधिर्यथा क्षीरमष्ट
गुणं द्रव्यात् क्षीरान्नीरं चतु
र्गुणं क्षीरावशेषं तत्पीतंशू
लमामोद्भवं जयेत्
इति भावप्रकाशः
क्षीरकः पुं क्षीरमोरटलता
इति रत्नमाला ॥ क्षीरकंचुकी
स्त्री क्षीरिणीवृक्षः इति रत्न
माला क्षीरकंठः पुं बालकः
यथा बालः पाकः शिशुर्डिम्भः
पोतः पावस्तनन्धयः पृथुकोऽ
र्भः ॥

स्तनपायः क्षीरकंठः कुमारकः
इति हेमचन्द्रः
क्षीरकंठकः पुं शिशुः इति त्रि
कांडशेषः ॥
क्षीरकन्दः पुं क्षीरविदारी
इति राजवनिर्घंटः
क्षीरकंदा स्त्री क्षीरवल्ली का
लभक्षिकुष्माण्ड इति ख्यातः
यथा क्षीरवल्ली क्षीरकन्दा म
हाश्वेतर्त्तगन्धिका इति जटा
धरः
क्षीरकाकोलिका स्त्री क्षीरका
कोली इति शब्दचन्द्रिका
क्षीरकाकोली स्त्री अष्टवर्गे
प्रसिद्धौषधिविशेषः तत
पर्य्यायः महावीरा २ स्वको
ली ३ पयस्विनी ४ इति रत्नमा
ला क्षीरशुक्ला ५ पयस्या ६
क्षीरविषाणिका ७ जीववल्ली ८
जीवशुक्ला ९ रस वीर्य्यवि
पाकेषु काकोल्याः सदृशी
च सा इति राजनिर्घंटः अपिच
अथ काकोल्योरुत्पत्तिलक्ष
णनामगुणाः जायते क्षीरका
कोली महामेदोद्भवस्थले यत्र
स्यात् क्षीरकाकोली काकोली
तत्र जायते ॥
पीवरीसदृशः कन्दः सक्षीरः
प्रियगन्धवान् सा प्रोक्ता क्षीरका
कोली काकोली लिंगमुच्यते
यथा स्यात् क्षीरकाकोली काको
ल्यपि तथा भवेत् त्रयाकिंचि
त्भवेत्
कृष्णाभेदोय मुभयोरपि का
कोलीवायसोली चवीराकाय
स्थिका तथा साप्रोक्ता क्षीरका
कोली वयस्था क्षीरवल्लिका
कथिता क्षीरिणी धीरा शुक्ल
क्षीरा पयस्विनी काकोली यु
गलं शीतं शुक्रलं मधुरं गुरु
बृंहणं वातदाहास्रपित्तशोष
ज्वरापहं काकोली क्षीरकाको
ली स्थाने असगन्धामूले
इति भावप्रकाशः ॥
क्षीरकांडकः पुं स्नुही अर्क
वृक्षः इति राजनिर्घण्टः ॥
क्षीरकीटः पुं दुग्धजातकी
टः तत्पर्य्यायः कालिका २
इति हारावली ॥
क्षीरजं क्ली दधि
इति
राजनिर्घण्टः हेमचन्द्रस्तु क्षी
रजातद्रव्या त्रि ॥ ॥ ॥



क्षीरदलः पुं अर्कवृक्षः
इति राजनिर्घण्टः ॥
क्षीरद्रुमः पुं अश्वत्थः इति
राजनिर्घण्टः ॥
क्षीरधेनुः स्त्री दानार्थक्षीरनि
र्म्मितधेनुः यथा होता
वाच क्षीरधेनुं प्रवक्ष्यामि तां
निबोध नराधिप अनुलिप्ते
महीपृष्ठे गोमयेन नृपोत्तम
गोचर्म्ममात्रमानेन कुशानां
स्तीर्य्य सर्व्वतः तत्रोपरि महा
राज न्यसेत् कृष्णाजिनं बुधः
तत्रोपरि कुण्डलिकां गोमये
न कृतामपि क्षीरकुम्भं ततः
स्थाप्य चतुर्थांशेन वत्सकं
सुवर्णमुखशृङ्गाणि चन्दना
गुरुकाणि च प्रशस्तपत्रश्रव
णं तिलपात्रोपरि न्यसेत् मुखेश
ङ्खमयं तस्या जिह्वा शर्करया
तथा फलमयस्तनां रत्नपादं
दर्भरोमां सितकम्बलकम्बलां
ताम्रपृष्ठीं कांस्यदोहां पट्टसू
त्रमयीं तथा पुच्छे च
नृपशार्दूल नवनीतमयस्त
नीं सुवर्णशृङ्गीं रौप्यखुरां पं
चरत्नसमन्वितां
चत्वारि तिलपात्राणि चतुर्दिक्षु वि
न्यापयेत् आच्छाद्य वस्त्रयुग्मेन
गन्धपुष्पैः समर्च्चयेत् धूपदीप
दिकं कृत्वा ब्राह्मणाय निवेद
येत् आच्छाद्यालंकृतां कृत्वा
मुद्रिकापानदौ छत्रं दत्वा दानं
समर्प्पयेत् अनेनैव तु मन्त्रेण क्षी
रधेनुं प्रदापयेत् याधेनुः सर्व्वभू
तानां इत्यादि सर्व्वपुंगव आप्या
यस्वेति मन्त्रेण क्षीरधेनुं माहको
रजन्मम दीयमानां प्रपश्यन्ति
तेषां नि परमां गतिं दत्वा हेमसह
स्रेण यातेनाथ स्वशक्तितः याता
हेमसवाप्नुहं तथार्हं च यथेच्छ
या दत्वा धेनुं महाराज शृणु तस्या
पि यत्फलं षष्टिवर्षसहस्राणि
रुद्रलोके महीयते पितृपिताम
हैः सार्द्धं ब्रह्मणो भवनं व्र
जेत् दिव्यं विमानमारूढो दिव्य
स्रगनुलेपनः क्रीडित्वा सुचिरं
कालं विष्णुलोकं
संगच्छति द्वादशादित्य
संकाशे विमाने
वरमण्डिते गीतवादित्र
निर्घोषे रम्यरोगणं
मवि ॥

ते तत्रोष्य विष्णोः सायुज्यं
विलसत्पुञ्जतां व्रजेत् य इदं
श्रावयेद्राजन् पठेद्वा भक्तिभा
वितः सर्व्वपापविनिर्म्मुक्तो विष्णु
लोके स गच्छति इति वाराह
पुराणोपाख्याने क्षीरधेनुमाहा
त्म्य नामाध्यायः
क्षीरनाशः पुं पराबोटवृक्षः
इति राजनिर्घण्टः दुग्धतयाक्षी
रनीरं क्ली आलिङ्गने इति श
ब्दमाला दुग्धजले च क्षीरपर्णी
पुं अर्कवृक्षः इति राजनिर्घण्टः
क्षीरपाणं क्ली दुग्धपानं
क्षीरपाणः दुग्धपानयुक्तदेशे
तत्कर्त्तरि च त्रि यथा देशेपा
नस्य पूर्व्वपदस्थितषकाररेफ
ऋवर्णेभ्यः परस्य पानस्य न
णः स्यात् देशेवाच्ये पीयते
यत्तत् पानं कर्म्मणि अनट् क्षीरं
पानं येषां ते क्षीरपाणा वाह्ली
काः कषायपाणा गान्धाराः
उशीनरादिपाणानां देशवाचि
त्वेपि तन्निवास
सम्बन्धेन मनुष्येषु प्रवृत्तिः
अथवा क्षीरं पानं
यत्र इति व्युत्पत्या देशो वा
च्यः भावकरणयो रनटो वा क्षी
रपाणं क्षीरपानं क्षीरं पीयते
नयेति क्षीरपाणी क्षीरपानी पा
त्री इति मुग्धबोधटीकायां दुर्गा
दासः क्षीरपायी त्रि दुग्धपानक
र्त्ता यथा क्षीरपायीत्यादिकस्तु म
हत्पर्य्यावच्छिन्न कर्त्तृतार्थस्याव
यवार्थे समर्थोपि न प्रकृत्यर्थ
मात्रावच्छिन्नस्य ततः पानशील
सामान्यमात्रमयात् इति शाब्द
पाक्षिमकाशिका ॥
क्षीरमोरटः पुं लताभेदः तत्
पर्य्यायः क्षीरद्रुः २ सुदलः ३
क्षीरकः ४ इति रत्नमाला अन्य
त् मोरटशब्दे द्रष्टव्यं ॥
क्षीरवल्ली स्त्री क्षीरविदारी इति
राजनिर्घण्टः ॥
क्षीरविकृतिः स्त्री कूर्च्चिका
क्षीरसा इति भाषा इत्यमरः
क्षीरविदारिका स्त्री क्षीरवि
दारी इति
शब्दरत्नावली ॥
क्षीरविदारी स्त्री कृष्णभूमिकु
ष्माण्डः तत्पर्य्यायः महाश्वे
ता २ ऋक्षगन्धिका ३ इत्यमरः
इक्षुगन्धा ४ इक्षुवल्लरी ५ ॥ ॥



रत्नवली ६ क्षीरकन्दः ७ क्षीरव
ल्ली ८ पयस्विनी ९ क्षीरशुक्ला
१० क्षीरलता ११ पयःकन्दा १२
पयोलता १३ पयोविदारिका १४
अस्या गुणाः मधुरत्वं अम्लत्वं
कषायत्वं तिक्तत्वं पित्तशूल
मूत्र मेहामय नाशित्वंच क्षी
रकन्दोद्विधा प्रोक्तो विनालस्त
सनालकः इति राजनिर्घंटः
क्षीरविषाणिका स्त्री दुग्धिका
ली क्षीरकाकोली इति राजनि
र्घंटः ॥
क्षीरवृक्षः पुं उडुंबरवृक्षः इ
तिजटाधरः क्षीरिका इति भ
रतः राजादनी इति
राजनिर्घंटः ॥
क्षीरशरः पुं दधियोगात प
कोल दुग्धजातं छाना
इतिभाषा तत् पर्य्यायः आ
मिक्षा २ पयस्या ३ इति हे
मचन्द्रः
क्षीरशीर्षः पुं श्रीवासः इति
राजनिर्घंटः ॥
क्षीरशुक्ला स्त्री क्षीरविदारी
क्षीरकाकोली इति राजनि
र्घंटः ॥ ॥

क्षीरशुक्लः पुं जलकंटकः
पानिफल इति भाषा इति
शब्दचन्द्रिका राजादनी क्षी
रणी इति भाषा इति राजनि
र्घंटः ॥
क्षीरशुक्ला स्त्री शुक्लभूमि
कुष्मांडः इत्यमरः ॥
क्षीरसः पुं क्षीरसारः इति
राजनिर्घंटः ॥
क्षीरसंतानिका स्त्री दुग्धविका
रविशेषः छाना इति नदक्षीर
इति च भाषा अस्या गुणाः क्षी
रसंतानिका वृष्यास्निग्धापि
त्तानिलापहा इति राजवल्ल
भः
क्षीरसमुद्रः पुं दुग्धसागरः
सत श्वेतद्वीपेवर्त्तते यथा
क्षीरसमुद्राय नमः श्वेतद्वीपा
यनमः इत्यादि पीठन्यासप्र
करणेतंत्रसारः ॥ क्षीरसागर
सुता स्त्री लक्ष्मीः इति कवि
कल्पलता ॥ क्षीरसारः पुं क्षी
रविशेषः पालजित इति हि
न्दीभाषा तत् पर्य्यायः क्षीरसः २
यथा — पक्षेभ्यकरं गौल्यं पि
मग्नं तर्पणं गुरु पुष्टि चैवाभिष

तस्यक्षीरसाभस्तु क्षीरसः इति
राजनिर्घंटः ॥
क्षीरस्फटिकः पुं क्षीरवर्णस्फ
टिकविशेषः यथा सूर्य्यकां
तः सूर्य्यमणिः सूर्य्याश्मा दह
नोपलः चन्द्रकांतस्तु चन्द्रमणि
श्चन्द्रश्चन्द्रोपलश्च सः क्षीरवे
लस्फटिकाभ्या सन्यौ स्वस्फटि
काविमौ इति हेमचन्द्रः ॥
क्षीरतरुः पुं दुग्धपाषाणः इति
राजनिर्घंटः ॥
क्षीरा स्त्री काकोली इति रा
जनिर्घंटः ॥
क्षीराब्धिः पुं क्षीरसमुद्रः इति
शब्दरत्नावली ॥
क्षीराब्धिजं क्ली सामुद्रलवणं
मौक्तिकं इति मेदिनी ॥
क्षीराब्धिजः पुं चन्द्रः इति
मेदिनी ॥
क्षीराब्धितनया स्त्री लक्ष्मीः
इत्यमरः
क्षीराविका स्त्री क्षीरी क्षीरावी
इति शब्दरत्नावली ॥
क्षीरावी स्त्री दुग्धिका इत्यम
रः तत् पर्य्यायः यादिणी २

कच्छुरा ३ ताम्रमूला ४ मरुद्भ
वा ५ इति रत्नमाला हेक्षीरा
षि इति व्याताया इयंचव
कुलपत्रत्वस्यपत्रालता छेदे
क्षीरं स्रवतीति सुभूतिः त
न्मते दुग्धिकाभ्या इति व्या
ताया मित्यनुमीयते हेक्षीरका
कोल्या मिति स्वामी क्षीरम
वतिस्रवति क्षीरावी अवरते
षण — प दुग्धमस्त्यस्याः दुग्धि
काविकार संचेति लिक इति
भरतः अस्य दुग्धिकाशाकं
पुं सरलवृक्षः इति त्रिकां
डशेषः ॥
क्षीरिका स्त्री क्षीरीवृक्षः ॥
क्षीरखर्जूर इति पिंडखर्जूर
इति च केत तत् पर्य्यायः
राजादनः २ फलाध्यक्षः ३
इत्यमरः राजातनः ४ राजा
दनफलं ५ अग्रफलं ६ मधुका
७ क्षीरवृक्षः ८ पलाशी ९
मर्कटप्रियः १० गुरुस्कन्धः ११
श्रेष्ठला १२ आतपली १३ दृ
ढा १४ मौलिकाजाली १५ इ
तिभरतधृतवाचस्पतिः क्षी
रिवृक्षः १६ वानरप्रियः १७ —



णि रत्नमाला राजन्यः १८ प्रि
यदर्शनः १९ दृढस्कन्धः २०
कपीष्टः २१ इति जटाधरः व
रादने २२ क्षीरी २३ क्षीरीश्च
इति शब्दरत्नावली॥
अस्याः फलगुणाः क्षीरिकायाः
फलं पक्वं गुरु विष्टम्भि शीत
लं कषायं मधुरं साम्लं नाति
वातप्रकोपनं इति राजवल्लभः
अपि च क्षीरिकायाः फलं बृं
ष्यं बल्यं स्निग्धं हिमं गुरु तृ
ष्णा मूर्च्छा मदभ्रान्ति क्षयदोष
त्रयास्रजित् इति भावप्रका
शः अन्यत् राजादनीशब्दे द्रष्ट
व्यं परमान्नं इति राजनिर्घण्टः
क्षीरिणी स्त्री वृक्षविशेषः
तत्पर्यायः काञ्चनक्षीरी २
कर्षिणी ३ पट्टफणिका ४ ति
क्तदुग्धा ५ हैमवती ६ हिम
दुग्धा ७ हिमावती ८ हिमाद्रि
जा ९ पीतदुग्धा १० यवचिञ्ची ११
हिमोद्भवा १२ हैमी १३ हिमजा
१४ अस्या गुणाः क्षीरिणीति
तिक्ता शीता च रेचनी शोफ
तापनुत् कृमिदोष कफघ्नी
च पित्तज्वरहरा परा इति राज॥

निर्घण्टः वराहक्रान्ता इति श
ब्दचन्द्रिका॥ कुटुम्बिनी काश्म
री दुग्धिका इति च राजनि
र्घण्टः॥
क्षीरिवृक्षः पुं क्षीरयुक्तपञ्च
प्रकारवृक्षः यथा न्यग्रोधोडु
म्बराश्वत्थ पारिश प्लक्षपाद
पाः पञ्चैते क्षीरिणो वृक्षास्ते
षां त्वक्पञ्चवल्कलं केचित्तु
पारिशस्थाने शिरीषं वेतसं
परे वदन्तीति शेषः अस्य गुणाः
क्षीरिवृक्षा हिमा वर्ण्या योनि
रोग व्रणापहाः रूक्षाः कषा
या मेदोघ्ना विसर्पामयनाशनाः
शोथपित्तकफास्रघ्ना स्तन्या भ
ग्नास्थियोजकाः
पञ्चवल्कगुणाः त्वक्पञ्चकं हि
मं ग्राहि व्रणशोथ विसर्पजि
त् तेषां पत्रगुणाः तेषां प
त्रं हिमं ग्राहि कफवातास्रनु
ल्लघु विष्टम्भाध्मानजित्तिक्तं
कषायं लघु लेखनं इति राज
निर्घण्टः क्षीरी पुं क्षीरिकावृक्षः
इति शब्दरत्नावली दुग्धिका इति
शब्दचन्द्रिका स्नुही अर्कवृक्षः
राजादनी दुग्धपाषा॥

णः वटः इतः सोमलता
स्यात्क्षीरवृक्षः इति राज॥
निर्घण्टः॥
क्षीरी स्त्री क्षीरीवृक्षः इति
शब्दरत्नावली॥
क्षीरीशः पुं क्षीरकञ्चुकी तत्
पर्यायः वरपर्णः २ त्वक्छ
दः ३ कुष्ठनाशनः ४ वसः ५
मूलकमूला ६ खरस्कन्धः ७
कञ्चुकीरः इति शब्दमाला
क्षीरेयी स्त्री पायसं यथा
क्षीरेयीपायसं प्रोक्तं परमान्नं
च सूरिभिः इति हलायुधः
क्षीरोदः पुं दुग्धसमुद्रः इ
त्यमरः तस्य मन्थनं यथा
मन्थानं मन्दरं कृत्वा नेत्रं कृ
त्वा तु वासुकिं दानवैः सहिता
भूत्वा मथध्वं क्षीरसागरं अ
हं च तत्र साहाय्यं करिष्या
मि दिवौकसः भविष्यत्यमृतं
तत्र तत्पानाद्बलवत्तराः भ
विष्यथ क्षणादेव अमृतस्य
प्रभावतः यूयं सर्वे महावी
र्या भुजिष्ठा रणविक्रमाः इ
न्द्रायास्तु महोत्साहाः स्यात्
लद्धा महानदीन ततो हि दान

वान् जेतुं समर्थानात्र संशयः॥
इत्युक्ता देवदेवेन देवाः सर्वं जग
त्पतिं प्रणम्यागत्य निलयं सन्धिं
कृत्वाथ दानवैः क्षीराब्धिमथने स
र्वे चक्रुरुद्योगं सत्तमं बलिना चो
दितो राजन् मन्दराख्यो महागिरिः
क्षीराब्धौ क्षेपितश्चैव तेनैकेन
नृपोत्तम सर्वौषधिश्च प्रतिक्षिप्ता दे
वैर्दैत्यैः पयोदधौ वासुकिश्च ततः
स्तत्र राजन् नारायणाज्ञया सर्व
देवहितार्थाय विसृष्टः स्वयमा
गतः ततो विसृष्टमादेशान्तत्र
सर्वैः सुरासुरैः समेत्य मित्रभाव
ने क्षीरोदस्तटमाश्रिताः संस्था
मे मन्दरं कृत्वा नेत्रं कृत्वाथ वासु
किं ततो मथितमारब्धा नृपते
तरसामृतं विष्णुना सव्यभागेन
वासुकेर्दानवाः कृताः देवाश्च
पुच्छभागेन संख्यार्थं निये
जिताः पर्वतं मथनात्तत्र म
न्दरोऽप्रविशत् वै आधारेण
विना राजंस्ते दृष्ट्वा सहसा हरिः
सर्वलोकहितार्थाय
कूर्म्मरूपमधारयत्
आत्मानं संप्रवेश्याथ
मन्दरस्य॥ ॥ ॥ ॥



शिरश्चः प्रविश्य धृतवान्।
क्षीरे हयग्रीवरूपेण केशवः
ऊर्ध्वमाक्रान्तवान् क्षीरे हयग्री
वरूपेण केशाक चकर्ष नागरा
जानं देवैः सार्द्धं जनार्दनः ॥
अमरै रप्यरूपेण दैत्यमध्ये
च केशाक ततस्तेत्वरायुक्ता
ममंथुः क्षीरसागरं यावच्छ
क्त्या नृपश्रेष्ठ वलवंतः सुरा
सुराः मथ्यमाने ततस्तस्मात्
क्षीराद्धे रभवंनृप कालकूट
मिति ख्यातं विषमत्यन्तदुःस
हं तत्प्राणा जगृहुः सर्पे तच्छे
षंमुकरोऽग्रहीत् नारायणा
त्तया तेन नीलकंठत्व माप्नुयात्
ऐरावतश्च नागेन्द्रो हयश्चो
च्चैःश्रवाः पुनः क्षितीपावर्तेना
द्राजन्नुत पञ्चाधितिनः श्रुतं
त्वतीपावर्तनादप्सरोगणाः जा
तः स्वशोभनः चन्द्रर्घात् पारि
जातश्चउतपञ्चः समहातरुः पं
चमात् हिमंडस्तस्मात् उत्थितः
क्षीरसागरात् तभवः शिरसाध
तेनारीव सस्तिका नृपनानावि
धानिरत्नानि दिव्यान्याभरणानि
च क्षीरोदधेस्ततस्थितानि गन्धर्वा
श्च सहस्रशः पश्चात् दृष्टातदोत

पश्चा नित्यास्तुष्टिसमन्विताः
अभवन् जातहर्षास्तेतत्र सर्वे
सुरासुराः देवपूतेततो मेघाः
सत्यं वर्षैस्तिसंस्थिताः क्षमा
त्तया नवायुस्त सर्वं वाभिस्तरा
न प्रति विषनिश्वासवातेनवा
सुकेतापनात् निस्तेजसोऽभवन्
दैत्याविर्वीर्याश्च महामते ततः श्री
रुत्थिता तस्मात् क्षीरोदाद्धूतपंक
जा विभ्राजमाना राजेन्द्र दिशः
सर्वाः स्वतेजसा ततस्तीर्थोदकैः
स्नातादिव्यवस्त्रैरलंकृता दिव्यग
न्धानुलेपैस्तस्मनोभिः सुपूजि
ता देवपतं समासाद्य स्थिताक्षण
मरिन्दम हरिवक्षस्थले सा सा ततः
सा कमलालया ततोऽमृतघटं
पूर्णं गृहीत्वापयसोनिधेः
धन्वंतरिः समुत्तस्थौ ततः प्रीताः
सुरा नृप दैत्याः श्रिया परित्य
क्ताः दुःखितास्तत्र ते पुनः आदा
यामृतवटं प्राप्तं तेव जग्मुर्य
थेच्छया ततः स्त्रीरूप म
करोद्विष्णु देवहितायवै आ
त्मानं नृपश्रेष्ठ सनाप्यालं
क्षोणे संयुते ॥ ततोजगाम
भगवान् स्त्रीरूपेण ॥ ॥ ॥

सुरान् प्रति दिव्यरूपं कृत्वा द्र।
ष्ट्वा मोहिता स्ते सुरद्विषः
अमृतपूर्णं घटं भूमौ हे सं
संस्थाप्य मतम कामेन पी
डिता स्तामन्वसरा स्तत्र तत स्त
ण्णात् मोहयित्वा ततानेव
मसुरानवनीपते अमृत भाज
नमादाय देवेभ्यः प्रददौ ह
रिः तत् पीत्वा ततो देवा
दवप्रसादतः वलवंतो महा
वीर्या रणेजग्मुर्महासुरान् इ
ति नृसिंहपुराणे ३९ अ
ध्यायः ॥ क्षीरोदतनया स्त्रीति
लक्ष्मीः इति हेमचन्द्रः क्षीरो
दतनयोपतिः पुं विष्णुः इति क
विकल्पलता क्षीरोदनन्दनः पुं चन्द्रः इति
शब्दरत्नावली ॥
क्षीव मदे उ दर्पे इति कवि
कल्पद्रुमः ऊ अक्षीवत् उ
क्षीवते इति दुर्गादासः
क्षीवति निरासे इति कविकल्प
द्रुमः निरासरह कृत् कारं
इतिभ ट्टमल्लः मुखेन श्लेष्मा
देर्वमन मिति केचित् क्षीव
त्यन्नं लोकः
इति दुर्गा दासः ॥ ॥ ॥

क्षीवः त्रि मत्तः यथा मत्ते
शौण्डोत्कट क्षीवाः इत्यमरः
दन्त्यवकारान्तोयं ॥
क्षुद् ल क्षुते इति कविकल्पद्रु
मः क्षवं हाँचीतिख्यातं इ त
वर्गः लक्षीति कषीकृतकं
कामिति चुक्षवे मृगाक्ष्या इति
माघे इति दुर्गादासः
क्षुः पुं सिंहः इत्येकाक्षर
कोषः।
क्षुणः पुं अरिष्टवृक्षः यथा
अरिष्टोवातिकर्मासो वेणी
वः फेनिलः क्षुणः इति शब्द
चन्द्रिका ॥
क्षुण्ण त्रि प्रहतं चूर्णीकृतं ॥
इति जटाधरः ॥
क्षुत् स्त्री क्षुतं इत्यमरः क्षु
ते क्षौ नासिकाभिघातजन्यश
ब्दवायुनिःसरणं हाँची
इति भाषा तत् पर्यायः क्षु
त् २ क्षवः ३ इत्यमरः
क्षुता ४ छिक्का ५ क्षवथुः ६
क्षुतः ७ इति शब्दरत्ना
वली हञ्छिः ८ इति जटा
धरः ॥ ॥



तस्य शाकुनानि यथा अथ क्षु
ताख्यं शाकुनं क्रमेण महाप्र
भावं प्रविभावयामः नश्यन्ति
यस्माच्छकुनाः समस्ता मृगा
धिनाथादिव वन्यसत्वाः सर्व
स्य सर्वत्र च सर्वकाले क्षुतेन
कार्य्यं क्वचिदेव शस्तं यतः
क्षुते तेन न किञ्चिदेव कुर्य्यात
क्षुतं प्राणहरं च गन्तः निषेध
मग्रेऽग्निर्दक्षिणे च धनक्ष
यं दक्षिणे च धनक्षयं दक्षिण
कर्णदेशे नत पृष्ठभागे कुरुते
ऽर्थवृद्धिं क्षुतं कदाचित् शुभमा
दधाति भोगाय यथा मस्रवण
स पृष्ठे कर्णे च वामे कथिते
जयाय सर्वार्थलाभाय च वा
मनेत्रे जातं क्षुतं स्यात् क्र
मशोऽपृष्ठेव क्रमात्रिवर्धं ग
मनस्य विघ्नं कलिं समृद्धि क्षु
तं शुभयोगं करोति रोगक्षय म
र्थलाभं दीप्त्यादिनाशं च क्षुतं क
रोति मानास्पृहां प्रयतेऽपरा
स्मात् पुनः पुनर्वीतत पव जातः
वृद्धाल्लिप्सोर्वा कफतो हठाद्वा
जातं क्षुतं केऽपि वदन्ति सत्यं आद्यं
तयो नेत्रजने प्रशस्तं क्षुतं मर्द्धसं

तिलभोजनादौ भवेत् कथंचिद्य
दि भोजनान्ते भवेत्तदान्नेन हि भोज्य
लाभः आदौ क्षुतं चेत् शकुनैस्त
तः किं ज्ञातान्न ज्ञातान् शकुना
न्निहन्ति क्षुतं क्षणमात्र न संश
योऽस्मिन् प्रयोजने यत्नकृतेऽपि
जाते क्षुतं क्षणमवहिनिहत्य च
द्यं कार्य्यात्मकेनापि मनागदी
यं तस्मापेक्ष्य न विचक्षणेन क्षुते
यतश्चाशुफलं विधत्ते इति च
संतराजशाकुने क्षुत प्रकरणं
तृतीयं अपिच छिक्काया ल
क्षणं वक्ष्ये लभेत् पूर्वे महाफ
लं आग्नेये शोक संतापो द
क्षिणे हानिं माप्नुयात् नैरृते
शोक सन्तापो मिष्टान्नं चैव पश्चि
मे अन्नं प्राप्नोति वायव्ये उ
त्तरे कलहो भवेत् ऐशाने
मरणं प्रोक्तं प्रोक्तं छिक्काफ
लाफलं इति गारुडे ज्योति
श्चक्रे ९०
अध्यायः॥
अन्यच्च वर्षकृत्ये वि
ले ब्राह्मणिकाद्यसिद्धि र
त्नला शाक्रेऽन्ताशे भयं या
म्या मद्रिभयं नैरृत्ये दिषि क॥

ति लोभः समुद्रालयो वायव्यां व
रवस्त्रगन्धसलिलं दिव्यांगनाचो
त्तरे ऐशान्यां मरणं ध्रुवं निग
दितं दिग्लक्षणं क्षवजने जोऽषी
क्षते क्षुते प्येव मुहुः केचिच्छके
विदाः इति क्षुते जीवेति प्रयो
गः कर्त्तव्यो यथा मदनपारि
जातधृते जीवेति क्षुवतः कथ्या
त् जीवेत्वकस्त्वया सह इति
क्षुतोऽन पतनं प्रमास जीवोति
ष्ठांश्च तिष्ठतिः शाक्रोऽपि च कर्त्ते
व्यमन्यथा कलहो भवेत् इति च
तिथ्यादितत्वं तस्य शुभजन
कत्वं यथा दाक्षिणात्यास्तु आ
सने शयने दाने भोजने वस्त्रसं
ग्रहे विवादे च विवादे च क्षुतं स
मस्तं शोभनं अन्यत्र विज्ञो रित्य
थि कुर्त्सविश्वधर्मोत्तरे नाम सं
कीर्त्तनं नित्यं क्षुत प्रस्खलिता
दिषु वियोगं शोकमाप्नोति स
र्वानर्थान संशयः इति॥
अतःसंवृधतस्तु क्षवस्य क्षतिविशेषो य
था विश्वधर्मोत्तरे नामसंकृतम
एः कुर्य्याद्धास्य जृम्भां तथा क्षु
ते इति क्षुते आचमनं कर्त्तव्यं

यथा याज्ञवल्क्यः स्नात्वा पीत्वा
क्षुते सप्तेभुक्त्वा रथ्योपसर्पणे आ
चान्तः पुनराचामेत् वासो विपरि
धाय च इति अपरार्कोऽस्मृतिः
क्षुते निष्ठीविते सप्ते परिधानेऽ
श्रुपातने कर्मस्थ एषुनाचामे
द्दक्षिणं श्रवणं स्पृशेत् इति
च उदाहृतत्वं वलिनां सकृत्
क्षुतं भवति यथा कुर्याद्दक्षिण
वक्रास्याहृलिनां च क्षुतं सकृत्
दक्षिणवक्रेति नाम्ना विशेषणं
इति च गारुडे ९६ अध्यायः॥
क्षुतः पुं क्षुतं इति शब्दर
त्नावली
क्षुतकः पुं राजिका इति
राजनिर्घण्टः॥
क्षुताभिजननः पुं कृष्णसर्षे
पः इत्यमरटीकायां स्वामी
क्षुतकरी स्त्री कंकालिका य
था भूर्जंगचारिणी स्तूरिः स
पातीक्षुतकरीस्पृहा इति।
शब्दचन्द्रिका॥
क्षुद ज ध ऊ इर क्षु
दि इति कविकल्पद्रुमः
ज ध क्षुणत्ति॥

लंने ऊेलोना इव अलदत् अहोमसीत् लदिचूर्णीकरणे इति दुर्गादासः ॥
लद स्त्री लधा इत्यमरः ॥
लदः पुं तंडुलादिचूर्णविकार इतिभाषा लदधातोः कादंतिककप्रत्ययेननिष्पन्नः ॥
लघुः पुं तंडुलावयवः इति। संक्षिप्तसारोणादिवृत्तिः उज्ज्वः इति शब्दरत्नावली ॥
लघुः त्रि कृपणः अधमः क्रूरः अल्पः इत्यमर मेदिनीकरौ दरिद्रः इति हेमचन्द्रः
लघुकंटकारी स्त्री अग्निदमनी इति राजनिर्घंटः ॥
लघुकंटकी स्त्री वृहती इति भावप्रकाशः लघुभंटाकीति चपाठः ॥ लघुकाखुः पुं लघुशंखः तत्पर्य्यायः शाखिनखः २ लालकः ३ इति भाषाः तत्पर्य्यायः कुडुंची २ श्रीफलिक ३ प्रतिपत्रफला ४ सुघवी ५ कारवी ६ वक्रफला ७

लघुकारलिका ८ कन्दफला ९ कन्दफलास्थाने कदलता इति च पाठः अस्याः गुणाः कटुत्वं उष्णत्वं तिक्तत्वं रुचिकारित्वं दीपनदत्वं रक्तानिलदोषकारित्वं पथ्यत्वंच तत्फलस्याप्येतेगुणाः तत्कन्दगुणाः अर्शोनाशित्वं मलरोधविशोधनत्वं योनिनिर्गतदोषगर्भस्राव विषापहत्वं च इतिराजनिर्घंटः ॥
लघुकारलिका स्त्री लघुकारवेल्ली इति राजनिर्घंटः
लघुकुलिशः पुं वैक्रान्तमणिः इति राजनिर्घंटः ॥
लघुगोक्षुरकः पुं गोक्षुरवृक्षभेदः छोटागोखरू इति हरिचिकार इति चहिन्दीभाषा तत्पर्य्यायः त्रिकंटकः २ कंटी ३ षडंगः ४ वक्रकंटकफलः ५ गोकंटकः ७ कंटफलः ८ पलंकषा ९ लघुलवः १० भक्तटकः ११ स्थलशृंगाटकः १२ वनशृंगाटकः १३ इक्षुगन्धः १४ स्वादुकंटः १५ अस्यगुणाः सुशीतलत्वं बलप्रदत्वं मधुरत्वं वृंहणत्वंकृ

रसायनत्वं तत्र वृहतो गुणोऽधिकत्वंच इति राजनिर्घंटः लघुचेटिका स्त्री कम्पालंकारविशेषः चाबर इति घुंगुरु इति च भाषा तत्पर्य्यायः किंकिणी २ इत्यमरः लघुघंटी ३ प्रतिसराघघ्रद्रघंटी किंकिणिका ५ कंकणी ६ कंकणिका ७ लघ्विका ८ इति शब्दरत्नावले चर्चरी ९ इति जटाधरः ॥
लघुघोली स्त्री चिविलिकाख्यः इति राजनिर्घंटः ॥
लघुचंचुः स्त्री क्षुपविशेषः तत्पर्य्यायः चंचूः २ चंचूः ३ ग्रुनकचंचुका ४ त्वक्सारभेदिनी ५ लघ्वी ६ कटुका ७ कटुपत्रिका ८ अस्यागुणाः मधुरत्वं कटुत्वं उष्णत्वं कषायत्वं दीपनत्वं शूल गुल्मार्शोविबन्धनाशित्वंच इति राजनिर्घंटः सल्लोपरक्षु ॥
लघुचन्दनं क्ली रक्तचंदनं इति राजनिर्घंटः लघुचिर्भिटा स्त्री गोपालकर्कटी इति राजनिर्घंटः

लघुचूडः पुं पक्षिविशेषः ॥ गोसालिक इतिभाषा यथाशवमलः लघुचूडो गृध्रलक्ष्मसालिकः इति शब्दचन्द्रिका
लघुजंवः पुं गालपदी इति शब्दमाला स्वल्पमात्रिमात्रेच लघुजातीफलं क्ली आमलकं इति राजनिर्घंटः लघुजीवकः पुं स्वल्पजीरकः लवदियाजीरा इति भाषा इति शब्दचंद्रिका
लघुजीवा स्त्रीजीवंती इति राजनिर्घंटः लघुतलसी स्त्री अजेकः सत्ववर्वरीभेदः इति राजनिर्घंटः लघुदंशिका स्त्री स्वल्पदंशकः छोटाडाश इति भाषा यथा पतंगिका पुत्तिका स्यात् दंशस्तुवनमालिका माचिका चाल्पतज्जातिदंशी स्यात् लघुदंशिका इति जटाधरः लघुदुरालभा स्त्री स्वल्पदुरालभावृक्षः तत्पर्य्यायः मरुस्था २ मरुसंभवा ३ विशारदा ४ अजभक्षा ५ अजादनी ६ उष्णभतिका ७ कषाया ८ कच्छिरुहा ९ ग्राहिणी १० करभप्रिया ११ करभादनिका १२ अस्यागुणाः गो



लवत्वं अम्लत्वं ज्वरकुष्ठश्वासका
सभ्रमनाशित्वं पारदशुद्धिकारि
त्वंच इति राजनिर्घंटः
क्षुद्रदुस्पर्शा स्त्री अग्निदमनी इ
ति राजनिर्घंटः॥
क्षुद्रनासिका त्रि स्त्री कर्कट
वृक्षः इति राजनिर्घंटः॥
क्षुद्रनासिकः त्रि स्वल्पनासायु
क्तः तत् पर्य्यायः नः क्षुद्रः २
इति हेमचन्द्रः॥
क्षुद्रपत्रा स्त्री चांगेरी इति
हारावली॥
क्षुद्रपत्री स्त्री वचा इति राज
निर्घंटः॥
क्षुद्रपनसः पुं लकुचः इति
राजनिर्घंट स्वल्पकंटाफलंच
क्षुद्रपर्णः पुं अर्जकः इति
राजनिर्घंटः सूक्ष्मपत्रेचित्र
क्षुद्रपाषाणभेदा स्त्री स्वल्पवि
शेषः क्षुद्रपाषाणभेदी इति
ख्याता तत् पर्य्यायः चतुः
पत्री २ पार्वती ३ नगभूः ४
अश्मकेतुः ५ गिरिभूः ६ कन्द
रोद्भवा ७ शैलोद्भवा ८ गिरि
जा ९ नगजा १० अस्या गुणाः
व्रणकृच्छ्राश्मरीहरत्वं॥ ॥॥

इति राजनिर्घंटः
क्षुद्रपिप्पली स्त्री वनपिप्पली
इति राजनिर्घंटः॥
क्षुद्रपोतिका स्त्री मूलपोती
इति राजनिर्घंटः॥
क्षुद्रफलकः पुं जीवनवृक्षः
इति शब्दचन्द्रिका॥
क्षुद्रफला स्त्री भूमिजम्बूः इ
ति शब्दमाला इन्द्रवारुणी गो
पालकर्कटी कंटकारी अग्निद
मनी इति राजनिर्घंटः क्षुद्रमु
स्ता स्त्री कसेरुः इति राजनि
र्घंटः॥
क्षुद्रवंशा स्त्री वराहक्रान्ता।
इति केचित्॥
क्षुद्रवर्वणा स्त्री वरदा इति
राजनिर्घंटः॥
क्षुद्रवल्ली स्त्री मूलपोती इति
राजनिर्घंटः॥ क्षुद्रवार्त्ताकी।
स्त्री वृहती इत्यमरः॥
क्षुद्रवार्त्ताकिनी स्त्री श्वेतकं
टकारी इति राजनिर्घंटः॥ क्षु
द्रशंखः पुं स्वल्पशंखजातिः
जोंगड़ा इति भाषा तत् पर्य्या
यः शंखनखः २ इत्यमरः
शंखनकः ३ इति॥ ॥ ॥

नदीका क्षुल्लकः ४ शंबूकः
५ भपृशंखकः ६ अस्य गुणाः
कटुत्वं तिक्तत्वं शूलहरत्वं
दीपनत्वंच इति राजनिर्घंटः
क्षुद्रशर्करा स्त्री यावनाल
शर्करा इति राजनिर्घंटः
क्षुद्रशार्दूलः पुं चित्रव्याघ्रः
इति राजनिर्घंटः॥
क्षुद्रशीर्षः पुं मयूरशिखावृ
क्षः इति शब्दचन्द्रिका
क्षुद्रशुक्तिः स्त्री जलशुक्तिः
इति राजनिर्घंटः॥
क्षुद्रश्यामा स्त्री कटभी इति
राजनिर्घंटः
क्षुद्रश्लेष्मान्तकः पुं भूकर्बुदा
रकः इति राजनिर्घंटः॥
क्षुद्रसहा स्त्री मुद्गपर्णी इन्द्र
वारुणी इति राजनिर्घंटः॥
क्षुद्रसुवर्णं क्ली रीतिः इति
राजनिर्घंटः क्षुद्रहिंगुलिका
स्त्री कंटकारी इति शब्दचन्द्रिका
क्षुद्रा स्त्री व्यंगा नटी वेश्या स
रघा कंटकारिका इत्यमरः चां
गेरिका हिंस्रा मक्षिकामात्रं इति
हेमचन्द्रः बादरला इति शब्द

रत्नावली गवेधुका इति र
त्नमाला॥
क्षुद्राग्निमन्थः पुं दशमूलेम
सिद्धवृक्षविशेषः छोटागणि
यारि इति हिन्दीभाषा तत् पर्य्या
यः तपनः २ विजया ३ गणि
कारिका ४ अरणिः ५ लघुमं
थः ६ तेजोवृक्षः ७ नवत्वच् ८
अस्य गुणाः अग्निमन्थद्वयंचैव
तत्सवीर्य्यरसादिषु तत्प्रयोगा
नुसारेण योजयेत्सुमनीषया
इति राजनिर्घंटः क्षुद्राण्डमत्
स्यसंघातः पुं पोनाधानं पोना
इति भाषा इत्यमरः क्षुद्रापा
मार्गः पुं रक्तापामार्गः इति
राजनिर्घंटः क्षुद्रामलकं क्ली
आमलकं काठआमला इति
भाषा इति राजनिर्घंटः
क्षुद्राम्लकसंज्ञः
पुं कर्क्कटवृक्ष
इति
राजनिर्घंटः॥ क्षुद्राम्लः
पुं कोषाम्रः इति राज
निर्घंटः॥
क्षुद्राम्लपनसः पुं लकुचः
इति त्रिकांडशेषः॥ ॥॥

ल्पत्वं अम्लत्वं ज्वरकुष्ठश्वासका-
सभ्रमनाशित्वं पारदशुद्धिकारि-
त्वंच इति राजनिर्घंटः
लघुदुःस्पर्शा स्त्री अग्निदमनी इ-
ति राजनिर्घंटः ॥
लघुनासिकाः त्रि स्त्री कर्कट-
वृत्तः इति राजनिर्घंटः ॥
लघुनासिकः त्रि स्वल्पनासायु-
क्तः तत् पर्यायः नः लघुः २
इति हेमचन्द्रः ॥
लघुपत्रा स्त्री चांगेरी इति
हारावली ॥
लघुपत्री स्त्री वचा इति राज-
निर्घंटः ॥
लघुपनसः पुं लकुचः इति
राजनिर्घंट स्वल्पकंटाफलत्व
लघुपर्णः पुं अर्जकः इति
राजनिर्घंटः स्थूलपत्रेचित्र
लघुपाषाणभेदा स्त्री लघुपवि-
शेषः लघुपाषाणभेदी इति
ख्याता तत् पर्यायः चतुः-
पत्री २ पार्वती ३ नगभूः ४
अश्मकेतुः ५ गिरिभूः ६ कन्द-
रोद्भवा ७ शैलोद्भवा ८ गिरि-
जा ९ नगजा १० अस्याः गुणाः
व्रणकृच्छ्राश्मरीहरत्वं ॥ ॥॥

इति राजनिर्घंटः
लघुपिप्पली स्त्री वनपिप्पली
इति राजनिर्घंटः ॥
लघुपोतिका स्त्री मूलपोती
इति राजनिर्घंटः ॥
लघुफलकः पुं जीवनवृक्षः
इति शब्दचन्द्रिका ॥
लघुफला स्त्री भूमिजम्बूः इ-
ति शब्दमाला इन्द्रवारुणी गो-
पालककर्कटी कंटकारी अग्निद-
मनी इति राजनिर्घंटः लघुमू-
ला स्त्री कसेरुः इति राजनि-
र्घंटः ॥
लघुवंशा स्त्री वराहक्रान्ता।
इति केचित् ॥
लघुवर्वणा स्त्री वरटा इति
राजनिर्घंटः ॥
लघुवल्ली स्त्री मूलपोती इति
राजनिर्घंटः ॥ लघुवार्त्ताकी।
स्त्री बृहती इत्यमरः ॥
लघुवार्त्ताकिनी स्त्री श्वेतकं-
टकारी इति राजनिर्घंटः ॥ ल-
घुशणवः पुं स्वल्पशणवृक्षजातिः
जोंगड़ा इति भाषा तत् पर्या-
यः शणवनाबः २ इत्यमरः
शणवनकः ३ इति ॥ ॥ ॥

तट्टीका लत्तकः ४ शांबूकः
५ भयशांबकः ६ अस्य गुणाः
कटुत्वं तिक्तत्वं शूलहरत्वं
दीपनत्वंच इति राजनिर्घंटः
लघुशर्करा स्त्री यावनाल-
शर्करा इति राजनिर्घंटः
लघुशाहलः पुं चित्रव्याघ्रः
इति राजनिर्घंटः ॥
लघुशीर्षः पुं मत्स्यशिवाह्व-
तः इति शब्दचन्द्रिका
लघुशुक्तिः स्त्री जलशुक्तिः
इति राजनिर्घंटः ॥
लघुश्यामा स्त्री कटभी इति
राजनिर्घंटः
लघुश्लेष्मातकः पुं भूकर्बुदा-
रकः इति राजनिर्घंटः ॥
लघुसहा स्त्री मुद्गपर्णी इन्द्र-
वारुणी इति राजनिर्घंटः ॥
लघुसुवर्णा स्त्री रीतिः इति
राजनिर्घंटः लघुहिंगुलिका
स्त्री कंटकारी इति शब्दचन्द्रिका
लघ्वी स्त्री गंगा नदी वेषणास-
रया कंटकारिका इत्यमरः चां-
गेरिका हिंस्रा मक्षिकामात्रं इति
हेमचन्द्रः वादरता इति शब्द-

रत्नावली गवेधुका इति र-
त्नमाला ॥
लघ्वग्निमन्थः पुं दशमूलेप्र-
सिद्धवृक्षविशेषः छोटागणि-
यारि इति हिन्दीभाषा तत् पर्या-
यः तपनः २ विजया ३ गणि-
कारिका ४ अरणिः ५ लघुमं-
थः ६ तेजोवृक्षः ७ नतुत्वच् ८
अस्य गुणाः अग्निमंथद्वयंचैव
तुल्यवीर्यरसादिषु तत्प्रयोगा-
नुसारेण योजयेत्सुमनीषया
इति राजनिर्घंटः लघ्वण्डमत्-
स्यजातः पुं पोताधानं पोना
इति भाषा इत्यमरः लघ्वपा-
मार्गः पुं रक्तापामार्गः इति
राजनिर्घंटः लघ्वामलकं क्ली
आमलकं काठआमला इति
भाषा इति राजनिर्घंटः
लघ्वामलकसंज्ञः
पुं कर्कटवृक्ष
इति
राजनिर्घंटः ॥ लघ्वाम्रः
पुं कोषाम्रः इति राज-
निर्घंटः ॥
लघ्वाम्रपनसः पुं लकुचः
इति त्रिकांडशेषः ॥ ॥॥

क्षुद्राम्ला स्त्री अम्ललोणिका
यथा वहुपत्रा च चांगेरीक्षु
द्राम्ला चाम्ललोणिका इति
हारावली पाषांडुली इति रा
जनिर्घण्टः ॥
क्षुद्राम्लिका स्त्री वृक्षविशे
षः आवषति इति आवता इति
वहिन्दीभाषा तत्पर्य्यायः॥
चांगेरी २ चुक्रापत्री ३ चु
क्रिका ४ लोणाम्ला ५ चतुः
पत्री ६ लोणा ७ वोप्पा ८
अम्लपत्रिका ९ अम्लष्ठा १०
अम्लवती ११ अम्ला १२ दन्तश
ठा १३ शाकाम्ला १४ अस्य
अम्लत्वं उष्णत्वं वह्निवर्द्धनत्वं
रुचिकारित्वं ग्राहित्वं दोषदु
णाम कफनाशित्वं च इति
राजनिर्घण्टः
क्षुद्रिका स्त्री दंशः इति
राजनिर्घण्टः क्षुद्रेंगुदी स्त्री यवासः
क्षुद्रैर्वारुः पुं गोपालकर्क
टी इति राजनिर्घण्टः ॥
क्षुद्रोडुम्बरिका स्त्री काको
डुम्बरिका इति राजनिर्घ
ण्टः क्षुद्रोपोदकनाम्नी स्त्री
मूल ॥ ॥ ॥ ॥ ॥

पोती इति राजनिर्घण्टः ॥
क्षुद्रोपोदकी स्त्री स्वल्पपत्रिका
शाकः तत्पर्य्यायः सूक्ष्मप
त्रा २ मंटपी ३ अस्या गुणाः
रसवीर्य्य विपाकेषु महत्यैस
वैयास्यं सूक्ष्मया उपोदकया
इति राजनिर्घण्टः ॥
क्षुद्रोलूकः पुं डुडुलः इति
राजनिर्घण्टः
क्षुध ९ यजोत्रदि इति कवि
कल्पद्रुमः क्षुद्गतणेच्छा ९
अक्षुधत् यत्त्वयान्नं बुभुक्षि
तं जौद्धा इति दुर्गादासः
क्षुधा स्त्री भोजनेच्छा इति
दुर्गादासः अभ्यवहारजिही
र्षा इति यादेवी सर्वभूतेषु
क्षुधारूपेण संस्थिता इति दे
वीमहात्म्यटीकायां नागोजी
भट्टः तत्पर्य्यायः अश
नाया २ बुभुक्षा ३ क्षुत् ४
इत्यमरः शब्दरत्नावलीच जिघत्स
सा ५ इति जटाधरः तत्कार्य्या
णि यथा व्याधयो निर्जितास्सर्वे क्ष
यथा रूपसत्तम कुंडली मुकुटी स्र
ग्वी तथैवालंकृतो नरः क्षुधार्त्तो न
विराजेत प्रेतवत् क्षुधितो नृणा

स्त्रीरत्नं विविधान् भोगान् व
स्त्राण्याभरणानि च नचेच्छति
नरः किंचित् क्षुधया कलुषी
कृतः यथा भूमिगतं तोयं रवि
रश्मिभिः शुष्यति शरीर
स्थस्तथा धातुः शुष्यते जाठरा
ग्निना नशृणोति नचाघ्राति
चक्षुषा न च पश्यति हसन्ने
वेपते मूढः शुष्यते च क्षुधा
र्द्दितः मूकत्वं वधिरत्वं च ज
डान्धत्वं च पंगुता रौद्रं मर्य्याद
हीनत्वं क्षुधा सर्वं प्रवर्त्तते भ
गिनीं जननीं पुत्रं भार्य्यां दुहि
तरं तथा भ्रातरं स्वजनं वापि
क्षुधाविष्टो न विंदति इति व
ह्निपुराणे प्रेतोपाख्यानं नामा
ध्यायः क्षुधाकुशलः पुं वि
ल्वान्तरवृक्षः इति राजनिर्घण्टः
क्षुधातुरः त्रि क्षुधापीडितः
यथा अर्थातुराणां न सुहृन्न
वन्धुः कामातुराणां न भयं न
लज्जा चिन्तातुराणां न सुखं
न निद्रा क्षुधातुराणां न बलं न
तेजः इति गारुडे ११८ अध्या
यः क्षुधाभिजननः पुं राजिका

इत्यमरः क्षुधाजनकद्रव्यमा
त्रे त्रि
क्षुधितः त्रि क्षुधान्वितः तत्प
र्य्यायः बुभुक्षितः २ जिघत्सुः ३
अशनायितः इत्यमरः
क्षुधुनः पुं म्लेच्छभेदः इत्युणा
दिकोषः
क्षुप सादे इति कविकल्पद्रुमः
सौत्रधातु रयं क्षुपः इति दुर्गा
दासः ॥
क्षुपः पुं ह्रस्वशाखाशिफः
वटवृक्षः इत्यमरः
क्षुपाम्लुः पुं पानीयाम्लः इति
राजनिर्घण्टः ॥
क्षुपः इति राजनिर्घण्टः
क्षुब्धः पुं मंथानदंडः इति हे
मचन्द्रः षोडशारनिवन्धान्नगो
नैकादशावन्ध्यः यथा पाशुप
तिपदे कृत्वा योनौ लिंगेन ता
डयेत् वाजपेयं धारणं गाढ
वंधो वै क्षुब्धसंज्ञकः इति र
तिमंजरी त्रि
भवितोऽस्मि त्रि क्षुभ ९ ङ
संचलने इति कविकल्पद्रु
मः ९ अक्षुभत् ङ क्षोभते
मानसजीविषु इति ॥ ॥ ४

हलायुधः इति दुर्गादासः
क्षुभ यग संचलने इति कवि
कल्पद्रुमः यत्क्षुभ्यतिरिपुश्चे
वेति हलायुधः गक्षुभ्नातिचुक्षो
भ इति दुर्गादासः क्षुभितः त्रि
भीतः इति हलायुधः संचलि
तः इति क्षुभ्यथा क्षुपदर्शना
त क्षुमा स्त्री अतसी इत्यमरः
शाणाः इति तट्टीकासारसु
न्दरी नीलिका इति मेदिनी।
लताभेदः इति शब्दरत्नाव
ली क्षुर छ विलेखने खनने
इति कविकल्पद्रुमः शाक्षुरा।
तिभुमिं लोकः क्षुरिता क्षु
रो लोमच्छेदनः
इति दुर्गादासः ॥
क्षुरः पुं कोकिलाक्षः इत्य
मरः शफं इति तट्टीका
छेदनद्रव्यं ॥
तत्तु नापितस्य लोमच्छेदका
स्त्रं गोक्षुरः
इति मेदिनी महापिंडीत
णः इति राजनिर्घंटः
खट्वादिपादुका क्षुरा इति
भाषा इति धरणिः ॥
क्षुरकः पुं तिलकवृक्षः इत्य
मरः कोकिलाक्षः गोक्षुरः
इति मेदिनी भूतांकुशः इति
राजनिर्घंटः स्वार्थे केक्षु
रश्च ॥
क्षुरकर्म्म क्ली क्षौरं यथायोज
न्ममासे क्षुरकर्म्म यात्रां कर्णस्य
वेधं कुरुतेच मोहात् नूनं स
रोगं धनपुत्रनाशं प्राप्नोति मू
ढो वधबन्धनानि ज्ञातं दिने ह
यते वशिष्टश्चाश्रीच गर्गोय
नोदशाहं जन्मात्र्यमास किल
भागुरिश्चचूडाकर्मे विवाहे क्षुर
कर्णवेधे देवकार्य्ये पितृश्रा
द्धे रवेर्रथापरितये क्षुविकर्म्म
न कुर्वीत जन्ममासेऽथ जन्मभे
इति तिथ्यादितत्वं ॥
क्षुरपत्रं पुं शरः इति राजनि
र्घंटः क्षुरतल्पपर्णयुक्ते त्रि॥
क्षुरपत्रिका स्त्री पालंकयशा
कं इति राजनिर्घंटः ॥
क्षुरप्रः पुं वाणविशेषः इ
ति हेमचन्द्रः क्षुरप्र नामकवा
सच्छेदनास्त्रंच क्षुरप्रगं क्ली क्षु
रप्रगं क्ली क्षुरप्रास्त्र इतिकेचि
त् क्षुरमर्द्दी पुं नापितः यथा

पुस्तकं लेप्यादिकर्म्म स्यात् ना
पित क्षौरिलः क्षुरी क्षुरमर्द्दी
दिवाकीर्त्ति मुंडकोः स्नावषा
ष्यति इति हेमचन्द्रः
क्षुरांगः पुं गोक्षुरकः इति
राजनिर्घंटः ॥
क्षुरिका स्त्री पालंक्यशाकं
इति राजनिर्घंटः ॥
क्षुरिका स्त्री पालंक्यशाकं
इति राजनिर्घंटः स्वल्पपात्र
विशेषः क्षुरी इतिभाषा क्षु
रिकापत्रं पुं शरः इति रा
जनिर्घंटः ॥
क्षुरिणी स्त्री वराहक्रान्ता इ
ति शब्दचन्द्रिका नापितभार्य्या
चक्षुरी पुं नापितः इत्यमरः
क्षुरी पुं नापितः इत्यमरः
क्षुरी स्त्री छुरिका इति हेम
चन्द्रः क्षुरीतिच पाठः क्षुल्लः
त्रि लघुः इहेमचन्द्रः क्षुल्लकः
त्रि क्षुद्रः इत्यमरः स्वल्पः नी
चकः कनिष्ठः दरिद्रः इति
भरतः पामरः दुःखितः खल
इति हेमचन्द्रः शब्दरत्नावल्यां
खिलक इतिच पाठः क्षुल्लकः पुं
क्षुद्रशंखः इति हेमचन्द्रः राज
निर्घंटश्च क्षुल्लतातः पुं पितृक
निष्ठभ्राता इति क्षुल्लतातकश
ब्ददर्शनात् शब्दरत्नावल्यां खुल्ल
तात इति पाठः क्षुल्लतातकः पुं
पितृव्यः खुडा इतिभाषा इति ज
टाधरः क्षेत्र क्ली भूमिः क्षेत इति
भाषा तत्पर्य्यायः वप्रं २ के
दारः ३ इत्यमरः वलजं ४ निष्कु
टः ५ राजिका ६ पाटीरः ७
इति जटाधरः तत् समूहवाच
कानि यथा कैदारकंत्र कैदा
र्य्यं क्षेत्रं कैदारिकं तथा वार
टंचेति पर्य्यायः क्षेत्रहूदेतिगद्य
ते इति शब्दरत्नावली तद्भेदाय
थाव्रीहिभवोचितं क्षेत्रं व्रैहेयं
तत् समोचितं शाल्युद्भवोचि
तं यत्तशालेयमभिधीयते य
व्यं यवकोचितं यष्टिकोद्भव
नं यत्तु षष्टिकीनत् प्रकीर्त्ति
तं तिलोद्भवोचितं यत्तु तिल्यं
तैलीनमित्यपि एवंमाषोत्त
माषीणं कोद्रव्यं कोद्र
वीणवत् तथा भंगंच
भांगीनं मूल्य मौमीनमि
त्यपि अष्य मौद्गीनंच मो
द्गीनमणव्य माणवीनव
त् माष॥



कोद्रव भंगोमा मुद्गाणसमभवो
वितं वीजाकृत समकृष्टम
तनीति समाक्षये सीतं कृष्ट
च हलंच तृतीयाकृतमित्यपि
त्रिगुणाकृत मित्येव त्रिवारकृ
ष्टभूमिषु शम्बाकृतं द्वि हलं
च द्वितीयं द्विगुणाकृतं द्वि
तीयाकृत मप्यत्र द्विवारकृ
ष्टभूमिषु द्रोणाढक खार्य्या
देर्वापादौ द्रौणिक खार्या स्या
दाढकिक खारीकौ उत्तमर्णा
दय स्त्रिषु आदिभ्यां मास्यि
कादिषु पाकादौ द्रौणिकापि
च इति च शब्दरत्नावली ॥
परक्षेत्रे गोचारणकथननिषेधो
यथा न कुर्य्यात् सह वैराणि
विवादं न च पैशुनं परक्षेत्रे
गां चरंतीं न च चक्षीत कस्यचि
त् इति कूर्म्मपुराणे उपरि
भागे १५ अध्यायः अपिच
मनुः आत्मनो यदि वान्येषां
गृहे क्षेत्रेऽथवा खले भक्षयंतीं
न कथयेत् पिबंतं चैव वत्स
कं इति प्रायश्चित्ततत्वे तत्रस्य
जलगुणाः केदारं मधुरं प्रो
क्तं विपाके गुरुदोषलं
इति राजवल्लभः ॥ ॥ ॥

अथ सिद्धक्षेत्राणि तत्र वाराण
सीक्षेत्रं यथा ॥
आसन्ने प्रवयोः क्षेत्रमिदं
वाराणसी त्वयत् कथितेना
ति दूरेव वर्त्तते ऽस्मत्समैमा ॥
इति कामरूपक्षेत्रं यथा नाति
शन् कामदं रूपं क्षेत्रं पीठं
निगद्यते चेरात् कामदो दे
वो न चिरायत्र ज्ञानदः तत्
क्षेत्रमिति लोके यज्ञायते स
र्वसूरिभिः कामरूपं महापी
ठं गुह्याद्गुह्यतमं परं इति
च कालिकापुराणे ५० अध्या
यः गंगाक्षेत्रं यथा स्कान्दे
तीरात् गव्यूतिमात्रं तु परितः
क्षेत्रमुच्यते नारायणक्षेत्रं य
था प्रवाहमवधिं कृत्वा या
वद्धस्तचतुष्टयं तत्र नाराय
णः स्वामी गंगागर्भान्तरे वरे
तत्र नारायणक्षेत्रे कुरुक्षेत्रे ह
रेः पदे पतेषन्योषु योदाने प्र
तिग्रहानि कामतः सच ती
र्थप्रतिग्राही कुम्भीपाकं प्रया
ति च इति ब्रह्मवैवर्त्ते प्रकृतिखं
डे ३७ अध्यायः भास्करक्षेत्रं यथा गं
गायां भास्करक्षेत्रे मातापित्रोर्ह्यतेर्गु
रो

आधाने सोमपाने च वपने
मष्टसु स्मृतं इति स्मृति समुच्चय
लिखितवचनं भास्करक्षेत्रं
प्रयागः इति प्रायश्चित्ततत्वं
गयाक्षेत्रं यथा पंचक्रोशं
गयाक्षेत्रं क्रोशमेकं
गया शिरः इति वायुपुराणं
पुरुषोत्तमक्षेत्रं यथा मुनय
ऊचुः पुरुषोत्तमाख्यं सम
हत् क्षेत्रं परमपावनं इत्यादि
जैमिनिरुवाच पतत् क्षेत्रवरं
वास वपुर्भूतं महात्मनः स्वयं
वपु वपुष्मान् यत्रास्ते स्वना
म्ना प्रथितं दितं इत्युत कल
खंडे विष्णुक्षेत्राणि यथा
श्री भगवानुवाच शृणुष्वावहि
तो वत्स गुह्यनामानि मेऽधुना
क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि
यत्नतः कोकामुखे वराहं च म
न्दरे मधुसूदनं अनंतं कपि
लद्वीपे प्रभासे रविनन्दनं मा
ल्योदपाने वैकुंठं महेन्द्रे तु नृप
त्मकं ऋषभेतु महाविष्णुं द्वार
कायांतु भूपतिं पांडुसह्ये तु दे
वेशं वसुकुंडे जगत्पतिं वन्दी
वने महायोगं चित्रकूटे नराधिपं

पं नैमिषे पीतवासं च गवां निष्क्र
मणे हरिं शालग्रामे तपोवासं
अचिंत्यं गन्धमादने ॥
कुब्जाम्रके हृषीकेशं गंगाद्वा
रे गदाधरं गरुडध्वजं तोषके
च गोविन्दं नारमाकेये वृ
न्दावने तु गोपालं मथुरायां
स्वयंभुवं केदारे माधवं वि
द्यात् वाराणस्यां तु केशवं पु
ष्करे पुष्कराक्षं तु दृषद्वत्यां जय
ध्वजं तृणविन्दुवने वीरमशोकं
सिन्धुसागरे केशे वटे महाबा
हुममृतं तेजसो वने विश्वावे
सूर्य्ये विश्वेशं नारसिंहं वने वने
लोहाकुले रिपुहरं देवशाले त्रि
विक्रमं पुरुषोत्तमं दशपुरे कु
ब्जके वामनं विदुः विद्याधरं वि
तस्तायां वाराहे धरणीधरं दे
वदारुवने गुह्यं कावेर्यां ना
गशायिनं प्रयागे योगमूर्त्तिं
च पयोष्ण्यां सुन्दरं विदुः
कुमारतीर्थे कौमारं लोहिते
हयशीर्षकं उज्जयन्यां त्रिविक्र
मं विद्यात् लिंगस्फोटे च
तुर्भुजं हरिहरं तु गह्वायां दृ
ष्ट्वा पापात् प्रमुच्यते ॥



विष्णुरूपं कुरुक्षेत्रे मणिकुंडे
हलायुधं लोकतीरे मयोध्या
यां कुंडिनेरुक्मिणीपतिं भ
जीरेवासुदेवंच चक्रतीर्थेसु
दर्शनं ग्रायंविष्णुपदेवियात्
सूकरे सूकरं विद्रुः विद्रुः कु
ब्जेएम्रानसैनीर्थेदंडकेश्याम
लं विद्रुः त्रिकूटेनागमोक्षंचमे
रुपृष्टेचभास्करं विरजे इष्ट
मत्याया वालवामीकरेविद्रुः य
शास्करं विपाशायां माहिष्मत्यां
हुताशनं तीराद्रौ पद्मनाभंच
विमलेचसनातनं शिवनद्यांपि
वकरं गयायांच गदाधरं स
र्वत्र परमात्मानंयः पश्यति स
मुच्यते अष्टषष्टिस्तुनामानि।
कीर्त्तितानि मया तव क्षेत्राणि
चैवपुण्यानि कथाशक्त्या क्षेत्रा
णिचनानिमानवैः वैसवेस्तु वि
शेषेण तेषां मुक्तिं ददाम्यहं
इति नारसिंहे ६२ अध्यायः
मेषादिद्वादशराशिः यथा रा
शिनामानिच क्षेत्रं भमृक्षं गृ
हनामच मेषादीनांच पर्य्या
यलीकादेवविचिंतयेत् अ
हाणां क्षेत्राणियथा कुजस्य
बुधेन्द्रके सौम्य शुक्राववनीभूवां
जीवार्किभावृजेज्यानां क्षेत्राणि
स्युरजादयः इति ज्योतिस्तत्वे
अपिच मेष मंगारक क्षेत्रं वृ
षं शुक्रस्यकीर्त्तितं
मिथुनस्य बुधोक्षेयः सोमः क
र्कटकस्यच सूर्यक्षेत्रं भवेत्
सिंहः कन्या क्षेत्रं बुधस्यच धनुः
सुरगुरोश्चैवशनेर्मकर कुंभकौ
मीनः सुरगुरोश्चैवग्रह क्षेत्रं म
कीर्त्तितं इतिगरुडे ८० अध्या
यः शरीरं सिद्धस्थानं कलत्र
इति मेदिनी ॥

अथ क्षेत्रव्यवहारो लिख्यते
तत्र भुज कोटि कर्णानामन्य
तमे ज्ञाते अन्यतमयो र्ज्ञानाय
करणसूत्रं वृत्तद्वयं इष्टाद्बाहो
र्यः स्यात् तत्स्पर्द्धिन्यां दिशी
तरो वाहुः त्र्यस्रेचतुरस्रेवासा
कोटिः कीर्त्तिता तत्कृतिं तत्
कृत्यो र्योगपदं कर्णो दोः कर्ण
वर्गयो र्विवरात् मूलं कोटिः
कोटिश्रुतिकृत्योरंतरात् पदं
वाहुः उदाहरणं कोटि श्रुत
द्वयं यत्र दोस्त्रयं तत्र का कृतिं
कोटिं दोः कर्ण॥ ॥

तः कोटिश्रुतिभ्यांचभुजं वद
न्यासः ४ ३ कोटिः ४ भु
जः ३ भुजवर्गः ९
कोटिवर्गः १६ त
योः योगात् २५ मूलं ५
कर्णोजातः ॥

अथकर्णभुजाभ्यां कोट्यानयनं
न्यासः ५ ३ कर्णः ५ भुजः ३
अनयोर्वर्गा
न्तरं १६
एतन्मूलं कोटिः ४

अथकोटिकर्णाभ्यां भुजानयनं
न्यासः ४ ५ कोटिः ४ कर्णः
५ अनयोर्वर्गान्त
रं ९ एतन्मू
लं भुजः ३

प्रकारांतरेण तज्ज्ञानाय कर
णसूत्रं सार्द्धवृत्तं राश्योरंत
रवर्गेण द्विघ्नेघाते युते तयो
र्वर्गयोगो भवेदेवं तयोर्योगांत
राहतिः वर्गांतरं भवेदेवं ज्ञेयं
सर्वत्र धीमता
कोटि श्रुतद्वय मिति पूर्वक्तो
दाहरणे॥

न्यासः ४ ३ कोटिः ४ भु
जः ३ अनयो
र्घाते १२ द्वि
घ्ने २४ अ
न्तरवर्गेण १ युतेवर्गयोगः २५
अस्यमूलं कर्णः ५

अथकर्णभुजाभ्यां कोट्यानयनं
न्यासः ५ ३ कर्णः ५ भुजः
३ अनयोर्योगः
८ अन्तरंतयोः २ ॥
नेन ८ हतो वा १६ वर्गां
तरं अस्य मूलं कोटिः ४ अ
थ भुजज्ञानं न्यासः ४ ५ कोटिः ४ क
र्णः ५ एवं जातो भु
जः ३

उदाहरणं सांघ्रित्रयमितो बाहु
र्यत्र कोटिश्च तादृशी तत्रक
र्णप्रमाणं किं गणक ब्रूहि
मेद्रुतं
न्यासः १३/४ १३/४ भुजः १३/४ को
टिः १३/४ अ
तयो र्वर्गयोर्योगः १६९ अ
स्यमूलाभावात् /४

करणीगतएवायं कर्णः
असन्नमूलज्ञानार्थं मुपायः
वर्गेण महतेष्टेन हताच्छेदा
शयो र्यथात् पदं गुणपद
तुल्यच्छिद्र्कं निकटं भवेत्॥
इयं कर्णकरणी १६९ असाः
                  ८
छेदांशघातः १३५२ अयुत
घ्न १३५२०००० असन्नमूलं
३६७७ इदं गुणमूलं १००
गुणितछेदेन ८०० भक्तं ल
ब्धमासन्नपदं ४ भागाः ४७७
अयंकर्णः एवं सर्वत्र॥
८००

त्र्यस्रजात्ये करणसूत्रं वृत्तद्व
यं इष्टो भुजोऽस्माद्द्विगुणेष्ट
निघ्नादिष्टस्य कृत्येकवियुक्त
याप्तं कोटिः पृथक् सेष्टगु
णा भुजोना कर्णो भवेत्त्र्यस्र
मिदं तु जात्यं इष्टो भुजस्तत् कृ
तिरिष्टभक्ताद्विः स्थापि तेष्टो
नयुतार्द्धिता वा तौ कोटिक
र्णाविति कोटिना वाबाऽस्फ्
तौ वाः करणीगतेस्तः
उदाहरणं भुजे द्वादशके यौ
यौ कोटि कर्णावनेकधा प्र
काराभ्यां वद क्षिप्रं ॥ ३॥

तौ तावत्करणीगतौ
न्यासः

१९ — २० — १२

इष्टो भुजः
१२ इष्ट २
अनेन द्वि
गुणेन ४
गुणितो भु
जः ४८ इष्टः।२। कृत्याथ ए
कोनया ३ भक्तो लब्धा कोटिः
१९ इयमिष्टगुणा ३८ भुजो
१२ ना जातः कर्णः २०॥
त्रिकोणेष्टेन वा।
न्यासः

९ — १५ — १२

कोटिः ९
कर्णः १५
पंचकेनवा


५ — १३ — १२

कोटिः ५
कर्णः १३
इत्यादि॥
अथ द्वितीयप्रकारेण॥
न्यासः

३५ — ३७ — १२

इष्टोभुजः १२
अस्यकृ
तिः १४४ इ
ष्टेन २ भक्ता
लब्धं ७२
इष्टेन २
ऊनं ७० ख
ना १४ वर्द्धिते

जातौ कोटिकर्णौ ३५ ३७
चतुष्टयेनवा




कोटिः १९
कर्णः २०

षट्केनवा।

९ — १५ — १२


कोटिः ९
कर्णः १५

अथेष्टकर्णात् कोटिभुजानय
ने करणसूत्रं वृत्तं।
इष्टेन निघ्नात् द्विगुणाच्च कर्णादि
ष्टस्य कृत्यैकयुजा यदाप्तं कोटिर्भ
वेत् सापृथगिष्टनिघ्नी तत् क
र्णयो रंतरमत्र बाहुः उदाहरण
पंचाशीतिमिते कर्णे यो याव
करणीगतौ स्यातां कोटिभुजौ
तौ तौ वद कोविद
सत्वरं
न्यासः
६८



कर्णः ८५ अ
ये द्विगुणः १७०
द्विकेनेष्टेन
हतः ३४० इष्ट
२ कृत्या ४ सैकया ५ भक्तो जाता
कोटिः ६८ इय


मिष्टगुणा १३६ कर्णा ८५
निता जातो भुजः ५१
चतुष्केणेष्टेन वा



कोटिः ४०
भुजः ७५

पुनः प्रकारांतरेण तत्कथन
सूत्रं वृत्तं॥
इष्टवर्गेण सैकेन द्विघ्नः कर्णो
थवा हृतः फलोनः श्रवणः
कोटिः फलमिष्टगुणं भुजः स्या
द्वौदाहरणे॥

कर्णः ८५
न्यासः
५१




अत्र द्वि
केने
ष्टेन जातौ
किल कोटिभुजौ ५१ ६८
चतुष्केण वा॥

७५ — ८५ — ४०


कोटिः ७५
भुजः ४० अत्र
दोः कोट्योर्भिन्न
भेद एव
केवलं नस्व
रूपभेदः॥
अथेष्टाभ्यां भुजकोटिकर्णान
यने करणसूत्रं वृत्तं॥

इष्टयो राहतिर्द्विघ्नी कोटिर्व-
र्गांतरं भुजः कृतियोग स्तयो-
रेवं कर्णश्चाकरणीगतः ॥ उदा-
हरणं येयैस्त्र्यस्रं भवेज्जात्यं
कोटिदोः श्रवणैः सखे ब्रू-
नद्य विदितानेनानन्त्रिमं कृदि
विचक्षण ॥



अत्रेष्टे २।१ आभ्यां कोटिभुजकर्णाः ४।३।५॥


अथवेष्टे २।३ आभ्यां कोटिभुजकर्णाः १२।५।१३ ॥



अथवा २।४। आभ्यां कोटिभुजकर्णाः १६।१२।२०।




एवमत्र ज्ञानेकधा ॥
कर्णकोटियुतौ भुजे च ज्ञाते पृ-
थक्करणसूत्रं वृत्तं । वंशाग्र-
मूलान्तरभूमिवर्गो वंशोद्धृत
दहृ भवतः क्रमेण वंशस्य ख-
ण्डे श्रुतिकोटिरूपे ॥ उदाहरणं । य-
दि समभुवि वेणुर्द्वित्रिपाणि-
प्रमाणो गणक पवनवेगादेक-
देशे सभग्नः । भुवि नृपमितहस्ते-
ष्वङ्गलग्नं तदग्रं कथय कतिषु
मूलादेष भग्नः करेषु ॥



वंशाग्रमूलान्तरभूमिः १६ ॥ वंशः ३२ कोटिकर्णयुतिः ३२ भुजः १६ ज्ञाते ऊर्ध्वाधः खण्डे २०।१२।

वाञ्छकर्णयोगे दृष्टे कोटौ च
ज्ञातायां पृथक्करणसूत्रं वृ-
त्तं स्तम्भस्य वर्गोऽहिबिलान्तरेण
भक्तः फलं व्यालबिलान्तरा-
लात् शोध्यं तदर्द्धप्रमितैः
करैः स्यात् बिलाग्रतो व्यालक-
लापियोगः ॥ उदाहरणं । अस्ति
स्तम्भतले बिलं तदुपरि ॥

क्रीडाशिखण्डी स्थितः स्तम्भे ह-
स्तनवोच्छ्रिते त्रिगुणिते स्तम्भ-
प्रमाणान्तरे दृष्ट्वाहिं बिलमात्र-
जन्तमपतत् तिर्यक् स तस्योप-
रि तन्मितेऽभ्यासनयोर्युतिः



स्तम्भः ९ अहिबिलान्तरं २७
ज्ञाता बिलयुतेर्मध्यहस्ताः १२
कोटिकर्णान्तरे भुजे च दृष्टे पृथ-
क्करणसूत्रं वृत्तं भुजाद्वर्गि-
तात् कोटिकर्णान्तराप्तं द्विधा
कोटिकर्णान्तरेणोनयुक्तं त-
दर्द्धं क्रमात् कोटिकर्णौ भवे-
तामिदं धीमता वेद्य सर्वत्र
योज्यं सखे पद्मनालजनस्या-
नमथ्यं भुजं कोटिकर्णान्त-
रं पद्मदृश्यं नलः वेदैवं
समानीय पानीयमानं उदा-
हरणं चक्रक्रौञ्चाकुलितस-
लिले क्वापि दृष्टं तडागे तो-
यादूर्द्धं कमलकलिकाग्रं
वितस्तिप्रमाणं मन्दं मन्दं
चलितमनिलेनाहतं ॥

तेनाहतं हस्तयुग्मे तस्मिन्मग्नं
गणकं कथय क्षिप्रमन्तः प्रमाणं

न्यासः १७/४ १५/४ २ १/२


कोटिकर्णान्तरं १/२ भुजः २ लब्धं जलगाम्भीर्यं १५/४ इयं कोटिः

१५/४ इयमेव कोटिः कलिका-
मानयुता जातः कर्णः १७/४
कोस्यैकदेशेन

युते कर्णे भुजे च दृष्टे कोटिक-
र्णज्ञानाय करणसूत्रं वृत्तं द्वि-
निघ्नतालोच्छ्रिति संयुतं यत्
सरोऽन्तरं तेन विभाजितायाः ता-
लोच्छ्रिते स्तालसरोन्तरघ्न्या
उड्डीयमानं खलु लभ्यते तत्
उदाहरणं वृक्षाद्धस्तशतोच्छ्रि-
याच्छतयुगे वापीं कपिः कोऽप्य-
गादुत्तीर्याथ परो द्रुतं श्रुति-
पथेनोड्डीय किञ्चिद्द्रुमात्
जातैवं समता तयोर्यदि गता-
वुड्डीयमानं कियद्विद्वन्
चेत् सुपरिश्रमोऽ-
स्ति गणिते क्षिप्रं तदा ॥
वदमे ॥




न्यासः



वृक्षवा
न्तरं
२००
इंकोच्छ्रा
यः १०० लब्धं सुडीनमानं ५०
कोटिः १५० कर्णः २५० भुजः
२००॥


भुजकोट्यो र्योगे कर्णे च ज्ञा
ते पृथक्करणसूत्रं वृत्तं क
र्णस्य वर्गाद्द्विगुणाद्विशोध्यो
दोःकोटियोगः स्वगुणोऽस्य मू
लं योगो द्विधा मूलविहीनयु
क्तः स्यातां तदर्द्धे भुज कोटि
माने उदाहरणं दश सप्ताधि
कः कर्णः सप्ताधिका विंशतिः
सखे भुजकोटियुति र्यत्र तत्र
ते मे पृथग्वद॥

न्यासः



कर्णः १७
दोःको
टियोगः
२३ जाते भुजकोटी ८।१५
उदाहरणं दोःकोट्योरन्त
रं शैलाः कर्णो यत्र त्रयो
दश भुजकोटी पृथक् तत्र
वदाशु गणकोत्तम॥


न्यासः



कर्णः १३
भुजको
ट्यन्तरं ७
लब्धे भुज
कोटी ५
१२

लम्बावबाधाज्ञानाय करणसूत्रं
वृत्तं अन्योन्यमूलाग्रगसूत्रयो
गाद्वेण्वो र्वधे योगहृते च
लम्बः वंशौ स्वयोगेन हृताव
भीष्टभूघ्नौ च लम्बोभयतः कु
खण्डे उदाहरणं पञ्चदशदश
करोच्छ्रायवेण्वो रज्ञातमध्यभू
मिकयोः इतरेतर मूलाग्रग
सूत्रयुते र्लम्बमान माचक्ष्व॥

न्यासः



वंशौ १५
।१०।
ज्ञातो लम्बः ६ वंशान्तरभूः ५
अत्र ज्ञाते भूखण्डे ३ २ अथ
वा भूः १० खण्डे॥

८।४। वा भूः १५ खण्डे ९।६।
वा भूः २०। खण्डे १२।८। एवं
सर्वत्र लम्बः स एव यत्र भूमितु
ल्ये भुजे वंशः कोटि स्तदा भू
ज्ये वंशः कोटि स्तदा भूखण्डेन कि
मिति त्रैराशिकेन सर्वत्र प्र
तीतिः॥
अथ क्षेत्रलक्षणे सूत्रं धृष्टो
द्दिष्टमृजुभुजं क्षेत्रं य
त्रैकबाहुतः स्वल्पा तदितर
भुजयुति रथवा तुल्या ज्ञेयं
तदक्षेत्रं उदाहरणं चतुरस्रे
त्रि षड्द्वर्का भुजास्त्र्यस्रे त्रिष
ण्नवाः उद्दिष्टा यत्र धृष्टेन त
दक्षेत्रं विनिर्दिशेत् एते अ
नुपपन्ने क्षेत्रे



भुजप्रमाण ऋजुशलाकाभि र्भु
जस्थानेषु विन्यस्तास्त्रनुपपत्ति र्द
र्शनीया॥
अथ बाधादिज्ञानाय करणसूत्रमा
र्याद्वयं त्रिभुजे भुजयोर्योग॥ ॥


स्तदन्तरगुणो भुवा हृतो ल
ब्ध्या द्विःस्था भू रूनयुता दलि
ताबाधे तयोः स्यातां स्वाबा
धाभुजकृत्यो रन्तरमूलं प्रजा
यते लम्बः लम्बगुणं भूम्यर्द्धं
स्पष्टं त्रिभुजे फलं भवति उ
दाहरणं क्षेत्रे मही मनुमिता
त्रिभुजे भुजौ तु यत्र त्रयोदश
तिथिप्रमितौ च यस्य तत्रावलं
बक मथो कथयावबाधे क्षि
प्रं तथा च समकोष्ठमितिं
फलाख्यां

न्यासः



लब्धे आबाधे ५।९ लम्बः १२
क्षेत्रफलं च ८४
ऋणाबाधोदाहरणं दशस
प्तदशप्रमौ भुजौ त्रिभुजे यत्र न
वप्रमा मही अबधे वद लम्बकं
तथा गणितं गणितिकाशु त
त्र मे॥

न्यासः



भुजौ
१०।१७।
भूमिः ९
अत्र त्रिभुजे भुजयो र्योगा
दिना लब्धं २१ अनेन॥

भूतुल्यानस्यात् अस्मादेव भूरप नीता शेषार्द्धं मृणगता वा धादिस्वैवपरीत्येन लम्बः तथा जाते आबाधे ९ । ५ अत उभ यत्रापि ज्ञातो लंबः ८ फलं ३२

चतुर्भुज त्रिभुजयो रस्पष्टस्पष्टफलानयने करणसूत्रं वृत्तं सर्वदो र्युतिदलं चतुःस्थितं बाहुभि र्विरहितं च तद्वधात् मूल मस्फुटफलं चतुर्भुजे स्पष्ट मेव मुदितं त्रिबाहुके उदाहरणं भूमिश्चतुर्दशमिता मुखं मंकसंख्यं बाहू त्रयोदश दिवाकरसम्मितौ च लम्बोपि यत्ररविसंख्यक एव तत्र क्षेत्रे फलं कथय तत् कथितं यदाद्यैः

न्यासः १३ ९ १२ १२ १४ भूमिः १४ मुखं ९ बाहू १२ । १३

उक्तवत् करणेन जातं क्षेत्रफलं करणी १९८०० अस्याः पदं किंचिन्न्यून मेकचत्वारिंशच्छतं १४१ इदमत्र क्षेत्रेवास्तवं फलं किंतु लम्बेन निघ्न कुमुखैक्यखण्ड मिति वक्ष्यमाणक ॥॥

करणेन वास्तवं फलं १२६ अत्र त्रिभुजस्य ह्युदाहृतस्य

न्यासः १३ १५ १२ ५ । ९ । १४ भूमिः १४ । भुजौ १३ ।

अनेनापि प्रकारेण त्रिबाहुके तदेव वास्तवं फलं ८४ अत्र चतुर्भुजस्यास्पष्टमुदितं ॥ अथ स्थूलत्वनिरूपणार्थं सूत्रं सार्द्धवृत्तं चतुर्भुजस्यानियतौ हि कर्णौ कथं ततोस्मिन् नियतं फलं स्यात् प्रसाधितौ तच्छ्रवणौ यदाद्यैः स्वकल्पितौ तावितरत्र न स्तः तेष्वेव बाहुष्वपरौ च कर्णौ अनेकधा क्षेत्रफलं ततश्च चतुर्भुजे हि एकान्तर कोणावाक्रम्यांतः प्रवेश्यमानौ तत्संसक्तं स्वकर्णं संकोचयतः इतरौ तु बहिः प्रसरंतौ स्वकर्णं वर्द्धयतः अत उक्तं तेष्वेव बाहुष्वपरौ च कर्णाविति लंबयोः कर्णयो र्वैकमनिर्दिश्यापरं कथं पृच्छत्यनियतत्वेपि नियतं चापि तत् फलं पृच्छकः पिशाचो वा वक्ता वा नितरां ततः यो न वेत्ति चतुर्भुज क्षेत्रस्यानियतां स्थितिं ॥

समचतुर्भुजायतयोः फलानयने करणसूत्रं सार्द्धश्लोकद्वयं इष्टा श्रुतिः तुल्यचतुर्भुजस्य कल्प्या च तद्वर्गविवर्जिता या चतुर्गुणा बाहुकृतिः तदीयं मूलं द्वितीयश्रवणप्रमाणं अतुल्यकर्णाभिहति द्विभक्ता फलं स्फुटं तत्समचतुर्भुजे च तथायते तद्भुजकोटिघातः चतुर्भुजेऽन्यत्र समानलम्बे लम्बेन निघ्नं कुमुखैक्यखण्डं अत्रोद्देशकः क्षेत्रस्य पंचकृतितुल्यचतुर्भुजस्य कर्णौ ततश्च गणितं गणक प्रवद तस्य क्षेत्रस्य तुल्यतत्स्य तथायतस्य यद्वि स्तृतीरसमिताष्टमितं च दैर्घ्यं प्रथमोदाहरणं ॥

न्यासः २५ २५ ४० ३० २५ २५

भुजाः २५ । २५ । २५ । २५ । अत्र त्रिंशन्मिता मेकां ३० श्रुतिं प्रकल्प्यानन्तरानीयते ।

करणेन जातान्या श्रुतिः ४० फलं च ६०० ॥

अथवा ॥

न्यासः ४८ २५ २५ २५ २५ २५

चतुर्दशमितामेकां १४ श्रुतिं प्रकल्प्योक्तवत् करणेन जातान्या श्रुतिः ४८ फलं च ३३६ द्वितीयोदाहरणे ।

न्यासः २५ २५

तत्कृत्यो र्योगपदं कर्ण इति जाता करणीगता श्रुतिः उभयत्र तुल्यैव १२५० गणितं च ६२५ अथायतस्य ॥

न्यासः ८ ६ ६ ८


विस्तृतिः ६ दैर्घ्यं ८ अस्य गणितं ४८ उदाहरणं क्षेत्रस्य यस्य ॥ ॥




वदनं मदनारिनखं विष्कंभ
ण द्विगुणितेन मुखेन तल्या
बाहू त्रयोदश नख सम्मितौ
च लंबः सूर्यान्मितस्य मणि
ते वदनत्र किं स्यात्॥



वदनं ११ विष्कंभण २२ बाहू
१२।२०। लंबः १२
अत्रसर्वदोर्युतिदलमित्यादिना
स्थूलफलं २५० वास्तवंत्वलंबे
ननिघ्नं कुमुखैक्याखंडमितिज्ञा
तेफलं १९८ क्षेत्रस्य खंडत्रयं
कृत्वास्य फलोपपत्तिं दर्शनीया
खंडत्रयदर्शनं॥



प्रथमस्य भुजकोटिकर्णाः ५
१२।१३। द्वितीयस्यायतस्य विस्त
तिः ९ दैर्घ्यं १२ तृतीयस्य भु
ज कोटिकर्णाः १६।१२।२०॥
अत्र त्रिभुजयोः क्षेत्रयोर्भुज
कोटिघाताद्धं फलं आयते
चतुरस्रे क्षेत्रे तद्भुज कोटिघा
तः फलं यथा प्रथमक्षेत्रे फलं
३० द्वितीये ७२ तृतीये ९६।
एषामैक्यं सर्वक्षेत्रफलं १९८
अथान्यदुदाहरणं पंचाशदेक
सहिता वदनं यदीयं भूः पंच
सप्ततिमिता प्रमितोऽष्टषष्ट्या
सव्यो भुजो द्विगुणविंशतिस
म्मितोऽन्यस्तस्मिन् फलं श्रवण
लंबमिती प्रचक्ष्व॥




अत्र फलावलंबश्रुतीनां सूत्रं
वृत्तार्द्धं।
ज्ञातेऽवलंबे श्रवणः श्रुतेर्वा
लंबः फलं स्यान्नियतं ततश्च।
कर्णस्यानियतत्वात् लम्बोऽप्य।

नियत इत्यर्थः॥
लंबज्ञानाय करणसूत्रं वृत्तार्द्धं
चतुर्भुजांतस्त्रिभुजे ऽवलंबः प्रा
ग्वत् भुजौ कर्णभुजौ महीभूः
अत्र लंबज्ञानार्थं सव्यभुजा
ग्राद्दक्षिणभुजमूलगामी इष्टः
कर्णः सप्तसप्ततिमितः ७७ क
ल्पित स्तेन चतुर्भुजांत स्त्रिभुजं
कल्पितं तत्रासौ कर्ण एको भु
जः ७७ द्वितीयस्तु सव्यभुजः
६८ भूः सैव ७५ अत्र प्राग्वद्दो
लंबः ७०८/५

लम्बे ज्ञाते कर्णज्ञानार्थं सूत्रं
वृत्ते यल्लंबलंबाश्रित बाहु
वर्गविश्लेषमूलं कथितावधाख्या
तद्रूनभूवर्गसमन्वितस्य यल्लंब
गस्य पदं स कर्णः॥
अत्रसव्यभुजाग्राल्लंबः किलक
ल्पितः ३०८/५ अतो जाताबाधा
१५४/५ तदूनभूवर्गसमन्वितेत्यादि
ना जातं कर्णः ७७
द्वितीयज्ञानार्थं सूत्रं वृत्तद्वयं
इष्टोत्रकर्णः प्रथमं प्रकल्प्य
स्तेन कर्णोभयतः स्थिते ये कर्णे
तयोः स्वाभिततरौ च बाहू प्रकल्प्य
लंबावबधे च साध्ये अबाधयोरेक

ककुप्स्थयोर्यत् स्यादंतरं तत्
कृतिसंयुतस्य लंबैक्यवर्गस्य प
दं द्वितीयः कर्णो भवेत् सर्वचतु
र्भुजेषु॥



तत्र चतुर्भुजे सव्यभुजाग्रात् द
क्षिणभुज मूलगामिनः कर्णस्य
मानं कल्पितं ७७ तत् कर्णरेखा
वच्छिन्नस्य क्षेत्रस्य मध्ये कर्णो
भयतो ये त्र्यस्रे उत्पन्ने तयोः
कर्णः भूमी तदितरौ च भुजौ
प्रकल्प्य प्राग्वल्लम्बः आबाधा
च साधिता तद्दर्शनं लंबः ६०
द्वितीयलंबः २४ आबाधयोः ४५
३२ एकककुप्स्थयोरंतरस्य १२
कृते १६९ लंबैक्य ८४ कृ
तेश्च ७०५६ योगः ७२२५
तस्य पदं द्वितीयकर्ण
प्रमाणं ८५॥
अत्रेष्टकर्णकल्पने विशेषो
क्तिः॥

मूत्रं सार्द्धहतं. कर्णाश्रितं स्व
स्वभुजैक्यसवीं प्रकल्प्यतल्लेय
मितौ च बाहू साध्यौ। वलंबो
ऽप्यनयाऽन्यकर्णः सोऽर्थः कथं
विक्षुवर्णेन दीर्घः तदन्यल
वात्रलघु स्तथेदं स्यात्वेष्टकर्णः
सुधिया प्रकल्प्यः चतुर्भुजे द्विप
कांतरकोणावाक्रम संकोच्य
माने त्रिभुजत्वं याति तत्रैक
कोणे लग्नलघुभुजयो रैक्यं
भूमिरितरौ भुजौ प्रकल्प्य साधि
ते स च लंवाह्वनः संकोच्यमानः
कर्णः कथंचिदपि न स्यात् यदि
तरौ भुजौ भुमे रधिकौ न स्यात्ता
मेवमुभयथापि एतदनुक्रम
पि बुद्धिमता ज्ञायते ॥
विषमचतुर्भुजफलानयनाय
करणसूत्रं वृत्तार्द्धं अस्ते लक
र्णाभयतः स्थिते ये तयोः फ
लैक्यं फलमत्र नूनं अनंतरो
क्त क्षेत्रांत स्त्र्यस्रयोः फले ९२४
२३१० अनयो रैक्यं ३२३४ त
स्य फलं समानलंवस्यावधा
दिज्ञानाय करणसूत्रं वृत्तद्व
यं समानलंबस्य चतुर्भुजस्य
मुखोनभूमिं परिकल्प्य भूमिं भु

जौ भुजौ त्र्यस्रवदेव साध्ये तस्मा
वधे लंवमिति स्फुटस्य अवाध
योना चतुरस्रभूमि स्तल्लंबगैक्या
पदं श्रुतिः स्यात् समानलंवे लघु
दोः कुयोगान्मुखोन्यदोः संगुणं
[illegible] स्यात् उदाहरणं
द्विपंचशन्मितत्र्यस्रदोः [illegible]
तौ भुजौ मुखं तु पंचविंशमितं
स्यं षष्ठा मही किल अत्रस्य
लंबकं क्षेत्रमिदं हार्दिरुदाहृतं
षट्पंचाशत् त्रिषष्टिश्च नियते
कर्णयो र्मितौ कर्णौ तत्राप
रौ व्रूहि समलंवं च तच्छ्रुती

६० २५ ५६
न्यासः ३९ ५२
६०

अत्र दृहत् कर्णं त्रिय
ष्टिमितं प्रक
ल्प्य ज्ञातः मावदन्यः कर्णः ५६
अथ षट्पंचाशत्स्थाने द्वात्रिं
शन्मितं कर्णं ३२ प्रकल्प्य प्रा
ग्वत् साध्यमाने कर्णौ ॥

२५
न्यासः ३९ ५२
३२ ६० ३९ २२/२५

जातं कर्णाविह द्वयं ६२॥

२७०० अनयो र्मूलयो २५ ५१ २२/२५ २४/२५
रैक्यं द्वितीयः कर्णः ७९ २२/२५

अथ तदेव क्षेत्रं चेत् समलंबं

२५
न्यासः ३९ ३८ २२/२५ ५२
४९ ६० ६१ २२/२५

तदा मुखोनभूमिं परिकल्प्य भू
मिमिति ज्ञानार्थं अस्तं कल्पितं
अत्र क्षेत्रे लंबाबाहारयोः षट्
शते पतिते ॥

न्यासः ५२ ३८ ३९
१७२ २५ ३/५

अत्राबाधे जाते ॥ ३/५ १७२/५

लंवश्च करणीगतो जातः
३८० १९ /२५ ३८
आसन्न मूलकरणेन जातः ३६२/६२५
अयं तत्र चतुर्भुजे समलंबाऽल
द्वावाधोनितसमभूमे र्लंवस्य च

वर्गयोगः ५०४९ अयं कर्णव
र्गः एवं वृहदावाधातो द्वितीय
कर्णवर्गः ३१७९ अनयोरास
न्नमूलकरणेन ज्ञातौ कर्णौ
७१ ५६ १/२ ४/२

एवं चतुरस्रे क्षेत्रे च वाहुश्च न्योक
र्णौ बहुधा भवतः एवमनियत
त्वेपि नियतावेव कर्णावानीतौ
ब्रह्मगुप्ताद्यैः स्तदानयनं यथा
कर्णाश्रितभुजघातैक्य मुभय
थान्येन भुजप्रतिभुज हत्योः कर्णौ
पदे विषमे ॥

न्यासः २५
५२ ६३ ३९
६०

कर्णाश्रितभुजघातेति प्रकवार
मनयो २५ ३९ घात ९७५ स्त
था ५२ । ६० तयो
र्घातः ३१२० घातयो र्द्वयो
रैक्यं ४०९५ तथा द्वितीयवारं
२५ ५२ अनयो र्घाते जात
१३०० तथा द्वितीयवारे ३९ ॥

६० अनयो र्घाते २३४० घातेया
र्वैयो र्वैक्यं ३९४० एतदैक्यं भु
जयो ५२ ३९ घातः २०२८ ए
स्मात् २५ ६० अनयो र्वधः १५००
भयोरैक्यं ३५२८ अनेनैक्येन २
८४० गुणितं जातं एवैक्यं १२३९
अस्यमूलं ५९ एककर्णः लब्धा द्वि
तीयकर्णार्घं प्रथमकर्णाश्रित
भुजघातैक्यं ४०९५
भुजं लब्धं ३१ ३९ अस्यमूलं ५९
एककर्णः अथवा द्वितीयकर्णार्घं
प्रथमकर्णाश्रितभुजघातैक्यं
४०९५ भुज प्रतिभुज ३५२८
वधयोगगुणितं जातं १४४४९
६० अन्यकर्णाश्रितघातैक्येन ३९
४० भक्तं लब्धं ३९ ९९ अस्यमू
लं ६३ द्वितीयः कर्णः अस्मिन्
विषमे क्षेत्रे कर्णौ साधने अस्य
कर्णानयनस्य प्रक्रिया गौरवं
लघुप्रक्रियादर्शनद्वारेणाह अ
भीष्टजात्यद्वयबाहुकोटयः प
रस्परं कर्णाहता भुजा इति च
तुर्भुजे यद्विषमं प्रकल्पितं
भुजौ तु तत्र त्रिभुजद्वयात
तः वास्तोर्वधः कोटिवधेन यु
कस्यादेको श्रुतिः कोटि
भुजा वधैक्यं ॥

क्यं अन्यात्वयौ सत्यपिसाधनेऽ
स्मिन् श्रुतिः कृते यद्गुरु त्रवि
मः ॥ जात्यक्षेत्रद्वयं

व्यासः
४

एतयो वितरेतर कर्णाहता भुजाः
कोटयः इतरेतर कर्णाहताः
कोटयो भुजा इति कृते जातं
२५ ६० ५२ ३९ तेषां
महती भूर्लघुर्व मितरौ बाहू
इति प्रकल्प क्षेत्रदर्शनं १
मो कर्णौ महतायासेनानीतौ
६३ ५९ अस्यैव जात्यद्वयस्यो
तरोत्तर भुजकोटयो र्घातौ जा
तौ ३९ । २० । अनयोरैक्यमे
कः कर्णः ५९ बाह्वोः ३५
कोट्योः ४ १२ घातौ
एवं लघुवेनजाते १५।४८।
अनयो रैक्यमन्यः कर्णः ६३
एवं श्रुती
स्यातां एवं लघुवेनजाते
अथ यदि पार्श्व
भुजयो र्व्यत्ययं
कृत्वा न्यस्तं क्षेत्रं ॥



तदा जात्यद्वयकर्णयोर्वधः ६५
द्वितीयकर्णः ॥

अथ सूचीक्षेत्रोदाहरणं
क्षेत्रे यत्र शतत्रयं ३०० क्षितिमि
तिर्वक्त्रं १२५ तत्र मुखं बाहू त्रयो
दशहृतिभिः २६० शराति धृतिभि
१९५ स्तत्रैव तत्र श्रुती पञ्चा
द्रोष्ट्यमैः २८० समानि थिगुणे
३१५ श्याधरलम्बकौ तत्सो गो
हृतिभि १८९ लब्धा जिनयमै
२२४ योगाद्व्यो लम्बयोः
तत्खंडे कथयाधरे श्रवणयो
र्योगाच्च लंबावधे तत सूची मि
जमार्ग हृद्ध भुजयो र्योगाद्यधा
स्यात्ततः स्यातथं वत लंबकं च
भुजयोः गणित
तिक प्रचक्ष्व नितरां क्षेत्रेऽत्र
दक्षोऽसि चेत्

सूच्याबाधा सूच्याबाधा
१५ ३९ ३५ ९४
६० ६०
भूमानं ३०० मुखं १२५ बाहू
२६० १९५ कर्णौ २८० ३१५
लंबौ १८९ २२४
अथ सन्धाप्याथानयनाय करणं
सूत्रं क्षेत्रद्वयं लंबतदाश्रित बा
ह्वो मध्यं सन्ध्याख्यमस्य लंब
स्य सन्ध्योनावधः पीठं साध्यं यस्मा
धोखंडे सन्धि द्विस्थः परलंबसं
वर्गाहतः परस्य पीठेन भक्ता
लंबश्रुत्यो र्योगात् स्यातां
मधः खंडे ॥
लंबः १८९ तदाश्रितभुजः
१९५ अनयो र्मध्ये यल्लंबलं
बाश्रितबाहुवर्गो इत्यादिना गता
वा ॥



यासन्धिसंज्ञा ४८ तद्भुनित
भुरिति द्वितीयावाधासा पीठ
संज्ञा २५२
एवं द्वितीयलंवः २२४ तदा
श्रितभुजः २९० पूर्ववत् स
न्धिः १३२ पीठं १९८
अथायलंवसाधः १६९ खंडं
साध्यं ॥
अस्य सन्धिः ४८ द्विस्थः ४८
परलंवेन २२४ अवगोनच २८०
एथग्गुणितः १०७५२। ३४४४०
परस्य पीठेन १९८ भक्तो लब्धं
लंवाधः खंडं ५४
अवगाधः खंडंच ८०
एवं द्वितीयलंवस्य २२४ स
न्धिः १३२ परलंवेन १६९ व
हीन च ३२५ एथग्गुणितः
परस्यपीठेन २५२ भक्तो ल
ब्धं लंवाधःखंडं ९९ अवगाधः
खंडंच १९५
अथकर्णयोर्योगादधोलंवज्ञा
नार्थं सूत्रं वृत्तं लंवौ भुजघ्नौ
निज निज पीठविभक्तौ च वं
शौ स्तः ताभ्यां प्राग्वत्क
र्णयोगाल्लंवः कुखंडे च ॥
लंवौ १६९ २२४ भु ७००
घ्नौ जातौ ५९ ७०० ९७२००

स्वस्वपीठाभ्यां २५२ १९८ भ
क्तौ एव मत्र लब्धौ वंशौ २२५
४०० आभ्यामन्योन्यमुला अगसू
त्रयोगादित्यादिकरणेन लब्धः
कर्णयोगादधोलंवः १४४ भुखं
डे च ९८ १९२
अथ सूच्यावाधालंवभुजज्ञाना
र्थं सूत्रं वृत्तत्रयं लंवहतो निज
सन्धिः परलंवगुणः समाक्ष
यो ज्ञेयः समपरसन्ध्यो रैक्यं
हारः स्वेनोनहतो नीच समपर
सन्धी भूक्तो सूच्यावाधे एथक्
स्यातां हारहृतः परलंवः
सूच्याः एवं ज्ञेत्रज्ञोदः प्रास्ते
स्वेराशिकाज् ज्ञेयः
अत्र किलायं लंवः २२४ अ
स्य सन्धिः १३२ अयं परलंवेन
१६९ गुणितो २२४ अनेन
भक्तो जातः समाक्षयः ९९/८
अस्य परसन्ध्योश्च ४८ योगो
हारः १८५/८
अनेन भू २०० घ्नः समः
२९७००/८
परसन्धिश्च १४४००/२ भक्तो जा
ते ॥ ॐ ॥

व्यासः ७ अस्य वर्गः ४९
भवकाग्नि निघ्ने पंचसहस्रभक्ते
तदेव स्तहतं फलं ३८ ११/१४
अथवा व्यासस्य वर्गः ४९ हु
द्राहते ५३९ ॥
शाक्रस्वते लब्धं स्थूलं फलं ३८ १/२ १५४/४
घनी कृतव्यासदलं
निघ्नैक विंशाशयुषोलस्य घन
फलं स्थूलं १७९ २/३

शरजीवानयनाय करणसूत्रं
सार्द्धवृत्तं ज्याव्यासयोगान्तर
घातमूलं व्यासस्तद्धनो दलितः
शरः स्यात् व्यासाच्छरोनाच्छ
रसंगुणाच्च मूलं द्विनिघ्नं भवती
हजीवा जीवार्द्धवर्गे शरभक्तयुक्त
व्यासप्रमाणं प्रवदंति वृत्ते उदाह
रणं दश विस्तृति वृत्तान्तर्यत्र ज्या
षण्मिता सखे तत्रेषु वदवाणज्या

व्यास
व्यासः १० ज्या ८ योगः
१८ अन्तरं २ घातः ३६
मूलं ६ एतहीनो व्यासः ४
दलितः २ जातः शरः २
व्यासात् १० शरोनात् ८
शर २ संगुणात् १६ मूलं
४ द्विनिघ्नं जाता जीवा बाणाभ्यां
व्यासानयनं यथा जीवा ८ र्द्ध
४ वर्गे १६ शर २ भक्ते ८
शर २ युक्ते जातो व्यासः १०

अथवृत्तान्तस्त्र्यस्रादि नवास्रान्त
क्षेत्राणां भुजमानानयनायैक
रणसूत्रं वृत्तत्रयं त्रिद्व्यकाग्नि
नभश्चन्द्रैः १०३९२३ त्रिवाण
एपुगणबुभिः ८४८५३ वेदा
ग्निवाणखाश्वैश्च ७०५३४ खखा
भ्राभ्ररसैः ६०००० क्रमात् वा
णेषु नखवाणैश्च ५२०५५ द्वि
द्वि नन्देषुसागरैः ४५९२२ कु
राम दश वेदैश्च ४१०३१ वृत्त
व्यासे समा ॥



हते खखखाभ्रार्क १२०००० सं
भक्ते लभ्यंते क्रमशो भुजाः
हृतांत स्त्र्यस्त्रपूर्वाणां नवास्त्रा
पृथक् पृथक् उदाहरणं सह
स्त्रहितयव्यासं यद्वृत्तं तस्समध्य
तः समत्र्यस्त्रादिकानां मेभुजान्
वद पृथक् पृथक् पृथक् ॥
अथ वृत्तांत स्त्रिभुजे भुजमा
नानयनाय

न्यास।

व्यासः २००० त्रि ह्यंकाग्नि न
नश्चन्द्रे १९३९२२ गुणितः
२०७८४८००० खखखाभ्रा
र्कैः १२०००० भक्ते लब्धं त्र्यस्त्रे
१७३२
भुजमानं ---
१०
वृत्तांत श्चतुर्भुजे भुजमा
नयनाय ॥

व्यासः २००० त्रिबाणहयुगाष्ट
ति ८४८५३ गुणितः १६९७०६०००
खखखाभ्रार्कैः १२०००० भक्तं ल
१४१४
ब्धं चतुरस्त्रे भुजमानं ---
१०
वृत्तांतः पंचभुजे भुजमाना
नयनाय

न्यासः

व्यासः २००० वेदाग्निबाणखा
ब्धे ७०५३४ गुणितः १४१०६८०००
खखखाभ्रार्कैः १२०००० भक्तेल
११७५
ब्धं पंचास्त्रे भुजमानं ---
१०
वृत्तांतः षड्भुजे भुजमानान
यनाय

न्यासः

व्यासः २००० ख खाभ्राभ्र रसैः
६०००० गुणितः १२०००००००

खखखाभ्रार्कैः १२०००० भक्तेल
ब्धं षडस्त्रे भुजमानं १००० ॥
वृत्तांतः सप्तभुजे भुजमानानय
नाय ॥

न्यासः

व्यासः २००० बाणेषुनखबाणैः
५२०५५ गुणितः १०४११०००
खखखाभ्रार्कैः १२०००० भक्तेल
८६७
ब्धं सप्तास्त्रे भुजमानं ---
१०
वृत्तांत रष्टभुजे भुजमानान
यनाय ॥


न्यास

व्यासः २००० द्विद्विनन्देषुसा
गरैः ४५९२२ गुणितः
९१८४४००० खखखाभ्रार्कैः १२००००
७६५
भक्तेलब्धं मष्टास्त्रे भुजमानं ॥ ---
१०

वृत्तांत नवभुजे भुजमानान
यनाय

न्यासः

व्यासः २००० कुरामदश वेदै
४१०३१ गुणितः ८२०६२०००
खखखाभ्रार्कैः १२०००० भक्ते
६८३
लब्धं नवास्त्रे भुजमानं ---
१०
एवमिष्टव्यासादेभ्योऽन्यापि
जीवाः सिद्ध्यंतीति तास्तु गोले
ज्योत् पत्ते वक्ष्ये ॥
अथ स्थूलजीवाज्ञानार्थं लघु
क्रियया करणसूत्रं वृत्तं चापो
ननिघ्नपरिधिःप्रथमाह्वयःस्या
त् पंचाहतः परिधिवर्ग चतुर्थ
भागः आद्योनितेन प्रथमम्मा
समिह ज्यकास्यात् उदाहरणं
अष्टादशांशोनवृत्तेः समान मे
कादशिनिघ्नेन च यत्र चापं
पृथक् पृथक् तत्र वदाशु
जीवाख्यार्कैं मितं व्यासदलंच
च यत्र ॥



व्यासः २४ अत्र किलांकलाघवाय विंशांशः सार्द्धैकशतांशमिलितः सूक्ष्मपरिधिः ७५४ अस्याष्टादशांशः ४२ अत्राप्यंकलाघवाय द्वयो रष्टादशांशयुतो गृहीतः अनेन पृथक् पृथगेकादिगुणितेन तुल्ये धनुषि कल्पिते ज्याः साध्याः अथवात्र सर्वार्द्धं परिधे रष्टादशांशेन परिधि धनूंषि चाप वल्प्यज्याः साध्या स्तथापि ताय व भवंति।
अपवर्त्तिते व्यासः परिधिः ७८ चापानि च १ २ ३ ४ ५ ६ ७ ८ ९ यथोक्तकरणेन लब्धा जीवाः ४२ ८२ १२० १५४ १८४ २०८ २२६ २३६ २४०
अथ चापानयनाय करणसूत्रं वृत्तं व्यासाब्धिघात मौर्व्वि

कया विभक्तो जीवांघ्रि पंचघ्नः परिधेस्तु वर्गः लब्धोनितात् परिधिवर्ग चतुर्थभागादाप्तेपदे वृत्तदलात् पतिते धनुः स्यात् उदाहरणं विदितास्त इह ये गुणा स्तेभ्यो वदते चापसंख्या यदि ते स्ति धनुर्गुणक्रिया गणिते गणितिकान्तिवेदिता
व्यासः ४२।८२।१२०।१५४। १८४।२०८।२२६।२३६।२४०
स्व पकापवर्तित परिधिः ७८ जीवांघ्रिणा २१ पंचभिश्च ५ परिधे ७८ वर्गो ३२४० हित्वा ४ जात ६९० युतस्यौविकयानया १०२ भक्तो लब्धो ७ अंक लाघवाय चतुर्थि पाते हीथिकसहस्राशयुतो गृहीतो ऽनेनोनितात् परिधिः ७८। वर्गा ३२४। चतुर्थभागात् ९४ पदे प्राप्ते ८ वृत्ति ७८ जातं धनुः एवं जातानि धनूंषि ।१। २। ३। ४। ५। ६। ७। ८। ९।
एतानि परिधिष्टादशांशेन गुणितानिस्फुटं

6803

इति श्रीभास्कराचार्यविरचितायां लीलावत्यां क्षेत्रव्यवहारः समाप्तः ॥
क्षेत्रकर्कटी स्त्री वालुकी इति राजनिर्घंटः ॥
क्षेत्रचिर्भिटा स्त्री चिर्भिटाकर्कटी इति राजनिर्घंटः ॥
क्षेत्रजः पुं स्वस्त्रिया मन्यद्वारा जनितः पुत्रः तत्पर्यायः देवरादिजः २ इति हेमचन्द्रः तस्य पितृरिक्थभागित्वं यथा मनुः औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः अनियोगोत्पन्नक्षेत्रजस्य औरसेन सह विभागमाह मनुः यद्येकरिक्थिनौ स्यातामौरस क्षेत्रजौ सुतौ यद्यस्य पैत्रिकं रिक्थं स तद्गृह्णीत नेतरः एकरिक्थिनौ एकस्यां जातौ रिक्थिनौ यस्य वीजाद्यो जातः स तस्य रिक्थं गृह्णीयात् इतरो ऽन्यवीजजो न गृह्णीयादित्यर्थः स्त्रीधने यत् पितृदत्तं यद्धनं स्त्रियैतद्वीजज स्तद्धनं गृह्णीयात् नान्य इत्यादनारदः द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रियाधने तयो र्यद्यस्य पित्र्यं स्यात् स तद् गृह्णीत नेतरः इतिदायतत्त्वे कलौ क्षेत्रजपुत्रकरणनिषेधो यथाआदित्यपुराणे दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः देवरेण सुतोत्पत्ति र्दत्तकन्या प्रदीयते इत्यादि दत्तौरसे तरेषां तु पुत्रत्वेन परिग्रहः इत्यादि एतानि लोकगुप्त्यर्थं कले रादौ महात्मभिः निवर्त्तितानि कर्म्माणि व्यवस्था पूर्वकं बुधैः इत्यादि च उद्वाहतत्त्वे ॥
क्षेत्रजातेत्रि ॥
क्षेत्रजा स्त्री श्वेतकंटकारी शशांडुली गोमूत्रिका शिल्पिका चनिका इति राजनिर्घंटः स्वस्त्रिया मन्यद्वारा ॥ जाता कन्या च
क्षेत्रज्ञः पुं शरीराधिदेवतः तत्पर्यायः आत्मा २ पुरुषः ३ इत्यमरः त्रीणि शरीराधिदेवतेऽन्तर्यामिकपि क्षेत्रं शरीरं जानातीति क्षेत्रं शरीरं जानाति ज्ञानवान्



भवतीति वा क्षेत्रज्ञः तत्त्वज्ञाना
दिनिड़ः इति भरतः तस्य प
र्य्यायान्तरं सवीजः ४ पु
रुषः ५ अन्तर्यामी ६ ईश्व
रः ७ पुद्गलः ८ परसंज्ञकः ९
इति शब्दरत्नावली प्रधानं १०
इति जटाधरः वटुकभैरवः
यथा क्षेत्रज्ञः तन्त्रयोविरा
ट इति तस्य स्तोत्रं छेकः
इति मेदिनी विदग्धः कृषकः
इति शब्दरत्नावली क्षेत्रपर्प
क्षेत्रि त्रिपर्पटी स्त्री क्षुपविशे
षः क्षेतपापड़ा इति भाषा इ
ति वैद्यकं ॥
क्षेत्रदूती स्त्री श्वेतकंटकारी
इति राजनिर्घंटः ॥
क्षेत्रपालः पुं देवताविशेषः
तद्भेदा यथा भेदा एकोनपं
चाशत् क्षेत्रपालस्य कीर्त्तिताः
मातृकाबीजभेदेन संभिन्ना
नामभेदतः अजरश्चापकुंभ
श्च इन्द्रमूर्त्तिरुक्षकः परः इ
डाचारः श्लोकसंज्ञ ऊष्मा
दऋषिसूदनः अस्रको ऽपि
एकपाच्च लपक श्चुकदंष्ट्रकः
ऐरावत श्चोपवन्तु घपीश

स्तथैवच अंजनस्तथास्त्रवारश्चक
वलः विरूपाक्षोनलः गामुख
श्चैव घंटादौ ऽग्नौ नस्तुवंडवारणः
स्फुटाटोपो जटालाख्यः फेंग
वस्तु जडम्बरं टंकपाणि
स्तथा श्मशानवस्तु डामरं
टक्कारवो गणाणीश्च तडिद्दे
हस्तिरस्तथा दंतरोधन दंष्ट्रा
स्यानलिक्रांतः प्रचंडकः फट्
कारो वीरसंज्ञश्च भृंगाख्यो मेघ
भासुरः सुगंतो रौलवश्चाथ
लम्बोष्ठो वसवस्तथा भूकुन
न्तः पडालाख्यः सनामा हु
ककस्तथा एते भेदाः समा
ख्याता मातृकाक्षरयोनिकाः
क्षेत्रपालकथनप्रयोजनं यथा
नामवयस्य वर्णानां योवर्णो
मातृकान्तरे दृश्यते प्रथमं त
त्तत्राद्यं क्षेत्रपालकं तत्रत
त्र विधिष्ठाता भेदे रैते व्यवस्थि
तः ततो विशिष्टो पदव्यं क्षे
त्रपालस्य सर्व्वतः क्षेत्रपाल
मसंपूज्ययः कर्म्म कुरुते क्वचि
त् तस्य कर्म्मफलं हन्ति क्षेत्रपा
लो नसंशयः इति एकोनपंचा
शत् क्षेत्रपालकथनं इति क्षेत्र
पालप्रकरणे प्रयोगसारः

अथ क्षेत्रपालमंत्रः मं
त्रदेवप्रकाशिन्यां क्षौं मिति
वीजादि क्षेत्रपालायेत्यपेतन
मोन्तः अयमूलादिक्षो म
न्त्रः तथा वर्णान्यसो विड
ध्रुक्ष क्षेत्रपालाय हूलाः ता
राख्यावस्वर्णोऽयं क्षेत्रपाल
स – रितः अस्यपूजा प्रातः
कृत्यादि प्राणायामान्तं वि
धाय धर्म्मादि पीठं विन्यस्य
ऋष्यादिन्यासं कुर्य्यात् अस्य
ब्रह्मा ऋषि गायत्रीच्छन्दः क्षे
त्रपालो देवता क्षौंबीजं आये
तिशक्तिः षडदीर्घभाजा वीजे
नांगन्यासः ततो ध्यानं भाजा
चन्द्रजटाधरं त्रिनयनं नीलां
जनाद्रिप्रभं दोर्दंडात्तगदा क
पाल मरुणस्रग्गंधवस्त्रोज्वलं
घंटा मेखल घर्घरध्वनिमिल
त् फंकार भीमं विभुं वन्दे सं
हितसर्पकुंडलधरं श्रीक्षेत्रपा
लं सदाप्रवं ध्यात्वा मानसैः स
संपूज्यार्घ्यस्थापनं कृत्वा धर्म्मा
दिकल्पितपीठपूजां विधाय
पुनर्ध्यात्वावाहनादि पंचपुष्पां
जलिदानपर्यन्तं विधायावरणपू

जामारभेत् अंगैः प्रथमभावर
णं अनलाताम्रिकेश करालघं
टारव महाक्रोध पिशिताशन पिं
गलाक्षो ऊर्द्ध्वकेशो रुष्टभि द्वितीयं
इन्द्रादिभिस्तृतीयं वज्रादिभिश्च
तुर्थं ततो धूपादिविसर्ज्जनान्तं क
र्म्मसमापयेत् अस्य पुरश्चरणं
लक्षजपः साज्येन चरुणा दशां
शहोमः तथाच निबन्धे लक्ष
मेकं जपेन्मंत्रं जुहुयात्तद्दशांश
तः चरुणा घृतसिक्तेन ततः
क्षेत्रेश मर्च्चयेत् मंत्रदेवप्रकाशि
कायांत प्रणवव्रहितोऽयं मंत्रः
अस्य पुरश्चरण मप्युक्तसंख्याज
पः अथास्य वलिविधानं रात्रौ गृ
हांगने स्थंडिलं कृत्वा तत्र देवं
सपरिवारं संपूज्य देवस्य हस्ते
वलिमंत्रेण त्रिवारं वलिं द
त्वा सपरिवारगणेभ्यः स्वस्व
नामभिर्वलिं दद्यात् वलिमं
त्रस्तु एहि एहि विडपिशचरुद्र
भुंजय भुंजय तर्जय तर्जय
विघ्नप्रद विघ्नप्रद महाभैरव
क्षेत्रपालवलिं गृह्ण गृह्ण स्वा
हा तथाच निबन्धे पूर्व्वमेवोदितं
पश्चात् विडाविस्पान् सरुद्रयं भु
जयद्वि॥



तयं भूय स्तर्जयद्वितयं पुनः ततो विघ्नपदद्वन्द्वं महाभैरव ततः परं क्षेत्रपाल बलिं गृह्णद्वयं पावकसुन्दरी यथा एह्येहि तुरु हुरु हुरु तर्ज जंभ हन हन विघ्नं विनाशय महाबलिं क्षेत्रपाल गृह्ण गृह्ण स्वाहा इति मंत्रं एष बलिविधिः सर्वग्रहनिवारको विजयश्रीकरः शुभदाति बलिमपि सोपदंशाढ्यत् पिंडेन दद्यात् फलन्तु बलिदानेन संतुष्टः क्षेत्रपालः प्रयच्छति कांतिमेधाबलारोग्यतेजः पुष्टियशः श्रियः इति तंत्रसारः

क्षेत्ररुहा स्त्री वालुकीकर्कटी इति राजनिर्घंटः क्षेत्रजाते त्रि॥

क्षेत्रसंभवः पुं चंचुतृणः भिंडातृणः इति राजनिर्घंटः भूमिजे त्रि॥ क्षेत्रसंभूतः पुं कुन्दरः इति राजनिर्घंटः क्षेत्रोद्भवे त्रि

क्षेत्राजीवः त्रि कर्षकः इत्यमरः॥

क्षेत्राधिदेवता स्त्री तीर्थाधिपदेवता यथा देवं गुरुश्चासनं क्षेत्रं क्षेत्राधिदेवतां सिद्धाधिकाराश्च श्रीपूर्वं समुदीरयेत् इति संस्कारतत्त्वे प्रयोगमारंभः

क्षेत्राधिपः पुं मेषादिद्वादशराशीनामधिपतिग्रहगणः यथा कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुता जीवार्कितनुजेज्यानां क्षेत्राणि स्युरजादयः इति ज्योतिस्तत्त्वं क्षेत्राधिष्ठात्रिदेवता च

क्षेत्रामलकी स्त्री भूम्यामलकी इति शब्दमाला॥

क्षेत्रिकः पुं क्षेत्रस्वामी यथा औघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति क्षेत्रिकस्यैव तद्बीजं न वप्ता फलमर्हति एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च विहंगमहिषीणां च विज्ञेयः प्रसवं प्रति इति मनुवचनं तत्र दासीपदं परोष्ट्रापदं तस्मा मन्येन ज्ञातो दासीभर्त्तेव बीजिभर्त्तः इत्युद्वाहतत्त्वं॥

क्षेत्रिय क्ली क्षेत्रतृणं॥

परदेहचिकित्सा इति मेदिनी

क्षेत्रियः पुं असाध्यरोगः परदाररतः इति मेदिनी क्षेत्री त्रि क्षेत्रविशिष्टः कृषीवलः यथा कुटुंबी कर्षकः क्षेत्री हली कृषिकः कार्षिको इति हेमचन्द्रः परगवादिना शस्यविनाशे तत्प्राप्तिर्यथा यावत्शस्य विनश्येत् क्षेत्री तावत् फलं लभेत् पालस्ताड्योऽथ गोस्वामी पूर्वोक्तं दण्डमर्हति इति याज्ञवल्क्यवचने गवादिदोषेण यावत् शस्यं विनश्यति तावदेव पालकात् प्राप्तव्यं पालकश्चोपालकस्ताड्यः गोस्वामी पूर्वोक्तदण्डादिकं अर्हति इति प्रायश्चित्ततत्त्वं क्षेत्रवृक्षः पुं यावनालः इति राजनिर्घंटः॥

क्षेपः पुं निन्दा विक्षेपः लंघनं गर्वः प्रेरणं इति मेदिनी विलंबः हेला लंघनं इति हेमचन्द्रः गुच्छः इति त्रिकांडशेषः

क्षेपकः त्रि॥

क्षेपकर्म्म त्रिप॥ ॥ ॥

याने: कर्म्मणि णक प्रत्ययेन निष्पन्नः इति व्याकरणं

क्षेपणं क्ली प्रेरणं तत्पर्यायः क्षिपा २ इत्यमरः यापनं यथा विधवा यौवनस्था च नारी भवति कर्कशा आयुषः क्षेपणार्थं तु दातव्यं स्त्रीधनं सदा इति विवादचिंतामणिधृतहारीतवचनं

क्षेपणिः स्त्री नौकादंडः डाँ

क्षेपणी डइतिभाषा इत्यमरः जालभेदः इति मेदिनी॥

क्षेपिमा पुं अतिशयक्षेपः क्षिपशब्दादिमनृ प्रत्ययेन निष्पन्नः इति व्याकरणं॥

क्षेपिष्ठः त्रि अतिशीघ्रः क्षिप्रतरः इत्यमरः क्षेपीयान् त्रि अतिशयक्षिप्रः क्षिप्रशब्दात् ईयसुन् प्रत्यये न निष्पन्नः इति सिद्धान्तकौमुदी

क्षेप्ता त्रि क्षेपणकर्ता क्षिपधातोः तृच् प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी

क्षेमः पुं क्ली कुशलं तद्वति त्रि इत्यमरः तहरणं॥



इति मेदिनी मोतः इति हेमचन्द्रः
क्षेमः पुं चोरनामगंधद्रव्यं॥ चण्डानामौषधं इति शब्दरत्नाव ली मेदिनी च॥
क्षेमकः पुं चोरनामगन्धद्रव्यं इति जटाधरः पांडवं शतानीक निमि वाजपुत्रः पतन् पर्य्यन्ते अस्य वंशस्य विश्राम्तिः परीक्षितादयः क्षेमकान्ताः कलेः सहस्रवत्स रपर्य्यन्तं राजान आसन् ततः सोमवंशशाखान्तरे मगधवंशप्र राजानः कलौ बहुकाले स्थिताः इति श्रीभागवतमतं
क्षेमकशब्द एवक कृधातोरच् प्रत्ययेन निष्पन्नः इति सिद्धान्त कौमुदी क्षेमकारः त्रि शुभंक रं इति भूरिप्रयोगः॥
क्षेमंकरः त्रि मंगलकारकः तत् पर्य्यायः अरिष्टतातिः २ शिवतातिः ३ शिवंकरः ४ इति हेमचंद्रः क्षेमकारः ५ भद्रंकरः ६ शुभंकरः ७ इति भूरिप्रयोगः॥

क्षेमंकरी स्त्री देवीविशेषः यथा क्षेमान् देवेभ्यो दे वी कृत्वा दैत्यपतेः क्षयं क्षे मंकरी शिवेनोक्ता पूज्या लोके भविष्यसि अनेनैव तु रूपेण वि याष्टकसमन्विता॥
एका वा नगरांतस्था पूजितास्या पिता शुभा प्रासादे पटकुड्येवा पुस्तके जलवह्निमानिस्त्रिंशे पू जयेत् क्षेमा सर्वकामफलप्रदा दमनीपद्ममाला च श्रीयोगाव ज्ञपासना अस्त्रं प्रत्यंगिरादेव्याः पूजयेत् समुदाहृता एताभिःस्था पनं कार्य्यं शिवासनसमानुग इति देवीपुराणे क्षेमंकरीप्रादु र्भावः ५० अध्यायः॥
शंखचिली साचभगवत्याः मूर्तिः यथा कुंकुमारुणसर्वांगि कु न्देन्दुधवलानने मत्स्यमांसप्रिये देवि क्षेमंकरि नमोऽस्तु ते इति तस्या नमस्कारमंत्रः अपि च कृशोदरि महाचंडे मुक्तके शि बलिप्रिये कुलाचारप्र प्रसन्नास्ये नम स्ते शंकरप्रिये॥
इति तंत्रं॥ ॥

क्षेमवान् त्रि मंगलयुक्तः क्षेम शब्दात् वतुप् प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी क्षेमा स्त्री का त्यायनी इति मेदिनी क्षेमंकरी यथा निस्त्रिंशे पूजयेत् क्षेमां स र्वकामफलप्रदां इति देवीपुरा णे क्षेमंकरीप्रादुर्भाव नामाध्यायः॥
क्षेमफला स्त्री उडुम्बरवृक्षः इति शब्दचन्द्रिका क्षेमफला इति वा पाठः
क्षेम्य त्रि क्षेमीयं कुशलयोग्यं क्षेमशब्दात् यत् प्रत्ययेन निष्पन्नं इति सिद्धान्तकौमुदी
क्षैत्रेयोऽहति कविकल्पद्रुमः क्षा दिः क्षयति इति दुर्गादासः
क्षैत्रं क्ली क्षेत्रसमूहः तत् प र्य्यायः क्षेत्रसमूहः तत्पर्य्यायः कैदारिकं २ कैदार्यं ३ कैदार कं ४ इत्यमरः वारटं ५ इति शब्दरत्नावली
क्षैत्रज्ञं क्ली क्षेत्रज्ञस्वभावः क्षैत्रज्ञं क्षेत्रज्ञशब्दात् अण् प्रत्ययेन यञ् प्रत्ययेन च निष्पन्नं इति सिद्धान्तकौ॥ ॥ मुदी॥

क्षैरेयी स्त्री परमान्नं इति हेमचंद्रः क्षीरसंबन्धिनि त्रि क्षैरेयी इति च पाठः
क्षोडः पुं आलानं गजबन्ध नी इति भूरिप्रयोगः क्षोणिः स्त्री पृथिवी इति शब्दार्ण वरत्नावली अमरटीका च
क्षोदः पुं चूर्णः इत्यमरः रजः पेषणं इति मेदिनी क्षोदितं क्ली चूर्णं इति शब्दचन्द्रिका पेषिते त्रि क्षोदितं क्ली चूर्णं इति शब्दचन्द्रिका पेषिते पुं अति शायक्षुद्रात् इष्ठाद्यादि मन्प्रत्यये क्षोदादेशेन निष्प न्नः इति व्याकरणं
क्षोदिष्ठः त्रि अतिशयक्षुद्रः इत्यमरः
क्षोदीयान् त्रि अतिक्षुद्रः क्षु द्रशब्दात् ईयसुन् प्रत्ययेन नि ष्पन्नं इति सिद्धान्तकौमुदी
क्षोभः पुं क्षोभणं संचलनं क्षुभधातो वलप्रत्य येन निष्पन्नः चित्तचंचल्यं यथापुरोत्पी डे तडागस्य परी॥



वाहः प्रतिक्रिया शोकक्षोभे च
हृदयं प्रलापैरेवधार्यते इति
भवभूतिकृतोत्तररामचरित्रे परीवा
हः सेतुभेदः शोकक्षोभे यथा,
क्वाथीन् विमर्वाचलेः प्रलपैः
रोदनादिभि रित्यर्थः अपिच
भुक्त्वा पीत्वा चरेत् ह्युक्तो जपं दे
व्याः समाहितः साधके क्षोभं
प्रजायते तस्माद्भुक्त्वा चपीत्वा
च अक्षुब्धो यजनं चरेत्
इति एकानन्दतरंगिणीधृत
तंत्रं

क्षोभकः पुं कामाख्यास्थपर्व
तविशेषः यथा ऊर्जराख्यस
पूर्वस्यां पुरं नामवरासनं तद्
क्षिणे महाशैलः क्षोभकोना
मनामतः तस्मिन् शिरोशिला
पृष्ठे वक्रेदेवीव्यवस्थिता पं
च पुष्करिणीनाम्ना पंचयोनि
स्वरूपिणी एकवक्त्र पंचवक्त्र
कं स्थितारमयित्वे तत्रनित्यमे
व हिमाद्रिजा
इति कालिकापुराणे
कामाख्यारूपनिर्णये ८१
अध्यायः क्षोभजना॥ ॥

केत्रि॥

क्षोभितः त्रि क्षोभयुक्तः संचलि
तः यथा पादाक्रान्त्या नतभुवं
किरीटोल्लिखिताम्बरा क्षोभिता
शेषपातालां धनुर्ज्यानिःस्वनेनता
इति मार्कंडेयेदेवीमाहात्म्य॥

क्षोमं क्ली डुकूले इत्यमरः क्षौ
मं इतिचपाठः॥

क्षोमः पुं क्ली अट्टः इत्यमरटी
कायां भरतः क्षौमोऽपिपाठः

क्षोभकः पुं गणादासकः इति
जटाधरः

क्षोणिः स्त्री पृथिवी इत्यमरः
क्षोणी अस्याव्युत्पत्तिर्यथा
इज्या च यागाधारा च
क्षोणी क्षीणा लये च यां
महालयेऽहयंयातितिति स्तेन
प्रकीर्त्तिता इति ब्रह्मवैवर्ते
प्रकृतिखंडे ७ अध्यायः॥

क्षोणीप्राचीरः पुं समुद्रः इति
जटाधरः॥

क्षौद्र

क्ली मधु इत्यमरः जलं
इति मेदिनी पिंगलवर्णात्
मक्षिकाकृतकपिलवर्णं॥

मधु अस्य गुणाः अतिशील
त्वं लघुत्वं क्लेदनाशित्वं छे
दनयुक्तं क्षौद्रं चेहिपथ्यत्वं च इ
ति राजवल्लभः अपिच मा
क्षिकाः कपिलाः सूक्ष्माः क्षु
द्राख्यास्तत्कृतं मधु मुनिभिः
क्षौद्रमित्युक्तं तद्वर्णात् कपि
लं भवेत् गुणे माक्षिकवत्
क्षौद्रं विशेषान्मेहनाशनं॥
इति भावप्रकाशः

क्षौद्रः पुं चम्पकवृक्षः इति
शब्दचन्द्रिका॥

क्षौद्रकं त्रि क्षुद्रं क्षुद्रकम्॥
हात् ञ्यट्प्रत्ययेन निष्पन्नं
इति सिद्धान्तकौमुदी

क्षौद्रजं क्ली सिक्थकं इति
राजनिर्घंटः मधुजातमात्रे
त्रि

क्षौद्रधातुः पुं माक्षिकं इति
राजनिर्घंटः॥

क्षौद्रप्रियः पुं जलमधुकवृक्षः
इति राजनिर्घंटः मधुप्रियेत्रि

क्षौद्रमेहः पुं प्रमेहरोगः
विशेषः तल्लक्षणं यथा क
षायं मधुरं रूक्षं क्षौद्रमेहं
वदेद्बुधः कषायं कषायवर्णं

इति भावप्रकाशः अस्य चिकित्
सा प्रमेहशब्दे द्रष्टव्या क्षौद्रेयं
क्ली सिक्थकं इति राजनिर्घ
ण्टः क्षौद्रसम्बन्धिनि त्रि

क्षौमं त्रि क्षुमाया विकारः
स्त्रियां क्षौमीकथा इत्यादि इ
त्यमरटीकायां भरतः

क्षौमः पुं क्ली अट्टालकः तत्
पर्य्यायः अट्टः २ इत्यमरः
हर्म्यादिगृहे प्राकाराग्रस्थि
तगृहे इति कौटिल्यः अ
हेति ख्याते गृहविशेषे इति
कोकटः प्राकारमण्डपस्योपरि
शालायामिति केचित् हर्म्यादि
वातकुटिकायामिति केचित्
मंडपोपरि हर्म्यपृष्ठे इति के
चित् प्राकारधारणार्थोऽभ्यं
तरे क्षौमाख्योऽट्टः इतिभट्टः
अट्टालेऽस्योऽट्टः अट्ट ङ विक्र
मे वधेऽप्यलं स्त्ववति शाश्वतेऽ
प्यक्षौमं दुकूलदुते नास्त्रि इति
मः गुणः स्वार्थ्ये जे क्षौमं च
पट्टदुकूलयोः

क्षौमं गुणवत् वस्त्रभेदे
क्षौमं वृद्धिमदिति
वहवः क्षौम मट्टे दुकूले॥



स्यादतसीवसनेऽपि चेति वि
श्वप्रकाशे अतसीवसनेन सह
पाठाद्देहेऽपि तौमं मंत्रमम्बर
ञ्च तत्र द्विपदेयां वृद्धिविधानात्
इति पुंवर्गे भरतः अतसीव
स्त्रं इति हेमचन्द्रः क्षुमायाः
विकारः तौमं क्षुमादि वाच्यलिं
गंच स्त्रियां तौमी कंथेत्यादि
इति नृवर्गे भरतः पट्टवस्त्रं
तत्पर्य्यायः दुकूलं २ इत्यम
रः दुपट्टवस्त्रमौत्रवस्त्रादधि
कं तौति तौमं हृत्वगुणादेनाप्नो
तिमः उणा यत् पुनरतसी
विकारवाचि प्रकृत्यन्तरं मह
द्विमत् दुकूलाद्यात् तौमान्
त्वार्थप्रज्ञादित्वादणि तौमंचे
ति केचित् इनोति उपताप
ति अधिकशीष्मजननादिति
नाम्नीति हूलकि दुकूलं २
तिच नृवर्गे भरतः शाणज व
स्त्रं यथा तौमं दुकूले स्या
दहे पुंनपुंसकयो रिद तौ
मं त्र शाणेऽपि स्यादतसीजे न
पुंसके
इति शब्दरत्नावली तौमकं
पुं चोरनामगन्ध ॥ ॥

द्रव्यं इति केचित् ॥
तौमी स्त्री अतसी इति रत्नमा
ला त्वमानिर्म्मितकंथा इति तौ
मशब्दटीकायां भरतः ॥
तौरं क्ली क्षौरकर्म्म कामान
इति भाषा तत्पर्य्यायः मुंडनं २
भद्रकरणं ३ वपनं ४ परिवाप
नं ५ इति हेमचन्द्रः अस्यगुणः
केशश्मश्रुनखादीनां कर्त्तनं सं
प्रसाधनं संप्रसादनं पवित्रीकर
णमिति यावत् इति राजवल्लभः
व्रतादिसंयमे तौरकर्म्माकरणे
दोषो यथा व्रतानामुपवासानां
श्राद्धादीनाञ्च संयमे नकरोति तौ
रकर्म्म अस्पृश्यः सर्वकर्म्मसु स
वतिष्ठति तिष्ठतिकुंडे पुनर्धादीनांच
सुन्दरि तदेव दिनमारभ्य तत्त्रोजा
द्रुहताडितः इति ब्रह्मवैवर्त्ते प्रकृ
तिखंडे २७ अध्यायः नित्यतौ
रवि हितनिषिद्धदिनादि यथा राज
मार्तंडः नस्नानमात्रगमनोत्
सकभूषितानामभ्यक्तभु
क्तरणकालनिरासनानां ॥
सन्ध्याविशापानि कुजार्कदि
नेषु रिक्तेतौरे इतं प्रतिप
द्दक्षिनचा ॥ ॥ ॥ ॥

पि विष्णुं प्राचीमुखः सौम्यमुखो
पि भूत्वा कुर्यात्नरः तौर मवृत्त
कदृष्यः उत्तरात्रितययामरोहि
णी रौद्रसर्पपितृभेषुचाश्विभे श्म
श्रुकर्म्म सकलं विवर्ज्जयेत् प्रे
तकार्य्ये पतितप्रेतसंप्रदानक
दानक दर्भतीच्छटस्नानविषयकं
अन्यथा कस्माभाणवचनविरो
धः स्यात् चन्द्रशुद्धियदानालि
तारायाश्च विशेषतः अतोविभे
पि कर्त्तव्यं चन्द्रचन्द्रजयोर्द्दिने
मानं तौरेहंतिगुरुः सुक्रोधनं
रविः आयुरंगारको हंतिसर्वं हंति
शनैश्चरः श्रीपतिरत्नमालायां
आज्ञया नरपतेर्द्विजन्मनां दार
कर्म्म मृतसूतकेषु च बन्धमो
त मरवदीक्षणेष्वपि तौरमिष्ट
मखिलेषु चोडुषु देवकार्य्येपि
तृश्राद्धे रवेरंशापरिवृत्तये त्वधिक
म्मत कुर्वीत तत्रन्समासे चहत्त्व
मे वृद्धगार्ग्यः केशवमानत्तेपु
रे पाटलिपुत्रेपुरीमहिक्षत्रादि
तिमदितिंचस्मरता
तौरविधौभवति कल्याणं
प्रत्रक्रमोवराहपुराणे ॥ ॥

श्मश्रुकर्म्म कारयित्वा नावच्छे
दमनन्तरं इति ज्योतिस्तत्वं अ
पिच गोभिलः केशश्मश्रुलो
मनखानि वापयीत शिखावर्ज्जं
इति स्मृतितत्वं ॥
अम्यच्च रोहिण्यांच विशाखायां
मैत्रे चैवोत्तरासुच मघायां कृ
त्तिकायांच द्विजैः तौरं विवर्ज्जि
तं कृत्वातमैथुनं तौरं योदे
वान्तर्पयेत् पितृन् रुधिरं तद्भ
वेत्तोयं दाताच नरकं व्रजेत्
इति ब्रह्मवैवर्त्तपुराणे नापित
गृहे तौरनिषेधो यथा स्वयं
मास्यं स्वयं पुष्पं स्वयं घृष्टच
चन्दनं नापितस्य गृहे तौरं श
क्रादपि हरेत् श्रियं रवौ इत्यु
स्तंच चन्द्रे कुजे नृसुर्थपेथने मा
नं हन्ति गुरौ वीरस्य क्रे स्मृक्रतयो
भवेत् शनौ च सर्वदोषाः स्युः
तौरं मत्र विवर्ज्जयेत् इति क
र्म्मलोचनं अथ प्रथमतौर
स्य चूडाकरणस्य विहित
दिनादि ज्योतिषे अयुग्मा
द्वे तथा मासि चूडा भीम
नीतरे




अर्केन्दु कालमृद्धौ च जन्ममा
सेऽन्दभेतरे रिक्तादर्शाष्टमीष
ष्ठी प्रतिपद्वर्जिते सितेदलेऽ
पि सामान्यतो दोषमाह षष्ठ
ष्टमी पंचदशी उभेपक्षे चतुर्दशी
अत्र सन्निहितं पापं क्षौरे मासे
मगे क्षौरे मेष सिंह तुला कर्कि
वृश्चिके तत्र लग्नके श्रवणादि
त्रय स्वातीचित्रा पुष्याश्विचन्द्र
भे आदित्यरेवतीहस्ता ज्येष्ठा
मूलेच चौडकं पौष्णाश्वि पुष्यव
सुरामकं पौष्णाश्वि पुष्यवसु
रामकं वासुदेव ब्रह्मार्कचन्द्रव
रुणादितिचित्रभेषु वारेषु सोम
बुधवाक्पति भार्गवाणां क्षौरं
करोति कुशलं खलु मानवानां
इति वचनात् रोहिण्यामपि चू
डाकरणं अत्रापि तिथ्यादि
विहमुहूर्त्तं विवर्जयेत् सूर्येन्द
क्षीणमार्गगामिनि दुर्बलेनि
रेण रवौ क्षीणे प्रतीककचाम
क्षीजयमयो व्दीरेणिशास्त्रन्या
याः भुक्तेः अक्रूतनो निषि
द्धसमयेऽलंकारपुरुषिषो
क्षौराद्रोगभयं वदंति जवना
मृत्यु तथान्ये जगुः राजमार्त
डे मानं हरेत् क्षौरमिहाशुचो

र्कः शनैश्चरः पंचकुजस्तथाष्टौ
आचार्यभृगुरिन्दुबुधाः क्रमेण
दद्युर्ह्यशीतिकादशसप्त पंच जी
वादिवारे क्षौरे भशस्तं भो
जराजः शिशिरमृगिथाने च
चूडाकरणं जगुः शुभं यवनाः
चैत्रे मासि दिवाकरवारे उत्तर
विशिखेर्के न गर्गः ॥
जन्मर्क्षे जन्ममासे च युग्ममासे
च वत्सरे न कुर्यात् प्रथमं
क्षौरं विशेषात्त्वेच पौषयोः
ज्येष्ठपुत्र कन्याया स्तज्येष्ठद
ग्रात्याभ्यंतरे चूडानिषेधो विवा
हप्रकरणे उक्तः इति ज्योतिस्त
त्त्वं अपि च भोजराजः योजन्म
मासे क्षौरकर्म यात्रां कर्णवे
धं कुरुते च मोहात् नूनं सरो
गधन पुत्रनाशं प्राप्नोति मू
ढाववयवान्यतानि जातं दिनंह
षयते वसिष्ठाष्टौ च गर्गोय
वनोदशाहं जन्माख्यमासं कि
लभागुरिश्च चूडे
विवाहे क्षौरकर्णवेधे पतद्वि
षयभेदस्तु राजमार्तंडे उ
क्तानि प्रतिपि॥

क्षाति पुनः संभावितानि च सा
पेक्ष निरपेक्षाणि श्रुतिवाक्या
नि कोविदैः सापेक्षनिरपेक्षाणि
समर्थासमर्थविषयकाणि
क्षौरेति क्षौरकर्म इति तिथ्या
दितत्त्वं ॥
क्षौरिकः पुं नापितः इति
शब्दमाला ॥
क्ष्णु तेजने इति कविकल्पद्रु
मः मूर्द्धन्यणकारोपधः
क्ष्णादिः क्ष्णौति खड्गं कर्म्मकारः
इति दुर्गादासः
क्ष्णुतः त्रि शाणितः तीक्ष्णीकृ
तः इत्यमरः॥
क्ष्मा स्त्री पृथ्वी इत्यमरः
क्ष्माजः पुं मंगलग्रहः इति
ज्योतिषं॥
क्ष्मातलं क्ली भूतलं पृथिवी
मध्यं इति केचित्
क्ष्माभुक् पुं राजा इत्यमरः
क्ष्माभृत् पुं राजा पर्वतः

चरतीति क्ष्मा क्षमते अनटिदूपं
कंपनमित्यर्थः इत्मातः उः क्ष्मा
यते हृतः चक्ष्मायेच मह्नीति
भट्टिः क्ष्मायते कंपते लंगते
जतीने च वेपते इति
कंपार्थभट्टमल्लेपि रमानाथस्त
विधूननपाठस्थैणाबलाच्युत् पक्षे
सकर्म्मकोऽयमिति प्रतीमः प्र
योगस्तन्मथा द्दश्यते इत्याद्द
इति दुर्गादासः क्ष्मायितः त्रि कंपि
तः क्ष्मायधातोः क्त प्रत्ययेन नि
ष्पन्नः क्ष्मायिता त्रि कंपकः क्ष्मा
यधातोः तृच प्रत्ययेन निष्प
न्नः॥
क्ष्मील निमेषे इति कविकल्प
द्रुमः निमेषः पक्ष्मभिश्चक्षुष
आवरणं क्ष्मीलति चक्षुः
पक्ष्मभि ॥
रोहत स्यादित्यर्थः
इति दुर्गादासः
क्ष्विड ए आ ङ जि स्नेहे॥



इति दुर्गादासः
क्ष्विण्णः त्रि मुक्तः स्निग्धः क्ष्वि
द्धातोः क्त प्रत्ययेन निष्पन्नः क्ष्वि
द ए ञा ङ ञि मोचने
स्नेहे इति कविकल्पद्रुमः
एतदाद्यास्त्रयो वकारयुक्तास्ता
द्याः ए अक्ष्विदत आक्ष्वेदित
क्ष्विण्णः तेन डेल्वरतैलिन् तैलं
मुंचतीत्यर्थः ञि क्ष्विण्णोऽस्ति
स्ति स्नेहः स्निग्धीभावः इति
दुर्गादासः ॥

क्ष्विद इर य आ मोचने स्नेहे इति
कवि कल्पद्रुमः इर अक्ष्विदत्
अक्ष्वेदीत् पुषादित्वान्नित्यं ङः
इत्यन्ये य क्ष्विद्यति आक्ष्वेदितं
क्ष्विण्णेन इति दुर्गादासः ॥

क्ष्विद आ ञि कूजने इति क
विकल्पद्रुमः आक्ष्वेदितं क्ष्विण्ण
तेन ञि क्ष्विण्णोऽस्ति मूर्द्धन्यव
गीतत्रीयांतोऽयमित्येके ॥ ॥

इति दुर्गादासः
क्ष्वेडं क्ली लोहितार्कपर्णफले
घोषापुष्पे इति मेदिनी क्ष्वेडः
पुं ध्वनिः कर्णामयः
विषं इति मेदिनी पीतघोषा
इलः इति रत्नमाला क्ष्वेडरो
गस्य निदानादिकर्णरोगशब्दे
द्रष्टव्यं ॥

क्ष्वेडः त्रि दुरासदः कुटिलः
इति मेदिनी ॥

क्ष्वेडा स्त्री वंशशलाका सिं
हनादः इति मेदिनी कोषा
तकी इति राजनिर्घण्टः
क्ष्वेडितं क्ली सिंहनादः
इत्यमरः

क्ष्वेल ऋ चाल गत्यां इति
कविकल्पद्रुमः वकारयुक्तः
तादिः ऋ अचिक्ष्वेलत्
चालः कंपः चालः
कैश्चिन्न मन्यते इति
दुर्गादासः ॥

समाप्तोयं शाब्दकल्पद्रुमः ॥








शब्दकल्पद्रुम

२०८







शब्दकल्पद्रुम
२०६



२०८

शब्दकल्पद्रुम





Trade Mark
SCALE
Non Com
